A.C. Joshi Library
P.U. Chandigarh

MSS No. 155 Subject Philosophy

Name of MSS पंच दशी ।। विद्यारण्य मुनि कृत व्या० तथा संपा०

Author

Period 1825 वि० लिपित Folios 216

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios –

तथा नि०

पंचदशी ॥ विद्यारण्य मुनि कृत व्या०
संप० ॥ ११ असूज (आश्विन वदि) १८२५
लिपित
२२८ पत्रक ॥ ल० म० १२ पं० प्र० पृ०

ह० ल०



50

वेदान्तसू.

पंचपादी

155

No 1



स्वस्ति श्रीगणेशाय नमः ॥ शिवाय नमः ॥ श्रीभगवत्यै नमः ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ प्रत्यक्तत्त्वविवेकस्य क्रियते पददीपिका ॥ १ ॥ प्रारि
तस्य ग्रंथस्याविघ्नेन परिसमाप्तिप्रचयगमनाय शिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्कारल
क्षणं मंगलाचरणं स्वेनानुष्ठितं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति ॥ अर्थाद्विषयप्रयोजने सूचयति ॥
नम इति ॥ शं सुखं करोतीति शंकरः सकलजगदानंदकरः परमात्मा ॥ एष ह्येवानंदयातीति श्रुतेः आनंद
निरतिशयप्रेमास्पदत्वेन परमानंदरूपः प्रत्यगात्मा ॥ शंकरश्चासावानंदश्चेति शंकरानंदः ॥ प्रत्यगभि
न्नः परमात्मा स एव गुरुः परिपक्वमलानुत्पादनहेतुशक्तिपातेन बोधयतीति परेतत्त्वे सद्गीतयाचार्यमूर्तिस्थ
इत्यागमात् ॥ श्रीमांश्चासौ शंकरानंदगुरुश्चेति ॥ गंधाद्विपद इत्यादिवत्समासः ॥ अनेन गुरोर्महिमाद्यैश्वर्यसंपन्नत्वेन सूचितं भ
ध

श्रीगणेशाय नमः ॥ नमः श्रीशंकरानंदगुरुपादांबुजन्मने ॥ सविलासमहामोहग्राहग्रासैककर्मणे ॥ १ र८

यद्वा ॥ श्रिया युक्त्या शं करोतीति शंकरः ॥ रातेर्डुः परायणमिति श्रुतेः ॥ अनेन श्रीगुरोर्ब्रह्मनिष्ठत्वसंपादनेसामर्थ्यं
सूचितं भवति ॥ तस्य गुरोः पादावेवांबुजन्म कमलं तस्मै नमः प्रह्वीभावोस्तु किं विधाय सविलासमहामोहग्रासैककर्म
* कारण तो ॥ विलासः कार्यवर्गस्तेन सह वर्त्तत इति सविलासः ॥ एवंविधो यो महामोहो महानज्ञानं स एव ग्राहो करादिवत्स्ववशं प्रा ग्राह
प्रस्यातीव दुःखहेतुत्वात्तस्य ग्रासो ग्रसनं तस्य निवर्त्तनं स एवैकं मुख्यं कर्म व्यापारो यस्य तत्तथा तस्मा इत्यर्थः मट
अत्र च शंकरानंदपदद्वयसामानाधिकरण्येन जीवब्रह्मणोरेकत्वलक्षणो विषयः सूचितो जीवस्य
परमब्रह्मस्वरूपतया परिच्छिन्नसुखाविर्भावलक्षणं प्रयोजनं च सूचितं सविलासेत्यादिना शेषानर्थनिवृत्ति
रूपलक्षणं प्रयोजनं मुख्यमभिहितं ॥ १॥
वै

इदानीमवांतरप्रयोजनकथनपुरःसरं ग्रंथारंभं प्रतिजानीते तदिति ॥ तस्य गुरोः पादावे
वांर वांबुरुहे कमले तयोर्द्वंद्वं तस्य सेवया परिचर्यया स्तुतिनमस्कारादिलक्षणया निर्मलं रागादिदू
षितं चेतोंतःकरणं येषां ते तथोक्तास्तेषां सुखबोधायानायासेन तत्वज्ञानोत्पादनायायं वक्ष्यमाण
प्रकारस्य तत्वस्यानारोपितस्य स्वरूपस्यात्मनः सच्चिदानंदं महावाक्येन लक्ष्यतरनिवृत्त्यमापुस्या विवेक
आरोपितात्त्वं च कोशादिलक्षणादन्यागतोपि वेचनं विधीयते क्रियत इत्यर्थः ॥२॥ जीवब्रह्मणोरैक्यलक्षणाणवि
षयसंज्ञावनाय जीवस्य सत्यज्ञानादिरूपतादिदर्शयिषुरादौ ज्ञानस्यैकत्वप्रतिपादनेनान्नित्यत्वं साधयति ॥ श
ब्दस्पर्शादय इत्यादिना ॥ तत्र तावद्विरुद्धस्य व्यवहारवति जागरे ज्ञानस्यैक्यं साधयति ॥ शब्दस्पर्शादय इति ॥ जाग

तत्पादांबुरुहद्वंद्वसेवानिर्मलचेतसां ॥ सुखबोधाय तत्वस्य विवेकोयं विधीयते ॥२॥ शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक् ॥ ततो विभक्ता तत्संविदैकरूप्यान्न भिद्यते ॥३॥

रइंद्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणावस्थाविशेषे वेद्याः संविद्विषयत्वेन ताः शब्दस्पर्शाद
यश्चाकाशादिगुणत्वेन प्रसिद्धास्तदाधारत्वेन प्रसिद्धाश्चाकाशादयश्च वैचित्र्यात्परस्परं गवाश्वादिवद्विलक्षणो
पेतत्वात् पृथक् परस्परं भिद्यंते ॥ ततस्तेभ्यो विभक्ता बुद्ध्या विवेचितास्ततस्तं विज्ञाय शब्दादीनां संविज्ज्ञानमेकरूप्या त्तत्सं
त्तत्संविदित्येकाकारेणावभासमानत्वाद्गगनमिव न भिद्यते ॥ अत्रायं प्रयोगः ॥ विवादाध्यासिता संवित्स्वाश्र
विकभेदशून्या उपाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वाद्गगनवत् ॥ शब्दसंवित्स्पर्शसंविदो न विद्यते
संवित्त्वात्स्पर्शसंविद्वदिति ॥ एकस्यापि संविदो गगनस्येवोपाधिकृतभेदेनापि चित्रव्यवहारोपपत्तेर्वास्तवभेद
कल्पनायां गौरवं बाधकं मंतव्यं ॥३॥

पं०द०
॥२॥

उक्तन्यायं स्वप्नेऽतिदिशति ॥ तथा स्वप्न इति ॥ यथा जागरतो वैचित्र्यादि विषयाणां भेदेऽप्येकरूपत्वात्संविदोऽभेदस्तथा तेनैव प्रकारेण स्वप्ने करणोपसंहृतेषु सत्सु जागरितसंस्कारजः प्रत्ययः स्वप्न इत्युक्तलक्षणायां स्वप्नावस्थायामपि विषयाणां विभिन्नानां संविदिति ॥ ननु यदि स्वप्नजागरयोरेकाकारता विषयतत्संविदोर्भेदाभेदाभ्यां ॥ तर्हि स्वप्नो जागर इति भेदव्यवहार इति भेदव्यवहारः किंनिमित्तक इत्याशंक्याह ॥ अत्र वेद्यं त्विति ॥ अत्र स्वप्ने वेद्यं परिदृश्यमानं वस्तुजातं न स्थिरं न स्थायि प्रतीतिमात्र

तथा स्वप्नेऽत्र वेद्यं तु न स्थिरं जागरे स्थिरं ॥ तद्भेदोऽतस्तयोः संविदेकरूपा न भिद्यते ॥४॥
सुप्तोत्थितस्य सौषुप्ततमोबोधो भवेत्स्मृतिः ॥

[illegible]

शरीरत्वात् ॥ जागरे तु परिदृश्यमानं वस्तुजातं स्थिरं स्थायि कालान्तरेऽपि द्रष्टुं योग्यत्वादतः स्थिरास्थिरविषयत्वलक्षणाद्वैलक्षण्यात्तद्भेदस्तयोः स्वप्नजागरयोर्भेदव्यपदेशः ॥ ननु स्वप्नजागरयोर्भेदेऽप्यत्र तत्संविदोरपि भेदः स्यादित्याशंक्याह तयोरिति ॥ एकरूपेति हेतुगर्भितं विशेषणं ॥
४ ॥ एवमवस्थाद्वये ज्ञानस्यैकत्वं प्रसाध्य सुषुप्तिकालीनस्यापि तस्य तेनैक्यप्रसाधनाय तत्र तावत्तज्ज्ञानं साधयति ॥ सुप्तोत्थितस्येति ॥ सुप्तः सन्नुत्थितः सुप्तोत्थितः ॥ सुप्तं सुषुप्तिस्तस्मादुत्थित इति वा ॥ तस्य सौषुप्ततमोबोधः ॥ सुषुप्तिकालीनस्य तमसोऽज्ञानस्य योऽवबोधो ज्ञानमस्ति ॥ न किंचिद्वेदिषमिति ॥ सा स्मृतिरेव भवेत् नानुभवस्तत्कारणस्येन्द्रियसंनिकर्षव्याप्तिलिङ्गादेरभावादिति भावः

ततः किं तत्राह ॥ सेति ॥ सा च स्मृतिरवबुद्धविषया अवबुद्धानुभूतो विषयो यस्याः सा तथोक्ता या स्मृतिः सानुभ
पूर्विकेति व्याप्तिर्लोके दृष्टेति भावः ॥ ततोऽपि किं तत्राह ॥ अवबुद्धमिति ॥ तत तस्मात्कारणात्तत्सौषुप्तं तमस्तदा सुषु
प्तावबुद्धमनुभूतमित्यवगंतव्यं ॥ अत्रायं प्रयोगः ॥ विमतं न किंचिद्वेदिषमिति ज्ञानमनुभवपूर्वकं भवितुमर्
हति स्मृतित्वात्सा मे मातेति स्मृतिवदिति ॥ ५ ॥ तस्यानुभवस्य विषयाद्ज्ञानाद्भेदं बोधांतरादभेदं चाह ॥ स बो
ध इति ॥ स बोधः सौषुप्ताज्ञानानुभवः ॥ विषयादज्ञानाद्भिन्नः पृथग्भवितुमर्हतीति बोधत्वात् घटबोधवत् ॥ बोधां
तराद्भिद्यते बोधत्वात्स्वप्नबोधवत् ॥ फलितं कथयन्नुक्तन्यायमन्यत्राप्यतिदिशति एवमित्यादिना ॥ एवमिति ॥

सा चावबुद्धविषयावबुद्धं तत्तदा ततः ॥ ५ ॥ स बोधो विषयाद्भिन्नो न बोधात्स्वप्नबोधवत् ॥
एवं स्थानत्रयेऽप्येका संवित्तद्वद्दिनांतरे ॥ ६ ॥ मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ॥
नोदेति नास्तमेत्येका संविदेषा स्वयंप्रभा ॥ ७ ॥

सामता

स्थानत्रयेऽप्येकदिनवर्तिजाग्रदादिषु अवस्थात्रयेऽपि संविदेकैव सर्वं वाक्यं सावधारणमिति न्यायात्तद्वद्दि यो ॥
नांतरे इति ॥ पूर्वेद्युः आसीन्दिवसे अवस्थात्रयेऽपि ज्ञानस्याभेद एवमन्यस्मिन्नपि दिवसे नेकधानेकप्रकारेण गता
गम्येष्वतीतानागतेषु मासेषु चैत्रादिषु ॥ अब्देषु प्रभवादिषु ॥ युगेषु कृतादिषु ॥ कल्पेषु ब्राह्मादिषु च ज्ञान
स्याभेद एवेत्यर्थः ॥ संविद एकत्वसमर्थनफलमाह नोदेतीति ॥ यतः संविदेकातो नोदेति नोत्पद्यते ॥ नास्त
मेति न विनश्यति च ॥ असाक्षिकयोरुत्पत्तिविनाशयोरसिद्धेः ॥ स्वोत्पत्तिविनाशयोस्तु स्वयमेव संविदा ग्रहीतुमश
क्यत्वात्संविदंतरात्मतावाच्चेतिभावः ॥ ननु संविदंतराभावे ग्राहकाभावादस्या अप्यभावे जगदांध्यप्रस
ज्येतेत्यत आह ॥ एषेति ॥ अत्रायं प्रयोगः ॥ संवित्स्वप्रकाशा अवेद्यत्वे सत्यपरोक्षत्वाद्व्यतिरेके घट
वत् ॥ नवी

ना

यं विशेषणासिद्धो हेतुः॥ संविदः स्वसंवेद्यत्वे कर्मकर्तृत्वविरोधात्॥ परवेद्यत्वेन [illegible]वस्थात्॥ अतः स्वप्र
काशत्वेनाभासमानायाः संविदः सर्वावभासकत्वं संभवान्न जगदांध्यप्रसंग इति भावः॥ ०॥ भवत्वेवं संविदो
नित्यत्वं स्वप्रकाशत्वं च ततः किमित्यत आह॥ इयमिति॥ अत्रायं प्रयोगः॥ इयं संविदात्मा भवितुमर्हति नित्य
त्वे सति स्वप्रकाशत्वात्॥ यन्नैवं तन्नैवं यथा घट इति॥ आत्मनो नित्यसंविद्रूपत्वप्रसाधनेन सत्त्वमपि साधितं
भवति नित्यत्वातिरिक्तसत्त्वाभावात्॥ नित्यत्वं सत्त्वं [illegible] स्यास्तीति तद्वित्यं सत्यमिति वाचस्पतिमिश्रैरु
क्तत्वात् इति भावः॥ आत्मन आनंदरूपत्वं साधयति॥ परानंद इति॥ आत्मेत्यनुषज्यते॥ परश्चासावा
नंदश्च परानंदो निरतिशयसुखस्वरूप इत्यर्थः॥ तत्र हेतुमाह॥ प[illegible]रप्रेमास्पदमिति॥

त्म

इयमात्मा परानंदः परप्रेमास्पदं यतः॥ मा न भूवं हि भूयासमिति प्रेमानीक्ष्यते॥ ८॥

यतो यस्मात्कारणात्परस्यानिरुपाधिकत्वेन निरतिशयस्य प्रेम्णः॥ स्नेहस्यास्पदं विषयस्तस्मात्॥
अत्रेदमनुमानं॥ आत्मा परानंदरूपः परप्रेमास्पदत्वात्॥ यः परानंदरूपो न भवति नासौ परप्रेमास्पद
मपि यथा घटः॥ न तथा चायं परप्रेमास्पदं न भवति॥ न तस्मात्परमानंदरूपो न भवतीति॥ नन्वात्म न
निधिड्रूपमिति द्वेषस्योपलभ्यमानत्वात्प्रेमास्पदत्वमेवा[illegible]सिद्धं कुतः परप्रेमास्पदत्वमित्याशंकाया द ४
तस्य दुःखसंबंधिनिमित्तकत्वेनान्यथासिद्धत्वात्॥ प्रेमतः आत्मनि अननुभवसि[illegible]द्धत्वान्नैवमिति
परिहरति॥ मा न भूवमिति॥ हि यस्मात्कारणादात्मनि विषये मा न भूवमहं मा भूवमिति न ममासत्त्वं क
दापि मा भूत् किंतु भूयासमेवं सदा सत्त्वमेव भूयादित्येवंविधं प्रेम दृश्यते सर्वैरनुभूयते॥ अतो नासिद्धिरि
त्यर्थः॥ ८॥

मात्मतत्त्वरूपासिद्धिः प्रेमणः परत्वे प्रमाणाभावसिद्धेरिति रित्याशंक्याह ॥ तत्प्रेमेति ॥ अन्यत्र स्यादिति सिद्धे पुत्रादौ यत्प्रेम
तदात्मार्थं तेषामात्मशेषत्वनिमित्तकमेव न स्वाभाविकमेवं आत्मनि विद्यमानं प्रेमान्यार्थं नात्मनोऽन्यशेषत्वनिमि
त्तकं न भवति किं त्वात्मत्वनिमित्तकमेवातो निरूपाधिकत्वात्परमं निरतिशयं ॥ फलितमाहेति नेति ॥ तेन निरतिशयप्रेमा
स्पदत्वेनात्मनः परमानंदता निरातिशयसुखस्वरूपत्वं सिद्धं एतेषु युक्तिः श्लोकैः प्रतिपादितमर्थं संक्षिप्य दर्शयति ॥ इत्थ
मिति ॥ शब्दस्पर्शादय इत्यादिना ज्ञानं स्फूर्तिरित्यंतं प्रसाध्यतं स्वयंवेद्य[illegible] नित्यात्मप्रसाधनेनात्मनः ॥ सच्चिद्रूपत्वं साधितं
परानंद इत्यादिना च परमानंदरूपत्वं समर्थितं अतस्तत्त्वमसिमहावाक्ये त्वंपदार्थः सच्चिदानंदरूपः सिद्धः ॥ ॥

तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि ॥ अतस्तत्परमं तेन परमानंदतात्मनः ॥ ८ ॥ इ
त्थं सच्चित्परानंद आत्मा युक्त्या तथाविधं ॥ परं ब्रह्म तयोश्चैक्यं श्रुत्यंतेषूपदिश्यते ॥ ९ ॥

नन्वेतल्लक्षणस्यात्मनो युक्त्यैवावगतावुपनिषदां निर्विषयत्वेनाप्रामाण्यप्रसंग इत्याशंक्याह ॥ तथाविधमिति
तथा तादृशी विधा प्रकारो यस्य तत्तथाविधं सच्चिदानंदरूपं परं ब्रह्म तत्पदार्थस्तयोस्त्वंपदा[illegible]र्थयोरैक्य
मखंडैकरसत्वं च श्रुत्यंतेषु वेदांतेषूपदिश्यते प्रतिपाद्यत इति ॥ अतो न वेदांतानां निर्विषयत्वमित्यर्थः ॥ ९ ॥
आत्मनः परमानंदरूपत्वमाक्षिपति ॥ अभान इति ॥ परमानंदरूपत्वं भासते न भासते वा ॥ आद्ये अप्रतीतौ न
परं प्रेमात्मनि निरतिशयः स्नेहो न स्यात् ॥ विषयसौंदर्यज्ञानजन्यत्वात्स्नेहस्य ॥ ॥ ॥

पं॰ द॰
॥४॥

त्र

नेप्रतीतौ तु ॥ विषये सुखसाधने स्रगादौ तत्र न्येसुखे वा स्वं इष्टे न स्यात् फलप्राप्तौ सत्यां साधनेच्छानुप
पत्तेर्लिप्या निरतिशयानंद .. लाभे सति द्वाणिके साधनपारतंत्र्यादि दोषदूषिते वैषयिके सुखे स्पृहायोगा
नेऽ च्च ॥ तस्मान्नाद्रूपता आत्मन नुपपन्नेति ॥ प्रकारांतरस्याज्ञासंभवान्नैवमिति परिहरति ॥ अतइति ॥ यतोज्ञा
नाज्ञानयोर्द्वयोरु .. भयोरपि दोषोस्ति ॥ अतकारणादात्मनोसौ परमानंदतात्माने प्रतीतौ सत्यामपि अज्ञात
न प्रतीता न भवति ॥ ननु एकस्य युगपद्भानाभाने न युज्येते इत्याशंक्याकिमिदमयुक्तं त्वमत्र दृष्टं चरत्वमुपपादि
राद्दृतं वानाद्यरत्याह ॥ अध्येतवर्गइति ॥ अध्येतृणां वेदपाठकानां वर्गः ॥ ॥ ॥ ॥

१५

ब .. अज्ञाने तं परप्रेमज्ञाने तद्विषयस्पृहा ॥ अतो ज्ञाने पर्ये ज्ञातौ सो परमानंद
तो .. द्वात्मनः ॥ अध्येतवर्गमध्यस्थपु .. त्रा .. य .. न शब्दवत् ॥ ज्ञानेप्य
ज्ञानं ज्ञानस्य प्रतिबंधेन युज्यते ॥ १२ ॥

यतंतत्कर्तृ
समूहस्तस्य मध्येतिष्ठतीति अध्येतवर्गमध्यस्थः स चासौ पुत्र अध्ययनस्याध्ययनं तत्कर्तृ
कंपठनं ॥ तस्य शब्दो ध्वनिर्यथा वहिष्ठस्य पितुर्जासमानो .. स्यामान्यतो ॥ नज्ञासंतेविशेषतः
अयं मत्पुत्रध्वनिरिति ॥ तथानंद .. स्याभिज्ञाने प्यज्ञानं न भवतीत्यर्थः ॥ द्वितीयं पृत्याह ॥ ज्ञान
स्येति ॥ ज्ञानेप्यज्ञानमित्येतदज्ञाप्यनु .. बंजतीयं ॥ ज्ञानस्य स्फुरणस्य प्रतिबंधेन वेदनेसमा
न्यतः प्रतीतावपि विशेषाकारेणाप्रतीतिरुज्यते उपपद्यतेत्यर्थः ॥
नकुह्वाणेनज्ञानेप्यज्ञानंसामान्यतः प्रतीता

कोसौ प्रतिबंध इत्यत आह॥ प्रतिबंध इति॥ अस्ति भातीति व्यवहारार्हवस्तुनि॥ अस्ति विद्यते भाति प्रकाशते इत्येवं प्रकारं व्यवहारं अर्हतीत्यस्ति भातीति व्यवहारार्हं तच्च तद्वस्तु चेति तस्मिन्॥ तं पूर्वोक्तं व्यवहारं निरस्य निराकृत्य विरुद्धस्य नास्ति न भातीत्येवं रूपस्य व्यवहारस्योत्पादनं जननं प्रतिबंध उच्यते॥१३॥ एवं लक्षणस्य प्रतिबंधस्य कारणं दृष्टांतदार्ष्टांतिकयोः क्रमेण दर्शयति॥ तस्येति॥ पुत्रध्वनिश्रवणलक्षणे दृष्टांते तस्य प्रतिबंधस्य हेतुः कारणं समानाभिहारो बहुभिः सह पठनं॥ इह दार्ष्टांतिके व्यामोहैकनिबंधनं व्यामोहानां विपरीतज्ञानानां एकनिबंधनं मुख्यकारणमनादिरुत्पत्तिरहिताविद्यैव वक्ष्यमाणप्रतिबंधस्य हेतुरित्यर्थः॥१४॥ इदानीं प्रतिबंधहेतुभूतामविद्यां व्युत्पादयितुं तन्मूलभूतां प्रकृतिं व्युत्पादयति॥ सिं दि

प्रतिबंधोस्ति भातीति व्यवहारार्हवस्तुनि॥ तन्निरस्य विरुद्धस्य तस्योत्पादनमुच्यते॥१३॥ तस्य हेतुः समानाभिहारः पुत्रध्वनिश्रुतौ॥ इहानादिरविद्यैव व्यामोहैकनिबंधनं॥१४॥ चिदानंदमयब्रह्मप्रतिबिंबसमन्विता॥ तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा॥१५॥ सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते॥ मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः॥१६॥

चिदानंदमयेति॥ यच्चिदानंदरूपं ब्रह्म तस्य प्रतिबिंबेन प्रतिच्छायया समन्विता युक्ता तमोरजःसत्त्वगुणा सत्त्वरजस्तमोगुणानां साम्यावस्था या सा प्रकृतिरित्युच्यते॥ सा च द्विविधा द्विप्रकारा प्रकृतिश्चकाराद्वक्ष्यमाणं प्रकारांतरं सूचयति॥१५॥ सहेतुकं द्वैविध्यमेव दर्शयति॥ सत्त्वशुद्ध्यविशुद्धिभ्यामिति॥ सत्त्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिर्गुणांतरेणाकलुषीकृतता॥ अविशुद्धिर्गुणांतरेण कलुषीकृतत्वं ताभ्यां सत्त्वशुद्ध्यविशुद्धिभ्यां द्विविधे मायाविद्ये माया इत्यविद्या इति च मते संमते॥ विशुद्धसत्त्वप्रधाना माया मलिनसत्त्वप्रधानाविद्येत्यर्थः॥ यदर्थं मायाविद्ययोर्भेद उक्त इदानीं दर्शयति॥ मायेति॥ मायाबिंबो मायायां प्रतिफलितश्चिदात्मा तां मायां वशीकृत्य स्वाधीनीकृत्य वर्त्तमानः सर्वज्ञः सर्वज्ञत्वादिगुणक ईश्वरः स्यात्॥१६॥ या२

यार

अविद्यावशगोऽविद्यायां प्रतिबिंबत्वेन तत्परतंत्रः तत्रस्थचिदात्मान्यो जीवः स्यात्॥ स च तद्वैचित्र्यात्त
स्या अविद्याया उपाधिभूताया वैचित्र्याद्विशुद्धितारतम्यादनेकधानेकप्रकारो देवतिर्यगादिभेदेन विविधो
भवतीत्यर्थः॥ यथा मुंजादिषीकेव आत्मा युक्त्या समुद्धृतः॥ शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते इत्युत्तरत्र शरी
रत्रितयाद्विवेचितस्य जीवस्य परं ब्रह्मत्वं वक्ष्यति॥ तत्र तानि कानि त्रीणि शरीराणि तदुपाधिको वा जीव

अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा॥
सा कारणशरीरं स्यात् प्राज्ञस्तत्राभिमानवान्॥ १७॥

किंरूपो भवतीत्याकांक्षायां तत्सर्वं क्रमेण व्युत्पादयति साकारणशरीरमित्यादिना॥ सेति॥ सा अविद्या
कारणशरीरं स्थूलसूक्ष्मशरीरादिकारणभूतप्रलयावस्थाविशेषत्वात् कारणमुपचारात्॥ शीर्यते तत्त्वज्ञा
नेन नश्यतीति शरीरं स्यात् तत्र कारणशरीरे मानवान् तादात्म्याध्यासेनाहमित्यभिमानी जीवः प्राज्ञः प्रज्ञा अवि
नाशिस्वरूपा अनुभवरूपा यस्य स प्रज्ञः॥ प्रज्ञ एव प्राज्ञः॥ इति नामकः स्यादित्यर्थः॥ १७॥

त्रिर

प्रा० क्रमं पंचसूक्ष्मशरीरं तदुपाधिकं जीवं च व्युत्पादयितुं तत्कारणाकाशादिसृष्टिमाह ॥ तमःप्रधानप्रकृते
रिति ॥ तद्भोगाय तेषां प्राणिनां भोगाय सुखदुःखसाक्षात्कारसिद्धये तमःप्रधानप्रकृतेस्तमोगुणप्रधानायाः
प्रकृतेः परमेश्वरशक्तिरूपाया उपादानकारणभूतायाः सकाशात् ईश्वराज्ञया ईशनादिशक्तियुक्तस्य जगदुत्पादयितुरीश्व पा०२
रेच्छापूर्वकसर्जनेच्छारूपया निमित्तकारणभूतया [illegible] वियदादीनि पंचापि भूतानि पंच

तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया ॥ वियत्पवनतेजोंबुभुवो भूतानि ज
ज्ञिरे ॥ १८ ॥ सत्त्वांशैः पंचभिस्तेषां क्रमाद्धीन्द्रियपंचकं ॥ श्रोत्रत्वगक्षिरसनघ्राण
ख्यमुपजायते ॥ १९ ॥

भूतानि जज्ञिरे प्रादुर्भूतानि ॥ उत्पन्नानीत्यर्थः ॥ १८ ॥ भूतसृष्टिमभिधाय भौतिकसृष्टिमभिदधान आदौ ज्ञा रो
नेन्द्रियसृष्टिमाह ॥ सत्त्वांशैरिति ॥ तेषां वियदादीनां पंचभिः सत्त्वांशैः सत्त्वगुणभागैरुपादानभू
तैः श्रोत्रत्वगक्षिरसनघ्राणाख्यं धीन्द्रियपंचकं धीन्द्रियाणि ज्ञानेन्द्रियाणि तेषां पंचकं क्रमादुपजायते ।
एकैकभूतसत्त्वांशादेकैकमिन्द्रियं जायत इत्यर्थः ॥

पं॰द॰
॥६॥

सत्वांशानां प्रत्येकं असाधारणकार्यमभिधाय सर्वेषां साधारणं कार्यमाह ॥ तैरिति ॥ तैः सहसत्वां
शैः सर्वैः संभूय वर्त्तमानैरंतःकरणं मनोबुद्ध्युपादानरूपं द्रव्यमुत्पाद्यत इत्यनुषंगः ॥ तस्यावांतरभेदं
सनिमित्तमाह ॥ वृत्तिभेदेनेति ॥ तदंतःकरणं वृत्तिभेदेन परिणामभेदेन द्विधा द्विप्रकारं भवति ॥ वृत्ति
भेदमेव दर्शयति ॥ मन इति ॥ विमर्शरूपं विमर्शः संशयात्मिका वृत्तिः सा स्वरूपं यस्य तत्तथा तन्मनः स्यात् ॥
निश्चयात्मिका निश्चयो ध्यवसायः स आत्मा स्वरूपं यस्याः सा निश्चयात्मिका वृत्तिर्बुद्धिः स्यात् ॥ २० ॥ क्रमप्राप्ता

तैः रंतःकरणं सर्वैर्वृत्तिभेदेन तद्द्विधा ॥ मनो विमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका ॥ २० ॥ रजोंशैः
पंचभिस्तेषां क्रमात्कर्मेंद्रियाणि तु ॥ वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे ॥ २१ ॥ तैः सर्वैः सहितैः
प्राणो वृत्तिभेदात्स पंचधा ॥ प्राणोपानसमानश्चोदानव्यानौ च ते पुनः ॥ २२ ॥

पा २

रजोंशानां नां प्रत्येकमसाधारणकार्यमाह ॥ रजोंशैरिति ॥ तेषां वियदादीनामेव पंचभिः रजोंशैः रजोभागैः स्वरूपादान
जैर्वाक्पाणिपादपायूपस्थाभिधानानि तन्नामकानि कर्मेंद्रियाणि क्रियाजनकानींद्रियाणि जज्ञिरे ॥ २१ ॥
रजोंशानामेव साधारणं कार्यमाह ॥ तैरिति ॥ सहितैः संभूय कारणैः तैः प्राणो जायत इति शेषः ॥ तस्यावां
तरभेदमाह ॥ वृत्तिभेदादिति ॥ स हि प्राणो वृत्तिभेदात् प्राणनादिव्यापारभेदात् पंचधा पंचप्रकारो भवति ॥ वृ
नेव१ त्तिभेदं दर्शयति ॥ प्राणापानसमानश्चेति ॥ ते पुनस्ते तु भेदाः ॥ प्राणादिशब्दवाच्या इत्यर्थः ॥ २२ ॥

पदद्वयमाकाशादिप्राणांतानां सृष्टिरुक्ता तदिदानीं दर्शयति ॥ बुद्धिकर्मेंद्रियप्राणपंचकैरिति ॥ बुद्धयो ज्ञानानि ॥ क
र्माणि व्यापारास्तज्जनकानींद्रियाणि बुद्धिकर्मेंद्रियाणि बुद्धींद्रियाणि कर्मेंद्रियाणि चेत्यर्थः ॥ बुद्धिकर्मेंद्रियाणि
च प्राणाश्च बुद्धिकर्मेंद्रियप्राणास्तेषां पंचकानि तैर्मनसा विमर्शात्मकेन धिया निश्चयरूपया बुद्ध्या च सप्त
सप्तदशभिः सप्तदशसंख्याकैः सूक्ष्मं शरीरं भवति ॥ तस्यैव संज्ञांतरमाह तल्लिंगमिति ॥ उच्यते वे
दांतेष्वित्यर्थः ॥२३॥ एवं सूक्ष्मशरीरमभिधाय तदभिमानित्वप्रयुक्तां प्राज्ञेश्वरयोरवस्थां दर्शयति ॥ नर५

बुद्धिकर्मेंद्रियप्राणपंचकैर्मनसा धिया ॥ शरीरं सप्तदशभिः सूक्ष्मं तल्लिंगमुच्यते ॥२३॥
प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते ॥ हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता ॥२४॥

प्राज्ञ इति ॥ प्राज्ञो मलिनसत्त्वप्रधानाविद्योपाधिको जीवस्तत्र तैजसःशब्दवाच्यांतःकरणोपलक्षितलिंग
शरीरेऽभिमानेन तादात्म्याभिमानेन तैजसत्वं तैजसनामकत्वं प्रपद्यते ॥ प्राप्नोति ॥ ईशः विशुद्धसत्त्व
प्रधानमायोपाधिकः परमेश्वरस्तत्र शरीरे ह्यभिमानेन हिरण्यगर्भतां हिरण्यगर्भसंज्ञकत्वं
प्रपद्यत इत्यनुषंगः ॥ तैजसहिरण्यगर्भयोर्लिंगशरीराभिमानित्वे समाने सति तयोः परस्परं भेदः
किंनिबंधन इत्यत आह ॥ तयोरिति ॥ तयोस्तैजसहिरण्यगर्भयोर्व्यष्टित्वं समष्टित्वं च भवति तत एव भेद इत्यर्थः

ईश्वरस्य समष्टिरूपत्वे जीवानां व्यष्टिरूपत्वे च कारणमाह॥ समष्टिरिति॥ ईशः ईश्वरो हिरण्यगर्भः सर्वे-
षां लिंगशरीरोपाधिकानां तैजसानां स्वात्मतादात्म्यवेदनात्॥ स्वात्मना तादात्म्यस्यैकत्वस्य वेदनात् ततः
ईश्वरादन्ये जीवास्तु तदभावात्तस्य तादात्म्यवेदनस्याभावात् व्यष्टिसंज्ञया व्यष्टिशब्देन कथ्यंते॥२५॥ ए-
वं लिंगशरीरं तदुपाधिको तैजसः हिरण्यगर्भश्च दर्शितौ स्थूलशरीराद्युत्पत्तिं दर्शयितुं पंचीकरणं

समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात्॥ तदभावात्ततोऽन्ये तु कथ्यंते व्यष्टिसंज्ञया॥२५॥
यर तद्भोगाय पुनर्भोग्यभोगायतनजन्मने॥ पंचीकरोति भगवान्प्रत्येकं वियदादिकं॥२६॥

निरूपयितुमाह॥ तद्भोगायेति॥ भगवानैश्वर्यादिगुणसंपन्नः परमेश्वरः पुनः पुनरपि तद्भोगाय तेषां
जीवानां भोगाय च॥ भोग्यभोगायतनजन्मने॥ भोग्यस्यान्नपानादेर्भोगायतनस्य जरायुजादिचतुर्विधश-
रीरजातस्य च जन्मने तदुत्पत्तये वियदादिकमाकाशादिभूतपंचकं प्रत्येकमेकैकं पंचीकरोति॥ अपंचात्म-
कं पंचात्मकं संपद्यमानं करोति॥२६॥

कथमेकैकस्य पंचात्मकत्वमित्यत आह ॥ द्विधेति ॥ वियदादिकमेकैकं द्विधा तंत्रे तौ भागौ इतो द्विधाशब्दः ॥ विधाय कृ
त्वा भागद्वयोपेतं कृत्वेत्यर्थः ॥ पुनः पुनरपि प्रथमं भागं चतुर्धा भागचतुष्टयोपेतं विधायेत्यनुषज्यते ॥ स्वस्वेतर
द्वितीयांशैः ॥ स्वस्मात्स्व[...]स्मादितरेषां च चतुर्णां चतुर्णां भूतानां यो द्वितीयः स्थूलो भागस्तेन तेन स्वस्वप्र
थमभागांशानां चतुर्णां चतुर्णामेकैकस्य योजनात् ते वियदादयः प्रत्येकं पंचात्मका भवंति ॥ २७ ॥ एवं पंचीक
भूतैप रणमभिधाय [...] तैरुत्पाद्यं कार्यविशेषं द[...]र्शयति ॥ तैरंड इति ॥ तैः पंचीकृतैर्भूतैरुपादानकारणभूतैरंडो

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ॥ स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते ॥ २७ ॥
तैरंडस्तत्र भुवनभोग्यभोगाश्रयोद्भवः ॥ हिरण्यगर्भः स्थूलेऽस्मिन्देहे वैश्वानरो भवेत् ॥ २८ ॥

उ॥ ब्रह्मांड[...]उत्पद्यते ॥ तत्र ब्र[...]ह्मांडे भुवनानि उपरभागे वर्त्तमाना भूम्यादयः सप्त लोकाः अधोभागे च स्थितान्यतला
दीनि सप्त पातालानि ॥ तेषु चतुर्दशभुवनेषु तैस्तैः प्राणिभिर्भोक्तुं योग्यान्यन्नादीनि ॥ तत्तल्लोकोचितशरीराणि चैतेरेव
पंचीकृतैर्भूतैरीश्वराज्ञया जायंते ॥ एवं स्थूलशरीरोत्पत्तिमभिधाय तेषु स्थूलशरीरेष्वभिमानवतो हिरण्यगर्भस्य स
मष्टिरूपस्य वैश्वानरसंज्ञत्वमेकैकस्थूलशरीराभिमानवतां व्यष्टिरूपाणां तैजसानां विश्वसंज्ञत्वं च भवती
त्याह ॥ हिरण्यगर्भ इति ॥ अस्मिन् स्थूलदेहे वर्त्तमानो हिरण्यगर्भो वैश्वानरो भवेत् ॥ २८ ॥

तत्रैव वर्त्तमानास्ते जन्तवो विमुह्यन्ति॥ तेषामवान्तरभेदमाह॥ देवतिर्यङ्नरादय इति॥ इदानीं तेषां विमुग्धसंसा
प्राप्ताप्राप्तानां जीवानां तत्त्वज्ञानरहितत्वेन संसारापत्तिप्रकारं सदृष्टान्तं श्लोकद्वयेनाह॥ ते परागदर्शिनः बाह्या
नेव शब्दादीन् पश्यन्तीति न तु प्रत्यगात्मानं पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात् पराङ् पश्यति नान्तरात्मन्निति श्रु
तेः॥ ननु तार्किकादयो देहव्यतिरिक्तमात्मानं जानन्तीत्याशंक्य यद्यप्यात्मानं ते जानन्ति तथापि श्रुतिसिद्धं तत्त्वं न जा
जानन्त्याशयेनोक्तमित्याह॥ प्रत्यगिति॥ अत एव भोगाय सुखदुःखानुभवाय मनुष्यादिशरीराण्यधिष्ठा

ते जन्तवो विमुह्यन्ते जाता देवतिर्यङ्नरादयः॥ ते परागदर्शिनः प्रत्यक्तत्त्वबोधविवर्जिताः॥ कु
र्वते कर्म भोगाय कर्म कर्तुं च भुञ्जते॥२४॥ नद्यां कीटा इवावर्तादावर्तान्तरमाशु ते॥ व्रजन्तो
जन्मनो जन्म लभन्ते नैव निर्वृतिम्॥२५॥

यत्कर्म तत्तच्छरीरोचितानि कर्माणि कुर्वते॥ जातावेकवचनं॥ पुनश्च कर्म कर्तुं देवादिशरीरैस्तत्तत्फलं भुञ्जते च
फलानुभवात्मना वेतनं तत्तज्जातीयेच्छानुपपत्त्या तत्साधनान्यनुपपन्नो॥२४॥ एवं वर्त्तमानास्ते जीवा नद्याः प्रवाह नुसारान्नार
पतिताः कीटा इवावर्तादावर्तान्तरमाशु व्रजन्तो यथा निर्वृतिं सुखं न लभन्ते॥ एवमाशु जन्मनो जन्म व्रजन्तः
सुखं नैव लभन्त इति॥२५॥

जन्म

एवं संसारापत्तिमभिधाय तन्निवृत्त्युपायं दर्शयितुं दृष्टान्तं तावदाह ॥ सत्कर्मपरिपाकादिति
ते कीटाः सत्कर्मपरिपाकात् पूर्वोपार्जितपुण्यकर्मपरिपाकात् कृपालुना केनचित्पुरुषविशेषेणोद्धृ-
ताः नदीप्रवाहाद्बहिर्निःसारिताः सन्तस्तीरतरुच्छायां प्राप्य सुखं यथा भवति तथा यद्वद्विश्राम्यन्ति ३१
इदानीं दृष्टान्ते सिद्धमर्थं दार्ष्टान्तिके योजयति ॥ उपदेशमवाप्यैवेति ॥ एवमुक्तप्रकारेण पूर्वोपार्जितपुण्य

सत्कर्मपरिपाकात्ते करुणानिधिनोद्धृताः । प्राप्य तीरतरुच्छायां
विश्राम्यन्ति यथासुखं ३१ उपदेशमवाप्यैवमाचार्यात्तत्त्वदर्शिनः
पंचकोशविवेकेन लभन्ते निर्वृतिं परां ३२

परिपाकवशादेव तत्त्वदर्शिनः ॥ प्रत्यगभिन्नब्रह्मसाक्षात्कारवतः ॥ आचार्यात् गुरोः सकाशात् ॥ उपदेशं
तत्त्वमस्यादिवाक्यार्थज्ञानसाधनं प्रवर्त्यां वक्ष्यमाणमवाप्य संपाद्य पंचकोशविवेकेन अन्नादीनां पंचानां को- नी२
शानां विवेकेन वक्ष्यमाणविवेचनेन परां निर्वृत्तिं मोक्षसुखं लभन्ते प्राप्नुवन्ति ॥ ३२ ॥

सि॰ २ ते के इत्यादयः पंच कोशा इत्याकांक्षायां तानुद्दिशति ॥ अन्नमिति ॥ अन्नं प्राणो मनो बुद्धिरानंद इत्येते पंच कोशाः ॥ बु
द्धिरूपाणां तेषामन्नादीनां कोशशब्दाभिधेयत्वे कारणमाह ॥ तैरावृत इति ॥ तैः कोशैरावृतः प्राच्छादितः स्वात्मा स्वस्व
रूपं तस्मात्स्वात्मविस्मृत्या स्वस्वरूपाविस्मरणेन संसृतिं जननादिप्राप्तिरूपं संसारं व्रजेत् ॥ स्पष्टं कोशो यथा कोशका
रकृमेरावरकत्वेन क्लेशहेतुरेवमन्नादयोप्यद्वयानंदस्यावरकत्वेनात्मनः क्लेशहेतुत्वात्कोशा इत्युच्यंत इत्यर्थः ॥ नः ४
॥ २२ ॥ तेषां कोशानां स्वरूपाणि क्रमेण व्युत्पादयति ॥ स्यात्पंचीकृतेत्यादिना मोदादिवृत्तिभिरित्यंतेन सार्द्धश्लोक

अन्नं प्राणो मनो बुद्धिरानंदश्चेति पंच ते ॥ कोशैस्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत्
॥ २३ ॥ स्यात्पंचीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः ॥ लिंगे तु राजसैः प्राणैः प्राणः कर्मे
न्द्रियैः सह ॥ २४ ॥ सात्त्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः ॥

दृ
द्वयेन ॥ पंचीकृतेभ्यो भूतेभ्य उत्पन्नः स्थूलो देहोऽन्नसंज्ञकोऽन्नमयशब्दितः कोशः स्यात् ॥ प्राणस्तु प्राणमयस्तु कोशः
लिंगे लिंगशरीरे वर्त्तमानै राजसै रजोगुणकार्यभूतैः प्राणैः प्राणापानादिभिर्वायुभिः पंचभिर्वागादिभिः कर्मेंद्रि
यैः सह दशभिः स्यात् ॥ २४ ॥ विमर्शात्मा संशयात्मके पंचभूतसत्वकार्यं यदंतःकरणं तत्सात्त्विकैः प्रत्येकभू
तसत्वकार्यभूतैः धीन्द्रियैः साकं सहितं मनोमयः कोशः स्यादिति पूर्वेण सह संबंधः ॥ काधीः ॥

तेषामेव सत्त्वकार्यरूपा बुद्धिस्तैरेव पञ्चभिर्ज्ञानेन्द्रियैरेव साकं सहिता सती विज्ञानमयो विज्ञानमयाख्यः कोशः स्यात् ॥ ३५ ॥ कारणे कारणशरीरभूतायामविद्यायां यन्मलिनं सत्त्वमस्ति तन्मोदादिवृत्तिभिः प्रियमोदप्रमोदाख्यै रिष्टदर्शनलाभभोगजन्यैः सुखविशेषैः सहितमानन्दमयः आनन्दमयाख्यः कोशः स्यादिति ॥ ननु स्थूलशरीरा ८३
ना४ दीनां शब्दवाच्यत्वे सम्भवति एव पुरुषोऽन्नरसमय इत्युक्तम्यत सम्बद्धात् तस्मादन्नरसमयादन्योऽन्तर आत्मा प्राण
मन्नमयादि

तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका ॥ ३५ ॥ कारणे सत्त्वमानन्दमयो मोदादिवृत्तिभिः । तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत् ॥ ३६ ॥

मय अन्योऽन्तर आत्मा मनोमय इत्यादि श्रुतत्वादात्मनोऽन्नमयादिशब्दवाच्यत्वं कथमुच्यते इत्याशंक्य देहादी कोशेन र
दिर नामन्नादिविकारत्वेनान्नमयादिशब्दवाच्यत्वं आत्मनस्तु तेन तेन तादात्म्याभिमानात् इत्याह ॥ तदिति ॥
आत्मा प्रत्यगात्मा तत्तत्कोशैः तेन तेन कोशेन सह तादात्म्याभिमानात् तत्तन्मयः तत्तत्कोशमयः स्याद्व्य
वहारकाले अन्नमयादिकोशप्राधान्यादन्नमयादिशब्दवाच्य इत्यर्थः ॥ तुशब्द आत्मनः कोशेभ्यो वै
लक्षण्यद्योतनार्थः ॥ ३६ ॥

एकत्रिंनिनात २२

कथं तर्ह्येवंविधस्यात्मनो ब्रह्मत्वं भवतीत्याशंक्य कोशेभ्य आत्मविवेकाद्भवतीत्याह॥ अन्वयव्यतिरेकाभ्यामि
ति अन्वयव्यतिरेकाभ्यां वक्ष्यमाणलक्षणाभ्यां॥ पंचकोशविवेकतः॥ पंचानां कोशानां अन्नमयादीनां
विवेकतः प्रत्यगात्मनो विवेचनेन पृथक्करणेन यद्वा पंचकोशेभ्योऽन्नमयादिभ्य आत्मनः पृथक्कर
णेन आत्मानं प्रत्यगात्मानं ततस्तेभ्यः कोशेभ्य उद्धृत्य बुद्ध्यादितः सच्चिदानंदस्वरूपं निष्कृष्य परं ब्रह्म
पूर्वोक्तलक्षणं प्रपद्यते प्राप्नोति ब्रह्मैव भवतीत्यर्थः॥३७॥ इदानीं विवक्षितावन्वयव्यतिरेकौ दर्शयति॥ अभाने इति

अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः॥ स्वात्मानं तत उद्धृत्य परं ब्रह्म
प्रपद्यते॥३७॥ अभाने स्थूलदेहस्य स्वप्ने यज्ज्ञानमात्मनः॥ सोऽन्वयो व्यति
रेकस्तज्ज्ञानेऽन्यानवभासनं॥३८॥

अ॥ स्वप्ने स्वप्नावस्थायां स्थूलदेहस्यान्नमयकोशस्याभाने अप्रतीतौ सत्यामात्मनः प्रतीच्यो यज्ज्ञानं स्वप्रकाशि
त्वेन यत्स्फुरणमस्ति स आत्मनोऽन्वयः॥ तस्यामेव स्वप्नावस्थायां तज्ज्ञाने तस्यात्मनः स्फुरणे सति अन्यान
वभासनं अन्यस्य स्थूलदेहस्यानवभासनं अप्रतीतिर्व्यतिरेकः॥ स्थूलदेहस्येति शेषः॥ अस्मिन्प्रकरणे
अन्वयव्यतिरेकशब्दाभ्यामनुवृत्तिव्यावृत्ती उच्येते॥३८॥

विलक्षणः

रावस्थूलदेहस्यानात्मत्वावबोधकावन्वयव्यतिरेकौ दर्शयित्वा लिंगदेहस्य तथात्वावगमकौ तौ दर्शयति ॥ लिं
गाभान इति ॥ सुषुप्तौ सुषुप्त्यवस्थायां लिंगाभाने लिंगस्य सूक्ष्मदेहस्याभाने अप्रतीतौ आत्मनो भानं तदवस्था
साक्षित्वेन स्फुरणं आत्मनोऽन्वयः स्यात् ॥ तद्भाने आत्मनो भाने लिंगस्याभानं लिंगदेहस्य व्यतिरेक इ
ति उच्यते ॥ ३९ ॥ ननु पंचकोशविवेचनमुपक्रम्य लिंगदेहविवेचनं प्रकृतासंगतमित्याशंक्य प्राणम

आरंभस्य मूलापे

लिंगाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः ॥ व्यतिरेकस्तु तद्भाने लिंगस्या
भानमुच्यते ॥ ३९ ॥ तद्विवेकाद्विविक्ताः स्युः कोशाः प्राणमनोधियः ॥ ते हि त
त्र गुणावस्थाभेदमात्रात्पृथक्कृताः ॥ ४० ॥

प्र

यादिकोशत्रितयस्य तत्रैवांतर्भावान्न कृतासंगतिरित्याह ॥ तद्विवेकादिति ॥ तस्य लिंगशरीरस्य विवेच
नात्प्राणमनोधियः तन्नामकाः कोशा विविक्ताः आत्मनः पृथक्कृताः स्युः ॥ कुत इत्यत आह ॥ ते हि त
त्रेति ॥ हि यस्मात्कारणात् ते प्राणमयादयस्त्रयः तस्मिन् लिंगशरीरे गुणावस्थाभेदमात्रात् गुणयोः
सत्त्वरजसोः अवस्थाभेदमात्रात् गुणप्रधानभावेनावस्थाविशेषादेव पृथक्कृताः भेदेन निर्दिष्टा इत्यर्थः ॥ ४० ॥

इदानीमानंदमयकोशत्वेन विवक्षितस्य कारणशरीरस्याविवेचनोपायमाह॥ सुषुप्त्याभानइति॥ समाध्यौव
दमाणलक्षणायां समाध्यवस्थायां सुषुप्त्यभाने सुषुप्तिशब्दोपलक्षितस्य कारणदेहरूपस्याज्ञानस्या
प्रतीतौ आत्मनस्तु शब्दोऽवधारणे आत्मन एव ज्ञानं यदस्ति स आत्मनोऽन्वयः॥ आत्मभाने आत्मस्फूर्तौ सत्यां
सुषुप्त्यनवभासनं सुषुप्त्युपलक्षितस्याज्ञानस्याप्रतीतिरेव व्यतिरेक...स्तस्येति॥ अत्रायं प्रयोगः॥ प्रत्य
गात्मा अन्नमयादिभ्यो भिद्यते तेषु परस्परं व्यावर्तमानेष्वपि स्वयमव्यावृत्तत्वात्॥ यद्येषु व्यावर्तमानेष्वपि नव्यावर्तते तेभ्यो त्तेषु
भिद्यते कुसुमेभ्यः सूत्रं यथा वा खण्डादिव्यक्तिभ्यो गोत्वमिति॥४१॥ एवमन्वयव्यतिरेकाभ्यां कोशपंचकाद्भिन्नत्तस्या..त्मनो

सुषुप्त्यभाने भानं तु समाधावात्मनोऽन्वयः॥ व्यतिरेकस्त्वात्मभाने सुषुप्त्यनव
भासनं॥४१॥ यथा मुंजादिषीकैवमात्मा युक्त्या समुद्धृतः॥ शरीरत्रितयाद्धीरैः
परं ब्रह्मैव जायते॥४२॥

ब्रह्मप्राप्तिर्भवतीत्युक्तं तत्र श्रुतिप्रतिपादिकामंगुष्ठमात्रः पुरुषोऽन्तरात्मेत्यादिकां तां विद्याच्छुक्रममृतमिति...त्वंतां प्रकाशय
कठश्रुतिमर्थतः॥ पठति॥ यथा मुंजादिति॥ यथा येन प्रकारेण मुंजादेतन्नामकात्तृणविशेषादिषीका गर्भस्थं
कोमलं तृणं॥ युक्त्या बहिरावरकत्वेन स्थितानां स्थूलपत्राणां विभजनलक्षणेनोपायेन समुद्ध्रियते एवमात्मा
पि युक्त्या अन्वयव्यतिरेकलक्षणेनोपायेन शरीरत्रितयात् पूर्वोक्तात् धीरैर्बुद्धीरैर्ब्रह्मचर्यादिसाधनसंपन्नैरधि
कारिभिः समुद्धृतः पृथक्कृतश्चेत् परं ब्रह्मैव जायते॥ चिदानंदरूपत्वस्य लक्षणस्योभयोराविशिष्टत्वादित्य
भिप्रायः॥४२॥

एतावता ग्रंथसंदर्भेण सफलस्य तत्वज्ञानस्य निरूपितत्वादुत्तरग्रंथभागस्यानारंभप्रसंग इत्याशं/
क्य तदारंभसिद्धये वृत्तानुकीर्त्तनपूर्वकमुत्तरग्रंथस्य तात्पर्यमाह॥ परापरात्मन इति॥ एवमुक्तेन प्र
कारेण परापरात्मनोस्तत्वंपदार्थयोः॥ परात्मजीवात्मनोरेकतोभिन्नतायुतयोर्लक्षणसाम्यदर्शनाद्यु
पायेन संभावितोंगीकारिता सा एकता तत्वमस्यादिवाक्यैः स्वस्वभागत्यागेन विरुद्धांशपरित्यागेन लक्ष्यते

परापरात्मनोरेवं युक्त्या संभावितैकता॥ तत्वमस्यादिवाक्यैः
सा भागत्यागेन लक्ष्यते॥४३॥ जगतो यदुपादानं मायामा
दाय तामसीं॥ निमित्तं शुद्धसत्वां तामुच्यते ब्रह्म तद्गिरा॥४४॥

लक्षणावृत्त्या वोध्यते॥४३॥ तत्वमसीतिवाक्यार्थज्ञानस्य तदादिपदार्थज्ञानपूर्वकत्वात्॥ तत्पदस्यवा
च्यमर्थं तावदाह॥ जगत इति॥ यत्सच्चिदानंदलक्षणं ब्रह्म तामसीं तमोगुणप्रधानां मायामादाय उपाधि
त्वेन स्वीकृत्य जगतश्चराचरात्मकस्य कार्यवर्गस्योपादानं॥ शुद्धस्याधिष्ठानं शुद्धसत्वां विशुद्धसत्वप्र
धानां तामुपाधित्वेन स्वीकृत्य निमित्तं उपादानाभिन्नं कर्तृत्वंवर्त्ति॥ तन्निमित्तोपादानोभयरूपं ब्रह्म तद्गिरा त
त्वमसिवाक्यस्थेन तत्पदेनोच्यते॥४४॥

त्वंपदवाच्यार्थमाह॥ यदेति॥ तदेव ब्रह्म यदा यस्यामवस्थायां मलिनसत्वामीषद्रजस्तमोमिश्रत्वेन मलिनस
त्वप्रधानामत एव कामकर्मादिदूषितामविद्याशब्दवाच्यां मायामादत्ते उपाधित्वेन स्वीकरोति तदा त्वंपदेनोच्य
ते॥४५॥ एवं तत्त्वंपदार्थावभिधाय महावाक्यार्थमाह॥ त्रितयीमिति॥ त्रितयीमपि तां त्रिप्रकारामपि॥ तमःप्रधानवि
त्वरे शुद्धसत्वप्रधानमलिनसत्वप्रधानत्वभेदेनोक्तामत एव परस्परविरोधिनीं तां मायां मुक्त्वा परित्यज्याखण्डं
तं। भेदरहितं सच्चिदानन्दं ब्रह्म महावाक्येन लक्ष्यत इत्युक्तं॥४६॥ नन्वेवं लक्षणावृत्त्या वाक्यार्थबोधनं कुत्र दृष्टमि

यदा मलिनसत्वां तां कामकर्मादिदूषितां॥ आदत्ते तत्परं ब्रह्म त्वंपदेन तदोच्यते
॥४५॥ त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीं॥ अखण्डं सच्चिदानन्दं महावाक्येन लक्
ष्यते॥४६॥ सोयमित्यादिवाक्येषु विरोधात्तदिदंतयोः॥ त्यागेन भागयोरेक आश्रयो
लक्ष्यते यथा॥४७॥ मायाविद्ये विहायैवमुपाधी परजीवयोः॥ अखण्डं सच्चिदानन्दं परं
ब्रह्मैव लक्ष्यते॥४८॥

त्याशंक्याह॥ सोयमिति॥ सोयं देवदत्त इत्यादिवाक्येषु तदिदं वाक्येषु तदिदंतयोः॥ तदेतद्देशकालवैशिष्ट्याल्लक्ष
णयोर्धर्मियोर्विरोधादैक्यानुपपत्तेर्भागयोर्विरुद्धांशयोस्त्यागेनैकाश्रयो देवदत्तस्वरूपमेव यथा लक्ष्यते
॥४७॥ एवं दृष्टान्तमभिधाय दार्ष्टान्तिकमाह॥ मायाविद्ये इति॥ एवं सोयं देवदत्त इत्यादिवाक्ये यथा तद्वत्॥ पर
जीवयोरुपाधी उपाधिभूते मायाविद्ये पूर्वोक्ते विहाय परित्यज्याखण्डं भेदरहितं सच्चिदानन्दं परं ब्रह्मैव महावा
क्येन लक्ष्यते॥४८॥

ननु किं महावाक्येन लक्षणं सविकल्पकमुत निर्विकल्पकं प्रथमे पक्षे दोषमाह पूर्ववादी ॥ सविकल्पकस्येति स
[illegible] विकल्पस्य विकल्पेन ॥ विपरीतत्वेन नामजात्यादिरूपेण सहवर्त्तत इति सविकल्पं तस्य लक्षणत्वे वा ए
केन वोध्यत्वे लक्षणस्य वाक्यार्थतया लक्षणस्यावस्तुता स्यान्मिथ्यात्वं स्यात् द्वितीये दोषमाह ॥ निर्विकल्पकस्ये
ति निर्विकल्पकस्य नामजात्यादिरहितस्य लक्षणत्वे लोके न क्वापि दृष्टं न च संभवि ॥ उपेक्ष्यमाणमपि न भवति ॥ प४
घा२ लक्ष्यत्वधर्मवत्तो निर्विकल्पकत्वा[illegible]तादिति ॥ ४९ ॥ सिद्धान्ती जात्युत्तरत्वान्नेदं चोद्यमिति विकल्पपूर्वकं दो
षमाह ॥ विकल्प इति ॥ सविकल्पकस्य निर्विकल्पकस्य वा लक्षणत्वमिति यो विकल्पस्तथा लक्षितः किं निर्विकल्पकस्य उ
त सविकल्पकस्य भवेत् ॥ आद्ये प्रथमे पक्षे व्याहतिस्तयोर्व्या[illegible] तएव ॥ अन्यत्र द्वितीये पक्षेऽनवस्थादयः ॥
घा१

सविकल्पकस्य लक्षणत्वे लक्षणस्य स्यादवस्तुता ॥ निर्विकल्पकस्य लक्षणत्वं न
दृष्टं न च संभावि ॥ ४९ ॥ विकल्पो निर्विकल्पकस्य सविकल्पकस्य वा भवेत् ॥ आ
द्ये व्याहतिरन्यत्रानवस्थात्माश्रयादयः ॥ ५० ॥

स्या१ तथाहि ॥ सविकल्पं विकल्प इत्यत्र विकल्पेन सह वर्त्तत इत्यत्र तेन तृतीयांतविकल्पपदेन प्रथमांत
विकल्पपदेन चैक एव विकल्पोऽभिधीयते द्वौ वा एक एव चेत् ॥ स्वयमेक एव विकल्प आश्रयविशेषणं तया
श्रयस्तदाश्रितो विकल्प एवेत्यात्माश्रयता ॥ द्वौ चेत्तदा तृतीयांत[illegible] शब्दनिर्दिष्टस्यापि विकल्पस्य विकल्प
सर रूपत्वात्तदाश्रय[illegible]स्यापि विकल्पकत्वात्तद्विशेषणं तत्रो विकल्पः किं प्रथमांतशब्दनिर्दिष्ट एव विकल्पः
उतान्योऽन्यः ॥ आद्येऽन्योन्याश्रयता द्वितीये धर्मिविशेषणीभूतो विकल्पः किं प्रथमांतशब्दनिर्दिष्ट उतान्यो
न्यः ॥ आद्ये चक्रकापत्तिः द्वितीये तस्याप्यन्य इत्यनवस्थापतत इति ॥ ५० ॥
न२
तस्याप्यन्य१

नकेवलमत्रैवेदं दूषणमापितु सर्वत्रैवंविधाविकल्पपूर्वकं दूषणं प्रसरतीत्याह॥ इदमीति॥ इदं विका
ल्पदूषणजातं गुणक्रियाजातिद्रव्यसंबंधवस्तुषु गुणादिसंबंधांतेषु पंचसु वस्तुषु समं॥ तथाहि॥ गुणाः किं
।निर्गुणे वर्त्तंत उत गुणवति क्रियापि क्रियारहिते वर्त्तते॥ क्रियावति वा आद्ये व्याघातः॥ अन्त्ये ज्ञाता आश्रयादयऽइति
सर्वत्रैवमस्त्वहं॥ नन्विदमसदुत्तरंपित्याशंक्याह॥ तेनेति तेनैवं विकल्पस्यासंगतत्वेनैतद्गुणादिकं सर्वं स्वरूप
स्येतीष्यतां गुणादयः सर्वे वस्तुस्वरूपे वर्त्तंत इत्यभिप्रायः॥५१॥ नवत्वेवमन्यत्र प्रकृते किमायातमित्यजा
त्या(ह॥ विकं तदभावाभ्यामिति॥ विकल्पतदभावाभ्यां विकल्पे न विकल्पाभावे न चासंस्पृष्टात्मवस्तूनि संस्पर्शरहिते

इदं गुणक्रियाजातिद्रव्यसंबंधवस्तुषु॥ समं तेन स्वरूपस्य सर्वमेतदिती
ष्यतां॥५१॥ विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तुनि॥ विकल्पितत्वाल्लक्ष्यत्व
संबंधाद्यास्तु कल्पिताः॥५२॥

परमात्मवस्तूनि विकल्पितत्वलक्ष्यत्वसंबंधाद्यास्तत्र विकल्पितत्वं नाम सविकल्पस्य वा निर्विकल्पस्य वा
निर्विकल्पस्य वेति पूर्वोक्तेन विषयीकृतत्वं लक्ष्यत्वं लक्षणवत्त्वा ज्ञाप्यत्वं संबंधः संयोगादिः॥
आदिशब्देन द्रव्यादयो गृह्यंते॥ तु शब्दोऽवधारणे॥ तत्र द्रव्यं नाम गुणानामाश्रयो द्रव्यं समवायिकारणं द्र
व्यमिति वा तार्किकैर्लक्षितं॥ कर्मव्यतिरिक्तत्वे सति जातिमात्राश्रयो गुणः॥ नित्यमेकमनेकव्यापि सामा
न्यमिति लक्षिता जातिः॥ संयोगविभागयोरसमवायिकारणं जातीयं कर्मेति लक्षिता क्रिया॥ एते स
र्वे स्वरूपे कल्पिता एवेत्यर्थः॥५२॥

एतावता ग्रंथसंदर्भेण किमुक्तं भवतीत्याकांक्षायां फलितमाह॥ इत्थं जगतो यदुपादानमित्यादिग्रंथजातोक्त
प्रकारेण वाक्यैस्तत्त्वमस्यादिवाक्यैस्तदर्थानुसंधानं तेषां वाक्यानामर्थस्य जीवब्रह्मणोरेकत्वलक्षणस्या
नुसंधानं श्रवणं भवेत्॥ युक्त्या शब्दस्य शक्तिर्यो वेद्या इत्यादिना परापरात्मनोरेवं युक्त्या संभावितैकतेत्यं
तेन ग्रंथसंदर्भेणोक्तप्रकारया संभावितत्वानुसंधानं श्रुतस्यार्थस्योपपद्यमानत्वज्ञानं यदस्ति तन्मन

इत्थं वाक्यैस्तदर्थानुसंधानं श्रवणं भवेत्॥ युक्त्या संभावितत्वानुसंधानं
मननं तु तत्॥५३॥ ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत्॥ ए
कतानत्वमेतद्धि निदिध्यासनमुच्यते॥५४॥

ननमित्युच्यते॥५३॥ इदानीं निदिध्यासनमाह॥ ताभ्यामिति ताभ्यां श्रवणमननाभ्यां निर्विचिकित्सेऽर्थे इति गतावि कि१
चिकित्सा संशयो यस्मात् स॥ असौ निर्विचिकित्सस्तस्मिन्नर्थे विषये स्थापितस्य धारणावतश्चेतसो देशबंधश्चित्त सर
स्य धारणेति पतंजलिनोक्तत्वात् यदेकतानत्वमेकाकारवृत्तिप्रवाहत्वमेतन्निदिध्यासनमुच्यते॥ हि प्र
सिद्धं योगशास्त्रे॥ तत्र प्रत्ययैकतानता ध्यानमिति॥५४॥

तस्यैव निदिध्यासनस्य परिपाकदशारूपं समाधिमाह ॥ ध्यातृध्यानेति ॥ निदिध्यासने तावद्ध्याता ध्यानं ध्येयं चेति
त्रितयं भासते ॥ तत्र यदा चित्तमभ्यासवशेन ध्यातृध्याने ध्यातारं ध्यानं च क्रमात्परित्यज्य ध्येयैकगोचरं ध्येयमेव गो
चरो विषयो यस्य तत्तथाविधं भवति ॥ तदा समाधिरित्युच्यते ॥ तत्र दृष्टांतः ॥ निवातदीपवदिति ॥ वायुरहिते प्रदेशे व
र्तमानो दीपो यथा निश्चलो भवति तद्वदित्यर्थः ॥५५॥ ननु समाधौ वृत्तीनामनुपलब्धेर्ध्येयैकगोचरत्वमपि नि
श्चेतुं न शक्यत इत्याशंक्य वृत्तिसद्भावस्यानुमानगम्यत्वान्नैवमित्याह वृत्तय इति ॥ आत्मगोचरा आत्मा गोचरो
विषयो यासां ता वृत्तयस्तु तदानीं समाधिकाले अज्ञाता अपि व्युत्थितस्य समाधेरुत्थितात्पुरुषात् स्मरणादेतावं

ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरं ॥ निवातदीपवच्चित्तं समाधिरभि-
धीयते ॥५५॥ वृत्तयस्तु तदानीमज्ञाता अप्यात्मगोचराः ॥ स्मरणादनुमीयं-
ते व्युत्थितस्य समुत्थितात् ॥५६॥ वृत्तीनामनुवृत्तिस्तु प्रयत्नात्प्रथमादपि ॥
अदृष्टासकृदभ्याससंस्कारसचिवाद्भवेत् ॥५७॥

तं कालं समाहितोऽभवमित्येवंरूपादनुमीयंते ॥ यद्यत्स्मर्यते तत्तदनुभूतमिति व्याप्तेर्लोकसिद्धत्वादित्यर्थः ॥
५६ ननु तदा निरुद्धत्वात्तदुत्पादकप्रयत्नाभावात्कथं वृत्त्यनुवृत्तिरित्याशंक्य तात्कालिकप्रयत्नाभावेऽपि प्राथमिका
देव प्रयत्नाददृष्टादिसहकारिसहिताद्भवतीत्याह ॥ वृत्तीनामिति ॥ ध्येयैकगोचराणां वृत्तीनामनुवृत्तिस्तु प्रवा
हरूपेणानुगतिस्तु प्रथमादपि प्रयत्नात्समाधिपूर्वकालीनादपि अदृष्टं अशुक्लाकृष्णकर्मा योगिनः पुण्यविशेषः ॥ क प: ३
र्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामिति पतंजलिना सूत्रितत्वात् ॥ असकृदभ्याससंस्काराः पुनःपुनः ॥ स
माध्यभ्यासेन जनितो भावनाख्यः संस्कारविशेषस्ताभ्यां सहकारिकारणाभ्यां सहवर्तमानाद्भवति ५७ पं०द०

तत्वयं समाधिः पूर्वाचार्यैर्निरूपितो द्वधरत्याशंक्य सर्वगुरुणा श्रीपुरुषोत्तमेन निरूपित्वा द्वैवाभिति परिह
रति ॥ यथांघ इति ॥ यथा दीपो निवातस्थो गतेमोपि स्मृते त्यादिभिः श्लोकैरनेकधा नानाप्रकारेण भगवा
न् ज्ञानैश्वर्यादिसंपन्नो रममेवा निर्विकल्पकसमाधिरूपमर्थमर्जुनाय शिष्याय न्यरूपयत् निरूपितमा
न् ॥ ५८ ॥ अस्य समाधेरवांतरफलमाह अनादाविति ॥ अनादौ स्पष्टं ॥ इह अस्मिन्संसारे संचिताः संचिताः ॥ पार
कर्मकोटयः कर्मणां पुण्यपापफलक्षणानां कोटयः लक्षाणि अपरिमितानि कर्माणीत्यर्थः ॥ अनेन समाधिना वि
इत्युपर

यथा दीपो निवातस्थ इत्यादिभिरनेकधा ॥ भगवान्निममेवार्थमर्जुनाय न्य
रूपयत् ॥ ५८ ॥ अनादाविह संसारे संचिताः कर्मकोटयः ॥ अनेन विलयं यां
ति शुद्धो धर्मो विवर्द्धते ॥ ५९ ॥ धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः ॥ वर्ष
त्येष यतो धर्मामृतधाराः सहस्रशः ॥ ६० ॥

लयं यांतीति विनश्यंति ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावर इति श्रुतेः ॥ ज्ञानाग्निः सर्वकर्माणीति स्मृ
तेः ॥ अस्य शुद्धो धर्मः समस्ताविद्यानिवर्तकतत्वसाक्षात्कारात्साधनमतो धर्मो विवर्द्धते स्पष्टं ॥ ५९ ॥ तत्र किं प्रमा
णमित्यत आह धर्ममेघमिति ॥ योगवित्तमा अतिशयेन योगज्ञाः ब्रह्मसाक्षात्कारवंत इति यावदित्यर्थः ॥ इ
मं निर्विकल्पकसमाधिं धर्ममेघं प्राहुः स्पष्टं ॥ एतदुपपादयति वर्षतीति ॥ यतः कारणादेष समाधिः धर्मा
मृतधारा धर्मलक्षणा अमृतधाराः सहस्रशो वर्षति ददाति मेकं क्रतुशतस्यापीति श्रुतेः ॥ अतो धर्ममेघं प्राहुरि
तिपूर्वेणान्वयः ॥ ६० ॥

इदानीं समाधेः परमप्रयोजनमाह ॥ अमुनेति ॥ समाधिना वासनाजाले अहंकारममकारकर्तृत्वाद्यभिमानहे-
तुभूते ज्ञानविरुद्धे संस्कारसमूहे निःशेषं यथा भवति तथा प्रविलापिते विनाशिते पुण्यपापाख्ये कर्मसं-
स॰२ चये समूलोन्मूलिते समूलं यथा भवति तथोन्मूलिते उद्धृते विनाशिते इति यावत् ॥ फलितमाह ॥ वाक्यमि-
ति ॥ वाक्यं तत्त्वमस्यादिवाक्यमप्रतिबद्धं सत्कर्मवासनाद्यप्रतिबंधरहितं सत्प्राक्परोक्षावभासिते पूर्वं
परोक्षतया प्रकाशिते तत्त्वे करामलकवत्करस्थितामलकगोचरमिव अपरोक्षं यथा तत्त्वावभासने समर्थं बो अपरोक्षा

अमुना वासनाजाले निःशेषं प्रविलापिते ॥ समूलोन्मूलिते पुण्यपापाख्ये कर्मसंचये ६१ ॥
वाक्यमप्रतिबद्धं सत्प्राक्परोक्षावभासिते ॥ करामलकवद्बोधमपरोक्षं प्रसूयते ॥ ६२ ॥ परो-
क्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकं ॥ बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ॥ ६३ ॥ अपरो-
क्षात्मविज्ञानं शाब्दं देशिकपूर्वकं ॥ संसारकारणाज्ञानतमसश्चंडभास्करः ॥ ६४ ॥

धं ज्ञानं प्रसूयते जनयति ॥ ६२ ॥ इदानीं परोक्षज्ञानस्य फलमाह ॥ परोक्षमिति ॥ देशिकपूर्वकं गुरुमुखाल्लब्धं शाब्दं
तत्त्वमस्याद्यागमजन्यं परोक्षं ब्रह्मविज्ञानं बुद्धिपूर्वकं ज्ञानपूर्वकं यथा भवति तथा कृतं कृत्स्नं समस्तं पापं वह्निव- स॰त २
द्दहतीति ॥ ६३ ॥ अपरोक्षज्ञानफलमाह ॥ अपरोक्षात्मविज्ञानमिति ॥ शाब्दं देशिकपूर्वकं व्याख्यातं अपरोक्षात्मवि-
ज्ञानं अपरोक्षस्यात्मनो विज्ञानं संशयविपर्ययपराहितं यद्ज्ञानं तत्संसारकारणाज्ञानतमसः संसारकारणं यदज्ञानमेव तम-
स्तिरोधायकत्वात्तमस्तस्य चंडभास्करो मध्याह्नकालीनः सूर्यः ॥ बाह्यतमसश्चंडभास्कर इवाज्ञानतमसो नाशक इत्यर्थः ॥ ६४

प्रतिपाद्यमानमर्थमप्रतीतरणप्रतिपादितं सोपपादयातेः

ग्रंथाभ्यासफलमाह ॥ इत्थमिति ॥ नरः इत्थमुक्तेन प्रकारेण तत्त्वविवेकं तत्त्वस्य ब्रह्मात्मैकत्वलक्षणस्य विवेकं को-
शपंचकाद्विवेचनं विधाय कृत्वा तस्मिंस्तत्त्वे विधिवच्छास्त्रोक्तप्रकारेण मनः समाधाय स्थिरीकृत्य विगलितसंसृति-
बंधः अपरोक्षज्ञानेन निवृत्तसंसारबंधः सन् परं पदं निरतिशयानंदरूपं मोक्षं न चिरादविलंबेन प्राप्नोति सत्य-
ज्ञानानंतलक्षणं ब्रह्मैव भवतीत्यर्थः ॥ ६५ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीभारतीतीर्थविद्यारण्यमुनिवर्य-
किंकरेण श्रीरामकृष्णाख्यविदुषा विरचिता प्रत्यक्तत्त्वविवेकव्याख्या समाप्तम् ॥ नत्वा श्रीभारतीतीर्थविद्यारण्य-

इत्थं तत्त्वविवेकं विधाय विधिवन्मनः ॥ समाधाय विगलितसंसृतिबंधः प्राप्नोति परं पदं
नरो न चिरात् ॥ ६५ ॥ इति पंचदश्यां प्रत्यक्तत्त्वविवेकः समाप्तः ॥ श्री २ सदद्वैतं श्रुतं यत्तत्पं-
चभूतविवेकतः बोद्धुं शक्यं ततो भूतपंचकं प्रविविच्यते ॥ १ ॥ शब्दस्पर्शौ रूपरसौ गंधो भूत-
गुणा इमे ॥ एकद्वित्रिचतुःपंचगुणा व्योमादिषु क्रमात् ॥ २ ॥

मुनीश्वरौ ॥ पंचभूतविवेकस्य व्याख्यानं क्रियते मया ॥ १ ॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति जगदुत्पत्तेः
पुरा यच्छ्रुतं जगत्कारणं सद्रूपमद्वितीयं ब्रह्म श्रुतं तस्यावाङ्मनसगोचरत्वेन स्वतो बोद्धुमशक्यत्वात्तत्कार्यत्वेन तदुपा-
धिभूतस्य भूतपंचकस्य विवेकद्वारा तद्बोधनाय योग्यं भूतत्वेन भूतपंचकविवेकं प्रतिजानीते ॥ सदद्वैतमिति ॥
तत्र तावदाकाशादीनां पंचानां भूतानां गुणांस्तेषां वा तद्गुणानाह ॥ शब्दस्पर्शाविति ॥ २ ॥

तत्वेते गुणाः किं सर्वे सर्वेषामुत एकैकस्यैकैको गुण इति विमर्शयन्नोभयथापि किंतु प्रकारांतरमस्तीत्यभिप्रायेणा
ह एकद्वित्रिचतुरिति तदेव प्रकारांतरं विशदयति प्रतिध्वनिरित्यादिभिः आकाशे तावच्छब्द एक एव गुणः स च प्रति
ध्वनिरूपः वायौ शब्दस्पर्शौ तत्र वायौ शब्दमनुकारेण दर्शयति वीसीति एवमुत्तरत्राप्यनुकरणशब्दं न द्रष्टव्यं
तस्य स्पर्शमाह अनुष्णाशीतसंस्पर्श इति वह्नौ शब्दस्पर्शरूपाणीति त्रयो गुणाः तान्क्रमेणाभिधीयंते वह्नौ तु भुगुभुगु
ध्वनिः ३ उष्णस्पर्शः प्रभारूपमिति जले शब्दादयो रसांताश्चत्वारो गुणास्तानाह जले च बुलुबुलुध्वनिः शीतस्पर्शः
शुक्लरूपं रसो माधुर्यमीरितमिति ४ भूमौ शब्दादिगंधांताः पंच गुणास्तानुदाहरति भूमौ कडकडाशब्द इत्यादिना

प्रतिध्वनिर्वियच्छब्दो वायौ वीसीति शब्दनं अनुष्णाशीतसंस्पर्शो वह्नौ भुगुभुगुध्वनिः ३ उष्णस्प
ध्वर र्शः प्रभारूपं जले बुलुबुलुध्वनिः शीतस्पर्शः शुक्लरूपं रसो माधुर्यमीरितं ४ भूमौ कडकडा
शब्दः काठिन्यं स्पर्श इष्यते नीलादिकं चित्ररूपं मधुराम्लादिको रसः ५ सुरभीतरगंधौ द्वौ धुरु
गुणाः सम्यग्विवेचिताः श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चेंद्रियपंचकं ६ कर्णादिगोलकस्थं
तच्छब्दादिग्राहकं क्रमात् सौक्ष्म्यात्कार्यानुमेयं तत्प्रायो धावेद्बहिर्मुखं ७

सुरभीतरगंधौ द्वावित्यंतेन उक्तमर्थमुपसंहरति द्वे गुणा गुणाः सम्यग्विवेचिता इति ५ एवं गुणतो भेदमभिधा
यार य कार्यतो भेदज्ञानाय तत्कार्याणि ज्ञानेंद्रियाणि तावदाह श्रोत्रमिति तेषां स्थानं व्यापारं च दर्शयति कर्णादिगोलक इंद्रयेण
स्थमिति इंद्रियसद्भावे किं प्रमाणमित्याकांक्षायां कार्यलिंगकानुमानमित्याह सौक्ष्म्यादिति तच्छब्दादिरूपोपलब्धिकर
णत्वमक्रियात्वात् छिदिक्रियावदित्यादि द्रष्टव्यं सौक्ष्म्यादयंक्ष्यकार्यत्वेन दुर्लक्ष्यत्वादित्यर्थः एतेषां स्वभाव
माह प्राय इति पराञ्चि खानि व्यतृणत्स्वयंभूरिति श्रुतेरित्यर्थः ७ ॥ नार

वह्निर्भरगनि

प्रायः शब्देन सूचितं क्वचित्करणानां आंतरविषयग्राहकत्वं दर्शयति कदाचिदिति ॥ कदाचित्कर्णस्य पिधाने कृते
सति प्राणवायौ जाठराग्नौ विद्यमाने आंतरः शब्दः श्रूयते ॥ ८ ॥ जलपानेन जठराग्नौ चांतराः स्पर्शाः स्पष्टं व्यज्यंते अभि
व्यक्तीभवंति ॥ नेत्रनिमीलने कृते आंतरं तमः उपलभ्यते ॥ उद्गारे जाते रसगंधौ गृह्येते इत्यनेन प्रका
अंतरविवक्षार रेण अक्षाणामांतरग्रहोऽक्षाणामिति कर्तरि षष्ठी आंतरस्य विषयस्य ग्रहो ग्रहणं ॥ इंद्रियकर्तृकमांत

तर

कदाचित्पिहिते कर्णे श्रूयते शब्द आन्तरः ॥ प्राणवायौ जाठराग्नौ जलपानेऽन्नभ
क्षणे ॥ ८ ॥ व्यज्यंते ह्यांतराः स्पर्शा मीलने चांतरं तमः ॥ उद्गारे रसगंधौ चेत्यक्षाणा
मांतरग्रहः ॥ ९ ॥ पंचोत्सर्गादानगमनविसर्गानंदकाः क्रियाः ॥ कृषिवाणिज्यसेवा
द्याः पंचस्वेतत्रवंतिहि ॥ १० ॥

रविषयग्रहणं भवतीत्यर्थः ॥ ९ ॥ एवं ज्ञानेंद्रियव्यापारानभिधाय कर्मेंद्रियासत्त्ववादिनं प्रति तत्सद्भावसमर्थना
य तत्तल्लिंगभूतांस्तत्र व्यापारानाह ॥ पंचेति ॥ उत्सर्गश्च आदानं च गमनं च विसर्गश्च आनंदश्चेति द्वंद्वसमासः ॥ उत्सर्गादा
नगमनविसर्गानंदाख्याः पंचक्रियाः कृष्याद्यतिशेषः ननु कृष्यादीनां क्रियांतराणामपि सत्त्वात्कथं पंचत्वमि
त्याशंक्याह ॥ कृषीति ॥

अ२

वा१

कानि तानि क्रियाजनकानीन्द्रियाणि इत्यत आह ॥ वागिति ॥ वागादिभिरक्षैस्तत्क्रियाजनिः सा सा क्रियाणामुत्पत्तिर्भवतीति शेषः ॥ अत्राप्रयुक्तिः करणपूर्वकक्रियात्वादित्यादिकार्यलिंगमनुमानं इह स्वयं ॥ तस्य कर्मेन्द्रियपंचकस्य स्थानान्याह ॥ मुखादिगोलकेष्विति ॥ आदिशब्देन करचरणगुदशिश्नच्छिद्रे च गृह्यते ॥ ११ ॥ इदानीमुक्तदशेन्द्रियप्रेरकत्वेन प्रस्तुतस्य मनसः स्वरूपं स्थानं च दर्शयति ॥ मनश्चेति ॥ तस्यान्तरिन्द्रियसन्निमित्तकमाह ॥ तदिति ॥ १२ ॥ दशेन्द्रियाध्यक्षत्वं

अ१

स्वामीर

वाक्पाणिपादपायूपस्थैरक्षैस्तत्क्रियाजनिः ॥ मुखादिगोलकेष्वास्ते तत्कर्मेन्द्रियपंचकं ॥ ११ ॥ मनो दशेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितं ॥ तच्चांतःकरणं बाह्येष्वस्वातंत्र्याद्विनेन्द्रियैः ॥ १२ ॥ अक्षेष्वर्थार्पितेष्वेतद्गुणदोषविचारकं ॥ सत्त्वं रजस्तमश्चास्य गुणा विक्रियते हि तैः ॥ १३ ॥

पदार्थश्र

मेव विशदयति ॥ अक्षेष्विति ॥ अक्षेषु इन्द्रियेषु अर्थार्पितेषु विषयेषु सत्सु एतन्मनो गुणदोषविचारकं इदं समीचीनमि[दमसमीचीन]मित्यादिविचारकारीत्यर्थः ॥ अयं भावः ॥ आत्मनः प्रमातृत्वेन सर्वज्ञानसाधारण्याच्चक्षुरादीनां च रूपादिज्ञानजननमात्रे चरितार्थत्वात् गुणदोषविचारस्योपलभ्यमानस्यान्यथानुपपत्त्यात् तत्कारणत्वेन मनोऽभ्युपगंतव्यमिति ॥ मनसो वैराग्यकामाद्यनेकविधवृत्तिमत्त्वप्रदर्शनाय सत्त्वादिगुणवत्त्वं दर्शयति सत्त्वमिति ॥ तेषां तद्गुणत्वे कारणमाह ॥ विक्रियत इति ॥

मिदसमचीन

तत्साधनेन र

गुणौ स्तस्याविक्रियमाणत्वमेव प्रपंचयति ॥ वैराग्यमिति ॥ १४ ॥ आत्मस्येति स्पष्टत्वान्न व्याख्यायते ॥ वैराग्यादीनां कार्याणि वि
भज्य दर्शयति ॥ सात्त्विकैरिति ॥ १५ ॥ एषां बुद्धिस्थत्वादन्तःकरणादीनां सर्वेषां स्वामिनमाह ॥ अज्ञाहमिति ॥ अज्ञाहमिति प्र
त्ययवान् ॥ कर्त्ता प्रभुरित्यर्थः ॥ लोकेपि कार्यकर्त्ता प्रभुरित्येवं व्यपदिश्यते ॥ १६ ॥ एवं जगतः स्थितिमभिधायेदानीं
तस्य भौतिकत्वज्ञानोपायमाह ॥ स्पष्टशब्दादियुक्तेष्विति ॥ स्पष्टशब्दादियुक्तेषु स्पष्टैः शब्दादिगुणैः सहितेषु घटा
दिषु वस्तुषु भूतकार्यत्वं स्पष्टमेवावगम्यते ॥ इंद्रियादिषु कथं भूतकार्यत्वं निश्चयं इत्याशंक्यागमानुमानाभ्यामित्या

वैराग्यं क्षांतिरौदार्यमित्याद्याः सत्त्वसंभवाः ॥ कामक्रोधौ लोभयत्नावित्याद्या रजसोत्थिताः ॥ १४ ॥
आलस्यभ्रांतितंद्राद्या विकारास्तामसोत्थिताः ॥ सात्त्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः ॥ १५ ॥
तामसैर्नोभयं किंतु वृथायुःक्षपणं भवेत् ॥ अत्राहंप्रत्ययी कर्त्तेत्येवं लोकव्यवस्थितिः ॥ १६ ॥
स्पष्टशब्दादियुक्तेषु भौतिकत्वमतिस्फुटं ॥ अक्षादावपि तच्छास्त्रयुक्तिभ्यामवधार्यतां ॥ १७ ॥

ह ॥ अक्षादाविति ॥ अन्नमयं हि सौम्य मनः आपोमयः प्राणस्तेजोमयी वागित्यादिशास्त्रं ॥ अनुमानं च विमतानि श्रोत्रादीनि
भूतकार्याणि भवितुमर्हन्ति ॥ भू[illegible]तान्वयव्यतिरेकानुविधायित्वात् ॥ यद्यदन्वयव्यतिरेकानुविधायि तत्तत्कार्यं दृ
ष्टं यथा मृदन्वयव्यतिरेकानुविधायी घटो मृत्कार्यो दृष्टस्तथा चेमानि तस्मात्तथेति ॥ तदन्वयव्यतिरेकानुविधायित्वं
च षोडशकलः सोम्य पुरुष इत्यादिना छांदोग्यश्रुतौ [illegible] मनसः श्रुतं ॥ यद्वदत्रापि द्रष्टव्यं ॥ १७ ॥

विनादास्यदो
नि २

एवं श्रुतानि नैगोतिकानि च विविच्य दर्शयित्वा प्रकृतां सदेव सोम्येदमग्र आसीदित्याद्यद्वितीयश्रु[illegible]स प्रतिपादिका
प्रकृतिं व्याचक्षाण एतद्वाक्यस्थेदंपदस्यार्थमाह ॥ एकादशेन्द्रियैरिति ॥ प्रत्यक्षादिभिः सर्वैः प्रमातॄर विशब्दादिप्रमा
णज्ञानैर्यावत्किंचिज्जगदवगम्यते तत्सर्वमयदेवं स्यादिवाक्यस्थेनेदं

एकादशेन्द्रियैर्युक्त्या शास्त्रेणाप्यवगम्यते ॥ यावत्किंचिद्भवेदेतदिदंशब्दोदितं जगत्
॥१८॥ इदं सर्वं पुरा सृष्टे[illegible]रेकमेवाद्वितीयकं ॥ सदेवासीन्नामरूपे नास्तामित्यारु[illegible]ते
र्वचः ॥१९॥ वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः ॥ वृक्षांतरात्सजातीयो विजातीयः
शिलादितः ॥२०॥

पदेनाभिहितं इत्यर्थः ॥१८॥ एवं इदंश[illegible]र्थमभिधाय इदानीं तां श्रुतिं स्वयमेवार्थतः पठति ॥ इदमिति ॥ आरुण
द्व र स्या[illegible]त्यमारुणिरुद्दालकः वचनमित्यर्थः ॥१९॥ एकमेवाद्वितीयमितिपदत्र[illegible]येण सद्वस्तुनि स्वगतादिभेदत्रयं
पा प्रसक्तं निवारयितुं लोके स्वगतादि[illegible]दत्रयं च दर्शयति ॥ वृक्षस्येति ॥ स्पष्टं ॥२०॥
भे१ ता१

एवमनात्मनि भेदत्रयं प्रदर्श्य सद्वस्तुन्यपि प्रसक्तं तद्भेदत्रयं श्रुतिः पदत्रयेण निवारयतीत्याह ॥ तथेति ॥ वस्तुत्वसामान्या
दनात्मनीव सद्वस्तुन्यपि प्रसक्तं स्वगतादिभेदत्रयमैक्यावधारणद्वैतप्रतिषेधाभिधायकैरेकमेवाद्वितीयमिति
त्रिभिः पदैः क्रमेण निवार्यत इत्यर्थः ॥ २१ ॥ सद्वस्तुनस्तावत्स्वगतभेदः शंकितुं शक्यते तस्य निरवयवत्वादित्याह ॥ स
तइति ॥ नामरूपयोः सदवयवत्वं किं न स्यादित्याशंक्य सृष्टेः पुरा तयोरभावान्न सदंशत्वमित्याह ॥ नामरूपइति
॥ २२ ॥ कुतो नामरूपयोरभाव इत्याशंक्याह ॥ नामरूपोद्भवस्येति ॥ फलितमाह ॥ तस्मादिति ॥ अत्रायं प्रयोगः ॥ सद्वस्तु

तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते ॥ ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात् ॥ २१ ॥
सतो नावयवाः शंक्यास्तदंशस्यानिरूपणात् ॥ नामरूपे न तस्यांर द्याप्यनुद्भवात् ॥ २२ ॥ शौ तयो २
नामरूपोद्भवस्यैव सृष्टित्वात्सृष्टितः पुरा ॥ न तयोरुद्भवस्तस्मान्निरंशं सद्यथा वियत् ॥ २३ ॥ त ३
सदन्तरं सजातीयं न वैलक्षण्यवर्जनात् ॥ नामरूपोपाधिभेदं विना नैव सतो भिदा ॥ २४ ॥ क्या

स्वगतभेदशून्यं सद्वस्तु भवितुमर्हति निरवयवत्वाद्गगनवत् इति ॥ २३ ॥ मास्तु स्वगतभेदः सजातीयभेदः किं न स्यादित्याशं
नर क्य तत्सजातीयं सदन्तरमिति वक्तव्यं तन्निरूपयितुं शक्यते सतो वैलक्षण्याभावादित्याह ॥ सदन्तरमिति ॥ ननु घटस
त्तापटसत्त्वेति सतो भेदः प्रतीयत इत्याशंक्य घटाकाशमठाकाशवदुपाधिको भेदो न स्वतो जातीत्याह ॥ नामरूपो
पाधिभेदमिति ॥ अत्रायं प्रयोगः ॥ सद्वस्तु सजातीयभेदरहितं भवितुमर्हति उपाध्यपरामृष्टमितरेण विज्ञायमानभेदत्वात्
गगनवदिति ॥ २४ ॥

पं०द०
२९

ननु तर्हि विजातीयाद्भेद इत्याशंक्य सतो विजातीयमसत् तस्यासत्वेन नैव प्रतियोगित्वासंभवेन तत्प्र
तियोगिकः कोपि भेदो नास्तीत्याह ॥ विजातीयमिति ॥ २५ ॥ फलितमाह एकमेवेति ॥ इदानीं स्वगतानि स्वगतान्या
येन सद्द्वैतमेव दृढयितुं पूर्वपक्षमाह अत्रान्विति ॥ २६ ॥

विजातीयमसत्तत्तु न खल्वस्तीति गम्यते ॥ नास्यातः प्रतियोगित्वं विजातीयाद्भिदा कु
तः ॥ २५ ॥ एकमेवाद्वितीयं सत्सिद्धमत्र तु केचन ॥ विह्वला असदेवेदं पुरासीदित्यव
गु०रे र्णयन् ॥ २६ ॥ मग्नस्याब्धौ यथाक्षाणि विह्वलानि तथास्य धीः अ
खंडैकरसं श्रुत्वा निःप्रचरा बिभेत्यतः ॥ २७ ॥ गौडाचार्या निर्विकल्पे समाधावन्ययोगि
सजघा॥ नां ॥ साकारब्रह्मनिष्ठानामत्यन्तं भयमूचिरे ॥ २८ ॥

विह्वलत्वे दृष्टान्तमाह मग्नस्येति ॥ दार्ष्टान्तिके योजयति ॥ तथास्य धीरिति ॥ अस्यासद्वादिनः ज्ञाता वैकल्प व२
तं धीरंतःकरणं अखंडैकरसं वस्तु श्रुत्वा निष्प्रचारा साकारवस्तुनीवाखंडैकरसे वस्तुनि प्रचाररहिता स
ती अतो समाद्वस्तुनो बिभेतीति ॥ उक्तार्थे आचार्यसंमतिं दर्शयति ॥ गौडाचार्या निर्विकल्प इति ॥ २८ ॥

पं०द०

केनवाक्येनोक्तं तत्रत्यकोदायां तदीयवार्त्तिकमेव पठति ॥ अस्पर्शयोग इति ॥ योयमस्पर्शयोगो निर्विकल्पः समाधिः १
एष सर्वयोगिभिः साकारध्याननिष्ठैर्दुर्दर्शः दुःखेन द्रष्टुं योग्यः दुःप्राप्य इत्यर्थः ॥ अत एव पाठकोमाह ॥ योगिन इ
ति हि यस्मात्कारणाद्योगिनः सर्वे द्वैतवादिनः अभये भयमन्ये समाधौ निर्जने देशे वा सइव भयदर्शिनो भयहेतु
त्वकल्पयंतः अस्माद्योगाद्भीतिं प्राप्नुवंति २९ श्रीमदाचार्यैः विरचितं तदभिहितमित्याह ॥ भगवत्पूज्यपादा इति ३०॥

ते२ त।

अस्पर्शयोगो नामैष दुर्दर्शः सर्वयोगिभिः ॥ योगिनो बिभ्यति ह्यस्माद्भये भयदर्शिनः
॥२९ भगवत्पूज्यपादाः प्रभुः तर्कपदं नमन्त ॥ आदौ मध्ये चान्तके नान्ता नचित्ते सि
द्धदात्मनि ३० ॥ अनादृत्य प्रतिश्रुतिमोक्षादि मेवो ह्यस्तमसिचिनः ॥ आचेद्धिरे नित्तात्मत्वम
नुमानेनैकचद्वोधः ॥ ३१ ॥ अन्यमासीदिति ब्रूवे सद्योगं वा सदात्मतां ॥ अन्यस्य न तु
तयुक्तमुक्तं व्याहततत्वतः ३२॥

इदानीमसद्वादं विकल्पाद्दूषयति ॥ अन्यमिति ॥ अन्यमासीदित्यनेनवाक्येन
तद्वार्त्तिकं पठति ॥ अनादृत्येति ॥ तदुभयं सत्तासंबंधस्वरूपत्वलक्षणं तदन्यस्य व्याहतत्वा
अन्यस्य सत्तायोगं वा स्वरूपतां वा ब्रूष इति विकल्पार्थः ॥ न्नयुज्यत इत्यर्थः ३२

दू१

व्याहृततत्त्वमेव दृष्टान्तपूर्वकं घटयति ॥ न युक्तमिति ॥ २३ ॥ नन्वद्वयमतेऽपि वियदादीनां निर्विकल्पे ब्रह्मणि सत्त्वस्या
हतामित्याशंक्याह ॥ वियदादेरिति ॥ तर्हि त्वन्मतेऽप्यस्यापि नामरूपे सद्वस्तुनि निर्विकल्पे कल्पिते इति वदतो वो ब्रह्मस्यापि द्वैतान्तरत्यपि
प्रायेणाह ॥ अस्यान्यस्येति ॥ २४ ॥ ननु तर्हि अन्यस्येव सद्वस्तुनोऽपि नामरूपे कल्पिते तेतांगीकर्तव्ये अद्वयमते वास्तवयोर्ना
मरूपयोरसत्त्वादिति शंकते ॥ सतोऽपीति ॥ विकल्पासहत्वादयं पक्षोऽनुपपन्न इत्यभिप्रायेण परिहरति ॥ तदा वदेति ॥

न युक्तस्तमसा सूर्यो नापि चासौ तमोमयः ॥ सच्छून्ययोर्विरोधित्वाच्छून्यमासीत्कथं वद ॥ २३ ॥
वियदादेर्नामरूपे मायया सुविकल्पिते ॥ शून्यस्य नामरूपे च तथा चेज्जीव्यतां चिरं ॥ २४ ॥ स
तोऽपि नामरूपे द्वे कल्पिते चेत्तदा वद ॥ कुत्रेतिरधिष्ठानो न भ्रमः क्वचिदीक्ष्यते ॥ २५ ॥

अयमभिप्रायः ॥ सतो नामरूपे किं सति कल्पिते उतासति ॥ अथवा जगतीति ॥ नाद्यः ॥ अन्यस्य रजतादेर्नामरूपयोरत्व
त्र शुक्तिकादावारोपदर्शनात् ॥ सतो नामरूपयोः सत्येव कल्पनायोगात् ॥ न द्वितीय ॥ असतो निरात्मकस्य चाधिष्ठान
त्वायोगात् ॥ न तृतीयः ॥ सतत्त्वमन्यस्य जगतः सन्नामरूपकल्पनाधिष्ठानत्वानुपपत्तेरिति ॥ मा भूदधिष्ठानं भ्रान
योः कल्पना किं न स्यादित्याशंक्याह ॥ निरधिष्ठान इति ॥ २५ ॥

मि

नन्वसदेवेदमग्र आसीदित्यत्र यथा व्याघातस्तथा सदेव सोम्येदमग्र आसीदित्यत्रापि दोषोऽस्तीति शंक
ते साद्विति तथाहि ॥ सदासीदिति शब्दयोरर्थभेदोऽस्ति न वा अस्ति चेद् द्वैतहानिः ॥ नास्ति चेत्पुनरुक्तिः स्यात् अतः
सदासीदित्यनुपपन्नमिति ॥ द्वितीयपक्षमादाय परिहरति मैवमिति ॥ पुनरुक्तिदोषस्य कः परिहार इत्याशंक्या
ह लोक इति ॥ २६ ॥ एवंविधेषु पुनरुक्त्यभावः कुत्र दृष्ट इत्याशंक्याह ॥ कर्त्तव्यमिति ॥ एवं त्वेवं लोके श्रुतौ किमा

सदासीदिति शब्दार्थभेदे वैगुण्यमापतेत् ॥ अभेदे पुनरुक्तिः स्यान्मैवं लोके तथेक्षणा
त् ॥ २६ ॥ कर्त्तव्यं कुरुते वाक्यं ब्रूते धार्यस्य धारणं ॥ इत्यादिवासनाविष्टं प्रत्यासीत्सदिती
रणं ॥ २७ ॥ कालाभावे पुरेत्युक्तिः कालवासनया युतं ॥ शिष्यं प्रत्येव तेनात्र द्वितीयं नहि
शंक्यते ॥ २८ ॥ चोद्यं वा परिहारो वा क्रियतां द्वैतभाषया ॥ अद्वैतभाषया चोद्यं नास्ति ना
पि तदुत्तरं ॥ २९ ॥

यातमित्यत आह ॥ इत्यादीति ॥ २७ ॥ नन्वद्वितीये वस्तुनि निर्गतकालाभावादग्र आसीदित्युक्तिरनुपपन्नेत्या
शंक्याह कालाभावे इति ॥ ननु जगदुत्पत्तेः पुरा जगदभावे न सद्द्वितीयत्वं ब्रह्मण इत्याशंक्य श्रोतृप्रति
बोधनार्थत्वान्नेति शंकनीयमित्याह ॥ तेनात्रेति ॥ इदानीं सिद्धांतमाह ॥ चोद्यमिति ॥ व्यवहारदशायां चोद्या
दि कर्त्तव्यं परमार्थतस्त्वद्वैतमेव तत्त्वमित्यर्थः ॥
२९

श्रुतिप्रवृत्ते द्वैतवासनावि
१ स्ट२

न तेजः तेजस्यानधिकरणं२

स॰२

परमार्थतो द्वैताभावे श्रुतिं प्रमाणयति ॥ तदेति ॥ स्तिमितं निस्तरंगं गंभीरं दुरवगाहं मनसाविषयी
कर्त्तुमशक्यं ॥ न तमः तमोविलक्षणमनावरणस्वभावं ॥ ततं व्याप्तं ॥ अनाख्यमाख्यातमशक्यं अनभि
त्रि॰२ व्यक्तं चक्षुरादींद्रियाविषयीकृतं तत्पूर्णं विलक्षणमत एव च किंचिदिदं तया निर्देष्टुमशक्यमवशि
ष्यते द्वैतनिषेधावधित्वेनावतिष्ठत इत्यर्थः ॥४०॥ ननु जनिमत्त्वेनानित्यस्य भूम्यादेरसत्त्वमस्तु नित्या

तदा स्तिमितगंभीरं न तेजो न तमस्ततं ॥ अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ॥४०॥
ननु भूम्यादिकं माभूत्परमाण्वंतनाशतः ॥ कथं ते वियतोऽसत्त्वं बुद्धिमारोहतीति
ति चेत् ॥४१॥ अत्यंतं निर्जगद्व्योम यथा ते बुद्धिमाश्रितं ॥ तथैव सन्निराकाशं कुतो
नाश्रयते मतिः ॥४२॥ निर्जगद्व्योम दृष्टं चेत्प्रकाशतमसी [illegible] विना ॥ क्व दृष्टं किंच
ते पक्षे न प्रत्यक्षं वियत्खलु ॥४३॥

काशस्यासत्त्वं कथमंगीक्रियत इति शंकते ॥ ननु भूम्यादिकमिति ॥४१॥ दृष्टांतावष्टंभेन परिहरति ॥
अत्यंतमिति ॥ अत्यंतं निर्जगत् जगन्मात्ररहितमि[illegible]त्यर्थः ॥४२॥ नहि दृष्टेऽनुपपन्नमिति न्याय २२
माश्रित्य चोदयति ॥ निर्जगद्व्योम दृष्टं चेदिति ॥ दर्शनमेवासिद्धमिति परिहरति प्रकाशतमसी विने
ति ॥ अपसिद्धांतोऽपीत्याह ॥ किंच ते पक्षे न प्रत्यक्षमिति ॥

ननु दर्शनाभावः सद्वस्तुन्यपि समानं इत्याशंक्य सतः सर्वैरनुभवसिद्धत्वान्नैवमित्याह || सद्वस्त्विति ||
ननु तूष्णींभावे शून्यमेव इतरस्य कस्यापि प्रतीत्यभावादित्याशंक्य शून्यप्रतीत्यभावाच्छून्यमपि न संभवतीत्याह || न शून्यत्वमिति || ४४ || ननु तर्हि सद्बुद्ध्यभावात्सत्वमपि न घटत इति शंकते || सद्बुद्धिरिति ||
तस्य स्वप्रकाशत्वान्न तद्बुद्ध्यभावो निष्ट इति परिहरति || मास्त्वस्येति || स्वगोचरबुद्ध्यभावे कथं सद्वस्त्ववगंतुं शक्यत इत्यत आह || निर्मनस्कत्वसाक्षित्वादिति || ४५ || एवं निष्प्रपंचस्य साक्षिणस्तूष्णींस्थि

सद्वस्तु शुद्धं त्वस्माभिर्निर्णीतैरनुभूयते || तूष्णींस्थितो न शून्यत्वं शून्यबुद्धेश्च वर्जनात् || ४४ || सद्बुद्धिरपि चेन्नास्ति मास्त्वस्य स्वप्रभत्वतः || निर्मनस्कत्वसाक्षित्वात्सन्मात्रं सुगमं नृणां || ४५ || मनोजृंभणराहित्ये यथा साक्षी निराकुलः || मायाजृंभणतः पूर्वं सत्तथैव निराकुलम् || ४६ || निस्तत्वा कार्यगम्यास्य शक्तिर्मायाग्निशक्तिवत् || नहि शक्तिः क्वचित्कैश्चिद्बुध्यते कार्यतः पुरा || ४७ ||

तोभावेन प्रदर्शितं दृष्टांतबलेन सृष्टेः पुरापि सद्वस्तु तथावगंतुं शक्यत इत्याह || मनोजृंभणराहित्य इति ४६ || मायायाः किंलक्षणमित्यत आह || निस्तत्वा कार्यगम्यास्येति || निस्तत्वा स्वगतकारणसत्ताद्वस्तुनः पृथक्सत्वरहिता कार्यगम्या यदादिकार्यलिंगगम्या अस्य सद्वस्तुनः शक्तिर्यथा दाहादिकार्यजननसामर्थ्यं वस्तुस्वरूपातिरिक्तशक्तिसद्भावे दृष्टांतमाह || अग्निशक्तिवदिति || यथाग्न्यादिस्वरूपानिमायेत्युच्यते वस्तुस्वरूपातिरिक्तं कार्यातिरिक्तं सामर्थ्यमस्ति तदादित्यर्थः || शक्तेः कार्यलिंगगम्यत्वे तं स्फोटादिकार्यलिंगगम्यं व्यतिरेकमुखेन द्रढयति नहीति || ४७ ||

ग२

एवं शक्तेः कार्यात्किं गम्यत्वमुपपाद्य निस्तत्त्वरूपतामुपपादयति। नेति। अयमभिप्रायः। सद्वस्तुनः शक्तिः किं
सती उतासती। न तावत्सती तथात्वे सतोऽभिन्नत्वेन तच्छक्तित्वायोगात्। उक्तार्थे दृष्टान्तमाह। नहीति। द्वितीयेऽपि किं न
रविषाणतुल्या उत सद्विलक्षणेति विकल्पाभिप्रायेण पृच्छति। सद्विलक्षणतायामिति। ४८। तत्राद्यपक्षमनूद्य दूषय द्या२
ति। शून्यत्वमिति। शून्यस्य नामरूपे च तथा चेज्जीव्यतां चिरमित्युक्तेरित्यर्थः॥

न सद्वस्तु सतः शक्तिर्न हि वह्नेः स्वशक्तिता॥ सद्विलक्षणतायां तु शक्तेः किं तत्त्वमुच्यतां॥४८॥ तादृक्२
शून्यत्वमिति चेच्छून्यं मायाकार्यमितीरितं॥ न शून्यं नापि सद्यादृक्तत्त्वमिहेष्यतां॥४९॥ त२
नासदासीन्नोसदासीत्तदानीं किं त्वभूत्तमः॥ सद्योगात्तमसः सत्त्वं न स्वसत्त्वनिषेधनात्॥५०॥

तस्माद्द्वितीयः पक्षः परिशिष्यत इत्याह। नशून्यमिति। मायास्वरूपं सत्त्वासत्त्वाभ्यां निर्वचनानर्हमित्यभिप्रायः॥
४९ अस्मिन्नर्थे श्रुतिं प्रमाणयति। नासदासीदिति। तम आसीत्तमसा गूढमग्र इत्यादिश्रुतिः प्रमाणमित्यर्थः॥
तर्हि तम आसीदिति कथं सत्त्वमुच्यत इत्यत आह। सद्योगादिति। कुत इत्यत आह। तन्निषेधादिति। ५०॥

फलितमाह ॥ अत एवेति ॥ यतः स्वतः सत्त्वं मायाया नास्ति अत एव सत्यस्येव मायाया अपि द्वितीयत्वं न गण्यते हि नेमाद्विय
तरत्यर्थः ॥ अन्यत्तस्याद्वितीयत्वानंगीकारे दृष्टांतमाह ॥ नलोके इति ॥ ५१ ॥ ननु शक्त्युपाधिकस्य जीविताधिक्यं दृश्यते अ
तः शक्तेरपि पृथक् जीवितत्वमस्तीति शंकते ॥ शक्त्याधिक्य इति ॥ न शक्तिर्जीवितं वर्द्धनेकारणमपि तु तत्कार्ययुद्ध
कृष्यादीति परिहरति ॥ तत्रेति ॥ ५२ ॥ दार्ष्टान्तिके योजयति ॥ तथा सर्वस्येति ॥ मात्रशब्देन तया सद्वितीयत्वं सत्तापि तु तत्का
र्येण ॥ तत्कार्यत्वेनेत्याशंक्य तस्य तदानीमसत्त्वान्नेत्वापि न सद्वितीयमित्याह ॥ शक्तिकार्यमिति ॥ ५३ ॥

अत एवाद्वितीयत्वं सत्यवन्न हि गण्यते ॥ न लोके चैत्रतच्छक्त्योर्जीवितं लिख्यते पृथक् ॥ ५१ ॥
श क्त्याधिक्ये जीवितं चेद्वर्द्धते तत्र वृद्धिकृत् ॥ न शक्तिः किं तु तत्कार्यं युद्धकृष्यादिकं तथा ॥ ५२ ॥
सर्वथा शक्तिमात्रस्य न पृथग्गणना क्वचित् ॥ शक्तिकार्यं तु नैवास्ति द्वितीयं शंक्यते कथं ॥ ५३ ॥
न कृत्स्नब्रह्मवृत्तिः सा शक्तिः किं त्वेकदेशभाक् ॥ घटशक्तिर्यथा भूमौ स्निग्धमृ द्येव वर्त्तते ॥ ५४ ॥ द्वै२
पादोस्य सर्वा भूतानि यादस्ति स्वयंप्रभे ॥ इत्येकदेशवृत्तित्वं मायाया वदति श्रुतिः ॥ ५५ ॥
त्रि

ननु सच्छक्तिः सती सर्वत्र वर्त्तते इत्येकदेशो नास्याः मुक्तैः प्राप्य ब्रह्माभावप्रसंगात् ॥ नाद्वितीयः ॥ निरंशत्वेनाविरोधि
त्वादित्याशंक्याधानंगीकारादद्वितीये परिहारो वक्ष्यते इत्यभिप्रायेणाह ॥ न कृत्स्नब्रह्मवृत्तिरिति ॥ एकदेशवृत्तौ दृष्टांतमा
ह ॥ घटशक्तिरिति ॥ ५४ ॥ शक्तेरेकदेशवृत्तित्वे प्रमाणमाह ॥ पादोस्येति ॥ ५५ ॥

न केवलं श्रुतिरेव स्मृतिरप्यस्तीत्याह ॥ विष्टभ्याहमिति ॥ ५६ ॥ इदानीं निर्माय स्वरूपसद्भावे प्रमाणमाह ॥ सन्न
मिमिति विकारावर्तिं च तथाऽऽह ॥ स्थितमाद्देति सूत्रकारवचनमित्यर्थः ॥ ५७ ॥ तर्हि निरंशत्वाविरोध इत्यस्य कः परिहा
र इत्याशंकावास्तवनिरंशत्वाभ्युपगमान्नाविरोध इत्यभिप्रायेणोदाहृतश्रुत्यभिप्रायमाह ॥ निरंश इति ॥ ५८ ॥
यदर्थं ब्रह्मणि मायासमर्पिता तदिदानीमाह ॥ सत्तत्त्वमिति विकृत्याविविधत्वे न क्रियंत इति विकृत्याः कार्य

विष्टभ्याहमिदं कृत्स्नमेकांशेनास्थितो जगत् ॥ इति कृष्णोऽर्जुनायाऽऽह जगतस्त्वेकदेशतां
॥ ५६ ॥ स भूमिं विश्वतो वृत्वा ह्यत्यतिष्ठद्दशांगुलं ॥ विकारावर्तिं चात्रास्ति श्रुतिसूत्रकृतो
र्वचः ॥ ५७ ॥ निरंशेऽप्यंशमारोप्य कृत्स्नेंऽशे वेति पृच्छतः ॥ तद्भाषयोत्तरं ब्रूते श्रुतिः श्रोतृहि
तैषिणी ॥ ५८ ॥ सत्तत्त्वमाश्रिता शक्तिः कल्पयेत्सति विक्रियाः ॥ वर्णा भित्तिगता भित्तौ चित्रं त्तंर
नानाविधं यथा ॥ ५९ ॥ आद्यो विकार आकाशः सोऽवकाशस्वरूपवान् ॥ आकाशोऽस्तीति स
त्तत्त्वमाकाशेऽप्यनुगच्छति ॥ ६० ॥

विशेषा इत्यर्थः ॥ अत्र दृष्टांतमाह ॥ वर्णा भित्तिगता इति ॥ वर्णा रक्तपीतादयो धातवो विशेषाः ॥ ५९ ॥ तत्र प्रथ
मं कार्यविशेषं दर्शयति ॥ आद्यो विकार इति तत्स्वरूपमाह ॥ सोऽवकाशरूपवानिति आकाशस्य ब्रह्मकार्यत्वे हे
तुमाह ॥ आकाश इति ॥ ६० ॥
तो

उक्तमर्थं विशदयति र
स्वर

ततः किमित्यत आह ॥ एकस्वभावमिति ॥ नावकाश इति ॥ सद्वस्तुन्यवकाशो नास्ति । किं तु सत्स्वभावादेकादाकाशाकाशे तु सच्च सत्स्वभावश्चेत्येषोऽप्यवकाशश्चाभावोऽपीति द्वयं स्थितं विद्यत इत्यर्थः ॥६१॥ सदाकाशयोरेकद्विस्वभावत्वं प्रकारांतरेणाप्युत्पादयति ॥ यद्वेति ॥ प्रतिध्वनिर्व्योम्नो गुण इत्युपपादितमधस्तात् ॥ असौ प्रतिध्वनिः सति सद्वस्तुनि नेक्ष्यते नोपलभ्यते व्योम्नि तु सद्ध्वनी सच्छब्दावुभावप्युपलभ्येते ॥ तेन कारणेन सदेकमेव स्वभावं वियद्द्विस्वभावकमित्यर्थः ॥६२॥ नन्वाकाशस्य सद्ब्रह्मकार्यत्वेनाकाशस्य सत्तेति सतश्चाकाशधर्मता कुतः प्रति

त

एकस्वभावं सत्तत्त्वमाकाशो द्विस्वभावकः ॥ नावकाशः सति व्योम्नि स चैषोऽपि
द्वयं स्थितं ॥६१॥ यद्वा प्रतिध्वनिर्व्योम्नो गुणो नासौ सतीक्ष्यते ॥ व्योम्नि द्वौ सद्ध्वनी तेन
सदेकं द्विगुणं वियत् ॥६२॥ या शक्तिः कल्पयेद्व्योम सा सद्व्योम्नोरभिन्नतां ॥ आपा
द्य धर्मधर्मित्वं व्यत्यये नावकल्पयेत् ॥६३॥ सतो व्योम्नः सत्तां तु लौकिकाः ॥ तार्किकाश्चा
वगच्छन्ति मायाया उचितं हि तत् ॥६४॥

निर
धर्मि

व्योमत्वमाप न्नं१

भातीत्याशंक्याह ॥ या शक्तिरिति ॥ या माया सद्वस्तुन्याकाशं कल्पयति सा प्रथमतः सद्व्योम्नोरभेदं कल्पयति ॥ पश्चाद्युक्तं धर्मधर्मिभावं वैपरीत्येन कल्पयति ॥ अतश्चाकाशस्य सत्तेति भानमुपपद्यत इत्यर्थः ॥६३॥ मायाया वैपरित्यं कथं ज्ञातमित्याशंक्याह ॥ सत इति ॥ वस्तुतत्त्वविचारे क्रियमाणे मृदो घटरूपत्वमिव सतो व्योमत्वमापन्नं सद्वस्तुन आकाशरूपत्वप्राप्तं लौकिकाः प्राणिनः शास्त्रियेषु मध्ये तार्किकाश्च तद्वैपरीत्येन व्योम्नो गगनस्य धर्मिणः सत्तां सद्रूपत्वं धर्मं जातिं चावगच्छन्ति ॥ ननु अन्यस्यान्यथाप्रतीतिरनुपपन्नेत्याशंक्याह ॥ मायाया इति ॥ तद्विपरीतदर्शने हेतुत्वं मायाया युक्तमित्यर्थः ॥६४॥

घट

जानंति

पं॰द॰
२४

॥२

मायाया अविपरीतप्रतीतिहेतुत्वं लौकिकन्यायप्रदर्शनेन स्पष्टीकरोति॥ यद्यथेति॥ यद्वस्तु शुक्त्यादि यथा॥ येन शु
क्तिकादिरूपेण वर्त्तते तस्य तथात्वं शुक्त्यादिरूपत्वं प्रमातः स्फुरति॥ अन्यथात्वं रजतादिरूपत्वं तद्भ्रमेणाज्ञा
त्वा प्रतिभातीत्ययं न्यायः सर्वलोकप्रसिद्ध इत्यर्थः॥ ६५ एवं मायाया अविपरीतप्रतिभानं दर्शयित्वा तन्निवर्त्युपा
यमाह एवमिति॥ एवमुक्तप्रकारेण श्रुतिविचारात्प्राक् श्रुत्यर्थाविचारात्पूर्वं यद्वस्तु यत्स्वरूपं ब्रह्म मायया यथा ॥२
येन गगनादिरूपेण वर्त्तते॥ तद्वस्त्वर्थ॥ पर्यालोचने न विपर्येति॥ गगनादिभावं परित्यज्य स्वरूपं ब्रह्मैव

यद्यथा वर्त्तते तस्य तथात्वं भाति मानतः॥ अन्यथात्वं भ्रमेणेति न्यायोऽयं सार्व
लौकिकः॥ ६५ एवं श्रुतिविचारात्प्राग्यथा यद्वस्तु भासते॥ विचारेण विपर्ये
तत्वत ति ततस्तच्चिन्त्यतां वियत्॥ ६६ भिन्नौ वियत्सती शब्दभेदाद्बुद्धेश्च भेदतः॥
॥३॥ वाय्वादिष्वनुवृत्तं सन्न व्योमेति भेदधीः॥ ६७॥

रा१
द्वियद्धि त्वं तां विचार्यतामित्यर्थः॥ ६६ विभा
भवति॥ ततः श्रुतिविचारात्तु वस्तुयाथात्म्यदर्शनसंभवात्॥ शब्दभेदादिति॥ वियत्सतोर्द्वयोः परस्प
रस्वरूपमेव दर्शयति॥ भिन्नाविति॥ भिन्ने इति प्रतिज्ञातार्थे हेतुमाह॥ शब्दभेदादिति॥ वाय्वादिष्विति सद्वाय्वादिषु वृत्तेषु सत्ता
यत्वादि इत्यर्थः॥ हेत्वन्तरमाह॥ बुद्धेरिति॥ तमेव हेतुं विशदयति॥ वाय्वादिष्विति सद्बुद्धिः व्योमबुद्धिर्भेदधीः भेदबुद्धिरित्यर्थः॥ ६७
युः सत्तेजइत्येवंप्रकारेणानुवर्त्तमानसत्ता व्योम तु नेवं भासत इति यज्ज्ञानं सा भेदधीः भेदबुद्धिरित्यर्थः

त्वं सदाकाशयोरिदं प्रसाध्य व्योम्नः सत्त्वेति अत्याप्रतीतस्य धर्मिधर्मभावस्याविचारेण व्यत्ययं दर्शयति सद्बु
द्धित्विति रूपरसादिषु अनुवृत्तस्य द्रव्यस्य गगनाकाशगवाद्यादिषु अनुवृत्तस्य सतो धर्मित्वेर रसादिभ्यो व्यावृत्तस्य रूपस्ये
व गवाद्यादिभ्यो व्यावृत्तस्य नञर्थस्य धर्मत्वमित्यर्थः॥ ननु तर्हि घटाद्यनुवृत्तस्य रूपस्य यथा न सत्त्वं तथा सतोऽपि
नुवृत्तस्य नञर्थस्यापि स्यादित्याशंक्य सद्व्यतिरिक्तस्य नञर्थस्य दुर्निरूपत्वान्नेवमित्याह॥ धियासतश्चेति ९८ दुर्नि
रूपत्वमसिद्धमिति शंकते अवकाशात्मकमिति तर्हि सतो विलक्षणत्वादसदेव स्यादिति परिहरति असत्त्वादि

सद्बुद्ध्यैवाधिकवृत्तित्वाद्धर्मिव्योम्नस्तु धर्मता॥ धियः संततः एवप्रकारे बुद्धिर्व्योम किं मा त्वमकं
९८ अवकाशात्मकं तच्चेदसत्तदितिचिंत्यताम्॥ भिन्नं सतो सच्छन्नेति वदिति चेद्व्याहतिस्तव ९९
नास्तीति चेद्धात्तुना मरूत्वणमापिकस्य तत्॥ यदि सन्दर्भसमानं तस्मिन्नेव स्वप्रगजादिव
देहि २ त् ९० जातिव्यक्तीदे ह्ये गुणद्रव्येयथापथक॥ वियता तोस्तध्येवास्तु पार्थक्यं कोऽत्र विस्मयः॥
९१ बुद्धौ चित्रे दोनोचिन्नैत्ति रूढिं यातिचेत्तदा॥ अनेकाग्र्यात्तं संशयाद्यारूघन्नावेस्यते वद ९२

ति सतो विलक्षणत्वस्यासत्त्वेनास्तीति वदतो दोषमाह भिन्नमिति ९९ असत्त्वेमानंनस्यादित्याशंक्य तुच्छविलक्षणत्वाद्भा
नेन विरुध्यतइत्याह नास्तीति अविशेषं दर्शयितुं मिथ्यावस्तुनो लक्षणं स्वदृष्टान्तमाह यद्वा समानमिति
यद्वस्तु स्वरूपेण वाधितमाने पि भासते तत्स्वप्नजागदिवान्मिथ्येत्यर्थः ९० ननु नियमेन सहोपलभ्यमान
योर्भेदो न दृष्टचरइत्याशंक्याह जातिव्यक्तीति ९१ भेदोयद्यपि बुद्ध्यातेतथापिभिन्नतो न भवतीति शंकते
बुद्धौ भेदाशति तस्य परिहारं वक्तुं निश्चयाज्ञाचेकारणं पश्यति अनेकाग्र्यादिति ९२

नित्यतु २

कंरूपं नवति

दि २

प॰द॰
२५

त्य नतार

आद्येपरिहारमाह॥ अप्रमत्त इति आद्येप्रथमेविकल्पे ध्यानात्तत्रप्रच्युतेकर्ताध्यानमित्युक्तोल्लङ्घनादप्रमत्तोभ
वेत्सावधानमनाभवेतियावत्॥ द्वितीयेपरिहारमाह॥ अन्यस्मिन्निति ततःकिमित्यतआह॥ ततइति॥ ततोपिकिमित्यतआ
ह॥ ध्यानादिति॥ ध्यानंपरवैराग्यलक्षणां मानं अभिन्नेविषयत्वंतीशब्दभेदादुक्तेऽभेदतइत्यत्रोक्तं॥ युक्तिसद्वस्तु अधिकर
णित्वादित्यादावुक्ताएतेध्यानादिभिर्विषयत्वतोन्येदेभिन्नेनिरूढियातेसतिविषयत्वंकदाचिदपिसत्यं किंतु सर्वदाभिद्यैव

ते
अप्रमत्तो भवेद्ध्यानादेकोरन्यास्मिन्विवेचनैः॥ कुरुप्रमाणयुक्तिभ्यां ततोरूढतमो भ
वेत् १३ ध्यानानंमानाद्यैर्युक्तितोपिरूढेभेदेविषयत्वतः॥ नकदाचिद्विषयत्वंसद्वस्तु
छिद्रवत्तेच १४ नस्यज्ञातिसदाव्योमनिस्तत्वोल्लेखपूर्वकं सद्वस्तोःपिविज्ञातंस्यनिःछि
द्रत्वपुरःसरं १५ वासनायांप्रवृत्तायांविषयस्यत्वकादिनं॥ यन्मात्रबोधयुक्तंचदृष्ट्वावि
स्मयतेबुधः १६ एवमाकाशमिथ्यात्वेसत्यत्वेचमासिते॥ न्यायेनानेनवाधादेःसद्वस्तु
प्रविविच्यतां १७

दा॥ बभासतेसद्वस्तुविच्छिद्रवत्॰ आकाशवन्नचनैवमवतीतिशेषः १४ विषयत्वविवेचनेफलमाह॥ नस्येति १५ विषयमिथ्या
त्वसतो वस्तुत्वंचसदाचिंतयतः किंभवतीत्यतआह॥ वासनायामिति॥ बुधोविषयत्वतोसत्त्वेन्नागगतोस्यसत्यत्वेवबुधारां
भतिरवकाशसद्वस्तुबोधरहितंच दृष्ट्वाविस्मयंप्राप्नोतीत्यर्थः १६ उक्तन्यायमन्यत्रा॰तिदिशति एवमाका प्य२
शमिथ्यात्वइति १७

प्रकाशेसति
वैसंकर
त्रसत्वग्रहण
जिश्चतेसति

ना८

सा०टी०८

नन्वाकाशकार्यस्य वायोरकारणान्तर्गतं सद्वस्तु तत्तादात्म्यप्रतीत्ययोगात्सतो विवेचनमप्रयोजकमित्याशंक्य संबंधमा
वेदयितुं परंपरया संबंधोस्तीत्याह सद्वस्त्विति ७८ एवं सन्मायोः संबंधं प्रदर्श्य तयोर्धर्मतो भेदज्ञानाय वायोः प्रतीयमा
नान्धर्मानाह ॥ शोष इति ॥ एवं प्रातिस्विकान्धर्मानभिधाय कारणतः प्राप्तानाह ॥ त्रय इति सन्मायाव्योम्नां ये त्रयः स्व
भावाः शीलविशेषास्तेपि वायुगा वायौ विद्यंत इत्यर्थः ७९ के ते धर्मा इत्यत आह ॥ वायुरिति ॥ वायुरस्तीति व्यवहारहेतुस्स
द्रूपत्वं सद्वस्तुनो धर्म एकः वायोः सद्वस्तुनो विवेचिते सति यन्निःसत्त्वरूपत्वं स मायाया धर्मो द्वितीयः ॥ शब्दो व्योम्नः संकाश श्लो५

सद्वस्त्वेकदेशस्था माया तत्रैकदेशगं ॥ वियत्तत्राप्येकदेशगतो वायुः प्रकल्पितः ॥ ७८ ॥
शोषः स्पर्शो गतिर्वेगो वायुधर्मा इमे मताः ॥ त्रयः स्वभावाः सन्मायाव्योम्नां ये तेपि वायुगाः ॥ ७९ ॥
वायुरस्तीति सद्भावः सतो वायोः पृथक्कृते ॥ निःसत्त्वरूपता मायास्वभावो व्योमगो ध्वनिः ॥ ८० ॥
सतोनुवृत्तिः सर्वत्र व्योम्नो नेति पुरेरितं ॥ व्योमानुवृत्तिरधुना कथं न व्याहृतं वचः ॥ ८१ ॥ छि
पृ ना ३१ द्रानुवृत्तिर्नेतीति पूर्वोक्तिरधुना त्वियं ॥ शब्दानुवृत्तिरेवोक्ता वचसो व्याहृतिः कुतः ॥ ८२ ॥

पृगें

दागतो धर्मस्तृतीय इत्यर्थः ८० ॥ ननु व्योमविवेचनप्रस्तावे वाय्वादिष्वनुवृत्तं सद्वस्तु व्योमेति नेदधीरित्यत्र वाय्वा
दावाकाशानुवृत्तिर्निवारिता इदानीं व्योमानुवृत्तिरभिधीयते ततः पूर्वोत्तरविरोध इति शंकते ॥ सतोनुवृत्तिरिति व्योमा
नुवृत्तिरधुनोच्यत इति शेषः ८१ ॥ पूर्वमवकाशलक्षणानुवृत्तिर्निवारिता इदानीं धर्मानुवृत्तिरभिधीयते न स्वरू
पानुवृत्तिरतो न व्याहृतिरिति परिहरति ॥ छिद्रानुवृत्तिरिति ८२

ननु वायोः सद्ब्रह्मविलक्षणत्वाद सत्त्वलक्षणं मायामयत्वं यद्युच्यते तर्ह्यव्यक्तस्वरूपमायावैलक्षण्याद मायाम
यत्वमपि किं न स्यादिति चोदयति ननु सद्वस्तु पार्थक्यादिति ८३ नाव्यक्तत्वं मायात्वे प्रयोजकं किंतु निस्तत्त्वं तत्तु मायाया
मिव वाय्वादावप्यस्तीति न मायामयत्वहानिरिति परिहरति निःसत्त्वरूपतेवेति ८४ ननु शक्तिकार्ययोरुभयोरपि

ननु सद्वस्तु पार्थक्याद सत्त्वं चेत्तदा कथं ॥ अव्यक्तमायावैषम्याद मायामयतापि नो
॥ ८३ ॥ निःसत्त्वरूपतेवात्र मायात्वस्य प्रयोजिका ॥ सा शक्तिकार्ययोस्तुल्या व्यक्ताव्यक्तत्वभे
दिनोः ॥ ८४ ॥ सदसत्त्वविवेकस्य प्रस्तुतत्वात्तदीक्ष्यतां ॥ असतोऽवांतरो भेद आस्तां तद्विंत
यात्र किं ॥ ८५ ॥ सद्ब्रह्म वस्तु शिष्टांशो वायुर्मिथ्या यथा वियत् ॥ वासयित्वा चिरं वायोर्मिथ्या
त्वं मरुतं त्यजेत् ॥ ८६ ॥

निःसत्त्वरूपतायामविशिष्टयोरव्यक्ताव्यक्तत्वलक्षणो भेदः कुत इत्याशंक्य तद्विचारः प्रकृतानुपयुक्त इति परिहरति
॥ सदसत्त्वविवेकस्येति असतो मायातत्कार्यरूपस्यावांतरभेदो व्यक्ताव्यक्तत्वरूप इत्यर्थः ॥ ८५ ॥ फलितमाह ॥ स
द्ब्र द्ब्रह्म वास्त्विति वायोर्यः सदंशः तद्ब्रह्मरूपं शिष्टांशोऽनिस्तत्त्वरूपादिर्वायोः स्वरूपं ॥ स च वायुर्निस्तत्त्वरूपत्वादेकाशव वा १
न्मिथ्या इत्थं वायोर्मिथ्यात्वं चिरं वासयित्वा मरुतं त्यजेत् ॥ मरुत्सत्य इति बुद्धिं त्यजेदित्यर्थः ॥ ८६ ॥

पार

मायया कृतं विचारं तेजस्यतिदिशति चिंतयेदिति ॥ ननु सद्वस्त्वेकदेशस्था माया तत्रेत्यादिनों सद्वियदादीनां न्यूनाधिकभाव उक्तः सलोकेन क्वापि दृश्यत इत्याशंक्याह ॥ ब्रह्मांडावरणेष्विति ॥ ८७ ॥ वायोः किंयतांशेन न्यूनो वह्निरित्यत आह ॥ वायोरिति ॥ तस्य वास्तवत्वशंकां वारयति वायौ प्रकल्पित इति ॥ ननु अयं न्यूनाधिकभावः स्वकपोलकल्पित इत्याशंक्याह ॥ पुराणोक्तमिति ॥ वह्नेः स्वरूपमाह ॥ वह्निरिति ॥ अत्रापि मायाविकारणाध

चिंतयेद्वह्निमप्येवं मरुतो न्यूनवर्तिनं ॥ ब्रह्मांडावरणेष्वेषा न्यूनाधिकाविचारणा
॥ ८७ ॥ वायोर्दशांशतो न्यूनो वह्निर्वायौ प्रकल्पितः ॥ पुराणोक्तं तारतम्यं दशांशैर्भूतपंच
के ॥ ८८ ॥ वह्निरुष्णः प्रकाशात्मा पूर्वानुगतिरत्र च ॥ अस्ति वह्निः सन्निस्तत्त्वः शब्दवान्स्पर्शवान वान्
पि ॥ ८९ ॥ सन्मायाव्योमवाय्वंशैर्युक्तस्याग्नेर्निजो गुणः ॥ रूपं तत्र सतः सर्वमन्यद्बुद्ध्या विवि
च्यतां ॥ ९० ॥ सतो विवेचिते वह्नौ मिथ्यात्वे सति वासिते ॥ आपो दशांशतो न्यूना कल्पिता इति
चिंतयेत् ॥ ९१ ॥

र्मा अनुगता इत्याह ॥ पूर्वानुगतिरिति ॥ के ते धर्मा इत्याकांक्षायामाह ॥ अस्तीति ॥ ८९ ॥ एवमग्नेः कारणधर्मानुगत्यनुवादपूर्वकं स्वकीयं धर्मं दर्शयति ॥ सन्मायाव्योमवाय्वंशैरिति ॥ इत्थं साविशेषणं वह्निस्वरूपं च्युत्वा इदानीं सद्वस्तुनो वह्निं विविनक्ति तत्रेति ॥ तत्र तेषु मध्ये सतः सद्वस्तुनो न्यत्सर्वं धर्मजातं मिथ्येति बुद्ध्या विविच्यतां पृथक्क्रियतामित्यर्थः ॥ ९० ॥ एवं वह्नेर्मिथ्यात्वनिश्चयानंतरं समपां मिथ्या चिंतयेदित्याह ॥ सत इति ॥ ९१ ॥

अ[blot]विकारत्वाद्धर्मान्स्वधर्मैश्चाविविच्य दर्शयति ॥ संत्यापइति ॥ शब्देन सह वर्त्तत इति सशब्दः अयमसौ स्पर्शश्च सशब्दस्पर्शः ॥ तेन युक्त इत्यर्थः ॥ ९२ ॥ विवेकध्यानाभ्यामपां मिथ्यात्वं निश्चित्याहुत्तरं भूमेर्मिथ्यात्वाच्चिंतनीयामित्याह ॥

संत्यापो मरुः अन्यतत्त्वात् सशब्दस्पर्शसंयुताः ॥ रूपवत्योऽन्यधर्मानुवृत्त्या स्वीयो रसो गुणः ॥ ९२ ॥ सतो विवेचितास्वप्सु तन्मिथ्यात्वे च वासिते ॥ भूमिर्दशांशतो न्यूना कल्पितास्वतिचिंतयेत् ॥ ९३ ॥ अस्ति भूस्तत्त्वमन्यासां शब्दस्पर्शौ सरूपकौ ॥ रसश्च परतो गंधो नैजः सत्ता विविच्यतां ॥ ९४ ॥ पृथक्कृतायां सत्तायां भूमिर्मिथ्यावशिष्यते ॥ भूमेर्दशांशतो न्यूनं ब्रह्मांडं भूमिमध्यगं ॥ ९५ ॥ ब्रह्मांडमध्ये तिष्ठंति भुवनानि चतुर्दश ॥ भुवनेषु वसंत्येषु प्राणिदेहा यथायथं ॥ ९६ ॥

सत इति ॥ ९३ ॥ तस्यां मि[.]ध्यात्वाच्चिंतनाय तद्धर्मान्विविनक्ति अस्तीति ॥ तेभ्यः सत्तामात्रं पृथक्कर्त्तव्यमित्याह ॥ सत्ता विविच्यतामिति ॥ ९४ ॥ सत्तापृथक्करणे फलमाह ॥ पृथक्कृतायामिति ॥ इदानीं भौतिकेभ्यो ब्रह्मांडादिभ्यः सतो विवेचनाय तदवस्थानप्रकारं दर्शयति ॥ भूमेरित्यादिसार्द्धश्लोकेन ॥ ९५ ॥ ९६ ॥

तेषु सद्विवेचनफलमाह ॥ ब्रह्माण्डलोकदेहेष्विति ॥ ९७ ॥ तज्ज्ञाते का हानिरित्युक्तमेवार्थं स्पष्टीकरोति ॥ भूतेति भौ
तिकमिति ॥ भूतानामाकाशादीनां भौतिकानां ब्रह्माण्डानां मायायामत्र तत्कारणभूतायां मिथ्यात्वविवेकध्याना
भ्यां चित्ते दृढं वासिते सति सद्वस्तुनो द्वैतत्वबुद्धिः ॥ कदाचिन्न विहन्यत इत्यर्थः ॥ ९८ ॥ ननु भूम्यादीनामसत्वेपि
दुष्टो व्यवहारलोपः प्रसज्येतेत्याशंक्याविवेके न मिथ्यात्वनिश्चयेपि भूम्यादेः स्वरूपोपमर्दनाभावान्न व्यवहारो म १

ब्रह्माण्डलोकदेहेषु सद्वस्तुनि पृथक्कृते ॥ असन्तोऽण्डादयो यान्तु तज्ज्ञातेपीह का हानि
॥ ९७ ॥ भूतभौतिकमायानामसत्वेत्यन्तवासिते ॥ सद्वस्त्वद्वैतमित्येषा धीर्विपर्येति न
क्वचित् ॥ ९८ ॥ सदद्वैतात्पृथग्भूते द्वैते भूम्यादिरूपिणि ॥ तत्तदर्थक्रिया रूपे यथा
दृष्टा तथैव सा ॥ ९९ ॥ सांख्यकाणादबौद्धाद्यैर्जगद्भेदो यथायथा ॥ उत्प्रेक्षतेऽनेकयुक्त्या न
वत्वेष तथा तथा ॥ १०० ॥ अवज्ञातं सदद्वैतं निःशंकैरन्यवादिभिः ॥ एवं का हानिरस्माकं तद
द्वैतमवजानतां ॥ १ ॥

अवज्ञातंफो
र्यान्नानात्वे १

प्या लु[illegible]त इत्याह ॥ सदद्वैतादिति ॥ ९९ ॥ ननु सत्त्वस्याद्वैतरूपत्वे सांख्यादिभिरभिधीयमानस्य कुतो निरासः क्रियत भेदस्य १
त इत्याशंक्य व्यावहारिकत्वेदस्याभिरभ्युपगतत्वान्न निरासाय प्रयत्यत इत्याह ॥ सांख्येति ॥ १०० ॥ ननु प्रमाण त्रि २
सिद्धस्य तत्त्वभेदस्यावज्ञानुपपन्नेत्याशंक्याह ॥ अवज्ञातमिति ॥ यथान्यवादिसांख्यादिभिर्निःशंकैरात्मा
दिसिद्धस्यापि सद्वैतस्यावज्ञा क्रियते ॥ अतियुक्त्यनुभवो वद्भे नास्माकं तदीयद्वैतानादरतो किं हीयत इत्यर्थः ॥ १ ॥

स्मा २

ननु निःप्रयोजनेयं द्वैतावज्ञेत्याशंक्य जीवन्मुक्तिलक्षणप्रयोजनसद्भावान्नैवमित्याह ॥ द्वैतेति २ न केवलं जीवन्मुक्तिरेव प्रयोजनमपि तु विदेहमुक्तिरपीत्यभिप्रायेण स्मृतिवाक्यमुदाहरति ॥ एषेति ३ अंतकालशब्देन वर्त्तमानदेहपातोऽभिधीयत इत्याशंक्य वारयितुं विवक्षितमर्थमाह ॥ सदद्वैत इति ॥

द्वैतावज्ञा सुस्थिता चेदद्वैते धीः स्थिरा भवेत् ॥ स्थैर्ये तस्याः पुमानेव जीवन्मुक्त इतीर्यते ॥ २ ॥ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ स्थित्वास्यामंतकालेऽपि ब्रह्मनिर्वाणमृच्छति ३ सदद्वैतेऽनृतद्वैते यदन्योन्यैक्यवीक्षणं तस्यांतकालस्तद्भेदबुद्धिरेव न चेतरः ४ यद्वांतकालः प्राणस्य वियोगोऽस्तु प्रसिद्धितः तस्मिन्कालेऽपि न भ्रांतेर्गतायाः पुनरागमः ५ नीरोग उपविष्टो वा रुग्णो वा विलुठन्भुवि मूर्छितो वा त्यजत्वेष प्राणान्भ्रांतिर्न सर्वथा ६

सद्रूपे अद्वैतेऽनृतरूपे द्वैते च यदन्योन्याध्यासलक्षणमैक्यज्ञानमस्ति तस्यैक्यभ्रमस्यांतकालो नाम तयोरद्वैतद्वैतयोः सत्यानृतरूपेण भेदबुद्धिरेव नापरो वर्त्तमानदेहपात इत्यर्थः ॥ ४ ॥ यदा नीलोकप्रसिद्ध्यर्थस्वीकारेऽपि न दोष इत्यभिप्रायेणाह ॥ यद्वेति ५ उक्तमेवार्थं प्रपंचयति ॥ नीरोग इति ॥ ६ ॥

ननुप्राणवियोगकाले मूर्छादिना ज्ञाननाशे भ्रांतिःस्यादेवेत्याशंक्य ज्ञाननाशो ज्ञानेदृशं तमाह। दिने दिन इति॥ पंचकोशविवेक

यथा प्रत्यहमधीते वेदे स्वप्नसुप्त्याद्यवस्थायां विस्मृतेऽपि परेद्युरनधीतवेदत्वं नास्ति॥ तथा मृतिकालेऽपि तत्त्वानु-
संधानाभावेऽपि ज्ञाननाशाभाव इत्यर्थः॥१ ज्ञाननाशाभावमेवोपपादयति प्रमाणोत्पादितेति॥८ उपपादितमर्थमुपसंहरति तस्मादिति॥९ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनीश्वरशिष्यश्रीरामकृष्णाख्येन विदुषा विरचिता महाभूतविवेकस्य तात्पर्यदीपिका समाप्ता॥२ नत्वा श्रीभारतीतीर्थविद्यार-

विद्यारण्य

। दिने दिने स्वप्नसुप्त्योरधीते विस्मृतेऽप्ययं॥ परेद्युर्नानधीतः स्यात्तद्वद्विद्या न नश्यति॥१ प्रमाणोत्पादिता विद्या प्रमाणं प्रबलं विना॥ न नश्यति न वेदांतात्प्रबलं मानमीक्ष्यते॥८ तस्माद्वेदांतसंसिद्धं सदद्वैतं न बाध्यते॥ अंतकालेऽप्यतो भूतविवेकान्निर्वृतिः स्थिता॥९ इति श्रीमत्परिव्राजकाचार्यश्रीभारतीतीर्थविरचितो महाभूतविवेकः समाप्तः॥२ गुहाहितं ब्रह्म यत्तत्पंचकोशविवेकतः॥ बोद्धुं शक्यं ततः कोशपंचकं प्रविविच्यते॥१

ब्रह्मानंद

ण्यमुनीश्वरौ पंचकोशविवेकस्य कुर्वे व्याख्यां समासतः॥१ तैत्तिरीयोपनिषत्तात्पर्यव्याख्यानरूपं पंचकोशविवेकाख्यं प्रकरणमारभमाण आचार्यस्तत्र श्रोतृप्रवृत्तिसिद्ध्यर्थं सप्रयोजनमभिधेयं सूचयन्मुखतश्चिकीर्षितं ग्रंथं प्रतिजानीते गुहाहितमिति॥ यो वेद निहितं गुहायां परमे व्योमन्निति श्रुत्या गुहानिहितत्वेनाभिहितं यद्ब्रह्मास्ति तद्गुहाशब्दवाच्यान्नमयादिकोशपंचकविवेकेन ज्ञातुं शक्यते यतस्ततस्तेभ्यः कोशेभ्यो पंचकं प्रकर्षेण प्रत्यगात्मनः सकाशाद्विभज्य प्रदर्श्यत इत्यर्थः॥१

ननु केयं गुहा यस्यां निहितं ब्रह्म कोशपंचविवेकेनावबुध्यत इत्याशंक्य प्रकृताया गुहाशब्देनाविवक्षितम
र्थमाह॥ देहादिति॥ देहादन्नमयात्प्राणमयः अभ्यंतरः आंतरः प्राणात्प्राणमयान्मनः मनोमयः अभ्यंतरं अं
तरं ततो मनोमयात्कर्त्ता विज्ञानमयः अंतर इत्यनुबध्यते॥ ततो विज्ञानमयाद्भोक्ता आनंदमयः सोपि पूर्ववदा
न्तर इत्यर्थः॥ सेयमन्नमयाद्यानंदमयान्तानां परंपरा गुहाशब्देनोच्यत इत्यर्थः॥ २॥ इदानीमन्नमयस्य

देहादभ्यंतरः प्राणः प्राणादभ्यंतरं मनः॥ ततः कर्त्ता ततो भोक्ता गुहा सेयं प
रंपरा॥ २॥ पित्रभुक्तान्नजाद्वीर्याज्जातोन्नेनैव वर्द्धते॥ देहः सोन्नमयो नात्मा प्रा
क्चोर्द्ध्वं तदभावतः॥ ३॥

स्वरूपं तदनात्मत्वं च दर्शयति॥ पित्रभुक्तान्नजादिति॥ पित्रभुक्तान्नजान्मातपित्र्यां भुक्ताद्यद्व्रीह्या
दिलक्षणादन्नाज्जायमानं यद्वीर्यमस्ति॥ तस्माद्वीर्याद्यो देहो जातः पश्चाज्जननानंतरं क्षीराद्यन्नेनैव वर्द्ध
ते स देहोन्नमयोन्नस्य विकारः॥ स आत्मा न भवति कुत इत्यत आह प्रागिति॥ जन्मनः प्राक् मरणादूर्द्ध्वं च तद
भावस्तस्य देहस्याभावात्॥ इत्यर्थः॥ ३॥

विनाशाध्यासितो देह आत्मा न भवति कार्यत्वाद्घटवदिति ॥ हेतुरस्तु साध्यं मास्त्वित्यविपक्षे बाधकाभावादप्रयोजकोऽयं हे
तुरित्याशंक्याकृताभ्यागमकृतविप्रनाशरूपबाधकसद्भावान्नैवमिति परिहरति ॥ पूर्वजन्मनीति ॥ एतद्देह[stain]रूप
स्यात्मनः पूर्वस्मिन्जन्मन्यसत्त्वादेतज्जन्महेतुभूतस्यासंचितस्य जन्मनो[stain]ऽङ्गीक्रियमाणत्वादकृताभ्यागमः प्रसज्येत त
प्या ४ था भाविजन्मन्य[stain]स्य देहरूपस्यात्मनोऽसत्त्वादत्रानादिहानुष्ठितयोः पुण्यपापयोः फलतो भोक्तुरभावेन भोगमंतरे
णापि कर्मक्षयः प्रसज्येतातोऽयं कृतविप्रणाशः ॥ एवं कृतविप्रनाशकृताभ्यागमरूपबाधकसद्भावादात्मनः कार्यत्वं नांगीकर्त
व्यमिति भावः ॥ ४ ॥ एवमन्नमयकोशस्यानात्मत्वं प्रदर्श्य प्राणमयकोशस्वरूपं तदनात्मत्वं च दर्शयति ॥ पूर्ण इति ॥

पूर्वजन्मन्यसत्[stain]त्येतज्जन्म संपादयेत्कथं ॥ भाविजन्मन्यसत्कर्म न भुंजीतेह संचि
तं ॥ ४ ॥ पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्तकः ॥ वायुः प्राणमयो नासावात्मा चैतन्य
वर्जनात् ॥ ५ ॥ अहंतां ममतां देहे गेहादौ च क[stain]रोति यः ॥ कामाद्यवस्थया भ्रांतो नासावा
त्मा मनोमयः ॥ ६ ॥

यो वायुर्देहे पूर्णः पादादिमस्तकपर्यंतं व्यापकः सन्बलं यच्छन् व्यानरूपेण सामर्थ्यं प्रयच्छन्नक्षाणां चक्षुरा
दीनामिंद्रियाणां प्रवर्तकः प्रेरको वर्तते स वायुः प्राणमय इत्युच्यते ॥ असावप्यात्मा न भवति ॥ तत्र हेतुमाह चैतन्य
वर्जनादिति ॥ विवादाध्यासितः प्राणः आत्मा न भवति जडत्वात् घटादिवदिति भावः ॥ ५ ॥ इदानीं मनोमयस्वरूपप्रदर्शनपू
र्वकं तस्याप्यनात्मत्वमाह ॥ अहंतामिति ॥ देहेऽहंतामहंभावं गेहादौ ममतां मदीयत्वाभिमानं च यः ॥ करोति असौ मनो
मयः आत्मा न भवति कुतस्तत्राह ॥ कामाद्यवस्थया भ्रांत इति हेतुगर्भितं विशेषणं ॥ कामक्रोधादिवृत्तिमत्त्वेनानित्य
तसं[stain]भवत्वादित्यर्थः ॥ तथा च मनोमय आत्मा न भवति विकारवत्त्वाद्देहवदिति भावः ॥ ६ ॥

नान

अनंतरं कर्तृशब्दवाच्यस्य विज्ञानमयस्य स्वरूपं प्रदर्शयन् तदनात्मत्वं दर्शयति ॥ लीनेति ॥ लीना सुप्ताविति ॥ या गानखाग्रग
चिच्छायोपेता धीश्चिदाभाससहिता बुद्धिः सुप्तौ सुषुप्तिकाले लीना विलीना ॥ बोधे जागरणकाले आनखाग्र
पर्यंतं वर्त्तमाना सती वपुः शरीरं व्याप्नुयात् संव्याप्य वर्त्तते सा विज्ञानमयशब्दभाक् विज्ञानमयश
ब्देनोच्यमाना नात्मा ॥ सावयवत्वान्न भवतीति जलयाद्यवस्थावत्त्वाद्दिदिवदित्यर्थः ॥७॥ ननु मनोबुद्ध्योरंतः द्वया।

लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा ॥ चिच्छायोपेतधीर्नात्मा विज्ञानमय
शब्दभाक् ॥७॥ कर्तृत्वकरणत्वाभ्यां विक्रियेतांतरिंद्रियं ॥ विज्ञानमनसी चांतर्बहि
ःस्थे ते परस्परं ॥८॥

करणत्वाविशेषान्मनोमयविज्ञानमयरूपेण कोशद्वयकल्पनानुपपन्नेत्याशंक्य कर्तृत्वकरणत्वाभ्यां भेदसद्भा
वाद्द्रष्टतरस्य मनोमयत्वादित्येदरत्याह ॥ कर्तृत्वेति ॥ अंतरिंद्रियमंतःकरणं कर्तृत्वकारणत्वाभ्यां कर्तृरूपेण करणरूपेण च विक्रियेत । क्रि२
परिणमत इत्यर्थः ॥ एते कर्तृकरणे विज्ञानमनसी विज्ञानमनःशब्दवाच्ये भवतः एते च परस्परम् अंतर्बहिर्भा
वेन वर्त्तेते तस्मात् कोशद्वयत्वमुपपद्यत इत्यर्थः ॥८॥

इदानीं भोक्तृशब्दवाच्यस्यानंदमयस्यानात्मत्वं दर्शयन् तस्य स्वरूपमाह ॥ काचिदिति ॥ पुण्यभोगे पुण्यकर्मफलानुभवकाले काचिद्धीवृत्तिरंतर्मुखा सती आनंदप्रतिबिंबभाक् आत्मरूपस्यानंदस्य प्रतिबिंबं भजते सैव भोगशांतौ पुण्यकर्मफलभोगोपरमे सति निद्रारूपेण लीयते विलीना भवती सा वृत्तिरानंदमय इत्यभिप्रायः ॥ ९ ॥ तस्यानात्मत्वमाह ॥ कदाचित्कत्वत इति ॥ अयमानंदमयोऽपि कदाचित्कत्वादात्मा न स्यात् दण्डादिपदार्थवदित्यर्थः ॥ ननु विद्यमानानामानंदमयादीनां सर्वेषामात्मत्वनिरासे नैरात्म्यप्रसक्तिरित्याशंक्याह ॥ बिंबभूत इति ॥ बुद्ध्यादौ प्रति-

दा२

काचिद्धीरंतर्मुखावृत्तिरानंदप्रतिबिंबभाक् ॥ पुण्यभोगे भोगशांतौ निद्रारूपेण लीयते ॥ ९ ॥ कादाचित्कत्वतो नात्मा स्यादानंदमयोऽप्ययं ॥ बिंबभूतो य आनंद आत्मासौ सर्वदास्थितः ॥ १० ॥ ननु देहमुपक्रम्य निद्रानंदांतवस्तुषु ॥ मा भूदात्मत्वमन्यस्तु न कश्चिदनुभूयते ॥ ११ ॥

बिंबतयावस्थितस्य प्रियादिशब्दवाच्यस्यानंदमयस्य बिंबभूतः कारणभूतो य आनंदोऽसावेवात्मा भवति ॥ कुत इत्यत आह ॥ सर्वदेति ॥ नित्यत्वादित्यर्थः ॥ विवादाध्यासितं आनंद आत्मा भवितुमर्हति नित्यत्वात् यन्नात्मा न भवति नासौ नित्यो यथा देहादिः ॥ गगनादेरुक्त्या नैमित्तेना[illegible]निबन्धनो नैकांतिकतेति भावः ॥ १० ॥ चोदयति ॥ नन्विति ॥ अन्नमयाद्यानंदमयांतानां कोशानामुक्तैर्हेतुभिरनात्मत्वं न घटते चेन्मा घ[illegible]टस्य अन्यस्यात्मानुपलभ्यमानत्वान्नैव संभवति ॥ ११ ॥ गाण्पकतान व

त्व२

पारिहरति बाढमिति || अत्र निद्राशब्देन निद्रानंदौ लक्ष्यते | निद्रादयो देहांता उपलभ्यंते न्यो नानुभूयत इति यदु- पा
क्तं तत्सत्यं || कथं तर्हि तदतिरिक्तस्यात्मनोंगीकार इत्यत आह तथापीति || अन्यस्यानुपलभ्यमानत्वेपि यद्बलादेतेषामा-
नंदमयादीनामुपलभ्यमानता भवति सोनुभवः कथं नांगीक्रियत इत्यर्थः || १२ || नन्वेवं चेदन्य आत्मा यदि विद्येत तर्हि उप-
लभ्येत न चोपलभ्यते तेनास्तीत्याशंक्याह || स्वयमिति || आनंदमयादीनां साक्षिणोनुभवस्वरूपत्वादेवानुभाव्यत्वं ना-

बाढं निद्रादयः सर्वेनुभूयंते न चेतरः || तथाप्येतेनुभूयंते येन तं को निवारयेत् |
|| १२ || स्वयमेवानुभूतित्वाद्विद्यते नानुभाव्यता || ज्ञातृज्ञानांतराभावादज्ञेयो न त्वसत्त-
या || १३ ||

स्तीति || अनुभवरूपत्वेप्यनुभाव्यत्वं कुतो न स्यादित्याशंक्याह || ज्ञातृज्ञानांतराभावादिति || ज्ञाता च ज्ञानं च ज्ञा-
तृज्ञाने अन्ये ज्ञातृज्ञाने ज्ञातृज्ञानांतरे तयोरभावस्तस्मादज्ञेयः || ज्ञानविषयो न भवतीति || ज्ञा[illegible]यं ज्ञा वा ज्ञानज्ञा-
पते स्वस्यैवास्य त्वा ह्यो किमत्र विनिगमने कारणमित्यत आह || न त्वसत्तयेति || निद्रानंदादिसाक्षित्वेनास्य स्व-
रूपमेवानिराकृतत्वादिति भावः || १३ ||

कि१

अनुभवरूपस्यात्मनोनुभाव्यत्वाभावेदृष्टांतमाह॥ माधुर्यादीति॥ आदिशब्देनाम्लादयोगृह्यंते॥ माधुर्यादयःस्वभावाःसहजाधर्मविशेषायेषांतेमाधुर्यादिस्वभावाःगुडादयस्तेषामन्यत्रस्वस्मादन्यस्मिन्पदार्थेषुचणकादिषुस्वगुणार्पणंस्वगुणान्माधुर्यादीनर्पयंतीतिस्वगुणार्पिणस्तेषांस्वस्मिन्स्वस्वरूपेगुडादिलक्षणेतदर्पणापेक्षातेषांमाधुर्यादी

आ४ नामर्पणेसंपादनेपेक्षाकांक्षामाधुर्यादिकंकेनचित्पदार्थेनसंपादनीयमित्येवंरूपानोनैवविद्यतेकिंत्वन्यदर्थकंनास्तिगुडादीनांमाधुर्यादिप्रदंवस्त्वंतरंनास्तीत्यर्थः॥१४॥ सदृष्टांतंफलितमाह॥ अर्पकांतरेति॥ माधुर्य

माधुर्यादिस्वभावानामन्यत्रस्वगुणार्पिणां॥ स्वस्मिंस्तदर्पणापेक्षानोनचास्त्यन्यदर्थकं॥१४॥ अर्पकांतरराहित्येप्यस्त्येषांतत्स्वभावता॥ माभूत्तथानुभाव्यत्वंबोधात्मातुनहीयते॥१५॥ स्वयं ज्योतिर्भवत्येषपुरोस्माद्भासतेखिलात्॥ तमेवभांतमन्वेतितद्भासाभासतेजगत्॥१६॥

दिसमर्पकवस्त्वंतराभावेपिएषांगुडादीनांमाधुर्यादिस्वभावतायथाविद्यतेएवमात्मनोनुभ प्या१
वविषयत्वंमाभूदनुभवरूपतातुभवत्येवेत्यर्थः॥१५॥ उक्तार्थेप्रमाणमाह॥ स्वयमिति॥ अयमात्मापुरु
षःस्वयंज्योतिर्भवति॥ अस्मात्सर्वस्मात्पुरतःसुविभातमेवतमेवभांतमनुभातिसर्वंतस्यभासासर्व
मिदंविभातीतिश्रुतेरयमात्मनःस्वप्रकाशत्वंबोधयतीत्यर्थः॥१६॥

येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति वाक्यमर्थतः पठति ॥ येनेदमिति ॥
येन साक्षिचैतन्यस्वरूपेणात्मनाइदं सर्वं दृश्यजातं जानते प्राणिनस्तं साक्षिणमात्मानमन्येन केन साधनभूते
न२ न जडेन ज्ञातारमवगच्छेयुः ॥ पुमांस इत्यस्येव वाक्यस्य तात्पर्यमाह ॥ विज्ञातारमिति ॥ दृश्यजातस्य ज्ञातारं केन दृश्य
भूतेन विद्याद्विजानीयात् न केनापि जानातीत्यर्थः ॥ ननु मनसो ज्ञास्यतीत्याशंक्याह ॥ शक्तमिति ॥ साधनं तु ज्ञा
नसाधनं तु मनो वेद्ये ज्ञातव्ये विषये शक्तं समर्थं न तु ज्ञातर्यात्मनि ॥ नैव वाचा न मनसेत्यादिश्रुतेः ॥ तस्या

येनेदं जानते सर्वं तत्केनान्येन जानताम् । विज्ञातारं केन विद्याच्छक्तं वेद्ये तु साधनम् ॥ १७ ॥
स वेत्ति वेद्यं तत्सर्वं नान्यस्तस्यास्ति वेदिता ॥ विदिताविदिताभ्यां तत्पृथग्बोधस्वरूपकम् ॥ १८ ॥

ऽपि वेद्यत्वे कर्मकर्तृत्वविरोधाद्भेति भावः ॥ १७ ॥ आत्मनः स्वप्रकाशत्वमेवं स वेत्ति वेद्यं न च तस्यास्ति वेत्ता ॥ अन्यदे दर्शयति४
व तद्विदितादथो अविदितादधीति वाक्यद्वयमपि प्रमाणमिति मत्वा न स्तौ वाक्यद्वयमर्थतः पठति ॥ स वेत्तीति ॥ स
आत्मा यद्यद्वेद्यं तत्सर्वं वेत्ति तस्यात्मनो वेदिता ज्ञाता अन्यो नास्ति तद्बोधस्वरूपकं ब्रह्म ॥ विदिताविदिताभ्यां विदितं
ज्ञातं ज्ञानेनाविषयीकृतं अविदितमज्ञानेनावृतं ताभ्यां पृथग्विलक्षणं बोधस्वरूपत्वादेवेत्यर्थः ॥ १८ ॥

अतात १

ननुविदिताविदितातिरिक्तो बोधोऽनुभूयत इत्याशंक्य विदितविशेषणस्य भेदनस्यैव बोधत्वात्तदनुभवाभावे विदितस्याप्यनुभवाभावप्रसंगाद्बोधानुभवोऽवश्यमंगीकर्तव्य इति सोपहासमाह ॥ बोधैर्व्याप्तेति ॥ यस्याज्ञस्य बो पि घटादिस्फुरणरूपेऽप्यनुभवः साक्षात्कारः कथंचन कथमपि न जायते नोत्पद्यते तं नरसमाकारं लोके स्वं स्वको वक्त्रा उमनुष्यः शास्त्रं कथं बोधयेत् न कथमपि बोधयेदित्यर्थः ॥१९॥ बोधं न बुध्यत इत्युक्तिरेव व्याहतेति सदृष्टान्तमाह । जिह्वा मेसि रति ॥ मेपि जिह्वास्ति न वेत्त्युक्तिर्न घटते यथा लज्जायै केवलं लज्जाजननायैव भवति ॥ ननु जिह्वामत्त्वज्ञाय नाय जिह्वायाविना भाषणानु

बोधैर्व्याप्तेऽनुभवो यस्य न कथंचन जायते ॥ तं कथं बोधयेच्छास्त्रं लोके स्वं नरसमाकृतिं ॥१९॥
जिह्वा मेऽस्ति न वेत्त्युक्तिर्लज्जायै केवलं यथा ॥ न बुध्यते मया बोधो बोद्धव्य इति तादृशी ॥२०॥
यस्मिन् यस्मिन्नस्ति लोके बोधस्तत्तदुपेक्षणे ॥ यद्बोधमात्रं तद्ब्रह्मेत्येवंधीर्ब्रह्मनिश्चयः ॥२१॥

पपक्तेः एवं मया बोधो न बुध्यत इतः परं बोद्धव्य इत्युक्तिरपि तादृशी लज्जाहेतुरेव बोधेन विना तद्व्यवहारासिद्धेरित्यर्थः ॥२०॥ भवत्वेवं सबोधस्तथापि प्रकृते ब्रह्मभावबोधे किमायातमित्याशंक्याह ॥ यस्मिन्निति ॥ लोके यस्मिन् यस्मिन् जगति घटादिलक्षण विषये बोधो ज्ञानमस्ति तत्तदुपेक्षणे तस्य घटादिविषयस्योपेक्षणे नादरणे कृते सति यद्बोधमात्रं घटादिषु सर्वत्रानुस्यूतं तत्स्फुरणमस्ति तदेव ब्रह्मेत्येवंरूपा धीर्बुद्धिर्ब्रह्मनिश्चयो ब्रह्मावगतिरित्यर्थः ॥२१॥

२ देय२

त्यागेर

ननु घटादिविषयोपेक्षया तद्द्रष्टुरनुभवरूपं ब्रह्मावगम्यते चेत् कोशपंचकविवेको निःप्रयोजनः स्यादित्याशंक्य ब्रह्मणः प्र-
त्यग्रूपताज्ञानेन विना संसारानिवृत्तेस्त्यागाद्बोधोपयोगित्वान्न तस्यापि वैयर्थ्यमित्याह॥ पंचकोशपरित्यागे इति॥ पंचानां
कोशानामन्नमयादीनां परित्यागे कृते अनात्मत्वेन निरूपे कृते तत्साक्षिरूपस्य बोधस्यावशेषणात् स साक्षिरूपो बोध एवास्य स्वरू-
पं स्वं निजं रूपं ब्रह्मैव स्यात्॥ नन्वन्नमयादीनामनुभवसिद्धानां त्यागे शून्यपरिशेषः स्यादित्याशंक्याह॥ शून्यत्वमिति॥ तस्य सा-

पंचकोशपरित्यागे साक्षिबोधावशेषतः॥ स्वस्वरूपं स एव स्याच्छून्यत्वं तस्य दुर्घटं॥ २२॥
अस्ति तावत्स्वयं नाम विवादाविषयत्वतः॥ स्वस्मिन्नपि विवादश्चेत्प्रतिवाद्यत्र को भवेत्॥ २३॥

क्षिबोधस्य शून्यत्वं दुर्घटं दुःसंपाद्यमित्यर्थः॥ २२॥ दुर्घटत्वमेवोपपादयति॥ अस्तीति॥ स्वयंशब्दवाच्यं स्वरूपं लौकिकानां
वैदिकानां च तावदस्त्येव॥ कुत इत्यत आह॥ विवादाविषयत्वत इति॥ स्वस्वरूपस्याविप्रतिपत्तिविषयत्वाज्ञानादित्यर्थः॥ विपक्षे
बाधकमाह॥ स्वस्मिन्निति॥ आत्मन्यपि विप्रतिपत्तौ सत्यामत्रास्यां विप्रतिपत्तौ कः प्रतिवादी स्यान्न कोपीत्यर्थः॥ २३॥

ननु स्वांऽसत्त्ववाद्येव प्रतिवादी न विद्यते इत्याशंक्य तथाविधः कोऽपि नास्तीत्याह ॥ स्वासत्त्वमिति ॥ श्रौतिमेकोऽपि स्वाप्यान्यस्य स्वादर्शायं स्वस्याभावः केनापि नांगीक्रियत इत्यर्थः ॥ कुत एवं तिस्त्री यत इत्याशंक्याह ॥ अत एवेति ॥ यतः कस्मैचिन्न रोचते तत एव श्रुतिर ता स्वसत्त्ववादिनो बाधं ब्रूते २४ ॥ केऽपि श्रुतीरित्यादि कां छायामसन्नेवेत्यादिकां तां श्रुतिमर्थतः पठति ॥ असदिति ॥ यदि ब्रह्मास

स्वासत्त्वं तु न कस्मैचिद्रोचते विभ्रमं विना ॥ अत एव श्रुतिर्बाधं ब्रूते चासत्त्ववादिनः ॥२४॥
असद्ब्रह्मेति चेद्वेद स्वयमेव भवेदसत् ॥ अतोऽस्य मा भूद्वेद्यत्वं स्वसत्त्वं त्वभ्युपेयतां ॥२५॥
कीदृक्तदिति चेत्पृच्छेदीदृक्ता नास्ति तत्र हि ॥ यदनीदृगताद्दृक्च तत्स्वरूपं विनिश्चिनु ॥२६॥

दिति जानीयात्तर्हि स्वयमेव ब्रह्मणोऽसत्त्वज्ञानेऽसन्न भवेत् स्वस्यैव ब्रह्मरूपत्वादित्यर्थः ॥ फलितमाह ॥ अतोऽस्येति २५ यदानीमात्मनः स्वप्रकाशत्वं वस्तुकामस्तस्य वेद्यत्वाभावे कीदृक्स्वरूपमिति प्रश्नमुत्थाप्य पठति ॥ कीदृगिति ॥ अयमत्र प्रायः ॥ आत्मन ईदृक्त्वादिना केनचिद्रूपेण विशिष्टांगीकारे तेनैव रूपेण वेद्यत्वं स्यात्तदनंगीकारे शून्यत्वमिति सत्यमीदृक्त्वांगीकारे तथैव वेद्यत्वं तत्तु नांगीक्रियत इत्याह ॥ ईदृक्तेति ॥ उपलक्षणमेतत्ताद्दृक्त्वस्यापि ॥ उभयाभावमेवाह ॥ यदनीदृगिति
॥२६॥

नहि प्रतिज्ञामात्रेणार्थसिद्धिरित्याशंक्य ईदृक्तादृक्त्वशब्दयोरर्थमभिदधानस्तद्वाच्यत्वमुपपादयति ॥ अक्षाणामिति ॥ प्रत्यक्षस्यैव घटादेरीदृक्शब्दवाच्यत्वं दृष्टं परोक्षस्यैव धर्मादेस्तादृक्शब्दवाच्यत्वं द्रष्टुरात्मन इंद्रियजन्यज्ञानाविषयत्वाभावान्नेदृक्त्वं स्वत्वेनैव परोक्षत्वाभावान्न तादृक्त्वमित्यर्थः ॥ तर्हि स्वत्वमिति द्वितीयपद्यं फलप्रदर्शनव्याजेन परिहरति ॥ अवेद्य इति इंद्रियजन्यज्ञानाविषयत्वाभावेप्यपरोक्षत्वात्स्वप्रकाश इत्यर्थः ॥ अत्रायं प्रयोगः ॥ आत्मा स्वप्रकाशः ॥ संवित्कर्मतामं

अक्षाणां विषयस्त्वीदृक्परोक्षस्तादृगुच्यते ॥ विषयी नाक्षविषयः स्वत्वान्नास्य परोक्षता ॥ २७ ॥ अवेद्योऽप्यपरोक्षोऽतः स्वप्रकाशो भवत्ययं ॥ सत्यं ज्ञानमनंतं चेत्यस्तीह ब्रह्मलक्षणं ॥ २८ ॥

तरेणापरोक्षत्वात्संवेदनवदिति ॥ न चाविशेषणासिद्धो हेतुः ॥ आत्मनः संवित्कर्मकर्तृभावाविरोधप्रसंगात्स्व त्वे कर्म॰
स्वरूपेण कर्तृत्वं विशिष्टरूपेण कर्मत्वमित्यविरोध इति चेन्न गमनक्रियाया अप्येकस्यैव स्वरूपेण कर्तृत्वंविशिष्टरूपेण कर्मत्वमित्यतिप्रसंगात् ॥ न च साधनविकलो दृष्टांतः वेदनांतरापेक्षाया अनवस्थानादिति ॥ ननु × त्मनः स्वप्रकाशत्वासिद्धेपि ब्रह्मलक्षणाभावान्न ब्रह्मत्वासिद्धिरित्याशंक्य तल्लक्षणं तत्र योजयति ॥ सत्यमिति ॥ सत्यं ज्ञानमनंतं ब्रह्मेति श्रुत्या च ब्रह्मणो लक्षणमुक्तं तादृक्षात्मनि विद्यत इत्यर्थः ॥ २८ ॥ ॥ ॥

संवेदनस्य स्व

आत्मनः सत्यत्वोपपादनाय तावत्सत्यत्वस्य लक्षणमाह ॥ सत्यत्वमिति बाधशून्यत्वं सत्यमबाध्यं बाध्यत्वाभिप्रेत्येति तादृग्विवेक इति पू
र्वाचार्यैरुक्तत्वात् अस्तु एवं ते किं मायायामित्यत आह ॥ जगदिति जगतः स्थूलसूक्ष्मशरीरादिलक्षणस्य यो बाधः सुषुप्तिमूर्च्छासमाधिष्वविद्य
मानतात्साक्षित्वेनैव वर्तमानस्यात्मनो बाधः किंसाक्षिकः साक्षीअस्य बाधस्यासौ किंसाक्षिकः न कोपि साक्षी विद्यत इत्यर्थः ॥ असाक्षिकोऽस्तु बाधः
किं न स्यादित्याह ॥ नात्विति ॥ साक्षिरहितो बाधो नाभ्युपगन्तव्योऽन्यथाऽतिप्रसंगादिति भावः ॥२९॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति ॥ अपनीते त्मा ३
ष्विति मूर्तेषु गृहादिगतेषु घटादिषु अपनीतेषु गृहादिभ्यो निःसारितेषु सत्स्वपि यथापनेतुमशक्यं नभो अवशिष्यते ॥ एवं सव्यतिरि
क्तेषु मूर्तामूर्तेषु देहेन्द्रियादिषु निराकर्तुं शक्येषु नेतिनेतीति श्रुत्या निराकृतेषु सत्स्वपि अन्ते वसाने सर्वनिराकरणसाक्षित्वेन यो ॥

देहेषु

सत्यत्वं बाधराहित्यं जगद्बाध्यैकसाक्षिणः ॥ बाधः किंसाक्षिको ब्रूहि न त्वसाक्षिक इष्यते ॥२९॥
अपनीतेषु मूर्तेषु ह्यमूर्तं शिष्यते वियत् ॥ शक्येषु बाधितेष्वन्ते शिष्यते यत्तदेव तत् ॥३०॥ स
नकिंचिच्चे र्वबाधे न किंचिच्चेद्यन्न किंचित्तदेव तत् ॥ भाषा एवात्र भिद्यन्ते निर्बाधं तावदस्ति हि ॥३१॥

बोधोऽवशिष्यते स एवाबाधरहितत्वात्सत्य इत्यर्थः ॥३०॥ ननु प्रतीयमानस्य सर्वस्यापि निषेधे किंचिन्नावशिष्यते ततः कथं शिष्य
ते यत्तदेव तदित्यवशिष्टस्यात्मत्वमुच्यत इति शंकते ॥ सर्वबाध इति ॥ न किंचिदवशिष्यत इति वदतापि तथाप्रयोगसिद्धये सं चेर
ज्ञानविषयं ज्ञानमवश्यमभ्युपेतव्यमतस्तदेवास्मदभिमतात्मस्वरूपमित्यभिप्रायेण परिहरति ॥ यत्रेति ॥ न किंचिदिति शब्देन
यच्चैतन्यमुच्यते तदेव तद् ब्रह्मेत्यर्थः ॥ न किंचिदित्यज्ञानवाचकेन न किंचिच्छब्देन कथं चैतन्यमुच्यत इत्याशंक्य बाध
साक्षिणोऽवश्यमभ्युपेयत्वादभिधायकशब्दभेदेऽपि प्रतिपत्तिर्नाभिधेय इति परिहरति ॥ भाषा इति ॥ अत्र बाधसाक्षिणि प्रत्य
गात्मनि भाषा एव न किंचित्तत्त्वं ज्ञातृत्वादिशब्दा एवात्र भिद्यन्ते निर्बाधं बाधरहितं साक्षिचैतन्यं तु विद्यत एवेत्यर्थः ॥३१॥ ॥

मश२ श्रुति२

उक्तमर्थं श्रुत्यारूढं करोति ॥ अत एवेति ॥ यतः साक्षिचैतन्यमबाध्यमत एव नेति नेत्यात्मेति श्रुतिरतद्व्यावृत्तिरूपतो नात्मपदार्थान्निरा-
करणद्वारेण बाध्यं निराकरणयोग्यं सर्वमनात्मवस्तुजातं बाधित्वा निराकृत्यादो निराकर्तुमशक्यं प्रत्यक्स्वरूपं शेषयति नेतीति श्रु-
त्वाबाधित्वा तिः किं यायोग्यं बाधित्वाऽशक्यमवशेषयतीत्युक्तं ॥ तत्र कीदृशं बाधितुं शक्यं कीदृशं चाशक्यमिति विवक्षायां तदुभयं विविच्य दर्शयति ॥

नो।

अत एव श्रुतिर्बाध्यं बाधित्वा शेषयत्यदः ॥ स एष नेति नेत्यात्मेत्यतद्व्यावृत्तिरूपतः ॥ ३२ ॥
इदंरूपं तु यद्यावत्तत्त्यक्तुं शक्यतेऽखिलं ॥ अशक्यो ह्यनिदंरूपः स आत्मा बाधवर्जितः ॥ ३३ ॥

इदमिति ॥ इदमित्येवंरूपं दृश्यत्वेनानुरूपमानं रूपं यस्य देहादेः स इदंरूपं तु शब्दोऽवधारणे यद्यावदिति पदद्वयं सर्वद्र- श्रिया त्मसेहु
व्योपसंहारार्थं एवं च सति यद्दृश्यं तदखिलं त्यक्तुं शक्यत एवेत्यर्थः ॥ संपद्यतो अनिदंरूपः प्रत्यक्त्वेनेदंतया गंतुमयोग्यः सा- १
प्रसिद्धि द्योतके क्षी त्यक्तुमशक्यस्त्यक्तुमित्यर्थः ॥ हीति निपातेन त्यक्तुं स्वस्वरूपत्वेन त्यागायोग्यतां सूचयति ॥ फलितमाह ॥ स आत्मेति ॥ यो बाधरहि-
न२ तः साक्षी स एवात्मा नाहंकारादिदृश्य इत्यर्थः ॥

न्नवत्वात्मनोऽबाध्यत्वं प्रसक्ते किमायातमित्यत आह ॥ सिद्धमिति ॥ ब्रह्मणि ॥ ब्रह्मलक्षणो यत्सत्यत्वमभिहितं तत्तदात्म
नि सिद्धं नवनु सत्यत्वज्ञानत्वं कँ मित्याकांक्षायां तत्पूर्वमेवोपपादितमित्याह ॥ ज्ञानत्वमिति ॥ स्वयमेवानुभूतित्वाद्विद्यतेना
नुभाव्यतेत्यादिभिर्वचनैर्ज्ञानरूपत्वं पूर्वमेवाभिहितमित्यर्थः ॥ ३४ ॥ ननु सत्यत्वज्ञानत्वयोरात्मनि सिद्धत्वेप्यानंत्यं न
घटेत ब्रह्मण्यपि तस्यासिद्धेरित्याशंक्य ब्रह्मणि तावत्तत्साधयति ॥ न व्यापित्वादिति ॥ नित्यं विभुं सर्वगतं सुसूक्ष्ममा
काशवत्सर्वगतश्च नित्यः । नित्यो नित्यानां चेतनश्चेतनानां इदं सर्वं यदयमात्मा सर्वं ह्येतद्ब्रह्मैवेदं सर्वमित्यादिश्रु

सिद्धं ब्रह्मणि सत्यत्वं ज्ञानत्वं तु पुरेरितं ॥ स्वयमेवानुभूतित्वादित्यादिवचनैः स्फुटं ॥ ३४ ॥ न व्यापित्वाद्देशतोंतो नित्यत्वान्नापि कालतः ॥ न वस्तुतोपि सार्वात्म्यादानंत्यं ब्रह्मणि त्रिधा ॥ ३५ ॥ देशकालान्यवस्तूनां कल्पितत्वाच्च मायया ॥ न देशादिकृतोंतोस्ति ब्रह्मानंत्यं स्फुटं ततः ॥ ३६ ॥

तिषु व्यापित्वनित्यत्वसर्वात्मत्वप्रतिपादनाद्ब्रह्मणस्त्रिविधमप्यानंत्यं देशकालवस्तुकृतपरिच्छेदराहित्य मस्त्यमेतव्यमित्यर्थः ॥ ३५ ॥ न केवलं श्रुतिः किंतु युक्तितोपीत्याह ॥ देशकालेति ॥ परिच्छेदहेतूनां देशकालान्यवस्तु नां मायया कल्पितत्वाद्गंधर्वनगरादिभिर्गगनस्येव न देशादिभिः कृतः पारमार्थिकः परिच्छेदो ब्रह्मणि संभवति य तोतो ब्रह्मण्यानंत्यं तावद्युक्तमेवातः सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवात्र हि नैनं विचिकित्स्यमित्यों सत्यमात्मैव न हि होदेवो ब्रह्म भवति ॥ अयमात्मा ब्रह्मेत्यादिभिरात्मनो ब्रह्माभेदप्रतिपादनात्तस्याप्यानंत्यं सिद्धमिति तात्पर्यं ॥ ३६ ॥ ॥ ब्रमाप५

वं

तदे२

नपांपायर

ननु जडस्य जगतो ब्रह्मण्यारोपितत्वेन ब्रह्मणः परिच्छेदकत्वाभावेऽपि चेतनयोर्जीवेश्वरयोस्तयोः संभवात्तत्कृतपरिच्छे
दवत्त्वेनानंत्यं ब्रह्मणो न संगच्छत इत्याशंक्य तयोरप्यौपाधिकरूपत्वेन पारमार्थिकत्वाभावान्न तयोरपि वास्तवपरिच्छेदहे
तुत्वमित्यभिप्रायेणाह ॥ सत्यमिति ॥ यत्सत्यादिरूपं ब्रह्म तद्वस्तु तदेव पारमार्थिकं तस्य ब्रह्मणो यल्लोकप्रसिद्धमीश्वरत्वं
जीवत्वं च तद्द्वयं मायोपाधिद्वयेन कल्पितमतः कल्पितत्वादेव जडवज्जीवेश्वरयोरपि तत्परिच्छेदकत्वाभावः ॥ २७ ॥ किं तदुपा

सत्यं ज्ञानमनंतं यद्ब्रह्म तद्वस्तु तस्य तत् ॥ ईश्वरत्वं च जीवत्वमुपाधिद्वयकल्पितं
॥ २७ ॥ शक्तिरस्त्यैश्वरी काचित्सर्ववस्तुनियामिका ॥ आनंदमयमारभ्य गूढा सर्वेषु वस्तु
षु ॥ २८ ॥

धिद्वयमित्याकांक्षायां तदुभयं क्रमेणाऽऽदिदर्शयिषुरादावीश्वरोपाधिभूतां शक्तिं निरूपयति ॥ शक्तिरिति ॥ ऐश्वरी ईश्वरत्वो
पाधितया ईश्वरसंबंधिनी काचित्सदसत्वादिभीरूपैरनिर्वक्तुमशक्या सर्ववस्तुनियामिका सर्वेषामंतर्यामिब्राह्मणोक्तानां पृथि
व्यादीनां वस्तूनां नियमनकर्त्री शक्तिरस्ति सा कुत्रास्तीति कुतो वा नोपलभ्यत इत्याशंक्याह ॥ आनंदेति ॥ आनंदमयादिषु ब्रह्मा
डांतेषु सर्वेषु वस्तुषु गूढा वर्त्तते अतो नोपलभ्यत इत्यर्थः ॥ २८ ॥

ब्राह्मण ध्या
पर

नियमेनानुपलभ्यमानायास्तस्या असत्त्वमेव किं न स्यादित्याशंक्य जगन्नियमान्यथानुपपत्त्या सावश्यमभ्युपेयेत्याह ॥ वस्तु
धर्मा इति वस्तूनां पृथिव्यादीनां काठिन्यद्रवत्वादयो यदा शक्त्या न व्यवस्थाप्यन्ते तदा तेषां धर्माणां सांकर्याद्विप्लुतेन एकजा
वस्थानाज्जगद्विप्लवेत ॥ तन्नियतव्यवहारविषयतां प्राप्नुयादित्यर्थः ॥ स्वल्पत्वादिति प्रसिद्धं द्योतयति ॥ ३९ ॥ ननु जडाया
ग्रस्या जगतो नियामकत्वं न युज्यत इत्याशंक्याह ॥ चिच्छायेति ॥ सा शक्तिश्चिच्छायावेशतश्चिदाभासप्रवेशाच्चेतनेव चे
तनत्वमापन्नेव विभातीति प्रतीयते ततोऽस्या नियामकत्वं घटत इति भावः ॥ अस्तु प्रस्तुते किमायातमित्यत आह ॥ तच्छक्ती

वस्तुधर्मा नियम्येरन् शक्त्या नैव यदा तदा ॥ अन्योन्यधर्मसांकर्याद्विप्लवेत जग
त्खलु ॥ ३९ ॥ चिच्छायावेशतः शक्तिश्चेतनेव विभाति सा ॥ तच्छक्त्युपाधिसंयोगा
द्ब्रह्मैवेश्वरतां व्रजेत् ॥ ४० ॥ कोशोपाधिविवक्षायां याति ब्रह्मैव जीवतां ॥ पिता पि
तामहश्चैकः पुत्रपौत्रौ यथा प्रति ॥ ४१ ॥

ति ॥ सा चासौ शक्तिश्चेति कर्मधारयः स्वैवोपाधिस्तेन संयोगः स्वं बंधस्तस्माद्ब्रह्मैव सत्त्वादिलक्षणमीश्वरतां सर्व
ज्ञत्वादिधर्मयोगितां व्रजेत्प्राप्नुयात् ॥ ४० ॥ जीवत्वोपाधिभूतानां कोशानां प्रागेवाभिहितत्वात्तन्निमित्तकं जीवत्वमि
दानीमाह ॥ कोशोपाधीति ॥ कोशात्मकोपाधिः कोशोपाधिस्तद्विवक्षायां पर्यालोचनायां क्रियमाणायां ब्रह्मैव सत्त्वा
दिलक्षणमेव जीवव्यवहारविषयतां गच्छति ॥ नन्वेकस्यैव विरुद्धधर्मद्वययोगित्वं युगपत्कथं घटत इत्याशं
क्याह ॥ पितेति ॥ यथैक एव देवदत्तादिरेक एव पुत्रं प्रति पिता भवति पौत्रं प्रति तु पितामहस्तद्वद्ब्रह्मापि कोशोपाधिविवक्षायां
जीवो भवति शक्त्युपाधिविवक्षायामीश्वरश्च भवतीत्यर्थः ॥ ४१ ॥ ॥ ॥ ॥

वस्तुतस्तु जीवत्वमीश्वरत्वं वा ब्रह्मणो नास्तीत्येतत्सदृष्टान्तमाह ॥ पुत्रादेरिति ॥ इदानीमुक्तज्ञानस्य फलमाह ॥ ४२ ॥ य एवमिति ॥ यस्साधनचतुष्टयसंपन्न एवमुक्तेन प्रकारेण पंचकोशविवेकपुरःसरं ब्रह्मप्रत्यगात्मनो सत्यादिलक्षणं वेद साक्षात्करोति स एव स्वयं ब्रह्मैव भवति ॥ स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति ॥ ब्रह्मविदाप्नोति परमित्या

पुत्रादेरविवक्षायां न पिता न पितामहः ॥ तद्वन्नेशो नापि जीवः शक्तेः कोशाविवक्षणे ॥ ४२ ॥ य एवं ब्रह्म वेदैष ब्रह्मैव भवति स्वयं ॥ ब्रह्मणो नास्ति जन्मातः पुनरेष न जायते ॥ ४३ ॥ इति श्रीविद्यारण्यमुनिवर्यविरचितः पंचकोश समाप्तः ॥

दिश्रुतिभ्यः ॥ ततोऽपि किमित्यत आह ॥ ब्रह्मण इति ॥ न जायते म्रियते वा विपश्चिदित्यादिश्रुतेर्ब्रह्मणस्तावज्जन्म नास्ति अतस्तद्भावो विद्वानपि स्वात्मनस्तद्रूपत्वावगमान्नैव जायते न स पुनरावर्तत इति श्रुतेरिति ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्येन विरचिता पंचकोशविवेकव्याख्या समाप्तः ॥

गंथस्य २

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ मया द्वैतविवेकस्य क्रियते पदयोजना॥१॥ चिकीर्षितस्य निःप्रत्यूहप
रिपूरणार्थाभिः कथितदेवतातत्त्वानुस्मरणलक्षणं मंगलमाचरन् तस्य वेदांतप्रकरणत्वाच्छास्त्रीयमेवानुबंधच
तुष्टयं सिद्धवत्कृत्य ग्रंथारंभं प्रतिजानीते॥ ईश्वरेणेति॥ ईश्वरेण कारणोपाधिकेनांतर्यामिणा जीवेनाधिकार्योपा
धिकेनाहंप्रत्ययिना च सृष्टमुत्पादितं द्वैतं जगद्विविच्यते विभज्य प्रदर्श्यते॥ अस्य द्वैतविवेचनस्य काकदंतपरीक्षा
वद्भिः प्रयोजनत्वं वारयति॥ विवेक इति॥ विवेके जीवेश्वरसृष्टयोर्द्वयोर्विवेचने कृते सति जीवेन पर्वक्रमेण हेयः परि

ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते॥ विवेके सति जीवेन हेयो बंधः स्फुटीभ
वेत्॥१॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं॥ स मायी सृजतीत्याहुः श्वेताश्वत
रशाखिनः॥२॥

त्याज्यो बंधो बंधहेतुर्द्वैतं स्फुटीभवेत् स्पष्टतां गच्छेदेतावज्जीवेन हेयमिति॥ निश्चीयत इत्यर्थः॥१॥ तत्त्वदृष्टद्वारा
जीवानामेव जगद्धेतुत्वं वादिनो वर्णयंतीत्यतः कथमीश्वरस्य स्रष्टृत्वमुच्यते जगत इत्याशंक्य बहुश्रुतिविरोधा
न्नेदं चोद्यमुत्थापयितुमर्हतीत्यभिप्रेत्य श्वेताश्वतरवाक्यं तावद्दर्शयतः पठति॥ मायामिति॥ मायोपाधिकमीश्वरं
प्रकृत्या समं मायी सृजते विश्वमेतादृगिति तस्यैवेश्वरस्य जगत्स्रष्टृत्वं श्वेताश्वतरशाखिनो वर्णयंतीत्यर्थः॥२॥

निर्विघ्न

प्रारब्धद्वारा

स्तुत्या १

ऐतरेयोपनिषद्वाक्यमर्थतोऽनुक्रामति ॥ आत्मेति ॥ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् । स ईक्षत लो
कान्नु सृजा इति स इमांल्लोकानसृजतेत्यनेन वाक्येनाद्वितीयस्य परमात्मन एव जगत्स्रष्टृत्वं बह्वृचा ऋक्शाखा म
ध्यायिन आहुरित्यर्थः ॥ २ ॥ ईश्वरस्य जगत्कारणत्वे तैत्तिरीयश्रुतिरपि प्रमाणमित्यभिप्रेत्य तद्वाक्य
र्थतः पठति ॥ एवेति श्लोकद्वयेन ॥ सत्यं ज्ञानमनन्तं ब्रह्मेत्युपक्रम्य तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिना

आत्मा वा इदमग्रेऽसत्सदेतत्तत्सृजा इति ॥ एकत्वेनासृजल्लोकान्स एतानि
ति बह्वृचाः ॥ ३ ॥ एवं वा ह्येतज्जगल्लोको व्यबध्यन्न देहोः क्रमाद्दमी ॥ सम्भूता ब्रह्मण
स्तस्मादिति स्मादीत्मनोऽस्ति खल्ताः ॥ ४ ॥ बहु स्यामहमित्येव तः प्रजायेयेति कामतः त
पस्तप्त्वा सृजते त्स्वयं जगदित्याह तित्तिरिः ॥ ५ ॥

नात्मरूपत्वे तेन वाक्येन गुहाहितत्वेन प्रत्यगात्मना ब्रह्मण आकाशादिदेहपर्यन्तं जगदुत्पन्नमित्यभिप्रायो
परिदृष्टा दयि सोऽकामयत बहु स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंचेति वाक्येन तस्यै ॥ ॥
न ब्रह्मणो जगत्सृजने इच्छापूर्वकपर्यालोचनेन जगत्स्रष्टृत्वं तित्तिरिराहेत्यर्थः ॥ २८ ॥

विचार?

ष्टांदोऽपि ब्रह्मण एव जगत्स्रष्टृत्वं श्रुत्याभित्याह ॥ इदमग्र इति ॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति
सद्रूपमद्वितीयं ब्रह्मोपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादिना तत्स्यैवेक्षणपूर्वकं तेजोऽबन्नस्रष्ट्
त्वमभिधाय तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति ॥ आंडजं जारजमुद्भिज्जमित्यादिनांडजादिशरीरनिर्मातृत्वं
चस्यामया वर्ण्यत इत्यर्थः ॥ ६ ॥ मुंडकोपनिषद्यपि तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभवंते सरू
पदार्थाः ५ पाः तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापि यंतीत्यक्षरशब्दवाच्याद्ब्रह्मणो जगदुत्पत्तिः श्रूयत इत्याह ॥

इदमग्रे सदेवासीद्बहुत्वाय तदैक्षत ॥ तेजोबन्नांडजादीनि ससर्जेति च सामगाः ॥ ६ ॥
विस्फुलिंगा यथा वह्नेर्जायंतेऽक्षरतस्तथा ॥ विविधाश्चिज्जडा भावा इत्याथर्वणि
कीश्रुतिः ॥ ७ ॥ जगदव्याकृतं पूर्वमासीद्व्याक्रियताधुना ॥ दृश्याभ्यां नामरूपाभ्यां वि स्वायंभुवी
राडादिषु ते स्फुटे ॥ ८ ॥ विराण्मनुर्नरा गावः खराश्वाजावयस्तथा ॥ पिपीलिकावधि
द्वंद्वमिति वाजसनेयिनः ॥ ९ ॥

विस्फुलिंगा इति ॥ ७ ॥ एवं छंदोदार एव केप्यव्याकृतशब्दवाच्याद्ब्रह्मणो नामरूपात्मकं जगदुत्पन्नमिति श्रुतिमित्याह निराकार १
जगतः२ जगदिति द्वाभ्यां तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदंरूप इति वाक्येन सृष्टेः पुरा स्पष्टनामरूप भिंदरूपर
तेनाव्याकृतशब्दवाच्यान्मायोपाधिकाद्ब्रह्मणो नामरूपयोः स्पष्टीकरणलक्षणात्सृष्टेरनंतरं तयोर्नामरूपयोर्विराडादिषु स्पष्टता
परतः२ कार्येषु स्पष्टता च तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियते सौ नामायमिदंरूप इति वाक्येनाभिहिता ते च विराडादयश्चात्रैव
वेदमग्र आसीत्पुरुषविध इत्यादिना एवमेव यदिदं किंच मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजतेत्येते न दर्शिता इत्यर्थः ॥ ८ ॥ ९ ॥

ति

उदाहृताभिः श्रुतिभिर्द्वैतस्य स्रष्टाभिधानानन्तरं ब्रह्मणो जीवरूपेण तत्र प्रवेशोऽप्यभिहित इत्याह ॥ कृत्वेति ॥ श्रुतयो जैवं जीवसंबन्धि रूपान्तरम् अविक्रियब्रह्मणो विलक्षणं विकारिरूपमित्यर्थः ॥ देहे देहजाते ॥ जीवत्वं कुत इत्यत

कृत्वा रूपान्तरं जैवं देहे प्राविशदीश्वरः ॥ इति ताः श्रुतयः प्राहुर्जीवत्वं प्राणधारणात् ॥१०॥ चैतन्यं यदधिष्ठानं लिङ्गदेहश्च यः पुनः ॥ चिच्छाया लिङ्गदेहस्था तत्संघो जीव उच्यते ॥११॥

आह ॥ जीवत्वमिति ॥ प्राणादीनां स्वामित्वेन प्रेरकत्वं प्राणधारणं तस्मात्तु जैवं रूपं कृत्वा प्राविशदित्युक्तम् ॥१०॥ किं तदित्यपेक्षायामाह ॥ चैतन्यमिति ॥ अधिष्ठानं लिङ्गदेहकल्पनाधिष्ठानं कूटस्थचैतन्यमस्ति यच्च तत्र कल्पितो लिङ्गदेहो यश्च तस्मिंल्लिङ्गदेहे विद्यमानश्चिदाभासः तत्संघस्तेषां त्रयाणां समूहो जीवशब्देनोच्यत इत्यर्थः ॥११॥

चैर

नन्वीश्वरस्यैव जीवरूपेण प्रविष्टत्वे तस्याज्ञत्वदुःखित्वादिविरुद्धधर्मवत्त्वं कुतस्त्याशंक्याह ॥ माहेश्वरीति ॥
माहेश्वरी मायेति नतु महेश्वरमिति श्रुत्युक्तामहेश्वरसंबंधिनी या माया अस्ति तस्या निर्माणशक्तिवत् जगत्सर्जनसा
मर्थ्यवत् मोहशक्तिश्च मोहनसामर्थ्यमप्यस्ति तदेतज्जडं मोहकमिति श्रुतेः ॥ ततः किमित्यत आह ॥ तामिति ॥
सा मोहनशक्तिस्तत्पूर्वोक्तं जीवं मोहयति ॥ चिदानंदादिस्वरूपज्ञानरहितं करोति ॥ १२ ॥ ततोऽपि किमित्यत आ

माहेश्वरी तु माया या तस्या निर्माणशक्तिवत् ॥ विद्यते मोहशक्तिश्च तं जी
वं मोहयत्यसौ ॥ १२ ॥ मोहादनीशतां प्राप्य मग्नो वपुषि शोचति ॥ ईशसृष्टमि
दं द्वैतं सर्वमुक्तं समासतः ॥ १३ ॥

ह ॥ मोहादिति ॥ मोहात्पूर्वोक्तादनीशतामिष्टानिष्टप्राप्तिपरिहारयोरसामर्थ्यं प्राप्य वपुषि मग्नः शरीरे तादा
त्म्याभिमानं गतः ॥ शोचति दुःखित्वाभिमानं करोति ॥ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान इति
श्रुतेः ॥ वक्ष्यमाणसंसारपरिहाराय वक्तानि गमयति ॥ ईशसृष्टमिति ॥ समासतः संक्षेपेणेत्यर्थः ॥ १३ ॥ ॥
इत्यर्थः २ द्वा २

ननु जीवस्य द्वैतस्रष्टृत्वे किं मानमित्याशंक्याह ॥ सप्तान्नेति ॥ कथं तत्र प्रपंचितमित्याशंक्य सप्तान्नशब्दवाच्य
द्वैतसृष्टिप्रतिपादकं यत्सप्तान्नानि मेधया तपसाजनयत्पितेति वाक्यमर्थतः संगृह्णाति ॥ अन्नानीति ॥ पिता सा
दृष्टृद्वारा जगदुत्पादनेन सर्वलोकपालको जीव इत्यर्थः ॥१४॥ नन्वन्नसप्तकसर्जनं किमर्थमित्याशंक्य
सं०१५४८ तद्विनियोगोपक्रमस्य साधारणं द्वे देवानभाजयत् त्रीण्यात्मने कुरुत पशुभ्य एकं प्रायच्छदिति वाक्यो
क्तो

अच्छ्या

सप्तान्नब्राह्मणे द्वैतं जीवसृष्टं प्रपंचितं ॥ अन्नानि सप्त ज्ञानेन कर्मणाजनयत्
पिता ॥१४॥ मर्त्यान्नमेकं देवान्ने द्वे पश्वन्नं चतुर्थकं ॥ अन्यत्त्रितयमात्मा
र्थमन्नानां विनियोजनं ॥१५॥ व्रीह्यादिकं दर्शपूर्णमासौ क्षीरं तथा मनः ॥ वा
क्प्राणश्चेति सप्तत्वमन्नानामवगम्यतां ॥१६॥

नोक्त इत्याह ॥ मर्त्यान्नमिति विनियोजनमुक्तमिति शेषः ॥१५॥ तानि च सप्तान्नानि तत्र कमस्य साधार
णमितीदमेवास्य तत्साधारणमन्नं यदिदमद्यत इत्यादिना यमात्मा वाङ्मयो मनोमयः प्राणमय इत्येते
न वाक्यसंदर्भेण इवत न्यून कं इ कान्वयस्तु पेण दर्शितानीत्याह ॥ व्रीह्यादिकमिति ॥१६॥ ॥

ज्ञानं कर्म च विहितं २

ननूक्तः सप्तान्नं जगदंतःपातित्वेनेश्वरनिर्मितत्वात्तन्निधानं मयेत्युक्तमित्याशंक्य ॥ तत्स्वरूपस्येश्वरनिर्मितत्वेपि भो-
ग्यत्वाकारस्य जीवनिर्मितत्वान्नैवमित्याह ॥ ईशेनेति ॥ ज्ञानकर्मभ्यां ज्ञानं विहितं तत्प्रतिषिद्धं च देवतापरयोषिदादिवि-
षयं यज्ञादिरूपं प्रतिषिद्धं हिंसादिरूपं ताभ्यामित्यर्थः ॥ तदन्नतां ते छां व्रीह्यादिप्राणंतानां स्वस्य भोगोपकरणत्वमित्य-

ईशेन यद्यप्येतानि निर्मितानि स्वरूपतः ॥ तथापि ज्ञानकर्मभ्यां जीवो कार्षीत्तदन्न-
तां ॥१७॥ ईशकार्यं जीवभोग्यं जगत् द्वाभ्यां समन्वितं ॥ पितृजन्यापि भर्तृभोग्या यथा योषिच्च-
चेष्यतां ॥१८॥ मायावृत्यात्मको हीशसंकल्पः साधनं जनौ ॥ मनोवृत्त्यात्मको जीवसंकल्पो
भोगसाधनं ॥१९॥ ईशनिर्मितमण्यादौ वस्तुन्येकविधे स्थिते ॥ भोक्तृधीवृत्तिनानात्वात्त-
द्भोगो बहुधेष्यते ॥२०॥

१७

किमुक्तं तत्र वती तितत्राह १

र्थः ॥ ईशेति ॥ जगत्सप्तान्नत्वेनोक्तं व्रीह्यादिरूपमीशकार्यत्वेन जीवभोग्यत्वेन च द्वाभ्यां संबद्धमित्यर्थः ॥ ए-
कस्योभयसंबंधे दृष्टांतमाह ॥ पितृजन्येति ॥१८॥ ईशजीवयोर्जगज्जनने किं साधनमित्यत आह ॥ मायेति ॥१९॥ नन्वी-
श्वरसृष्टवस्तुस्वरूपातिरिक्तो भोग्यत्वाकार एव नास्ति कोऽजीवेन सृज्यत इत्याशंक्याह ॥ ईशनिर्मितेति ॥ एकस्मि-
न्नेव विषये बहुविधो भोग उपलभ्यमानः सात्त्विको जनको भोग्याकारभेदं गमयतीत्यर्थः ॥२०॥ ॥ ॥

ननु सति भोगजनके द्वैते भोग्यभेदः कल्प्येत न तु स एव नास्तीत्याशंक्य दृश्यमानत्वान्नैवमित्याह ॥ हृष्यतीति ॥ एको मण्यर्थी
तं लब्ध्वा हृष्यति अन्यस्तथाविधस्तदलाभात् क्रुध्यति अत्र मणौ विषये विरक्तस्तु तं मणिं पश्यत्येव लाभालाभनि
मित्तकौ हर्षक्रोधौ न प्राप्नोतीत्यर्थः ॥ २१ ॥ के ते भोगजे द्वैते प्रकारा जीवसृष्टाकारभेदा इत्यत आह ॥ प्रिय इति ॥ म
णिनिष्ठाः प्रियत्वाप्रियत्वोपेक्ष्यत्वलक्षणा आकारभेदा जीवैः सृष्टाः त्रिष्वपि साधारणमनुस्यूतं रूपं तदीश्वर

हृष्यत्येको मणिं लब्ध्वा क्रुध्यत्यन्यो ह्यलाभतः ॥ पश्यत्येव विरक्तोऽत्र न हृष्यति न कु
प्यति ॥ २१ ॥ प्रियोऽप्रियोऽप्युपेक्ष्यश्चेत्याकारा मणिगास्त्रयः ॥ सृष्टा जीवैरीशसृष्टं रूपं सा
धारणं त्रिषु ॥ २२ ॥ भार्या स्नुषा ननान्दा च याता मातेत्यनेकधा ॥ प्रतियोगिधिया योषिद्भि
द्यते न स्वरूपतः ॥ २३ ॥ ननु ज्ञानानि भिद्यन्तामाकारस्तु न भिद्यते ॥ योषिद्वपुष्यतिशयो न
दृष्टो जीवनिर्मितः ॥ २४ ॥

सं०वं०टी
२

निर्मितमित्यर्थः ॥ २२ ॥ उक्तं जीवसृष्टाकारभेदमुदाहरणान्तरेण स्पष्टयति ॥ भार्येति ॥ ननान्दा भर्तृभगिनी याता
देवरपत्नी प्रतियोगिधिया भर्तृश्वशुरादिकद्वारा प्रतियोगिगोचरया बुद्ध्या ॥ न तु तद्रूपेणेत्यर्थः ॥ २३ ॥ ननु यो
षिद्विषयाणि भार्या स्नुषेत्यादिज्ञानान्येव भिन्नान्युपलभ्यन्ते न तु तद्विषयभूताया योषितः स्वरूपभेदो दृश्य
ते अतः प्रतियोगिधिया योषिद्भिद्यत इत्युक्तमयुक्तमिति शंकते ॥ नन्विति ॥ २४ ॥

ज्ञानवैलक्षण्यस्य ज्ञेयवैलक्षण्यं विनानुपपत्तात् ॥ ज्ञेयाकारज्ञेयद्वयांगीकर्त्तव्यतयेत्याशयेन परिहरति ॥ एवमि
ति ॥२५॥ ननु भ्रान्त्यादिस्थले वाह्यविषयाभावात्तत्रत्यवस्तु मनोमयमस्तु ॥ प्रमितिस्थले तु तदनुपपन्नं वा
ह्यवस्तुनः सत्वादिति शंकते ॥ भ्रांतिस्वप्नेति ॥ मानेन प्रत्यक्षादिप्रमाणेन मेयस्येत्यर्थः ॥२६॥ प्रमितिस्थले वाह्य
विषयसत्वमंगीकरोति ॥ बाढमिति ॥ कथं तर्हि तद्विषयस्य मनोमयत्वमुच्यत इत्यत आह ॥ माने तु मेयेनेति ॥

एवं मांसमयी योषित्काचिदन्या मनोमयी ॥ मांसमय्या अभेदेऽपि भिद्यते हि मनोमयी ॥२५॥
भ्रांतिस्वप्नमनोराज्यस्मृतिष्वस्तु मनोमयं ॥ जाग्रन्मानेन मेयस्य न मनोमयतेति चेत् ॥२६॥ मयर
नर बाढं माने तु मेये योगात्स्याद्विषयाकृतिः ॥ भाष्यवार्त्तिककाराभ्यामयमर्थ उदीरितः ॥२७॥
मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा ॥ रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवं ॥२८॥

माने विषयाकृतिस्तु तस्य मेयेन योगात्संबंधात्स्यात् ॥ नन्विदं स्वकपोलकल्पितमित्याशंक्याह ॥ भाष्येति ॥२७॥ त
त्र तावद्भाष्यकारवचनमुदाहरति ॥ मूषासिक्तमिति ॥ यथा द्रुतं ताम्रं मूषायां सिक्तं सत्तन्निभं जायते तत्समानाकार
वद्भवति ॥ तथा रूपादीन्विषयान्व्याप्नुवद्विषयीकुर्वच्चित्तं ध्रुवमवश्यं तन्निभं दृश्यते उपलभ्यत इत्यर्थः ॥ त्वार
॥२८॥

ननु ताम्रादेरङ्गारादिसंपर्कद्रुतस्य मूषानिषिक्तस्य काठिन्ये मूषाविन्यस्ते न शैत्यात्पत्तौ मूषाकारापत्तावपि ॥ वृत्तेरस्म
दीयास्ताम्रादिविलक्षणाया विषयव्याप्तावपि कुतस्तदाकारापत्तिरित्याशंक्य दृष्टांतांतरमाह ॥ व्यंजको वेति ॥ यथा वा व्यंज
कः प्रकाशकश्चालोकश्चादिः व्यंग्यस्य प्रकाश्यस्य घटादेराकारतामाकारवत्तामियात् ॥ प्राप्नुयात् ॥ एवं धीरपि सर्वा
र्थस्य व्यंजकत्वात्सकलपदार्थप्रकाशकत्वादर्थाकारा अर्थस्याकार इवाकारो यस्याः सा तथा प्रदृश्यते ॥ प्रकर्षेणोपलभ्य
त इत्यर्थः ॥ २९ ॥ इदानीं वार्त्तिककारवचनमाह ॥ मातुरिति ॥ मातुः प्रमाधिष्ठानबुद्धिस्थचिदाभासस्वरूपात्प्रमातुर्मानाभि
निष्पत्तिर्मानस्य साक्षात्संतःकरणवृत्तिरूपस्याभिनिष्पत्तिर्भवतीति शेषः ॥ निष्पन्नमुत्पन्नं तन्मानं मेयं घटादिरूपं प्रमेयं र

व्यंजको वा यथालोको व्यंग्यस्याकारतामियात् ॥ सर्वार्थव्यंजकत्वाद्धीरर्थाकारा प्रदृश्यते ॥
२९ ॥ मातुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति यत् ॥ मेयाभिसंगतं तच्च मेयाभत्वं प्रपद्यते ॥
३० ॥ सत्त्वेवं विषयौ द्वौ स्तो घटौ मृन्मयधीमयौ ॥ मृन्मयो मानमेयः स्यात्साक्षिभास्यस्तु धीमयः ॥ ३१ ॥

पमेति प्राप्नोति ॥ किं च तन्मानं मेयाभिसंगतं प्रमेयेन संबद्धं सन्मेयाभत्वं मेयस्याभेवाभा यस्य तन्मेयाभं तस्य भावस्तत्त्वं मे२
मेयसमानाकारतां प्रपद्यते प्राप्नोतीत्यर्थः ॥ ३० ॥ नन्वेवं प्रकृते किमायातमित्यत आह ॥ सत्त्वेवमिति ॥ ननु मृ
न्मयघटस्यैव मनोमयघटस्यापि तेनैव मनसा गृहीतुमशक्यत्वात् ग्राहकांतरानवस्थासिद्धिरेवेत्याशंक्य ग्रा
हकांतरानपेक्षसिद्ध इत्याह ॥ मृन्मय इति ॥ यथा मृन्मयो मानमेयस्तथा धीमयः साक्षिभास्य इत्यर्थः ॥ ३१ ॥

भवत्वेवं द्विविधं द्वैतमत्र कस्य हेयत्वं कस्य नानेति न ज्ञायत इत्याशंक्य जीवस्य स्वस्वदेहयत्वाभिमत्यास्ति चेत्यतस्य बंध
हेतुत्वं दर्शयति॥ अन्वयेति॥ अन्वयव्यतिरेकावेव दर्शयति॥ सत्यस्मिन्निति॥ अस्मिन्जीवस्य देमानसप्रपंचे सतीति वि
द्यमाने सुखदुःखे भवतः असति तस्मिन्नद्वयं सुखदुःखं च नास्तीत्यर्थः॥२२॥ ननु कावन्वयव्यतिरेकौ नाह्यार्थवि
षयोः किं न स्यातामित्यत आह॥ असत्यपीति॥ नरो म[illegible]नुष्यः एतदुपलक्षणमन्येषामपि स्वप्नादौ स्वप्नसत्त्वादिकौ न्वेर
नाह्यार्थेन्तु काले योऽपि [illegible] दादौ प्राप्तिकाले व्याघ्रादौ च पारमार्थिके विषये सत्यपि आविर्भावे नाध्यवस्यते सुखदुःखाभ्यां घा२

अन्वयव्यतिरेकाभ्यां धीमयो जीवबंधकृत्॥ सत्यस्मिन्सुखदुःखे स्तस्तस्मिन्नसति न द्वयं॥
॥२२॥ असत्यपि च बाह्यार्थे स्वप्नादौ बध्यते नरः॥ समाधिसुप्तमूर्च्छासु सत्यप्यस्मिन्न बध्यते॥
॥२३॥ दूरदेशं गते पुत्रे जीवत्येवात्र तत्पिता॥ विप्रलंभकवाक्येन मृतं मत्वा प्ररोदिति॥२४॥

पुज्यते समाध्यादिषु सत्यस्मिन्बाह्यार्थे सत्यपि न बध्यते न सुखदुःखादिमान्भवति॥ अतस्तादृश एवान्वयव्यतिरेकौ न
स्मरत्यर्थः॥२३॥ मनोमयप्रपंचस्य बंधकृत्वे नान्वयव्यतिरेकावुदाहरति॥ तस्यैव स्पष्टयति॥ दूरदेशमिति॥ देशांतरं प्रापे
पुत्रे तत्र जीवत्येव सत्यत्र स्वगृहे स्थितस्तस्य पिता प्रलंभकस्य मिथ्यावचनैः परं वंचकस्य त्वत्पुत्रो मृत इत्येवंरूपेणाना
कीनस्य पुत्रं मृतं कल्पयित्वा प्रकर्षेण रोदनं करोति॥२४॥

तस्मिन्नेव पुत्रे मृतेऽपि तन्मृतिवार्तायामश्रुतायां सुखं नरो न रोदनं करोति ॥ फलितमाह ॥ अत इति ॥ २५ ॥ धीमयस्यैव ज-
गतो बंधहेतुत्वांगीकारे बाह्यार्थापलापादपसिद्धांतापातः स्यादिति कैशंते ॥ विज्ञानेति ॥ परिहरति ॥ नहीति ॥ धियोपि
मानसप्रपंचस्यैव बंधहेतुत्वे तथापि तद्धेतुत्वेन बाह्यार्थस्यापि स्वीकारान्न विज्ञानवादप्रसंग इति भावः ॥ २६ ॥ नन्वेन-

मृतेऽपि तस्मिन्वार्तायामश्रुतायां न रोदिति ॥ अतः सर्वस्य जीवस्य बंधकृन्मा-
नसं जगत् ॥ २५ ॥ विज्ञानवादो बाह्यार्थवैयर्थ्यात्स्यादिहेति चेत् ॥ न हृद्याकारमा-
धातुं बाह्यस्यापेक्षितत्वतः ॥ २६ ॥ वैयर्थ्यमस्तु वा बाह्यं न वारयितुमीश्महे ॥ प्रयो-
जनमपेक्षंते न मानानीति हि स्थितिः ॥ २७ ॥

हृद्याकारसमर्पणाय बाह्यपदार्थोऽपेक्षणीयः ॥ पूर्वपूर्वमानसप्रपंचसंस्कारस्यैवोत्तरोत्तरमानसप्रपंचे हेतु-
त्वोपपत्तेरित्याशंक्य प्रौढिवादेन तदंगीकरोति ॥ वैयर्थ्यमिति ॥ तर्हि विज्ञानवादात्को भेद इत्यत आह ॥ बाह्यमिति
। विज्ञानवादिनो बाह्यार्थमेवापलपंति वयं न तथेत्ययमेव नो भेद इत्यर्थः ॥ प्रयोजनशून्यत्वादभ्युपगमोऽप्ययुक्त
एवेत्याशंक्याह ॥ प्रयोजनमिति ॥ मानाधीना वस्तुसिद्धिर्न प्रयोजनाधीना मानसिद्धस्य प्रयोजनशून्यत्वमात्रेण
सत्वस्य लौकिकैर्वादिभिश्चानभ्युपरामादित्याति भावः ॥ २७ ॥

मानसद्वैतस्यैव बंधहेतुत्वे तस्य मनोनिरोधात्मकयोगेनैव निवृत्तिसंभवात् ब्रह्मज्ञानस्य बंधनिवर्त्तकत्वा
भ्युपगमो विरुद्ध्येतेति शंकते ॥ बंधश्चेदिति ॥ ३८ ॥ योगेन किं द्वैतोपशमस्तात्कालिक उच्यते आत्यंतिकं वि कल्प्य माद्यं
अंगीकृत्य द्वितीयं दूषयति ॥ तात्कालिकेति ज्ञानादेवं मुच्यते सर्वपाशैः ॥ ज्ञात्वा शिवं शांतिमत्यंतमेति ॥ यदा चर्मव

नर बंधश्चेन्मानसं द्वैतं तन्निरोधेन शाम्यति ॥ अभ्यसेद्योगमेवातो ब्रह्मज्ञानेन
किं वद ॥ ३८ ॥ तात्कालिकद्वैतशांतावप्यागामिजनिक्षयः ॥ ब्रह्मज्ञानं विना न स्यादि
ति वेदांतडिंडिमः ॥ ३९ ॥ अनिवृत्तेपीशसृष्टे द्वैते तस्य मृषात्मतां ॥ बुद्ध्वा ब्रह्माद्वयं
वोद्धुं शक्यं वस्त्वैक्यवादिना ॥ ४० ॥

दाकाशं वेष्टयिष्यंति मानवाः ॥ तदा देवमविज्ञाय दुःखस्यांतो भविष्यतीत्यादिश्रुतिष्वन्वयव्यतिरेकाभ्यां ब्र
ह्मज्ञानादेव बंधनिवृत्तिरभिधीयत इति भावः ॥ ३९ ॥ ननु बाह्यद्वैतनिवारणमन्तरेणाद्वितीयब्रह्मज्ञा
नमेव नोदियादित्याशंक्य तान्निवारणं नावेपितस्य मिथ्यात्वज्ञानादेव पारमार्थिकमद्वैतं वोद्धुं शक्यत इत्या
ह ॥ अनिवृत्तेपीति ॥ ४० ॥

विरोधित्वेन२

नद्वैतमस्त्वात्वज्ञानमद्वैतज्ञानप्रयोजकमपि तु तन्निराकरणमेवेत्यभिनिविशमानं प्रत्याह ॥ प्रलयेइति ॥ प्रल तस्य द्वैतं२
ये प्रलयावस्थायां तन्निवृत्तौ तु तस्य द्वैतस्य निवृत्तौ सत्यां तु विरोधिद्वैताभावेऽद्वैतज्ञानं भवदभिमतस्यैतेन वा
रतोऽसत्त्वपि: गुरुशास्त्राद्यभावतः गुरुशास्त्रादिरूपस्य ज्ञानसाधनस्याभावाद्द्वैतोऽद्वयं वस्तु बोद्धुं न भवति ॥ अ क०४
तस्मान्निवारणमप्रयोजकमिति भावः ॥४१॥ तथापि सति द्वैते कथमद्वैतज्ञानमित्याशंक्याह ॥ अबाधमि

न शास्त्रीय ३

प्रलये तन्निवृत्तौ तु गुरुशास्त्राद्यभावतः ॥ विरोधिद्वैताभावेऽपि न शक्यं बो
द्धुमद्वयं ॥४१॥ अबाधकं साधकं च द्वैतमीश्वरनिर्मितं ॥ अपनेतुमशक्यं चेत्या
स्तां तद्द्विष्यते कुतः ॥४२॥ जीवद्वैतं तु शास्त्रीयमितिद्विधा ॥ उपाददीत शास्त्री
यमातत्त्वस्यावबोधनात् ॥४२॥

ति ॥ ईश्वरनिर्मितं द्वैतमबाधकं तन्मृषात्वज्ञानेनैवाद्वैतज्ञानोत्पत्तेरुक्तत्वात्साधकं च गुरुशास्त्रादिरूपस्य
तस्य ज्ञानसाधनत्वादाकाशादिरूपं द्वैतमस्माभिरपनेतुमशक्यं चेति हेतोस्तद्द्वैतमास्तां कुतः कारणाद्द्वि
ष्यत इति भावः ॥४२॥ इदानीं जीवसृष्टं द्वैतं विभजते ॥ जीवद्वैतमिति ॥ किं द्विविधमपि सदा हेयमेवेत्याह ॥ उ
पाददीतेति ॥ आतत्त्वस्यावबोधनात्तत्त्वस्यावबोधनपर्यन्तमित्यर्थः
॥४२॥

किं तच्छास्त्रीयद्वैतमित्याकांक्षायामाह ॥ आत्मब्रह्मेति ॥ प्रत्यग्रूपस्य ब्रह्मणो विचाराख्यं यच्छ्रवणादिकं त
च्छास्त्रीयं मानसं जगदित्यर्थः ॥ तच्चातत्त्वस्यावबोधनादित्युक्तमनुपपन्नमासुप्तेरामृतेः ॥ कालं नयेद्वे
दांतचिंतयेत्युक्तत्वात्तरत्याशंक्याह ॥ बुद्धे तत्त्वे तच्च हेयमिति ॥ तद्द्वैतं तत्त्वे ब्रह्मात्मैक्यलक्षणे बुद्धे साक्षात्कृ
ते सतीत्यर्थः ॥ तर्ह्यासुप्तेरिति वाक्यस्य का गतिरिति चेत् ॥ दद्यान्नावसरं कंचित्कामादीनामनागपि

आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत् ॥ बुद्धे तत्त्वे तच्च हेयमिति श्रुत्यनु
शासनं ॥४४॥ शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः ॥ परमं ब्रह्म विज्ञाय उल्का
वत्तान्यथोत्सृजेत् ॥४५॥ ग्रंथमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ॥ पलालमिव धान्या
र्थी त्यजेद्ग्रंथमशेषतः ॥४६॥ तमेवैकं विजानीत ह्यन्या वाचो विमुंचथ ॥ यच्छेद्वाङ्मन
सी प्राज्ञ इत्याद्याः श्रुतयः स्फुटाः ॥४८॥

तमेव धीरो विज्ञा
य प्रज्ञां कुर्वीत
ब्राह्मणः ॥ नानु
ध्यायाद्बहूञ्छ
ब्दान्वाचो विग्ला
पनं हि तत् ॥४७

ति पूर्वोक्तकामाद्यनवसरप्रदानस्याविच्छिन्नत्वात्तत्परतैवेति वदामः ॥४४॥ तत्त्वबोधोत्तरकालं तद्द्वैतत्यागप्रतिपा
दनपराः श्रुतीरुदाहरति ॥ शास्त्राण्यधीत्येति ॥४५॥ ग्रंथमभ्यस्येति ॥४६॥ तमेव धीरमिति ॥ तमेवैकं विजा मितिर ॥
नीतेनेन ॥ तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथामृतस्यैष सेतुरिति श्रुत्यर्थः ताः प्रदिताः ॥४८॥

द्वि

तु

अशास्त्रीयस्यापि द्वैतस्यावांतरभेदमाह॥ अशास्त्रीयमिति॥ द्विविधमपि क्रमेणोदाहरति॥ कामक्रोधादिकमिति॥
इतरन्मंदमित्यर्थः॥४९॥ किमनयोः शास्त्रीयद्वैतस्येव तत्त्वबोधोत्तरकालमेव हेयत्वं नेत्याह॥ उभयमिति॥ प्रा
क्निवारणं किमर्थमित्याह॥ बोधसिद्धय इति॥ तत्र लिंगमाह शम इति॥ यतस्तत्त्वबोधात्प्राक् तयोर्हेयत्वं तत
त्त्वविनित्यानित्यवस्तुविवेकादिब्रह्मज्ञानसाधनेषु मध्ये शांतः समाहित इति पदाभ्यां शांतिसमाधी श्रूयेते इ

अशास्त्रीयमपि द्वैतं तीव्रं मंदमिति द्विधा॥ कामक्रोधादिकं तीव्रं मनोराज्यं तथे
तरत्॥४९॥ उभयं तत्त्वबोधात्प्राङ्निवार्यं बोधसिद्धये॥ शमः समाहितत्वं च साध
नेषु श्रुतं यतः॥५०॥ बोधादूर्ध्वं च तद्धेयं जीवन्मुक्तिप्रसिद्धये॥ कामादिक्लेशबंधे
न युक्तस्य न हि मुक्तता॥५१॥

त्यर्थः॥५०॥ ननु तत्त्वबोधात्प्राक्निवार्यमित्यभिधानात् उत्तरकालमस्य स्वीकार्यता स्यादित्याशंक्या
ह बोधादूर्ध्वमिति॥ उक्तमर्थं व्यतिरेकमुखेन द्रढयति॥ कामादीति॥ कामादिरूपो यः क्लेशः स एव बंधस्ते
न युक्तस्य बद्धस्य मुक्तता जीवन्मुक्तता जीवन्मुक्तत्वं न हि नास्त्येवेत्यर्थः॥५१॥

ननु जन्मादिसंसारा द्भिन्नस्यात्यंतिकपुरुषार्थरूपस्याविदेहमुक्तेर्वाल्मीकिमतयाऽऽश्रयाति [illegible] जीवन्मुक्त्ये
ति शंकते जीवन्मुक्तिरिति ॥ ऐहिकभोगनिवृत्तिमयजीवन्मुक्तित्यागश्चामुष्मिकभोगनिवृत्तिमयाविदेहमु
क्तिरपि त्याज्या स्यादिति प्रतिबंद्या परिहरति ॥ तर्हीति ॥ ५२ ॥ प्रतिबंदीमोचनं शंकते ॥ क्षयातिशयेति ॥ दोषयुक्तत्वेन स्व
र्गादेस्त्याज्यत्वे सकलपुरुषार्थविघातकत्वेनातीवदोषरूपस्य कामादेः सुतरां त्याज्यत्वमित्याह ॥ तदा दोषेत
ति ॥ ५३ ॥ ननु वैराग्यादिसंपादनेनात्यंतानर्थहेतोः कामादेस्त्याज्यत्वादैहिकभोगमात्रोपयोगिकामाद्यनुपग

जीवन्मुक्तिरियं मा भूत् जन्माभावे त्वहं कृती ॥ तर्हि जन्मापि तेऽस्त्वेव स्वर्गमात्रात्कृती
भवान् ॥ ५२ ॥ क्षयातिशयदोषेण स्वर्गो हेयो मतो यदा ॥ तदा दोषतमात्मायं कामादिः किं
न हीयते ॥ ५३ ॥ तत्त्वं बुद्ध्वापि कामादीन्निःशेषं न जहासि चेत् ॥ यथेष्टाचरणं ते स्यात्क
र्मशास्त्रातिलंघिनः ॥ ५४ ॥ बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ॥ शुनां तत्त्वदृशां चैव
को भेदोऽशुचिभक्षणे ॥ ५५ ॥

मे को दोष इत्याशंक्याह ॥ तत्त्वमिति ॥ तत्त्ववि[illegible]त्त्वाभिमानेनाविधिनिषेधशास्त्रमतिक्रम्य कामाद्यधीनतया व
र्तमानस्य तव यथेष्टाचरणं स्यादित्यर्थः ॥ ५४ ॥ अस्तु को दोष इत्याशंक्य तदनिष्टत्वप्रतिपादनपरं सुरेश्वराचा
र्यवचनमुदाहरति ॥ बुद्धाद्वैतेति ॥ बुद्धमद्वैतसतत्त्वमद्वैतस्वरूपं ब्रह्म येन स बुद्धाद्वैतसतत्त्ववित्तस्य यथेष्टाचर
णं यदि स्यात्तर्हि अशुचिभक्षणादिकमपि स्यात्तथा सति शुनां तत्त्वदृशां चैव न कोऽपि विशेषः स्यादित्यर्थः ॥ ५५ ॥

तत्व २

वांस्तु ... शक्तत्वेन स...मविड्वराहादिसा
म्यं ३

।तावता किमनिष्टमायादित्याशंक्य सोपहासमुत्तरमाह॥ बोधादिति॥ तत्वज्ञानोदयात्पुरा कामक्रोधा
दिचित्तदोषैस्तव क्लेशोऽभूदिदानीं तु सर्वलोकनिंदामपि सहस्वरातिम क्लेशा शवैगुण्यमिति भावः॥५६॥ तर्हि
किं कर्त्तव्यमित्यत आह॥ विड्वराहादीति॥ सर्वोत्कर्षहेतुज्ञानं मा कार्षीः किंतु॥ स्वं कामादित्यागाशक्तत्वेन सर्वाध
मविड्वराहादिसाम्यं माकादित्यन्वयः॥ सकलमनोदोषहानेन सर्वजनैर्देववत्पूज्य अप्रपूज्यो भवेत्यर्थः॥५७॥

बोधात्पुरा मनोमात्रदोषात्क्लिष्टोऽस्यथाधुना॥ अशेषलोकनिंदा चेत्यहो ते बोध
वैभवं॥५६॥ विड्वराहादितुल्यत्वं माकांक्षीस्तत्वविद्बहु॥ सर्वधीदोषसंत्यागा
ल्लोकैः पूज्यस्व देववत्॥५७॥ काम्यादिदोषदृष्ट्याद्याः कामादित्यागहेतवः॥ प्र
सिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव॥५८॥

दयो येषां द्वेष्यादीनां ते काम्यादयस्तेषां ये दोषा
॥ त्यागोपायमाह॥ काम्याः॥ कामनाविषयाः स्त्रगादयश्चादयो येषां कोपस्वरूपविचारादीनां ते तथोक्ताः॥ तेषां का
अनित्यत्वसातिशयत्वे तेषां दृष्टिरवलोकनं ... प्रसिद्धेति॥ अवतु ततः किं मायातमित्यत आह॥ तानन्विष्येति॥५८॥
मादित्यागे हेतुत्वे प्रमाणमाह॥

ननु कामादीनामनर्थहेतुत्वात्त्याज्यत्वमस्तु मनोराज्यस्य त्वातथात्वत्यागो नयोद्धित इति शंकते । त्याज्यतामिति साक्षा
दनर्थहेतुत्वाभावेपि परंपरया तद्धेतुत्वात्त्याज्यमेवेत्यभिप्रेत्य परिहरति । अशेषेति । परंपरया अनर्थहेतुत्वप्रदर्श
नपरं भगवद्वाक्यमुदाहरति । ध्यायतो विषयानिति । ६० तर्ह्यस्य मनोराज्यस्य कः परिहारोपाय इत्यत आह । शक्यमि
ति । सोपि कुतः सिद्ध्यतीत्यत आह । सुसंपाद इति । ६१ । नन्वष्टांगयुक्तस्य तथास्तु तद्रहितस्य का गतिरित्यत आह । बुद्ध योग४
तत्वेनेति । बुद्धमवगतं तत्वं ब्रह्मात्मैक्यलक्षणं येन स बुद्धतत्वस्तेन कामक्रोधादिवृत्तिदोषराहितेन एकांतवासि

त्याज्यतामेष कामादिर्मनोराज्ये तु का क्षतिः । अशेषदोषबीजत्वात् क्षतिर्भगवतेरिता ॥ ५९ ॥
ध्यायतो विषयान्पुंसः संगस्तेषूपजायते ॥ संगात्संजायते कामः कामात्क्रोधोभिजायते ६०
शक्यं जेतुं मनोराज्यं निर्विकल्पसमाधितः ॥ सुसंपादः क्रमात्सोपि सविकल्पसमाधिना ॥ ६१ ॥
बुद्धतत्वेन धीदोषशून्येनैकांतवासिना ॥ दीर्घप्रणवमुच्चार्य मनोराज्यं विजीयते ॥ ६२ ॥
जिते तस्मिन्वृत्तिशून्यं मनस्तिष्ठति मूकवत् ॥ एतत्पदं वशिष्ठेन रामाय बहुधेरितं ॥ ६३ ॥

ना विजनदेशनिवासशीलेन पुरुषेण दीर्घं बद्धद्वादशादिमात्रोपेतं प्रणवमोंकारमुच्चार्य मनोराज्यं विजीय
ते निवार्यत इत्यर्थः ॥ ६२ ॥ मनोराज्यविजये किं भवतीत्यत आह । जिते तस्मिन्निति । यथा मूकः सकलवाग्व्यापा
ररहितस्तिष्ठत्येवं मनोपि सर्वव्यापाररहितं भवति तिष्ठतीत्यर्थः ॥ वृत्तिकमनोवस्था तस्य पुरुषार्थत्वे प्र
माणमाह । एतदिति । एतत्पदमियं दशेत्यर्थः ॥ ६३ ॥

अ१

वाशिष्ठश्लोकद्वयमुदाहरति॥दृश्याभावमिति॥नेहनानास्तिकिंचनेत्यादिश्रुत्याद्वितीयवस्त्वातिरिक्तजगदभा
वज्ञानेनमनसः सकाशात् दृश्यान्निवारणंसंपन्नं यदि तर्हि निरतिशयं मोक्षसुखं निष्पन्नमिति जानी
यादित्यर्थः॥६४॥अद्वैतशास्त्रमत्यर्थं विचारितं यथापरस्परं गुरुशिष्यादिसंवादद्वाराचिरकालं प्रत्यायितं च॥
णं वस्तुत्वा किं निश्चितमित्यत आह॥संत्यक्तेति॥सम्यक्परित्यक्तकामादिवासनान्मनसस्तूष्णींभावादृतेऽधि ना

दृश्यंनास्तीतिबोधेन मनसो दृश्यमार्जनं॥संपन्नंचेत्तदुत्पन्ना परानिर्वाणनिर्वृतिः
॥६४॥विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः॥संत्यक्तवासनान्मौनादृतेनास्त्युत्तमं प
दं॥६५॥विक्षिप्यते कदाचिद्धीः कर्मणा भोगदायिना॥पुनः समाहिता सा स्यात्तदैवाभ्या
सपाटवात्॥६६॥

कः पुरुषार्थोनास्तीतिनिश्चिता मित्यर्थः॥६५॥एवंनिर्वृतिकस्यापि चित्तस्य र कर्मणा बुद्धिवि प्राब्धर
क्षेपे सति तत्प्रतीकारोपायः क इत्यपेक्षायामाह॥विक्षिप्यत इति॥भोगप्रदेन प्रार कर्मणा बुद्धिः कदा ब्धर
चिद्विक्षिप्यते चेत्तर्हि सा बुद्धिरभ्यासदार्ढ्यात्तदैव पुनरपि समाहिता स्यादित्यर्थः॥६६॥ ॥

सदाविक्षेपरहितस्य ब्रह्मवित्त्वमप्यौपचारिकमित्याह॥ विक्षेप इति॥ पारदर्शिन इति पारदर्शिनो वेदां
तपारंगंतार इत्यर्थः॥ ६७॥ अत्रापि वासिष्ठवाक्यमुदाहरति॥ दर्शनादर्शने इति॥ यो ब्रह्म जानामि न जाना
मीति व्यवहारद्वयं परित्यज्य स्वयमद्वितीयचैतन्यमात्ररूपेणावतिष्ठते स स्वयं ब्रह्मैव न ब्रह्मव
दित्यर्थः॥ ६८॥ सफलं द्वैतविवेचनमुपसंहरति॥ जीवन्मुक्तेरिति॥ असावुक्तप्रकारा जीवन्मुक्तेः परा

विक्षेपो यस्य नास्त्यस्य ब्रह्मवित्त्वं न मन्यते॥ ब्रह्मैवायमिति प्राहुर्मुनयः पारदर्शि
नः॥ ६७॥ दर्शनादर्शने हित्वा स्वयं केवलरूपतः॥ यस्तिष्ठति स तु ब्रह्मन् ब्रह्म न ब्र
ह्मवित्स्वयं॥ ६८॥ जीवन्मुक्तेः परा काष्ठा जीवद्वैतविवर्जनात्॥ लभ्यतेऽसौ ततोऽत्रेद ५१
मीशद्वैताद्विवेचितं॥ ६९॥ इति श्रीमद्विद्यारण्यविरचितो द्वैतविवेकः समाप्तः॥ ४॥

काष्ठा निरतिशयापर्यवसानभूमिः॥ जीवद्वैतस्य मनोमयः प्रपंचस्य विवर्जनात्परित्यागात् लभ्यते प्रा
प्यते ततः कारणादिदं जीवद्वैतमीशद्वैतात् ईश्वरसृष्टद्वैताद्विवेचितं विविच्य प्रदर्शितमित्यर्थः॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृ
ष्णाख्यविदुषा विरचिता द्वैतविवेकपदयोजना समाप्ता॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ महावाक्यविवेकस्य कुर्वे व्याख्यां समासतः॥१॥ मुमुक्षो
र्मोक्षसाधनब्रह्मात्मैकत्वावगतिसिद्धये [illegible] प्रसिद्धानां चतुर्णां महावाक्यानामर्थं क्रमेण निरू
पयन्पूर्वमृक्शाखाकूराचार्यआदौ तावदैतरेयारण्यकगते प्रज्ञानं ब्रह्मेति महावाक्ये प्रज्ञानशब्दस्यार्थ
माह॥ येनेति॥ येन चक्षुर्द्वारा निर्गतान्तःकरणवृत्त्युपहितचैतन्येनेदं दर्शनयोग्यं रूपादिकमीक्षते पश्य
ति पुरुषस्तथा श्रोत्रद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन शब्दजातं शृणोति तथैव घ्राणद्वारा निर्गतान्तःकर

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च॥
स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितं॥१॥

णवृत्त्युपहितेन गंधजातं जिघ्रति॥ येन वागिंद्रियावच्छिन्नेन व्याकरोति शब्दजातं व्याहरति॥ येन रस
नेन्द्रियद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन स्वाद्वस्वादूरसो विजानाति॥ अत्र नेत्रेति समुच्चयार्थश्च श
ब्दः तथा चोक्तानुक्तैः सकलेन्द्रियैरन्तःकरणवृत्तिभेदैरुपलक्षितं यच्चैतन्यमस्ति तदेवात्र प्रज्ञानमित्यु
च्यत इत्यर्थः॥ अनेन येन वा पश्यतीत्यादेः सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानीत्येतस्यावान्तरवाक्यसं
दर्भस्यार्थः संक्षिप्य दर्शितः॥२॥

एवं प्रज्ञानशब्दस्यार्थमभिधाय ब्रह्मशब्दार्थमाह ॥ चतुर्मुखेंद्रेति ॥ उत्तमेषु देवादिषु मध्यमेषु मनुष्येष्वध
मेष्वश्वगवादिषु देहधारिष्वाकाशादिषु भूतेषु च जगज्जन्मादिहेतुभूतं यदेकं चैतन्यमस्ति तद्ब्रह्मेत्यर्थः ॥ अ
नेन च एष ब्रह्मैष इंद्र इत्यादेः प्रज्ञाप्रतिष्ठेत्यंतस्याम्नान्तरवाक्यस्यार्थः संक्षिप्य दर्शितः ॥ इत्थं पदार्थमभिधा
य वाक्यार्थमाह ॥ अत इति ॥ यतः सर्वत्रावस्थितं प्रज्ञानं ब्रह्म ततो मय्यप्यवस्थितं प्रज्ञानं ब्रह्मैव प्रज्ञानत्वाविशेषा
दित्यर्थः ॥ २ ॥ एवं बह्वृक्शाखागतमहावाक्यार्थं निरूप्य यजुःशाखासु मध्ये बृहदारण्यकोपनिषद्गतस्या

चतुर्मुखेंद्रदेवेषु मनुष्याश्वगवादिषु ॥ चैतन्यमेकं ब्रह्मातः प्रज्ञानं
ब्रह्म मय्यपि ॥ २ ॥ परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि ॥ बुद्धेः सा
क्षितया स्थित्वा स्फुरन्नहमितीर्यते ॥ ३ ॥

हं ब्रह्मास्मीति महावाक्यस्यार्थं विवक्षुरादावहंशब्दस्यार्थमाह ॥ परिपूर्ण इति ॥ स्वभावतो देशकालवस्तु
भिरपरिच्छिन्नः परमात्मास्मिन्मायाकल्पिते जगति विद्याधिकारिणि शमादिसाधनसंपन्नत्वेन वि
द्यासंपादनयोग्येऽस्मिन्ब्राह्मणाद्यनुष्ठानवति देहे मनुष्यादिशरीरेषु बुद्धेर्बुद्ध्युपलक्षितस्य सूक्ष्म
शरीरस्य साक्षितयाविकारित्वेनावभासकतयावस्थित्वावस्थायस्फुरन्नप्रकाशमानोऽहमितीर्यते लक्षणयाहंपदे
नोच्यत इत्यर्थः ॥ ३ ॥

ब्रह्मशब्दार्थमाह॥ स्वतः पूर्ण इति॥ स्वतः परिपूर्णः स्वभावतो देशकालाद्यनवच्छिन्नः पूर्वोक्तः परमात्मात्रा
स्मिन्महावाक्ये ब्रह्मशब्देन ब्रह्मेत्यनेन पदेन वर्णितः लक्षणयोच्यत इत्यर्थः॥ एतद्वाक्यगतेनास्मीति प
देन पदद्वयसामानाधिकरण्यलभ्यं जीवब्रह्मणोरैक्यं परामृश्यत इत्याह॥ अस्मीति॥ फलितमाह तेन ब्रह्म

स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः॥ अस्मीत्यैकपराम
र्शस्तेन ब्रह्म भवाम्यहं॥४॥ एकमेवाद्वितीयं सन्नामरूपविवर्जि
तं॥ सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्यते॥५॥

भवामीति॥४॥ इदानीं छांदोग्यश्रुतिगतस्य तत्त्वमसीति वाक्यस्यार्थप्रकाशनाय तत्पदलक्ष्यार्थमा
ह॥ एकमेवाद्वितीयमिति॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति वाक्येन सृष्टेः पुरा स्वगतादि
भेदशून्यं॥ नामरूपरहितं यत्सद्वस्तु प्रतिपादितमस्य सद्वस्तुनोऽधुनापि सृष्टेरुत्तरकालमपि तादृ
क्त्वं विचारदृष्ट्या तथात्वं तदिति पदेनेर्यते लक्ष्यत इत्यर्थः॥५॥

त्वंपदलक्ष्यार्थमाह ॥ श्रोतुरिति ॥ श्रोतुः श्रवणाद्यनुष्ठानेन वाक्यार्थप्रतिपत्तुर्देहेंद्रियेभ्यो पलक्षितं स्थूलादिशरीरत्रय साक्षितयातद्विलक्षणं ॥ सद्वस्तु सद्वस्त्वेव त्वंपदोदितं वाक्यगतेन त्वमितिपदेन लक्षितमित्यर्थः ॥ एतद्वाक्यस्थेन असीतिपदेन तत्त्वंपदस्य सामानाधिकरण्यलब्धं पदार्थद्वयैक्यं शिष्यं प्रतिप्रत्याय्यत इत्याह ॥ एकतेति ॥ सिद्धमर्थमाह ॥ तदैक्यमिति ॥ तयोस्तत्त्वंपदार्थयोरैक्यं प्रमाणसिद्धमेकत्वमनुभूयतां मुमुक्षोभिरित्यर्थः ॥ ८ ॥ क्रमप्राप्तस्याथर्वणवेदगतस्यायमात्माब्रह्मेति वाक्यस्यार्थं व्याचिकीर्षुरादावयमात्मेति पदद्वयेनाविवक्षितमर्थं क्रमेणाह

श्रोतुर्देहेंद्रियातीतं वस्त्वत्र त्वंपदोदितं ॥ एकता ग्राह्यतेऽसीति तदैक्यमनु
भूयतां ॥ ८ स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतं ॥ अहंकारादिदेहांतात्प्र
त्यगात्मेति गीयते ॥ ९ ॥

र्थयति ॥ स्वप्रकाशेति ॥ अयमित्युक्तितोऽयमिति शब्देन स्वप्रकाशापरोक्षत्वं स्वयंप्रकाशत्वेनापरोक्षत्वं मतमभिमतं अयं दृश्यवद्वित्यपरोक्षत्वे घटादिवद्दृश्यत्वं च व्यावर्तयितुं विशेषणद्वयमिति बोध्यं ॥ देहादिष्वप्यात्मशब्दप्रयोगदर्शनादत्रात्मशब्देन किं विवक्षितमित्याकांक्षायामाह ॥ अहंकारादिति ॥ अहंकार आदिर्यस्याहंकारप्राणमनइंद्रियदेहसंघातस्य सोऽहंकारादिस्तथा देह ॥ अन्तो यस्याहंसंघातस्य स देहान्तोऽहंकारादिश्चासौ देहांतश्चेति तथा तस्मात्प्रत्यगधिष्ठानतया साक्षितया च आन्तर आत्मेति गीयतेऽस्मिन् वाक्य इत्यर्थः ॥ ९ ॥

त:
ब्राह्मणत्वादिष्वपि ब्रह्मशब्दस्य प्रयोगदर्शनात्तद्व्यावर्त्तनायात्र विवक्षितमर्थमाह ॥ दृश्यमानस्येति ॥ दृश्यत्वेन
।मि[illegible]ष्यमानस्य सर्वस्याकाशादेर्जगतः सत्त्वमधिष्ठानतया तद्बाधावधित्वेन च पारमार्थिकं सच्चिदानंदलक्षणं यद्रू
पमास्ति तद्ब्रह्मशब्देनेर्यते कथ्यत इत्यर्थः ॥ वाक्यार्थमाह ॥ तद्ब्रह्मेति तदुक्तलक्षणं ब्रह्म स्वप्रकाशात्मस्वरूपं यस्य त
त् स्वप्रकाशात्मस्वरूपकं स एवेत्यर्थः ८ इति परमहंसपरिव्राजकाचार्यश्रीरामकृष्णाख्यविरचितायां वाक्य द्वार
विवेकव्याख्या समाप्ता ५ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ । क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधि

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते ॥ ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकं ८
इति श्रीपरमहंसपरिव्राजकाचार्यविद्यारण्यविरचितो महावाक्यविवेकः समाप्तः ॥
॥ ५ यथा चित्रपटे दृष्टमवस्थानां चतुष्टयं ॥ परमात्मनि विज्ञेयं तथावस्थाचतुष्टयं १ ॥

नी ॥ १ ॥ चिकीर्षितस्य ग्रंथस्यति प्रत्यूहपरिपूरणाय परमात्मनीति पदेन इष्टदेवतातत्त्वानुसंधानल
क्षणं मंगलमाचरन्नस्य ग्रंथस्य वेदांतप्रकरणत्वात् तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिं मनसि निधाय व्याख्या
रोपापवादाभ्यां निःप्रपंचं प्रपंच्यत इति न्यायमनुसृत्य परमात्मन्यारोपितस्य जगतः स्थितिप्रकारं सदृष्टां
तं प्रतिजानीते यथेति ॥ चित्रपटे यथा वक्ष्यमाणानामवस्थानां चतुष्टयं ॥ तथैव परमात्मन्यपि वक्ष्यमाणमव
स्थाचतुष्टयं ज्ञेयमिति ॥ १ ॥ ॥ ॥

किं तदित्याकांक्षायां दृष्टांतदार्ष्टांतिकयोरुभयोरप्यवस्थाचतुष्टयं क्रमेणोपदिशति ॥ यथेति ॥ धौतो घट्टितो लांछितो रंजित इत्येवं प्रकाशस्य तस्यावस्था यथा चित्रपटे रूपल्लक्ष्यते तथा परमात्मन्यपि ॥ चिदंतर्यामिसूत्रात्माविराट् चेत्यवस्थाचतुष्टयं बोधव्यमित्यर्थः ॥ २ ॥ दृष्टांतस्थितानामवस्थानां स्वरूपं क्रमेण व्युत्पादयति ॥ स्वतः शुभ्र इति ॥ अत्रा स्वावस्थासु मध्ये स्वतो द्रव्यांतरसंबंधं विना शुभ्रो धौत इत्युच्यते ॥ अन्नेन लिप्तो घट्टितः मसीमयै राकारैर्युक्तो लांछितः ॥ यथायोग्यवर्णैः ॥ पूरितः रंजितः स्यात् ॥ २ ॥ दार्ष्टां

यथा धौतो घट्टितश्च लांछितो रंजितः पटः ॥ चिदंतर्यामिसूत्रात्माविराडात्मा तथेष्यते ॥ २ ॥ स्वतः शु भ्रोऽत्र धौतः स्याद् घट्टितोऽन्नविलेपनात् ॥ मस्याकारैर्लांछितः स्याद्रंजितो वर्णपूरणात् ॥ ३ ॥ स्वतश्चिदंतर्यामी तु मायावी सूक्ष्मसृष्टितः ॥ सूत्रात्मा स्थूलसृष्ट्यैव विराडित्युच्यते परः ॥ ४ ॥ ब्रह्माद्याः स्तंबपर्यंताः प्राणिनोऽत्र जडा अपि ॥ उत्तमाधमभावेन वर्तंते पटचित्रवत् ॥ ५ ॥

तिके ता व्युत्पादयति ॥ स्वतश्चिदिति परः परमात्मा मायातत्कार्यरहितश्चिदित्युच्यते ॥ मायायोगादंतर्यामी अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयोगात्सूत्रात्मा पंचीकृतभूतकार्यसमष्टिस्थूलशरीरोपाधियोगाद्विराडिति ॥ ४ ॥ ननु परमात्मनश्चित्रपटस्थानीयत्वे तदाश्रितानि चित्राणि च कानि व्यानीत्यत आह ॥ ब्रह्माद्या इति ॥ उत्तमाधमभावेन वर्तमानं ब्रह्मादिस्तंबपर्यंतं चेतनात्मकं गिरिनद्यादि जडजातं च चित्रस्थानीयमित्यर्थः ॥ ५

अत्र परमात्मनि ?

ब्रह्मादिजगतश्चैतन्यस्थानीयत्वे कारणं चोक्तं दृष्टान्तमाह। चित्रार्पितमनुष्याणामिति॥ यथा चित्रे लिखि-
तानां मनुष्यादिशरीराणामेव नानावर्णोपेता वस्त्राभासविशेषा लिख्यन्ते॥ ते च शीतातपादिनिवारकत्वात्
वस्त्राभासा एव इदानीं दार्ष्टान्तिकमाह॥ पृथगिति। एवं परमात्मन्यारोपितानां देवादीनां शरीराणा-
मेव जीवनामानश्चिदाभासाः प्रत्येकं कल्प्यन्ते न पर्वतादीनां॥ तेषां तत्कल्पने कारणमाह॥ बहुधे-

।चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक् पृथक्। चित्राधारेण वस्त्रेण सदृशा इव
कल्पिताः ६ पृथक् पृथक् चिदाभासाश्चैतन्याध्यस्तदेहिनां कल्प्यन्ते जीवनामानो
बहुधा संसरन्त्यमी ७ वस्त्राभासस्थितान् वर्णान् यद्वदाधारवस्त्रगान् वदन्त्यज्ञास्त-
था जीवसंसारं चिद्गतं विदुः ८ चित्रस्थपर्वतादीनां वस्त्राभासो न लिख्यते सृष्टि-
स्थमृत्तिकादीनां चिदाभासस्तथा न हि ९

ति॥ अमीजीवा देवतिर्यङ्मनुष्यादिशरीरं प्राप्य बहुधा संसरंति न परमात्मा तस्य निर्विकारत्वादि-
त्यभिप्रायः॥ ७ ननु सर्वे वादिनो लौकिकाश्चात्मन एव संसाररति वदंति तत्र किं कारणमित्याशंक्य
अज्ञानमेव कारणमिति सदृष्टान्तमाह॥ वस्त्रेति॥ ८ गिरिनद्यादीनां तु चिदाभासकल्पनाभावं दृ-
ष्टान्तपुरःसरमाह॥ चित्रस्थपर्वतामिति॥ प्रयोजनाभावादित्यर्थः॥ ९॥

एवमात्मन्यारोपितस्य संसारस्य ज्ञाननिवर्त्यत्वसिद्धये तन्मूलभूतामविद्यामाह ॥ संसार इति ॥
केयं विद्या तल्लाभोपायश्च क इत्याकांक्षायां विद्यास्वरूपं तल्लाभोपायं च दर्शयति ॥ आत्माभासस्येति ॥ आत्माभा
सस्य चिदाभासस्येत्यर्थः ॥११॥ विचाराल्लभ्यत इत्युक्तं ॥ कस्य विचारादित्याशंक्याह ॥ सदा विचार
येदिति ॥ ननु परमात्मा विचार्यतां मोक्षावस्थायां फलरूपेणावस्थानात् जीवजगतोर्विचारः कोपयुज्यत
इत्याशंक्य तयोरपबाधेन परमात्मावशेषेणोपयुज्यत इत्याह ॥ जीवेति ॥१२॥ ननु विचारेण जीवजगतो

संसारः परमार्थोयं संलग्नः स्वात्मवस्तुनि ॥ इति भ्रान्तिरविद्या स्याद्विद्ययैषा
निवर्त्तते ॥१०॥ आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः ॥ इति बोधो भवेद्विद्या
लभ्यतेसौ विचारणात् ॥११॥ सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः ॥ जीवभा
वजगद्भावबाधे स्वात्मैवशिष्यते ॥१२॥ नाप्रतीतिस्तयोर्बाधः किंतु मिथ्यात्वनिश्चयः ॥
नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः ॥१३॥ परमात्मावशेषोपि तत्सत्यत्वविनिश्च
यः ॥ न जगद्विस्मृतिर्नो चेत् जीवन्मुक्तिर्न संभवेत् ॥१४॥

र्बाधे तदप्रतीत्या व्यवहारलोपः प्रसज्येतेत्याशंक्य बाधशब्दस्य विवक्षितमर्थं विपदेदं दृ चाह ॥ नाप्रतीतिरि
ति ॥ सुषुप्तिमूर्छादौ स्वत एव द्वैतप्रतीत्यभावात्तज्ज्ञानं विनापि मुक्तिः स्यादित्यर्थः ॥१३॥ आत्मैवशिष्यतर
त्वेनापि परमात्मनः सत्यत्वज्ञानमेवाविवक्ष्यते न तदतिरिक्तजगद्विस्मृतिर्जीवन्मुक्तावप्रसंगादित्याह ॥ पर
मात्मेति ॥१४॥

परोदाहर

सदाविचारयेदित्युक्तत्वाद्देहपातपर्यन्तं विचारप्रसक्तौ सत्यां तस्यावधिमाह॥ परोक्षेति॥१५॥ विचारजन्या विद्यापरोक्षत्वभेदेन द्विधेत्युक्तं॥ तयोस्तु[?]नयोः स्वरूपं क्रमेण दर्शयति॥ अस्तीति॥१६॥ एवंविधात्मसाक्षात्कारासाधारणमात्मतत्त्वविवेचनं प्रतिजानीते तत्साक्षात्कारेति॥ येन साक्षात्कारेण पुमान्संसारादेव विमुच्यते तत्साक्षात्कारसिद्ध्यर्थमिति पूर्वेणान्वयः॥१७॥ चिदात्मनः पारमार्थिकमेकत्वं निश्चित्य तु व्यवहारदशायां प्रतीयमानं चैतन्यभेदमुद्दिशति॥ कूटस्थ इति॥ एकस्याश्चितश्चातुर्विध्ये दृष्टान्तमाह॥ घटाकाशेति॥१८॥ घटावच्छिन्नस्य घटाकाशस्य तदनवच्छिन्नस्य महाकाशस्य च प्रसिद्धत्वात्तौ विहाय अप्रसिद्धं जलाकाशं व्युत्पादयति॥ घटावच्छिन्नेति॥ घटावच्छिन्नस्याकाशे यदुदकमस्ति तत्र जले प्रतिबिम्बितोऽभ्रनक्षत्रसहितमाकाशो जलाकाश इत्युच्यते॥१९॥

परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा॥ तत्रापरोक्षविद्याप्तौ विचारोऽयं समाप्यते॥१५॥
अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत्॥ अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते॥१६॥
तत्साक्षात्कारसिद्ध्यर्थमात्मतत्त्वं विविच्यते॥ येनायं सर्वसंसारात्सद्य एव विमुच्यते॥१७॥
कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा॥ घटाकाशमहाकाशौ [illegible] जलाकाशाभ्रखे यथा॥१८॥
घटावच्छिन्नखे नीरं यत्तत्र प्रतिबिम्बितः॥ साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते॥१९॥

मेघाकाशं व्युत्पादयति ॥ महाकाशस्येति ॥ तत्र मेघमंडले यज्जलं तस्मिन्नित्यर्थः २० ननु मेघे जलस्याप्रतीयमानत्वा
न्नभसस्तत्र कथं प्रतिबिंबितत्वज्ञानमित्याशंक्याह ॥ मेघांशेति ॥ मेघस्य स्वजलस्य प्रत्यक्षेणानुपलंभेपि वृष्टिल
क्षणकार्येण मेघे तदुपादानमुदकं सूक्ष्मावयवरूपमस्तीत्यनुमीयते ॥ उदकत्वेन वह्निंगेन विमतं जलमाका
महेति शप्रतिबिंबवद्भवितुं जलत्वात् घटगतजलवदित्यनुमानेन मेघांशरूपे जलेप्याकाशप्रतिबिंबसद्भावोवगम्य
४ त इत्यर्थः २१ एवं दृष्टांतभूतमाकाशचतुष्टयं व्युत्पाद्य दार्ष्टांतिके प्रथमोद्दिष्टं कूटस्थं व्युत्पादयति ॥

मेघा। महाकाशस्य मध्ये यन्मंडलमीक्ष्यते प्रतिबिंबतया तत्र मेघाकाशो जले स्थितः २० मेघां
शरूपमुदकं तुषाराकारसंस्थितं तत्रस्वप्रतिबिंबोऽयं नीरत्वादनुमीयते २१ अधिष्ठान
तया देहद्वयावच्छिन्नचेतनः कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते २२ कूटस्थे
कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबकः प्राणानां धारणाज्जीवः संसारेण स युज्यते २३

अधिष्ठानतयेति पंचीकृतापंचीकृतभूतकार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्याविद्याकल्पितस्या
धारतया वर्तमानत्वेन तावन्मात्रमवच्छिन्नोत्मा कूटस्थ इत्युच्यते तत्र कूटस्थशब्दप्रवृत्तौ निमित्तमाह ॥ कूट
वन्निर्विकारेणेति २२ एवं कूटस्थं व्युत्पाद्य जीवस्य कूटस्थे कल्पितबुद्धिप्रतिबिंबत्वेन तत्पद
पाधित्वात्तं व्युत्पादयति ॥ कूटस्थ इति ॥ तस्य जीवशब्दाभिधेयत्वे निमित्तमाह ॥ प्राणानामिति ॥ कू
टस्थातिरिक्तजीवकल्पनमप्रयोजकमित्याशंक्याविकारिणः कूटस्थस्य संसारासंभवात्तन्निर्वाहा
र्थं सोंगीकर्तव्य इत्याह ॥ संसारे
णेति २३

ननु जीव[illegible]व्यतिरिक्तः कूटस्थोऽस्तीति चेत् ॥ किमिति न प्रतिभासत इत्याशंक्य जीवेन न तिरोहितत्वादिति स
दृष्टान्तमाह ॥ जलव्योम्नेति ॥ नन्वेतत्तिरोधानं न क्वापि शास्त्रे प्रतिपादितमित्याशंक्य तस्यान्योन्याध्यासशब्दे
नाभिधानान्नेवमित्याह ॥ सोऽन्योन्याध्यास इति [illegible] आख्यायत इति शेषः ॥ २४ ॥ नन्वयमेवाध्यासः क्वेदस्य का
रणरूपाविद्या वक्तव्येत्याशंक्य जीवकूटस्थयोः संसारदशायां भेदाप्रतीतिरेवाविद्येत्याह ॥ अयमिति २४ पू
र्वोक्तस्य जीवस्याविद्याकल्पितत्वस्य स्पष्टीकरणायाविद्यां विभजते ॥ विक्षेपेति ॥ विक्षेपहेतुत्वेनाच्छादितत्वादा

जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः ॥ तथा जीवेन कूटस्थः सोऽन्योन्याध्यास
उच्यते ॥ २४ ॥ अयं जीवो न कूटस्थं विविनक्ति कदाचन ॥ अनादिरविवेकोऽयं मूलाविद्येति
गम्यतां ॥ २५ ॥ विक्षेपावृतिरूपाभ्यां द्विधाविद्या प्रकल्पिता ॥ न भाति नास्ति कूटस्थ इ
त्यापादनमावृतिः ॥ २६ ॥ अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते ॥ न भाति नास्ति कूटस्थ
इति बुद्ध्वा वदत्यपि ॥ २७ ॥

वृत्तिं प्रथमं लक्षयति ॥ न भातीति ॥ कूटस्थो न भाति न प्रकाशते नास्ति त्वेति व्यवहारहेतुरावरणमित्यर्थः ॥ २६ ॥
नन्वविद्यायास्तत्त्वावरणस्य च सद्भावे किं प्रमाणमित्याशंक्य लोकानुभव एवेत्याह ॥ अज्ञानीति ॥ विदुषा
कूटस्थं जानासीति पृष्टोऽज्ञानी तं न जानामीत्यज्ञानमनुभूय वक्ति अयमविद्यानुभवः ॥ न केवलमज्ञानानु
भवमेव वक्ति अपि तु नास्ति न भाति कूटस्थ इति ॥ कूटस्थाभावाज्ञाने चानुभूय वदति अयमावरणानुभ
वः ॥ अतस्तूभयत्रानुभवः प्रमाणमिति भावः ॥ २७ ॥

ननु भवन्मते आत्मनः स्वप्रकाशत्वात्तस्मिन्नविद्या नोपपद्यते। तेजस्तिमिरयोरिव विरुद्धस्वभावत्वेन
तयोः संबंधानुपपत्तेः। अविद्याभावे तत्कृतमावरणं दुर्निरूप्यं स्यात्। तदभावे च तन्मूलकस्याविक्षे
पस्यासंभवः। विक्षेपाभावे च ज्ञाननिवर्त्यस्यानर्थस्याभावात् ज्ञानवैयर्थ्यं ततस्तत्प्रतिपादकं शास्त्रमप्र
माणं स्यादित्याशंकायां तत्सर्वं पूर्वोक्तानुभवबाधितमित्याह। स्वप्रकाश इति। इत्यादितर्कजालानि स्वानु
भूतिर्ग्रसत्यसाविति। नहि दृष्टेनुपपन्नं नामेति न्यायादिति भावः। २८ ननु अनुभवस्योक्ततर्कविरोधे

स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः। इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ ॥२८॥
स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थितेः। कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात् ॥२९॥
बुद्ध्यारोहाय तर्कश्चेदपेक्ष्येत तथा सति। स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यतां ॥३०॥ स्वा
नुभूतिरविद्यायामावृतौ च प्रदर्शिता। अतः कूटस्थचैतन्यमविरोधीति तर्क्यतां ॥३१॥

नाभासत्वान्न तेन तत्त्वनिश्चय इत्याशंक्यानुभवप्रामाण्यानभ्युपगमे केवलतर्कस्यानिश्चायकत्वस्य स्वेनैवाभ्यु
पगतत्वान्न तार्किकस्य तत्त्वनिश्चयः क्वापि स्यादित्याह। स्वानुभूताविति। २९ तत्त्वेनुभवस्य तत्त्वनिश्चायकत्व एव तथा
प्यनुभूयमानस्यार्थस्य संभावितत्वज्ञानाय तर्कोऽपेक्ष्यते चेत्तत्र इत्याशंकामनूद्य तर्ह्यनुसारेण तर्को वर्णनी
यो न तद्विरोधेनेत्याह। बुद्ध्यारोहायेति ३० कोसावनुभवो यदनुसारेण तर्को वर्णनीय इत्याकांक्षायां पूर्वो
क्तमविद्यादिगोचरमनुभवं स्मारयति। स्वानुभूतिरिति। फलितमाह। अत इति ३१ ॥ ॥ ॥

तमेव तर्कमभिनीय दर्शयति ॥ तद्वदिति ॥ अविद्यावरणसाधकत्वेन तस्यैव तद्विरोधित्वे विद्याप्रतीतिरेव न स्यादिति भावः ॥ तर्ह्यविद्यायाः को विरोधीत्यत आह ॥ विवेकस्त्विति ॥ विवेक उपनिषद्विचारजन्यं ज्ञानं विवेकस्याविद्याविरोधित्वं क्व दृष्टमित्यत आह ॥ तत्त्वज्ञानिनीति ॥२२॥ एवमविद्यावरणं दर्शयित्वा विक्षेपाध्यासमाह ॥ अविद्यावृतेति ॥ पूर्वोक्ताविद्यावरणावृतकूटस्थे प्रत्यगात्मन्यारोपितस्थूलसूक्ष्मशरीरसहित

चेर

ततचेत्वं

"तद्वद्विरोधकं चैतन्यमावृतिर्हि निरूप्यतां ॥ विवेकस्तु विरोध्यस्यास्तत्त्वज्ञानिनि
दृश्यतां ॥२२॥ अविद्यावृतकूटस्थे देहद्वययुता चितिः ॥ शुक्तौ रूप्यवदध्यस्ता वि
क्षेपाध्यास एव हि ॥२३॥ इदमंशस्य सत्यत्वं शुक्तिगं रूप्य ईक्ष्यते ॥ स्वयंत्वं वस्तु
ता चैवं विक्षेपे वीक्ष्यतेऽन्यगं ॥२४॥ नीलपृष्ठत्रिकोणत्वं यथा शुक्तौ तिरोहितं ॥ अ
संगानंदताद्येवं कूटस्थेपि तिरोहितं ॥२५॥

चिदाभासो विक्षेपाध्यास इत्यर्थः ॥२३॥ अंशस्य विक्षेपस्याध्यासत्वसिद्धये शुक्तिरजताध्याससाम्यं दर्शयति ॥ इदमंशस्येति ॥ शुक्तिकायां स्थितं पुरोदेशादिसंबंधित्वमबाधितत्वं च यथारोपिते रजते च भासते एवं स्वयंत्वं वस्तुत्वं च कूटस्थनिष्ठमारोपिते चिदाभासे तदित्यर्थः ॥२४॥ एवं सामान्यांशप्रतीतिमुक्त्वा पदर्श्य ॥ विशेषाप्रतीतिसाम्यं दर्शयति नीलपृष्ठत्रिकोणत्वमिति ॥२५॥

सामान्यांतरं दर्शयति ॥ आरोपितस्येति ॥ दृष्टांते शुक्तिस्थले आरोपितपदार्थस्य रूप्यं नाम रूप्यमिति नाम यथा
॥ एवं कूटस्थे कल्पितचिदाभासरूपविक्षेपस्य पूर्वोक्तस्याहमिति नामेत्यर्थः ॥ ३६ ॥ ननु दृष्टांते पुरोवर्तिनि
शुक्तिशकले इंद्रियसंनिकर्षे जाते सति रूप्यमिदमिति तदतिरिक्तो रजताभिमान उपपद्यते नैवं दार्ष्टांतिके
स्वात्मातिरिक्तत्वेन स्वत्वाभिमानः तत्राशंक्याजापि स्वप्रकाशतया [illegible] चिदात्मन्यवभासमाने तदतिरिक्तो हमित्यभिमा
न उपलभ्यते अतो न वैषम्यमित्यभिप्रायेणाह ॥ इदमिति ॥ ३७ ॥ ननु स्वयमहंशब्दयोरेकार्थत्वात्कथं दृष्टांतदार्ष्टां

आरोपितस्य दृष्टांते रूप्यं नाम यथा तथा ॥ कूटस्थाध्यस्तविक्षेपनामाहमिति निश्चयः
॥ ३६ ॥ इदमंशं स्वतः पश्यन्नरूप्यमित्यभिमन्यते ॥ तथा स्वं च स्वतः पश्यन्नहमित्यभिमन्यते
॥ ३७ ॥ इदंत्वरूप्यते भिन्ने स्वत्वाहंते तथेष्यतां ॥ सामान्यं च विशेषश्च उभयत्रापि गम्यते
॥ ३८ ॥ देवदत्तः स्वयं गच्छेत्त्वं वीक्षस्व स्वयं तथा ॥ अहं स्वयं न शक्नोमीत्येवं लोके प्रयुज्यते
॥ ३९ ॥ इदं रूप्यमिदं वस्त्रमिति यद्वदिदं तथा ॥ असौ त्वमहमित्येषु स्वयमित्यभिमन्यते ४० ॥

तिकयोः साम्यमित्याशंक्य इदंरूप्यशब्दार्थयोः स्वयमहंशब्दार्थयोश्च सामान्यविशेषरूपत्वस्योभयत्र साम्या
न्नैवमित्याह ॥ इदंत्वेति ॥ ३८ ॥ स्वयंशब्दार्थस्य सामान्यरूपत्वस्पष्टीकर्तुं लौकिकप्रयोगं तावद्दर्शयति ॥ देवदत्तः
स्वयमिति ॥ ३९ ॥ भवत्वेवं प्रयोगः लोके कथमेतावता स्वयंशब्दार्थस्य सामान्यरूपत्वमित्याशंक्येदंशब्दार्थवदि
त्याह ॥ इदं रूप्यमिति ॥ यथा रूप्यवस्त्रादौ सर्वत्रेदंशब्दस्य प्रयुज्यमानत्वात्तदर्थस्य सामान्यरूपत्वं तथासौ
त्वमहमित्यादौ सर्वत्र स्वयंशब्दप्रयोगात्तदर्थस्यापि सामान्यरूपत्वमनुगम्यत इत्यर्थः ॥ ४० ॥

वतो ३

ननु स्वयमहंशब्दार्थयोर्लोके भेदः । तावता कूटस्थे ऽऽत्मनि किमायातमिति पृच्छति ॥ अहमिति ॥ सामान्यरू
पः स्वयंशब्दार्थ एव कूटस्थ इतीदमायातमित्याह ॥ स्वयमिति ॥४१॥ ननु स्वत्वरूपो धर्मोऽन्यत्वं निवारयति न कू
टस्थत्वं बोधयतीति शंकते ॥ अन्यत्ववारकमिति ॥ स्वयंशब्दार्थस्य कूटस्थस्यैवात्मत्वात्स्वत्वेनान्यवारण
मिष्टमेवेति परिहरति ॥ अन्यवारणं कूटस्थस्येति ॥४२॥ ननु स्वयमात्मशब्दयोर्भिन्नप्रवृत्तिनिमित्तयोर्गो

अहंत्वाद्भिद्यतां स्वत्वं कूटस्थे तेन किं तव ॥ स्वयंशब्दार्थ एवैष कूटस्थ इति मे भवे
त् ॥४१॥ अन्यत्ववारकं स्वत्वमिति चेदन्यवारणं ॥ कूटस्थस्यात्मतां वक्तुरिष्टमेव हि
तद्भवेत् ॥४२॥ स्वयमात्मेति पर्यायौ तेन लोके तयोः सह ॥ प्रयोगो नास्त्यतः स्वत्वमात्म
त्वेवान्यवारकं ॥४३॥ त्मात्मेन्य

वास्वादिशब्दयोरिवैकार्थत्वाभावात्कथं स्वयंशब्दार्थस्य कूटस्थस्यात्मत्वमित्याशंक्याह हस्तकरादिशब्दवद्दे
कार्थत्वोपपत्तेर्मैवमिति परिहरति ॥ स्वयमात्मेतीति ॥ पर्यायत्वे सह प्रयोगाभावे हेतुमाह ॥ तेन लोक इ
ति ॥ फलितमाह ॥ अतः स्वत्वमिति ॥४३॥

ननु घटादिष्वचेतनेष्वपि स्वयंशब्दस्य प्रयोगदर्शनात्स्वयंत्वात्मत्वयोरेकत्वं न घटत इति शंकते ॥ घट इति घटादिष्वपि स्फुरणरूपेणात्मचैतन्यस्य सत्वात्तेष्वपि स्वयंशब्दप्रयोगो न विरुद्ध इत्युत्तरमाह दृश्यतामिति ४४ ननु घटादिषु यद्यात्मचैतन्यस्य सत्वं चेतनाचेतनविभागो निर्निमित्तकः स्यादित्याशंक्याचिदाभाससत्वासत्वकृतत्वान्न सद्भाववन्निवमिति परिहरति चेतनाचेतनेति ४५ चेतनाचेतनविभागस्याचि

स्वत्वं

घटः स्वयं न जानातीत्येवं घटादिषु ॥ अचेतनेषु दृष्टं चेद् दृश्यतामात्मसत्वतः ४४ ॥
चेतनाचेतनभिदा कूटस्थात्मकृता नहि ॥ किंतु बुद्धिकृताभासकृतैवेत्यवगम्यतां ४५
यथाचेतनआभासः कूटस्थे भ्रांतिकल्पितः ॥ अचेतनो घटादिश्च तथा तत्रैव कल्पितः ४६
तत्तेदंते अपि स्वत्वमिव त्वमहमादिषु ॥ सर्वत्रानुगते तेन तयोरप्यात्मतेति चेत् ४७ ॥

दाभाससत्वासत्वप्रयुक्तत्वाभ्युपगमे चेतनेष्वात्मसत्वाभ्युपगमो निःप्रयोजनः स्यादित्याशंक्य चेतनाचेतनविभागहेतुत्वेन कूटस्थानभ्युपगम्यत्वेपि अचेतनकल्पनाधिष्ठानत्वेन कूटस्थोभ्युपगंतव्य इत्यभिप्रायेण घटादेस्तत्र कल्पितत्वं सदृष्टांतमाह ॥ यथाचेतन इति ॥ ४६ ॥ स्वत्वात्मत्वयोरेकत्वेति प्रसंगं शंकते ॥ तत्तेदंते ॥ त्वमहमादिषु सर्वत्रानुगतस्य स्वत्वस्येव सर्वत्रानुगतयोरप्यात्मत्वरूपता किं न स्यादिति भावः ॥ ४७ ॥

तत्तेदंतयो

तत्तेदं तयोरात्मत्वाधिकवृत्तित्वादात्मत्वं न संजवतीत्याह॥ ते इति॥ तत्तेदंते सत्त्वमिन पद्यापि त्वमहमादि
षनुगते तथापि तेषनुवर्त्तमाने आत्मत्वेप्यनुगते तदात्मत्वमिदं त्यादिव्यवहारसंज्ञनादतस्तयोरात्म
त्वाद्धिकवृत्तित्वादात्मरूपत्वं न संभाव्यते॥ तत्र दृष्टान्तः॥ सम्यक्त्वादेरिति आत्मत्वं सम्यगात्मत्वमस
म्यमिति व्यवहारवशादात्मत्वेप्यनुवर्त्तमानयोः सम्यक्त्वासम्यक्त्वयोरिवेत्यर्थः॥ ४८॥ एवं प्रासंगि

ते आत्मत्वेप्यनुगते तत्तेदंते ततस्तयोः॥ आत्मत्वं नैव संभाव्यं सम्य
क्त्वादेर्यथा तथा॥ ४८॥ तत्तेदंते स्वतान्यत्वे त्वत्ताहंते परस्परं॥ प्रति
द्वंद्वितया लोके प्रसिद्धे नास्ति संशयः॥ ४९॥ अन्यतायाः प्रतिद्वंद्वी स्वयं
कूटस्थ इष्यतां॥ त्वत्तायाः प्रतियोगी हामित्यात्मनि कल्पितः॥ ५०॥

कं परिसमाप्य कल्पितदर्शनाय लोकव्यवहारासिद्धमर्थमनुवदति॥ तत्तेदमिति॥ तत्ताप्रतियोगित्व
मिदंतायास्तादिदमिति॥ स्वत्वप्रयोगित्वमन्यत्वस्य स्वयमन्य इति॥ त्वंताप्रतियोगित्वमहंतायास्त्वम
हमिति लोके प्रतिद्वंद्वित्वेन प्रयोगदर्शनात् प्रसिद्धमिति भावः॥ ४९॥ नन्वेवं लोके प्रवृत्ते किमायात
मित्यत आह॥ अन्यताया इति॥ अन्यत्वप्रतियोगी स्वयंशब्दार्थः त्वत्ताप्रतियोग्यहंशब्दार्थश्चिदाभासः कू
टस्थे कल्पित इत्यर्थः॥ ५०॥

नन्वुक्तप्रकारेण जीवकूटस्थयोर्भेदे सत्यपि सर्वैरित्थं किमिति न जानंतीत्याशंक्याह अहंतेति बुद्धिसाक्षि
णः कूटस्थस्य बुद्ध्या प्रत्यक्षीकर्तुमशक्यत्वादहमिति प्रतिभासमानयोर्जीवकूटस्थयोर्भेदेऽप्येकत्वं प्रतिपन्ना इ
त्यर्थः ५१ नन्वस्य जीवकूटस्थयोरेकत्वज्ञमस्य किं कारणमित्यपेक्षायामाह तादात्म्याध्यास इति अज्ञानसि
द्धो येनादिरविवेको यमित्यज्ञोक्तयाविद्य[?]येत्यर्थः यतोऽविद्याकार्यत्वमस्यातो विद्यानिवर्त्यकज्ञानेनैव

अहंतास्वत्वयोर्भेदे रूपतोऽहंतयोरिव ॥ स्पष्टेऽपि मोहमापन्ना एकत्वं
प्रतिपेदिरे ॥ ५१ ॥ तादात्म्याध्यास एवात्र पूर्वोक्ताविद्यया कृतः ॥ अविद्या
यां निवृत्तायां तत्कार्यं विनिवर्तते ॥ ५२ ॥ अविद्यावृतितादात्म्ये विद्ययैव
विनश्यतः ॥ विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते ॥ ५३ ॥

तन्निवृत्तिरित्याह ॥ अविद्यायामिति ॥ ५२ ॥ नन्वध्यासस्याविद्याकार्यत्वाज्ज्ञानान्निवृत्तिरित्येतदनुपपन्नं ब्रह्मात्मैकत्व
विद्यायामुत्पन्नायामप्यविद्याकार्यस्य देहादेरुपलभ्यमानत्वादित्यत आह अविद्येति अविद्यैककारण
विर योरावृतितादात्म्ययोर्विद्ययैव निवृत्तिः कर्मसहिताविद्याजन्यस्य तु विक्षेपस्वरूपस्य कर्मावसानप
र्यंतमनवस्थानामित्यविरोध इति भावः ॥ ५३ ॥

निवृति ३

ननु प्रारब्धकर्मणो निमित्तमात्रत्वात्तत्सद्भावमात्रेणोपादाने विनष्टेऽपि कथं कार्यानुवृत्तिरित्याशंक्य शा
स्त्रान्तरसिद्धदृष्टान्तेन तदनुवृत्तिं संभावयति उपादान इति ॥५४॥ ननु तार्किकैः कार्यस्य क्षणमात्रमवस्था
नमंगीकृतं नाचिरकालमित्याशंक्याह तन्तूनामिति संसारस्यानादिकालमारभ्यानुवृत्तत्वात् त
त्संस्कारवशेन भ्रमस्य चिरकालानुवृत्तिर्न विरुध्यत इति भावः ॥५५॥ ननु तार्किकैर्यथायुक्तमपि

उपादाने विनष्टेऽपि क्षणं कार्यं प्रतीक्षते ॥ इत्याहुस्तार्किकास्तद्वदस्माकं किं न सं
भवेत् ॥५४॥ तन्तूनां दिनसंख्यानां तैस्तादृक्क्षण ईरितः ॥ भ्रमस्यासंख्यकल्प
स्य योग्य क्षण इहेष्यतां ॥५५॥ विना क्षोदक्षमं मानं तैर्वृथा परिकल्प्यते ॥ श्रुतियुक्त्य
नुभूतिभ्यो वदतां किं नु दुःशकं ॥५६॥ आस्तां दुस्तार्किकैः साकं विवादः प्रकृतं ब्रुवे स्वा
हमोः सिद्धमेकत्वं कूटस्थपरिणामिनोः ॥५७॥

दितं तद्वद्भवतापीत्याशंक्य स्वोक्तौ ततो वैषम्यं दर्शयति ।विनाक्षोदक्षममिति क्षोदक्षमं विचारसहं मानं विना
प्रमाणमंतरेणेत्यर्थः तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति च श्रुतिः । श्रुतिभ्रमक्रमादिदृष्टान्तो यु
।क्तिरनुभूतिर्विद्वदनुभवस्तेभ्यः किं वक्तुमशक्यमित्यभिप्रायः ॥५६॥ प्रकृतमनुसरति आस्तामिति दुस्तार्कि
कैरिति स्वयमहंशब्दार्थयोः कूटस्थपरिणामिनोरेकत्वं भ्रान्त्या सिद्धं ॥५७॥

पं०द०
५७

ननु कूटस्थजीवयोरेकत्वं भ्रांतिसिद्धं चेदिदं भ्रांतमिति केपि कुतो न जानंतीत्याशंक्य श्रुति
म प तात्पर्यपर्यालोचनशून्यत्वादित्याह आभास्यंत इति ५८ ननु श्रुत्यर्थप्रवक्तारोपि केचिदित्थं कुतो न
जानंतीत्याशंक्य तेषामापाततत्वेन श्रुत्यर्थपर्यालोचनाभावादित्याह पूर्वापरेति ५९ तत्र तावत्प्रत्यक्षैक
प्रमाणाभ्युपगमेनास्तिकलोकायतादिपक्षं प्रथमतोनुभाषते कूटस्थादीति प्रत्यक्षसिद्धत्वे देहात्म
त्वं पारमार्थिकं स्यादित्याशंक्योक्तं प्रत्यक्षाभासमिति ६० ते प्रत्यक्षैकप्रमाणवादिनोपि परव्यामोहनाय

आभास्यंतेथ पंडितंमन्याः सर्वे लौकिकतैर्थिकाः अनादृत्य श्रुतिं मौर्ख्यात्केवलां यु
क्तिमाश्रिताः ५८ पूर्वापरपरामर्शविकलास्तत्र केचन वाक्याभासान्स्वस्वपक्षे यो
जयंत्याप्तलिप्सया ५९ कूटस्थादिशरीरांतसंघातस्यात्मतां जगुः लोकायताः पा
मराश्च प्रत्यक्षाभासमाश्रिताः ६० श्रोतीकर्णे स्वपक्षं ते कोशमन्नमयं तथा विरो
चनस्य सिद्धांतं प्रमाणं प्रतियज्ञिरे ६१

स्वमतश्रुतिसिद्धमिति दर्शयितुं वाक्यमप्युदाहरंतीत्याह श्रोतीकर्णमिति कोशमन्नमयं कोश मितिशद्वेनान्न
प्रतिपादकं स वा एष पुरुषोन्नरसमय इत्यादिवाक्यं लक्ष्यते विरोचनस्य सिद्धांतमिति तत्सि मय१
द्धांतप्रतिपादकमात्मैवेह मह्य इत्यादिवाक्यं लक्ष्यते एतद्वाक्यद्वयं प्रमाणत्वेन प्रतिजानत एवं न
नुपपादयितुं त्वमाः प्रकरणाद्विरोधादिति भाव ६१

समतर

पं०द०
५८

अस्मिन्मते दोषप्रदर्शनपुरःसरं मतांतरमुत्थापयति जीवात्मेति ६२ कीदृशो देहातिरिक्त
आत्मा केन वा प्रमाणेनावगम्यत इत्याकांक्षायामाह प्रत्यक्षत्वेनेति अहं वच्मि अहं पश्यामि इत्यादि
प्रयोगदर्शनात् देहातिरिक्ताहंबुद्धिगम्यानींद्रियाण्यात्मेत्यर्थः ६३ ननु इंद्रियाणामचेतना
नां कथमात्मत्वमित्याशंक्याह श्रुतिष्विंद्रियसंवादश्रवणाच्चेतनत्वमासिद्धमित्याह वागादीनामिति

जीवात्मनि निर्गमे देहमरणस्यात्र दर्शनात् देहातिरिक्त आत्मेत्याहुर्लौकाय
ताः परे ६२ प्रत्यक्षत्वेनाभिमताहंधीर्देहातिरेकिणं गमयेदिंद्रियात्मानं व
तः३ च्मीत्यादिप्रयोजकः ६३ वागादीनामिंद्रियाणां कलहः श्रुतिषु श्रुतः तेन चैत
न्यमेतेषामात्मत्वं तत एव हि ६४ हैरण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे
दो२ चक्षुराद्युत्क्रमेऽपि प्राणसत्त्वे तु जीवति ६५ प्राणो जागर्ति सुप्तेऽपि प्राणश्रैष्ठ्या
दिकं श्रुतं कोशः प्राणमयः सम्यग्विस्तारेण प्रपंचितः ६६

ग चेतनत्वस्यैवात्मत्वलक्षणत्वाच्चेतनानामिंद्रियाणामात्मत्वमुचितमित्याह आत्मत्वं तत एव ही
ति ६४ मतांतरमुत्थापयति हैरण्यगर्भा इति ६५ प्राणस्यात्मत्वे श्रौतलिंगादीनि दर्शय
कर्मकलाप ति प्राण इति प्राणाग्नय एवैतस्मिन्पुरे जाग्रतीत्यादिना प्राणजागरणं श्रूयते तस्मात्प्रपन्ने
१ उदानेति स्पष्टत्वदु [illegible] कथमिति प्राणस्य श्रैष्ठ्यादिकं श्रूयते अन्योऽन्तर आत्मा प्राणमय इत्यादि
[illegible]

तात्प्राणमयकोशः प्राणविकारः आदिशब्दैर्गृहीतं संग्रहः
प्राणानामाद्यैः संगृहीतं ३३

पं०द०

प्राणादयान्तरस्य मनस आत्मत्ववादिनो मतं दर्शयति ॥ मन आत्मेति ॥ प्राणस्यानात्मत्वे युक्तिमाह ॥ प्राणस्येति ॥ ६७ मनस आत्मत्वे युक्तिं प्रतिपादितं श्रुतिमाह ॥ मन एवेति ॥ तस्माद्वा एतस्मा५
त्प्राणमयादन्योऽन्तर आत्मा मनोमय इति श्रुत्यंतरं दर्शयति ॥ श्रुतो मनोमय इति ॥ फलितमाह ॥ तेनेति ॥ ६८ ॥ मनसोऽप्यांतर विज्ञानस्यात्मवादिनो बौद्धस्य मतं दर्शयति ॥ विज्ञानमिति ॥ विज्ञा

मन आत्मेति मन्यन्ते उपासनपरा जनाः ॥ प्राणस्याभोक्तृतास्य संयोगे भोक्तृत्वं मनस
स्ततः ॥ ६७ ॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः ॥ श्रुतो मनोमयः कोशस्तेना
त्मेतीरितं मनः ॥ ६८ ॥ विज्ञानमात्मेति परे आहुः क्षणिकवादिनः ॥ यतो विज्ञान
मूलत्वं मनसो गम्यते स्फुटं ॥ ६९ ॥ अहंवृत्तिरिदंवृत्तिरित्यंतःकरणं द्विधा ॥ विज्ञा
नं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत् ॥ ७० ॥ अहंप्रत्ययबीजत्वमिदंवृत्तेरिति स्फुटं ॥
अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित् ॥ ७१ ॥

नस्यांतरत्वे युक्तिमाह ॥ यत इति ॥ ६९ ॥ विज्ञानमनःशब्दवाच्यस्यांतःकरणस्यैकत्वात् कथं
मनोविज्ञानयोः कार्यकारणभावः इत्याशंक्य तमुपपादयितुं तयोर्भेदं तावद्दर्शयति ॥ अहमिति ॥
७० ॥ तयोः कार्यकारणभावमाह ॥ अहंप्रत्ययेति ॥ तदेवोपपादयति ॥ अविदित्वेति ॥ अहंवृत्त्युद
याभावे इदंवृत्त्युदयादर्शनात्तयोः कार्यकारणभाव इत्यर्थः ॥

तस्य विज्ञानस्य क्षणिकत्वेऽनुभवं प्रमाणयति ॥ क्षणे क्षण इति ॥ क्षणिकत्वमुपपाद्य स्वप्रकाशत्वमुपपादयति ॥ स्वप्रकाशं स्वतो मितिः स्वेनैव प्रमितत्वादित्यर्थः १२ विज्ञानस्यात्मत्वे आगमः प्रमाणमित्याह ॥ विज्ञानमयेति ॥ तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमयः विज्ञानं यज्ञं तनुत इत्यादिकवाक्यं विज्ञानस्यात्मत्वप्रतिपादकमिति भावः १३

क्षणे क्षणे जन्मनाशावहंवृत्तेर्मितौ यतः ॥ विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मितिः ॥१२॥ विज्ञानमयकोशोऽयं जीव इत्यागमा जगुः ॥ सर्वः संसार एतस्य जन्मनाशसुखादिकः ॥१३॥ विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत् ॥ अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः ॥१४॥ असदेवेदमित्यादाविदमेव श्रुतं ततः ॥ ज्ञानज्ञेयात्मकं सर्वं जगद्भ्रान्तिप्रकल्पितं ॥१५॥ निरधिष्ठानविभ्रान्तेरभावादात्मनोऽस्तिता ॥ शून्यस्यापि ससाक्षित्वादन्यथा नोक्तिरस्य ते ॥१६॥

बौद्धावांतरभेदस्य शून्यवादिनो मतं दर्शयति ॥ विज्ञानमिति ॥ १४ ॥ तत्र श्रुतिमाह ॥ असदेवेदमिति ॥ शून्यस्यैव तद्रूपत्वे प्रतीयमानस्य जगतः का गतिरित्यत आह ॥ ज्ञानज्ञेयात्मकमिति ॥ १५ ॥ तदेतन्मतं दूषयति ॥ निरधिष्ठानविभ्रान्तेरिति ॥ निःस्वरूपस्याधिष्ठानत्वायोगान्निरधिष्ठानस्य भ्रमस्यानुपपत्तेर्जगत्कल्पनाधिष्ठानस्यात्मनः सत्ताभ्युपगन्तव्या किंच शून्यवादिनोऽपि शू

कस्तर्ह्यात्मेत्यत आह ॥ अन्य इति ॥ तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनंदमय अ
स्तीत्येवोपलब्धव्यस्तत्वभावेनेति च श्रुतिसद्भावादानंदमय आत्माभ्युपगंतव्य इति वैदिक दर्शनं
वैदिकसिद्धांतः ॥ १७ ॥ एवमात्मस्वरूपे विप्रतिपत्तिं प्रदर्श्य तत्परिमाणविशेषेऽपि वादिविप्रतिपत्तिं
दर्शयति ॥ अणुरिति ॥ १८ ॥ अणुत्वं वादिनस्तावद्दर्शयति ॥ अणुं वदंती अणुत्वाभिधाने हेतुमाह ॥

अन्यो विज्ञानमयत आनंदमय आंतरः ॥ अस्तीत्येवोपलब्धव्य इति वैदि
क दर्शनं ॥ १७ ॥ अणुर्महान्मध्यमो वेत्येवं तत्रापि वादिनः ॥ बहुधा विवदंते
हि श्रुतियुक्तिसमाश्रयात् ॥ १८ ॥ अणुं वदंत्यांतरालाः सूक्ष्मनाडीप्रचारतः ॥
रोम्णः सहस्रभागेन तुल्यासु प्रचरत्ययं ॥ १९ ॥ अणोरणीयानेषोऽणुः सूक्ष्मात्सू
क्ष्मतरं त्विति ॥ अणुत्वमाहुः श्रुतयः शतशोऽथ सहस्रशः ॥ २० ॥ वालाग्रशतभाग
स्य शतधा कल्पितस्य तु ॥ भागो जीवः स विज्ञेय इति चाह परा श्रुतिः ॥ २१ ॥

सूक्ष्मनाडीष्विति ॥ तदुपपादयति ॥ रोम्ण इति ॥ सूक्ष्मासु नाडीषु संचारोऽणुत्वमंतरेण न घटत इत्यभिप्रा
यः ॥ १९ ॥ अणुत्वे किं प्रमाणमित्यत आह ॥ अणोरणीयानिति ॥ अणोरणीयान्महतो महीयानेषोऽणु
रात्मा चेतसा वेदितव्यः ॥ सूक्ष्मात्सूक्ष्मतरं नित्यमित्यादिश्रुतय इत्यर्थः ॥ २० ॥ श्रुत्यंतरमुदाहरति ॥ वा
लाग्रेति ॥ २१ ॥

स्वतु १

मध्यमपरिमाणत्वादिनो दर्शयन्ति दिगंबरा इति॥ तत्रोपपत्तिमाह॥ आपादेति॥ स एष इह प्रविष्ट आ नखा
ग्रेभ्य इति श्रुतिरप्यत्र प्रमाणमित्याह आनखाग्रेति॥ ८२॥ ननु मध्यमपरिमाणत्वे श्रुतिसिद्धो नाडीप्रचारेण
घटत इत्याशंक्याह॥ सूक्ष्मनाडीति॥ यथा देहावयवयोर्हस्तपादयोः कंचुकप्रवेशेन देहस्य कंचुकप्रवेशस्तद्व चित्र ६
द्वात्मावयवीनां सूक्ष्माणां नाडीषु प्रचारेणात्मनोपि प्रचारस्तूपपद्यत इत्यर्थः॥ ८३॥ नन्वात्मनो नियतमध्यमपरिमाण
त्वेकमेव स्यात्॥ न्यूनाधिकशरीरप्रवेशो न घटत इत्याशंक्यावयवागमापायाभ्यामात्मनो नियतमध्यम

दिगंबरा मध्यमत्वमाहुरापादमस्तकं॥ चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि॥
८२॥ सूक्ष्मनाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत्॥ स्थूला देहस्य हस्तांशाः कंचुक
प्रतिमोकवत्॥ ८३॥ न्यूनाधिकशरीरेषु प्रवेशोपि गमागमैः॥ आत्मांशानां भवेत्ते
न मध्यमत्वं विनिश्चितं॥ ८४॥ सांशस्य घटवन्नाशो भवत्येव तथा सति॥ कृतनाशकृता
भ्यागमयोः को वारको भवेत्॥ ८५॥ तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः॥ आकाशव
त्सर्वगतो निरंशः श्रुतिसंमतः॥ ८६॥ ॥ ॥

परिमाणत्वाद्देहवदुत्रयं न विरुध्यत इत्याह॥ न्यूनाधिकशरीरेष्विति॥ फलितमाह॥ तेनेति॥ ८४॥ आत्मनः
सावयवत्वे घटादिवदनित्यत्वप्रसंगेन तत्र दूषयति॥ सांशस्येति॥ ननु को दोषस्तत्राह॥ तथासति कृत
योः पुण्यपापयोर्भोगमंतरेण नाशः॥ अकृतयोरकस्मात्फलदातृत्वमकृताभ्यागमः॥ एतद्दोषद्वयमात्म
नोऽनित्यत्वाभ्युपगमेन भवेदिति भावः॥ ८५॥ अतः पारिशेष्यादात्मनो विभुत्वं सिद्धमित्याह॥ तस्मादिति॥ तत्र प्र
माणमाह॥ आकाशवदिति॥ आकाशवत्सर्वगतश्रुतित्वः॥ निष्कलं निष्क्रियमित्याद्यागमप्रमाणमित्यर्थः
॥ ८६॥

एवमात्मनो विभुत्वं प्रसाध्य तस्याचिद्रूपत्वं निषेधुं तावद्वादिविप्रतिपत्तिं दर्शयति ॥ इत्युक्त्वेति ॥ ८७ ॥ अचिद्रू
पवादितो दर्शयति ॥ प्राभाकरेति ॥ तत्प्रक्रियामनुभाषते ॥ आकाशवदिति आत्मा द्रव्यत्वविभुत्वमहत्त्वेति गुण
वत्वादाकाशवदित्यनुमानं सूचितं ॥ आत्मनः पृथिव्यादिभ्यो भेदसाधकं विशेषगुणं दर्शयति ॥ शब्दव
दिति ॥ आत्मा पृथिव्यादिभ्यो भिद्यते ज्ञानगुणकत्वाद्यत्पृथिव्यादिभ्यो न भिद्यते तन्न ज्ञानगुणकं यथेन
नेदे

इत्युक्त्वा तद्विशेषे तु नवन्तु धाकलहं ययुः ॥ अचिद्रूपो यचिद्रूपश्चिदचिद्रूप इत्यपि
॥ ८७ ॥ प्राभाकरास्तार्किकाश्च आत्मनुरस्याचिदात्मतां ॥ आकाश[illegible]वत् द्रव्यमात्मा शब्दवग
गुणश्रितिः ॥ ८८ ॥ इच्छाद्वेषप्रयत्नाश्च धर्माधर्मौ सुखासुखे ॥ तत्संस्काराश्च तस्यैते गु
णाः [illegible] श्रितिवदीरिता ॥ ८९ ॥ आत्मनो मनसा योगे स्याददृष्टवशात्ततो गुणाः ॥ जायन्ते ध्वप्रली
यन्ते सुषुप्तेऽदृष्टसंक्षयात् ॥ ९० ॥ ॥ ॥

मानं द्रष्टव्यं ॥ ८८ ॥ तस्यैव विशेषगुणान्तराण्याह ॥ इच्छेति ॥ तत्संस्का
नवति यथा पृथिव्यादीत्यनु
राश्चावनः ॥ ८९ ॥ एषां गुणानामुत्पत्तिविनाशकारणमाह ॥ आत्मन इति ॥ स्याददृष्टवशात आत्म
नो मनसा योग इत्यन्वयः ॥ ९० ॥ ॥ ॥

ग्रार ध्रुवर्षा ४

आत्मनो चिद्रूपत्वे कथं चेतनत्वाभ्युपगम इत्याशंक्य। चितिमत्वादित्याह॥ चितिमत्वेति॥ आत्मन
श्चेतनत्वे हेत्वंतरमाह॥ इछेति॥ तमेवारा द्वैलक्षण्यमाह स्यादेवमिति॥ ९९॥ नत्वात्मनो। विभुत्वे
लोकांतरगमनादिकं कथं घट इत्याशंक्याऽस्मिन्देहे कर्मवशादिछाद्युत्पत्तौ सत्याम ता३

चितिमत्वाच्चेतनोऽयमिछाद्वेषप्रयत्नवान्॥ स्याद्धर्माधर्मयोः कर्त्ता भोक्ता
दुःखादिमत्वतः॥ ९१॥ यथात्र कर्मवशतः कादाचित्कं सुखादिकं॥ तथा
लोकांतरे देहे कर्मणेछादि जन्यते॥ ९२॥ एवं च सर्वगस्यापि संभवेतां॥ ॥
गमागमौ॥ कर्मकांडः समग्रोऽत्र प्रमाणमिति ते वदन्॥ ९३॥

आत्मनो व्यवस्थानादिव्यवहार इव कर्मवशाल्लोकांतरे दे[illegible] देहांतरोत्पत्तौ देवादिष्वात्मप्र
देशे सुखाद्युत्पत्तिवशात्तत्रात्मनो गमनादिव्यवहार इत्यौपचारिकमात्मनो गमनादिकमि
त्यभिप्रेत्याह॥ यथेति॥ ९२॥ एवमिति॥ आत्मनः कर्तृत्वादिधर्मत्वे
किं प्रमाणमित्यत आह॥ कर्मकांड इति॥ ९३॥

न त्वन्यो विज्ञानमयात् आनंदमय आंतर इत्यानंदमयस्यात्मत्वमुक्तं इदानीं इच्छादिमानित्यप्रतिपा-
द्यते अतः पूर्वोत्तरविरोध इत्याशंक्याह आनंदमयेति ॥ सुषुप्तावस्पष्टविद्या आनंदमयकोशः परिशि-
ष्यते पूर्वकोशः ॥ कोशेति ॥ पंचकोशेषु प्रथमगाणां प्राज्ञाकरादीनामात्मास्यात्मनस्ते पूर्वोक्ता ज्ञाना

आनंदमयकोशो यः सुषुप्तौ परिशिष्यते ॥ अस्पष्टचि-
त्स आत्मैषां पूर्वकोशोस्य ते गुणाः ॥२४॥ गूढं चैतन्य-
मुत्प्रेक्ष्य जडबोधस्वरूपतां ॥ आत्मनो ब्रुवते भाट्टाश्चि-
दुत्प्रेक्षोत्थितस्मृते ॥२५॥

विचारित्वा २

दयो गुणा इत्यर्थः ॥२४॥ अस्यैवात्मनश्चिदचिद्रूपत्वं भाट्टा वर्णयंतीत्याह ॥ गूढमिति ॥ आदावा-
त्मनो गूढमस्पष्टं चैतन्यमुत्प्रेक्ष्य ऊहित्वा चिदचिन्मयात्मकतां वर्णयंति ॥ चैतन्योत्प्रेक्षायां कार-
णमाह ॥ चिदुत्प्रेक्षेति उत्थितस्य ते चिदुत्प्रेक्षा भवतीति योजना ॥ सुषुप्तेरुत्थितस्य जायमानात्स्मरणा-
त्तस्मात्सुषुप्ते चैतन्योत्प्रेक्षा भवतीत्यर्थः ॥२५॥

।चिदुत्वेक्षाप्रकारमेवस्पष्टयति ॥ जडोऽस्फुरत्वोति ॥ तदा सुप्तिकाले जडोऽस्फुरत्वात्स्याप्यस्मीत्येवंरूपा जाड्यस्फूर्तिरु
त्थितस्य जायमाना सुषुप्तिकालीनजाड्यानुभवमन्तरेणानुपपद्यमाना तदानीतनजाड्यानुभवं कल्पयती
तिभावः ॥ ९६ ॥ सुषुप्तौ चैतन्यलोपाभावे प्रमाणमाह ॥ इच्छेरिति ॥ नहि इच्छाद्वेषयोः परिलोपो विद्यते विना

जडोऽस्फुरत्वात्तदास्याप्यस्मिति जाड्यस्फूर्तिस्सदा ॥ विना जाड्यानुस्फूर्तिं न कथंचिदु
पपद्यते ॥ ९६ ॥ इच्छाद्वेषरजोपश्च स्फुरतः सुप्तौ ततस्त्वयं ॥ अप्रकाशप्रकाशाभ्या
मात्मा खद्योतवद्युतः ॥ ९७ ॥ निरंशस्योभयात्मत्वं न कथंचिद्घटिष्यते तेनाचि
द्रूपत्वात्तेत्याहुः सांख्यविवेकिनः ॥ ९८ ॥ जाड्यांशः प्रकृते रूपं विकारि त्रिगु
णं च तत् ॥ चितेर्भोगापवर्गार्थं प्रकृतिः सा प्रवर्तते ॥ ९९ ॥



शित्वादिति स्फुरतो सुषुप्तौ चैतन्यलोपाभावः स्फुरयतो ततो विकारणाद्यमात्मा खद्योतवत्स्फुरणास्फुरा
णाभ्यां युक्तो भवतीत्यर्थः ॥ ९७ ॥ अस्मिन्नर्थे दृष्टमते लक्षणाभिधानपुरःसरं सांख्यमतमनूद्यापद्यति ॥
निरंशस्येति ॥ ९८ ॥ जाड्यस्फूर्तेस्साहजिकाङ्गतिरित्याशंक्याह ॥ जाड्यांश इति ॥ तत्प्रकृतिरूपं सत्वरज
स्तमोगुणात्मकं ॥ प्रकृतिकल्पनायां प्रयोजनमाह ॥ चितेर्भोगापवर्गार्थमिति ॥ चितः पुरुषस्येति यावत्
॥ ९९ ॥

ननु चितोऽसंगत्वेन प्रकृतिपुरुषयोरत्यंतविविक्तत्वात् प्रकृतिप्रवृत्त्या कथं पुरुषस्य भोगापवर्गौ चित्या-
शंक्य तयोर्विवेकस्याग्रहणात् पुरुषे भोगापवर्गौ व्यवह्रियेते इत्याह ॥ असंगाया इति तार्किकादि-
भिरिव सांख्यैरात्मभेदोक्तिः क्रियत इत्याह ॥ बंधमुक्तीति ॥ १०॥

असंगायाश्चितेर्बंधमोक्षौ भेदाग्रहान्मतौ ॥ बंधमुक्ती व्यवस्था-
र्थं परवैषामिवाचिद्विदा ॥ १०॥ महतः परमव्यक्तमिति प्रकृतिरु-
च्यते ॥ श्रुतावसंगता तद्वदसंगो हीत्यतः स्फुटाः ॥ १॥ चित्संनिधौ
प्रवृत्तायाः प्रकृतेर्हि नियामकं ॥ ईश्वरं ब्रुवते योगाः स जीवेभ्यः परः
श्रुतः ॥ २॥

प्रकृतिसद्भावे पुरुषस्यासंगत्वे च श्रुतिमुदाहरति ॥ महत इति ॥ महति इति ॥ १॥ एवं जीवविषयां वादि-
विप्रतिपत्तिं प्रदर्श्य ईश्वरविषयां तां प्रदर्शयितुमीश्वरस्वरूपं तावत्स्थापयति । चित्संनिधाविति
ननु प्रकृतिपुरुषातिरिक्तेश्वरकल्पनमप्रमाणमित्याशंक्याह ॥
स जीवेभ्य इति ॥ २॥

ज्ञा

तामेव ईश्वरसद्भावप्रतिपादिकां श्रुतिं पठति ॥ प्रधानं गुणसाम्यावस्थारूपं क्षेत्रज्ञा जीवास्तेषां पतिः गुणाः सत्वादयस्तेषामीशः नियामक इत्यर्थः ॥ न केवलमियमेव श्रुतिरीश्वरप्रतिपादिका अंतर्यामी ब्राह्मणमपीत्याह ॥ आरण्यक इति ॥ २ ॥ तामेव वादिविप्रतिपत्तिर्जानीते ॥ अत्रापीति ॥ प्रज्ञामनतिक्रम्य यथाप्रसंगं ४ ॥ इदानीं पतंजलिनोक्तमीश्वरप्रतिपादकं ॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ई

दि

प्रधानक्षेत्रज्ञपतिर्गुणेश इति श्रुतिः ॥ आरण्यके संभ्रमेण ह्यंतर्याम्युप
पादितः ॥ २ ॥ अत्रापि कलहायंते वादिनः स्वस्वयुक्तिभिः ॥ वाक्यान्यपि यथा
प्रसंगं दार्ढ्यायोदाहरंति हि ॥ ४ ॥ क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुतः ॥
पुंविशेषो भवेदीशो जीववत्सोप्यसंगचित् ॥ ५ ॥

श्वर इत्येतत्सूत्रमर्थतः पठति ॥ क्लेशकर्मेति ॥ क्लेशा अविद्यादय ॥ कर्माणि ॥ कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामिति सूत्रितानि ॥ सति मूले तद्विपाकाः जात्यायुर्भोगा इत्युक्ताः कर्मविपाकाः फलविशेषाः तदाशयास्तेषां संस्काराः तैः क्लेशादिभिरसंस्पृष्टः पुरुषविशेष ईश्वरो भवति सोपि जीववदसंगश्चिद्रूपश्चेत्यर्थः ॥ ५ ॥ ॥

नन्वसंगचिद्रूपत्वे कथं नियंतृत्वमित्यत आह ॥ तथापीति ॥ ईश्वरस्य नियंतृत्वानभ्युपगमे दोषमाह ॥ अव्यवस्थापत्तिरिति ॥ द
असंगेश्वरस्य नियंतृत्वं निःप्रमाणकमित्याशंक्याह ॥ जीवस्य सादीति ॥ तन्नियंतृत्वं श्रुतं ॥ ननु श्रुतमप्ययुक्तं कथमसंगी
क्रियत इत्यत आह ॥ युक्तमपीति ॥ जीवधर्मस्य क्लेशादेरन्यथानुपपत्त्या चेत्यर्थः ॥ ७ ॥ ननु जीवा अप्यसंगचिद्रूपाः क्ले
शादिरहिता एव ॥ तथा चेश्वरे को विशेष इत्याशंक्य जीवानां स्वतः क्लेशादिरहितत्वेपि बुद्ध्या सहाविवेकाग्रहा

तां

तथापि पुंविशेषत्वाद्घटते स्यान्नियंतृता ॥ अव्यवस्थैव बंधमोक्षाद्यापत्तेरिहान्यथा ॥ ६ ॥
जीवस्यादित्वेवमादावसंगस्य परात्मनः ॥ श्रुतं तद्युक्तमप्यस्य क्लेशकर्माद्यसंग
मात् ॥ ७ ॥ जीवानामप्यसंगत्वान्न क्लेशादिर्न ह्यबाधि च ॥ विवेकाग्रहतः क्लेशकर्मा
दि प्रागुदीरितं ॥ ८ ॥ नित्यज्ञानप्रयत्नेच्छागुणानीशस्य मन्वते ॥ असंगस्य नियं
तृत्वमयुक्तमिति तार्किकाः ॥ ९ ॥

र

त्क्लेशादिरस्तीति पूर्वोक्तं स्मारयति ॥ जीवानामिति ॥ ८ ॥ तार्किकास्त्वसंगस्य नियामकत्वमसहमाना जी
ववैलक्षण्याय ज्ञानादिगुणत्रयं नित्यमंगीकुर्वत इत्याह ॥ नित्यज्ञानेति ॥ ९ ॥

नात्विच्छादिगुणकस्य कथं जीवाद्वैलक्षण्यमित्याशंक्य गुणानां नित्यत्वादेवेति परिहरति ॥ पुंविशेषत्वमप्य
स्येति गुणानां नित्यत्वे प्रमाणमाह ॥ सत्यकाम इति १० तत्रापि दोषसद्भावमाशंक्योत्तरमाह नित्यज्ञानादीति तस्य
हिरण्यगर्भस्य किंरूपमित्यत आह ॥ लिंगदेहेनेति ॥ मायोपाधिकः परमात्मा लिंगशरीरसमष्ट्यभिमाने
न हिरण्यगर्भ इत्युच्यत इत्यर्थः ११ हिरण्यगर्भस्येश्वरत्वे किं प्रमाणमित्यत आह ॥ उद्गीथेति ॥ ननु

पुंविशेषत्वमप्यस्य गुणैरेव न चान्यथा ॥ सत्यकामः सत्यसंकल्प इत्यादिश्रुतिर्जगौ ॥
१० नित्यज्ञानादिमत्त्वेऽस्य सृष्टिरेव सदा भवेत् ॥ हिरण्यगर्भ ईशोऽतो लिंगदेहेन संयुतः ॥
११ उद्गीथब्राह्मणे तस्य माहात्म्यमतिविस्तृतं ॥ लिंगसत्त्वेऽपि जीवत्वं नास्य कर्माद्यभाव
तः ॥१२ स्थूलदेहं विना लिंगदेहो न क्वापि दृश्यते ॥ वैराजो देह ईशोऽतः सर्वतो मस्त
कादिमान् ॥१३॥ सहस्रशीर्षेत्येवं चाविघ्नतत्प्रकारित्वपि ॥ श्रुतामित्याहुरानिशं विष्णुरूपस्याचिंतकाः १४

लिंगशरीरयोगे जीवः स्यादित्याशंक्य विद्याकामकर्माभावान्न जीव इत्याह ॥ लिंगसत्त्व इति १२ केव
लं लिंगशरीरस्य स्थूलशरीरं विहायानुपलभ्यमानत्वात्स्थूलशरीरसमष्ट्यभिमानी विराडेवे
श्वर इत्याह ॥ स्थूलदेहमिति १३ तत्सद्भावे प्रमाणमाह ॥ सहस्रशीर्षेति श्रुतवाक्यमिति शेषः ॥
विष्णुरूपस्याचिंतका विराड्रूपोपासकाः १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कते।

अत्रापि दोषदृष्ट्या देवतांतरत्वं इत्याह॥ सर्वत इति॥१५॥ एवं कैरुच्यत इत्यत आह॥ प्रजार्थमिति॥ प्रजाप
तिः प्रजा असृजतेत्यादिवाक्यं तत्र प्रमाणमित्याहुरित्याह प्रजापतिरिति॥१६॥ भागवतमतमाह॥ विष्णोरि
ति॥१७॥ शैवानां मतमाह॥ शिवस्येति॥१८॥ गाणपत्यमतमाह॥ पुरत्रयमिति॥१९॥ ॥ ॥ ॥

सर्वतःपाणिपादत्वे किं स्यादेरपि वेशता॥ ततश्चतुर्मुखो देहक्लेशो नेतरः पुमान्
॥१५॥ प्रजार्थं तमुपासीना एवमाहुः प्रजापतिः॥ प्रजा असृजतेत्यादि श्रुतिं चोदाहर
न्त्यमी॥१६॥ विष्णोर्नाभेः समुद्भूतो वेधाः कमलजस्ततः॥ विष्णुरेवेश इत्याहुर्लो
के भागवता जनाः॥१७॥ शिवस्य पादौ वक्त्रे च शार्ङ्गिपद्मजौ शिवस्ततः॥ ईशो न विष्णु
रित्याहुः शैवा आगममानिनः॥१८॥ पुरत्रयं साधयितुं विघ्नेशं सोप्यपूजयत्॥
विनायकं प्राहुरीशं गाणपत्यमते रताः॥१९॥ एवमन्ये स्वस्वपक्षाभिमानेनान्यथा
न्यथा॥ मंत्रार्थवादकल्पादीनाश्रित्य प्रतिपेदिरे॥२॥ ॥ ॥ ॥

पद्यतो २

उक्तान्यायमन्यत्राप्यतिदिशति॥ एवमन्ये इति॥ अन्येऽपि भैरवभैरवात्माद्युपासकाः अन्यथान्यथा वर्णने
कारणमाह स्वस्वपक्षाभिमानेनेति तत्र तत्र प्रमाणानि संतीति दर्शयति॥ मंत्रार्थवादेति॥२॥ ॥ ॥

एवं कतिमतानीत्याशंक्य संख्यानीत्याह॥ अंतर्यामिणमिति॥ स्थावरेशवादो न क्वापि दृष्टचर इत्या
शंक्याह॥ अश्वत्थार्केति॥ २१॥ नन्वेवं मतभेदे कस्योपादेयत्वं कस्य वा हेयत्वं इत्याकांक्षायामाह॥ तत्त्वनि
श्चयेति॥ तत्त्वनिश्चयकामेन तत्त्वनिश्चयेच्छया न्यायागमयोर्विचारणशीलानां पुरुषाणां प्रतिप
त्तिरेकैव स्यात्साकीदृशीत्यत आह॥ साप्यत्रेति॥ २२॥ तामेव प्रतिपत्तिं दर्शयितुं तदनुकूलां श्रुतिं पठति॥

अन्तर्यामिनमारभ्य स्थावरान्तेशवादिनः॥ सन्त्यश्वत्थार्कवं
शादेः कुलदैवतदर्शनात्॥२१॥ तत्त्वनिश्चयकामेन न्यायागम
विचारिणां॥ एकैव प्रतिपत्तिः स्यात्साप्यत्र स्फुटमुच्यते॥२२॥ मायांतु
प्रकृतिं विद्यान्मायिनंतु महेश्वरं॥ अस्यावयवभूतैस्तु व्याप्तं सर्व
मिदं जगत्॥२३॥

मायांत्विति॥ मायामेव प्रकृतिं जगदुपादानकारणं विद्याज्जानीयात् मायिनंतु मायोपाधिकमंतर्यामिण
मेव महेश्वरं मायाधिष्ठातारं निमित्तकारणं जानीयात्॥ अस्य मायिनो महेश्वरस्यावयवभूतैरंश
रूपैश्चराचरात्मकैर्जीवैः कृत्स्नमिदं जगद्व्याप्तमित्यस्याः श्रुतेरर्थः॥२३॥ ॥ ॥ ॥ ॥

नेपातश्रुत्यनुसारेणेश्वरविषयो निर्णयो युक्त इत्याह इतीति कुतो युक्त इत्याशंक्य सर्वज्ञाविरुद्धत्वादि
त्याह तथेति सर्वस्यापीश्वरत्वाभ्युपगमान्नैकेनापि विरोध इति भावः २४ ननु जगत्प्रकृतिभूताया मायायाः किंरूपमित्यत
आह मायेति एतत्कुत इत्यत आह तापनीयेति माया च तमोरूप इति तापनीयोपनिषदि तमोरूपस्याभिधानादित्यर्थः मायायास्त
मोरूपत्वे किं प्रमाणमित्याकांक्षायां अनुभूतेरिति श्रुतिरेवानुभवः प्रमाणमिति प्रतिजानीते इत्याह अनुभूतिमिति २५

इति श्रुत्यनुसारेण युक्तो निर्णय ईश्वरे ॥ तथा सत्यविरोधः स्यात्स्थावरान्तेशवादिनां ॥ २४ ॥ माया चेयं
तमोरूपा तापनीये तदीरणात् ॥ अनुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्वयं ॥ २५ ॥ जडं मोहात्मकं तच्चेत्य १३
नुभावयति श्रुतिः ॥ आबालगोपं स्पष्टत्वादानन्त्यं तस्य साब्रवीत् ॥ २६ ॥ अचिदात्मघटादीनां यत्स्वरू
पं जडं हि तत् ॥ यत्र कुण्ठीभवेद्बुद्धिः स मोह इति लौकिकः ॥ २७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तत्र मायास्तमोरूपत्वे कोसावनुभव इत्याकांक्षायां तदेतज्जडं मोहात्मकमिति श्रुतिरेवानुभवं स्पष्टयतीत्याह जडमो
हात्मकमिति अनन्तामिति श्रुत्या सर्वानुभवसिद्धत्वमुच्यत इत्याह आबालेति जडशब्दार्थमाह अचिदात्मेति मो
हशब्दार्थमाह यत्रेति २७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

उक्तप्रकारेण सर्वानुभवसिद्धत्वेन लक्षणप्रमाणं तयोः सिद्धमित्याह ॥ इत्थमिति एतच्चाज्ञामोहलक्षणं तमोरूपत्वं ॥ ननु एवं मायायाः सर्वानुभवसिद्धत्वे घटादिवत् ज्ञानेनानिवर्त्यत्वं स्यादित्याशंक्याह ॥ युक्तीति ॥ तुशब्दः शंकानिवृत्त्यर्थः ॥ अनिर्वाच्यं सत्त्वेन सदसत्त्वेन चानिर्वक्तुमशक्यं ॥ तत्र किं प्रमाणमित्यत आह ॥ नसदासीदिति ॥ २८ ॥ अस्याः श्रुतेरभिप्रायमाह ॥ नासदासीद्विभातत्वान्नो सदासीच्च बाधनात् मोहेत्यादिति ॥ बाधनान्नेह नानास्ति किंचनेति श्रुत्या निषेधादित्यर्थः ॥ सदसद्रूपत्वं तु विरुद्धत्वादयुक्तमिति श्रुत्यापेक्षितं दृष्ट्वानिर्वचनीयतनुप्रदर्शनमिदं

इत्थं लौकिकदृष्ट्यैतत्सर्वैरप्यनुभूयते ॥ युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदिति श्रुतेः ॥ २८ ॥
नासदासीद्विभातत्वान्नो सदासीच्च बाधनात् ॥ विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः ॥ २९ ॥ तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ॥ ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ॥ ३० ॥ अस्य सत्त्वमसत्त्वं च जगतो दर्शयत्यसौ ॥ प्रसारणाच्च संकोचाद्यथा चित्रपटस्तथा ॥ ३१ ॥

वि रूपमस्येति श्रुतिर्द्विदनुभवेन तस्यास्तुच्छत्वं दर्शयतीत्याह ॥ विद्यादृष्ट्येति ॥ तुच्छत्वे हेतुमाह ॥ तस्येति ॥ २९ ॥ उपपादितमर्थमुपसंहरति ॥ तुच्छेति ॥ श्रौतबोधेन तुच्छा कालत्रयेप्यसती ॥ यौक्तिकबोधे त्वनिर्वचनीया ॥ लौकिकबोधे न वास्तवीच ॥ इत्येवं त्रिधा माया ज्ञेयेत्यर्थः ॥ ३० ॥ अस्याः सत्त्वमसत्त्वं च दर्शयतीति श्रुतेरर्थमस्याः कृत्यमाह ॥ अस्य सत्त्वमसत्त्वं चेति ॥ एकस्याप्यस्य मायाया जगत्सत्त्वासत्त्वप्रदर्शकत्वे दृष्टान्तमाह ॥ प्रसारणादिति ॥ ३१ ॥

स्वतंत्रैवास्वतंत्रत्वेनेति आत्माया मायायाः स्वातंत्र्यास्वातंत्र्ये दर्शिते । तत्रोभयत्रोपपत्तिमाह । अस्वतंत्रेति । स्वप्रकाशकचैतन्यं वि-
हाय न प्रकाशत इत्यस्वतंत्रा । असंगस्यात्मनोऽन्यथाकरणत्वात् स्वतंत्रापीत्यर्थः । २२ अन्यथाकरणमेव स्पष्टयति । कूटस्थे-
ति । जीवेशावाभासेन करोतीति आत्युक्तो जीवेश्वरविभागं च करोतीत्याह । चिदाभासेति । २३ नत्वात्मनोऽन्यथाकरणे कूटस्थ-
त्वहानिः स्यादित्याशंक्याह । कूटस्थमनपेतिन नु कूटस्थत्वाविघातेन जगदादिस्वरूपत्वापादनं दुर्घटमित्याशंक्य मायाया दुर्घ-

ट २

अस्वतंत्रा हि माया स्यादप्रतीतेर्विना चितिं । स्वतंत्रापि तथैव स्यादसंगस्यान्यथाकृते ॥ २२ ॥ कूटस्था-
संगमात्मानं जडत्वेन करोति सा । चिदाभासस्वरूपेण जीवेशावपि निर्ममे ॥ २३ ॥ कूटस्थमनपाप्लु-
त्य करोति जगदादिकं । दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ॥ २४ ॥ द्रवत्वमुदके
वह्नावौष्ण्यं काठिन्यमश्मनि । मायाया दुर्घटत्वं च स्वतः सिध्यति नान्यतः ॥ २५ ॥ न वेत्ति लोको
यावत्तं साक्षात्तावच्चमत्कृतिं । धत्ते मनसि पश्चात्तु मायैषेत्युपशाम्यति ॥ २६ ॥ ॥ ॥ ॥ ॥

कूटस्थमनुपस्पृश्य २

टैकविधायित्वान्नेदमाश्चर्यकारणमित्याह । दुर्घटैकेति । किमाश्चर्यमन्यथा मायात्वमेव न स्यादिति भावः । २४ मायाया
दुर्घटकारित्वस्य स्वाभाविकत्वे दृष्टांतमाह । द्रवत्वेति । उदकादीनां द्रवत्वादिर्यथा स्वाभाविकं तद्वन्मायाया दुर्घटकारित्वमित्यर्थः ।
२५ ननु मायाया दुर्घटकारित्वमाश्चर्यकारणं न भवतीत्युक्तमनुपपन्नं लोके मायायाश्चमत्कारहेतुत्वदर्शनादित्याशंक्य मा-
याप्रयोक्तृसाक्षात्कारपर्यंतमेव तस्याश्चर्यकारणत्वं नोपरि स्यादित्याह । न वेत्तीति । २६ ॥ ॥ ॥ ॥

किंच जगत्सत्यत्ववादिनो नैयायिकादीन्प्रत्येवं विद्यानि नोद्यानि कर्त्तव्यानि न मायावादिनं प्रतीत्याह प्रसं
रंतीति ३७ मायावादिनं प्रति चोद्यकरणे तिप्रसंगमाह चोद्येपीति तर्हि किं कर्त्तव्यमित्यत आह परिहार्यमिति
३८ उक्तमेवार्थं प्रपंचयति विस्मयैकेति ३९ मायात्वनिश्चये तत्परिहारान्वेषणमुचितं ॥ ॥ ॥ ॥

प्रसरंति हि चोद्यानि जगद्वस्तुत्ववादिषु ॥ न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः ॥ ३७ ॥
चोद्येपि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मया ॥ परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतां ॥ ३८ ॥ वि
स्मयैकशरीराया मायायाश्चोद्यरूपतः ॥ अन्वेष्यः परीहारो बुद्धिमद्भिः प्रयत्नतः ॥ ३९ ॥ मायात्व
मेवानिश्चेयमिति चेत्तर्हि निश्चिनु ॥ लोकप्रसिद्धमायाया लक्षणं यत्तदीक्षतां ॥ ४० ॥ न निरूपयितुं
शक्या विस्पष्टं भासते च या ॥ सा मायेतींद्रजालादौ लोकाः संप्रतिपेदिरे ॥ ४१ ॥ स्पष्टं भाति जगच्चे
दमशक्यं तन्निरूपणं ॥ मायामयं जगत्तस्मादीक्षस्वापक्षपाततः ॥ ४२ ॥ ॥ ॥ ॥ ॥ ॥

सा त्वनेदानीं सिद्धा इति शंकते मायात्वमिति मायायलक्षणसद्भावान्मायात्वं निश्चीयतामित्यभिप्रायेणाह
तर्हीति किं लक्षणमित्यत आह लोकप्रसिद्धेति ४० तस्याश्च पि किं लक्षणमित्यत आह न निरूपयितुमिति
४१ दृष्टांतसिद्धलक्षणं दार्ष्टांतिके योजयति स्पष्टं भातीति ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

जगतोऽशक्यनिरूपणत्वं कथमित्याशंक्य तद्दर्शयति ॥ निरूपयितुमिति ॥ ४३ ॥ अशक्यनिरूपणत्वमेवोदाहरणेन स्पष्टयति
देहेति ॥ ४४ ॥ स्वभाववादी शंकते ॥ वीर्यस्येति ॥ सिद्धान्ती पृच्छति कथं तदिति ॥ अन्वयव्यतिरेकाभ्यां जानामीत्याशंक्य व्याप्यभावा
देवेत्याह ॥ अतएवेति ॥ ४५ ॥ एवं पुनः पुनः पृष्टे सति किमपि न जानामीत्येवोत्तरं देयमिति फलितमाह ॥ न जानामीति ॥ ४६

निरूपयितुमारब्धेऽखिलैरपि पण्डितैः ॥ अज्ञानं पुरतस्तेषां भाति कक्षासु कासुचित् ॥ ४३ ॥
देहेन्द्रियादयो भावा वीर्येणोत्पादिताः कथं ॥ कथं वा तत्र चैतन्यमित्युक्ते किमुत्तरं ॥ ४४ ॥ वी
र्यस्यैष स्वभावश्चेत्कथं तद्विदितं त्वया ॥ अन्वयव्यतिरेकौ यौ भग्नौ तौ वन्ध्यवीर्यतः ॥ ४५ ॥ न जाना
मि किमप्येतदित्यन्ते शरणं तव ॥ अतएव महान्तोऽस्य प्रवदन्तीन्द्रजालतां ॥ ४६ ॥ एतस्मात्किमिवे
मस्त ५ न्द्रजालमपरं यद्गर्भवासस्थितं ॥ रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानांकुरं ॥ पर्यायेण शिशुत्वयौ
वनजरावेषैरनेकैर्वृतं पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छति ॥ ४७ ॥ देहवद्वटधाना
दौ सुविचार्य विलोक्यतां ॥ क्व धाना कुत्र वा वृक्षस्तस्मान्मायेति निश्चिनु ॥ ४८ ॥ निरुक्तावभिमानं ये दध
ते तार्किकादयः ॥ हर्षमिश्रादिभिस्ते तु खण्डनादौ सुशिक्षिताः ॥ ४९ ॥ ॥ ॥ ॥ ॥ ॥

उक्तानिर्वचनीयत्वे वृद्धसंमतिं दर्शयति ॥ एतस्मादिति ॥ ४७ ॥ न केवलं देहस्यैव दुर्निरूपत्वं किंतु वटवृक्षादेरपीत्याह ॥ दे
हवदिति ॥ ४८ ॥ ननु तस्मान्निर्वक्तुमशक्यत्वेऽपि खण्डनादिग्रन्थकारैर्निरूप्यत इत्याशंक्याह ॥ निरुक्ताविति ॥ ४९ ॥ ॥ ॥

उक्तार्थे सांप्रदायिकानां वाक्यं संवादयति अचिंत्या इति ॥ ५० ॥ भवत्वेवं जगतोऽचिंत्यरचनात्वं मायायां किं मायायामित्यत
आह ॥ अचिंत्यरचनेति ॥ अचिंत्यरचनाशक्तिमद्बीजकारणं सैव मायेत्यर्थः ॥ नत्वेवंविधकारणं क्वा दृष्टमित्यत आह ॥

अचिंत्याः खलु ये भावा न तांस्तर्केषु योजयेत् ॥ अचिंत्यरचनारूपं मनसा जगत्खलु ॥ ५० ॥
अचिंत्यरचनाशक्तिबीजं मायेति निश्चिनु ॥ मायाबीजं तदेवैकं सुषुप्तावनुभूयते ॥ ५१ ॥ जा
ग्रत्स्वप्नजगत् तत्र लीनं बीज इव द्रुमः ॥ तस्मादशेषजगतो वासनास्तत्र संस्थिताः ॥ ५२ ॥ या
बुद्धिवासनास्तासु चैतन्यं प्रतिबिंबति ॥ मेघाकाशवदस्पष्टचिदाभासोनुमीयतां ॥ ५३ ॥

मायाबीजमिति ॥ ५१ ॥ कथं तस्या जगद्बीजत्वमित्यत आह ॥ जाग्रदिति ॥ ततः किमित्यत आह ॥ तस्मादशेषेति ॥ ५२ ॥ यतो ज
गत्कारणं मायातोऽशेषजगद्वासनास्तत्र मायायां तिष्ठंतीत्यर्थः ॥ ततोपि किं तत्राह ॥ या बुद्धिवासनेति ॥ ननु तासु प्रतिबिंबो नि
चेत्कुतो नानुभूयते इत्याशंक्यास्पष्टत्वादित्याह ॥ मेघाकाशवदिति ॥ तर्हि कुतस्तत्सिद्धिरित्यत आह ॥ अनुमीयतामिति ॥ ५३ ॥

नन्वभ्रे घोदकस्यास्वच्छाकाशप्रतिबिंबत्वेपि तज्जातीयस्य घटोदकस्य स्वच्छाकाशप्रतिबिंबतः सद्भावान्मेघाकाशानुमानं घट
ते इह तथाविधदृष्टांताभावात्कथमनुमानोदय इत्याशंक्याज्ञाधितथाविधदृष्टांतसंपादनायाह॥ साभासेति॥ चिदाभासविशि
ष्टं तदेवाज्ञानं बुद्धिरूपेण परिणममाणं विक्षेपस्य चिदाभासयुक्तं भवतीति भावः॥ एवं चेदनुमानं स्राचितं भवति॥ विमता बुद्धिर्वा

भासासमेव तद्बीजं धीरूपेण प्ररोहति॥ अतो बुद्धौ चिदाभासो विस्पष्टं प्रतिभासते॥५४॥
मायाभासेन जीवेशौ करोतीति श्रुतौ श्रुतं॥ मेघाकाशजलाकाशाविव तौ सुव्यवस्थितौ॥
॥५५॥ मेघवद्वर्त्तते माया मेघस्थिततुषारवत्॥ धीवासनाश्चिदाभासस्तुषारस्थखवात्स्थितः॥५६॥

सनाभित्त्वात्प्रतिबिंबवत्त्वात्प्रतिबिंबत्वमर्हतीति बुद्ध्यवस्थाविशेषत्वाद्बुद्धिवृत्तिवत्॥५४॥ एवं जीवेश्वरयोर्मायिकत्वं श्रु
त्युक्तमुपपादितं उपसंहरति॥ मायेति॥ ननु जीवेशयोर्मायिकत्वे समाने कथमवांतरभेदसिद्धिरित्याशंक्यास्व
स्वस्थोपाधिमत्त्वेन मेघाकाशजलाकाशयोरिव तत्सिद्धिरित्याह॥ मेघाकाशेति॥५५॥ ईशस्य मेघाकाशसाम्यं
स्फुटीकरोति॥ मेघवदिति॥५६॥

यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं २ ॥ एवानंदमयो ह्यानंदभुक्चेतोमुखः प्राज्ञस्तृतीयः पाद ३

मायाप्रतिबिंबस्येश्वरत्वे किं प्रमाणमित्याशंक्य श्रुतिरेवेत्याह ॥ मायेति ॥ न केवलमीश्वरत्वमस्य श्रुतं अपि त्वंतर्यामित्वादिकमपि
धर्मजातं श्रुतमस्तीत्याह ॥ अंतर्यामीति ५७ ॥ ननु धीवासनाप्रतिबिंबस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशंक्य तदुपपादिकां श्रु
तिं दर्शयति ॥ सौषुप्तमिति ॥ सुषुप्तस्थानएकीभूतः प्रज्ञानघनमित्यादिका श्रुति धीवासनाप्रतिबिंबस्वरूपस्यानंदमयस्येश्वरत्वा

मायाधीनश्चिदाभासः श्रुतो मायी महेश्वरः ॥ अंतर्यामी च सर्वज्ञो जगद्योनिः स एव हि ॥ ५७ ॥
सौषुप्तमानंदमयं प्रक्रम्यैवं श्रुतिर्जगौ ॥ एष सर्वेश्वर इति सोयं वेदोक्त ईश्वरः ॥ ५८ ॥ स
र्वज्ञत्वादिके तस्य नैव विप्रतिपद्यतां ॥ श्रौतार्थस्याऽवितर्क्यत्वान्मायायां सर्वसंभवात् ॥ ५९ ॥
अयं यत्सृजते विश्वं तदन्यथयितुं पुमान् ॥ न कोऽपि शक्तस्तेनायं सर्वेश्वर इति श्रुतः ॥ ६० ॥

दिकं प्रतिपादयतीत्यर्थः ॥ ५८ ॥ ननु त्वानंदमयस्य सर्वज्ञत्वादिकमनुभवविरुद्धमित्याशंक्याह ॥ सर्वज्ञत्वादिकइति ॥ कुत
रित्यत्र तत्राह ॥ श्रौतेति ॥ इतोपि न विप्रतिपत्तिः कार्येत्याह ॥ मायायामिति ५९ ॥ ननु कालपुत्रत्वस्यैवाश्रुतिरपि वागर्थवाक्य
वदर्थवादः स्यादित्याशंक्य श्रुतिप्रामाण्यासिद्धयं सर्वेश्वरत्वादिकमुपपादयति ॥ अयमिति ॥ अयमानंदमयो यज्जगदादिविश्वं ॥ अरूव ३ ॥
सृजति तन्नाकेनाप्यन्यथाकर्तुं शक्यते ततोयं सर्वेश्वर इत्यर्थः ॥ ६० ॥

इदानीं सर्वज्ञत्वमुपपादयति ॥ अशेषेति ॥ तत्र सौषुप्ते ज्ञाने कारणीभूते कार्यीभूतानां सर्वप्राणिबुद्धीनां वासनानि वसंति ॥
ताभिर्वासनाभिः सर्वजगत् क्रोडीकृतं विषयीकृतं ॥ तेन सर्वबुद्धिवासनोपेतज्ञानोपाधिकत्वेन सर्वज्ञत्वमुच्यत इत्यर्थः ॥ ननु यदि
सर्वज्ञत्वमस्ति तर्हि तत्कुतो नानुभूयत इत्याशंक्य तदुपाधीनां वासनानां परोक्षत्वान्नानुभव इत्याह ॥ वासनानामिति ॥ कथं तर्हि तदव-

अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः ॥ ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरितः ॥ ६१ ॥ वासना-
नां परोक्षत्वात्सर्वज्ञत्वं नहीक्ष्यते ॥ सर्वबुद्धिषु तद्दृष्ट्वा वासनास्वनुमीयतां ॥ ६२ ॥ विज्ञानमयमुख्येषु
कोशेष्वन्यत्र चैव हि ॥ अंतस्तिष्ठन्यमयति तेनांतर्यामितां व्रजेत् ॥ ६३ ॥ बुद्धौ तिष्ठन्नांतरोस्या धि-
यानीक्ष्यश्च धीवपुः ॥ धियमंतर्यमयतीत्येवं वेदेन घोषितं ॥ ६४ ॥ ॥ ॥ ॥ ॥

गम इत्याशंक्याह ॥ सर्वबुद्धिष्विति ॥ सर्वबुद्धिलिंगं सर्वज्ञत्वं स्वकारणीभूतवासनागतसर्वज्ञत्वपुरःसरं भवितुमर्हति कार्यनिष्ठ-
धर्मविशेषत्वात् ॥ पटगतरूपादिवदित्यर्थः ॥ ६२ ॥ सर्वज्ञत्वमुपपाद्यांतर्यामीति श्रुत्युक्तमंतर्यामित्वमुपपादयति ॥ विज्ञाने-
ति ॥ विज्ञानेति ॥ अन्यत्र पृथिव्यादौ तिष्ठन्यमयति यतस्तेनेत्यर्थान्वयः ॥ ६३ ॥ अस्मिन्नर्थेंऽतर्यामिब्राह्मणं तत्र प्रमाणमिति दर्शयितुं तदे-
कदेशमन्नतं ॥ यो विज्ञाने तिष्ठन्नित्यादिवाक्यमर्थतोनुक्रामति ॥ बुद्धाविति ॥ ६४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इदानीमंतर्यामिब्राह्मणस्य प्रतिपर्यायं व्याख्यानेनं यद्बाहुल्यत्रयात् व्याख्यानस्य सर्वपर्यायसंचारित्वसिद्धये यः सर्वेषु
भूतेषु तिष्ठन्निति पर्यायं व्याचष्टे यः सर्वेषु भूतेषु तिष्ठन्नित्यस्यार्थं सदृष्टांतमाह ॥ तंतुरिति ॥ ६५ ॥ नन्पादानतया सर्वत्राय
मवस्थितस्तर्हि किमिति सर्वैर्नोपलभ्यत इत्याशंक्य सर्वांतरत्वादित्याह ॥ पटादिति ॥ अत्रेदमनुमानं आंतरत्वतारतम्यं

तंतुः पटे स्थितो यद्वदुपादानतया तथा ॥ सर्वोपादानरूपत्वात्सर्वत्रायमवस्थितः ॥ ६५ ॥ पटा
दप्यांतरस्तंतुस्तंतोरप्यंशुरांतरः ॥ आंतरत्वस्य विश्रांतिर्यत्रासावनुमीयतां ॥ ६६ ॥ द्वित्र्यंत
रत्वकक्षाणां दर्शनेप्ययमांतरः ॥ न वीक्ष्यते ततो युक्तिश्रुतिभ्यामेव निर्णयः ॥ ६७ ॥ पट
रूपेण संस्थानात्पटस्तंतोर्वपुर्यथा ॥ सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा ॥ ६८ ॥

एवा

क्वचिद्विश्रांतं तारतम्यत्वात् ॥ अणुत्वतारतम्यवदिति ॥ ६६ ॥ तर्ह्यांतरत्वे प्यंश्वादिवदंतर्यामिनो दर्शनं किं न स्यादित्याशंक्यते
क्वचिद्विश्रांततारतम्यत्वात् ॥ अणुत्वतारतम्यवदिति ॥ ६६ ॥ तर्ह्यांतरत्वे प्यंश्वादिवदंतर्यामिनो दर्शनं किं न स्यादित्याशंक्याह ॥ ततो युक्तीति ॥ अचेतनस्य
बाभिवबाह्यत्वामोवांतरदृश्यतरत्यत्निप्रार्पणाह ॥ द्वित्र्यंतरांति ॥ कुतस्तर्हि तन्निर्णय इत्यत आह ॥ ततो युक्तीति ॥ अचेतनस्य
चेतनाधिष्ठानमंतरेण प्रवृत्त्यनुपपत्तिर्युक्तिः ॥ श्रुतिस्तु उदाहृतैव ॥ ६७ ॥ यस्य सर्वाणि भूतानि शरीरमित्यस्यार्थमाह ॥
पटरूपेतेति ॥ पटरूपेणावस्थितस्य तंतोः पटः शरीरं यथा ॥ एवं सर्वरूपेणावस्थितस्य सर्वं शरीरमित्यर्थः ॥ ६८ ॥

यः सर्वाणि भूतान्यंतरो यमयतीति वाक्यतात्पर्यस्य दृष्टांतमाह श्लोकद्वयेन ॥ तंतोरिति ॥ तंतुः संकोचादिना पटसंकोचादि यथा भवति एवं पृथिव्यादिषूपादानत्वेनावस्थितोऽन्तर्यामी यया वासनया यथा पटादिकार्यस्वरूपेण विक्रियते तत्कार्यजातं तथावश्यं भवतीति भावः ॥ ७० ॥ एवमंतर्यामिप्रतिपादिकां श्रुतिमुपन्यस्य स्मृतिमप्युपन्यस्यति ॥ ईश्वर इति ॥ ७१ ॥ सर्वभूतानामिति पदस्यार्थमाह ॥ सर्वभूता

तंतोः संकोचविस्तारचलनादौ पटस्तथा ॥ अवश्यमेव भवति न स्वातंत्र्यं पटे मनाक् ॥ ६९ ॥ तथांतर्याम्ययं यत्र यथा यया वासनया यथा ॥ विक्रियेत तथावश्यं भवत्येव न संशयः ॥ ७० ॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥ ७१ ॥ सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः ॥ तदुपादानभूतेशस्तत्र विक्रियते खलु ॥ ७२ ॥ देहादिपंजरं यंत्रं तदारोहोऽभिमानिता ॥ विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥ ७३ ॥ ॥ ॥

नीति ते च हृदयपुंडरीके स्थिताः ॥ ननु तेषां कुतो हृदयवस्थानमित्याशंक्य हृद्यंतर्यामिणो विज्ञानमयाकारेण परिणामादित्याह ॥ तदुपादानेति ॥ ७२ ॥ यंत्रारूढानीत्यत्र यंत्रारोहशब्दयोरर्थमाह ॥ देहादीति ॥ देहादिपंजरमिति ॥ भ्रामयन्निति पदे प्रकृत्यर्थमाह ॥ विहितप्रतिषिद्धेष्विति ॥ ७३ ॥

इदानीमिति॥ चप्रत्ययमायापदयोरर्थमाह॥ विज्ञानमयरूपेणेति ७४॥ अंतस्य यमयतीति पदस्याप्ययमेवार्थ इत्या
ह॥ अंतर्यमयतीति॥ उक्तव्याख्यानं पर्यायांतरेण श्रुतिं दिशति॥ पृथिव्येति ७५ प्रवृत्तिर्जातस्य सर्वेश्वराधीनत्वे वचनांतर
मुदाहरति॥ जानामीति ७६ ननु प्रवृत्तेरीश्वराधीनत्वे पुरुषप्रयत्नो व्यर्थः स्यादित्याशंक्य पुरुषप्रयत्नस्यापि ईश्वररूपत्व

विज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपतः॥ स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तत्॥ ७४॥ अंत
र्यमयतीत्युक्तायमेवार्थः श्रुतौ श्रुतः॥ पृथिव्यादिषु सर्वत्र न्यायोऽयं योज्यतां धिया॥ ७५॥ जा
नामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः॥ केनापि देवेन हृदि स्थितेन यथा नियु
क्तोऽस्मि तथा करोमि॥ ७६॥ नार्थः पुरुषकारेणेत्येवं माशंक्यतां यतः॥ ईशः पुरुषकारस्य रू
पेणापि विवर्तते॥ ७७॥ ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्नैव वार्यतां॥ तथापीशस्य बोधेन स्वा
त्मासंगत्वधीजनिः॥ ७८॥

नैवमिति परिहरति॥ नार्थ इति॥ अर्थः प्रयोजनं पुरुषकारः पुरुषप्रयत्नः॥ ७७ ननु पुरुषप्रयत्नस्यापीश्वररूपत्वे य
ती मयेति प्रतिपादितमंतर्यामिप्रेरणं व्यर्थं स्यादित्याशंक्य तद्बोधनस्यात्मासंगत्वज्ञानलक्षणफलस्य सत्त्वान्नैवमिति परिह
रति॥ ईदृग्बोधेनेशस्य पुरुषकारादिरूपेणाप्यवस्थानज्ञाने न प्रवृत्तिरंतर्यामिरूपेण प्रेरणा ७८॥ ॥ ॥

आत्मनो संगत्वज्ञाने नापि किं प्रयोजनमित्यत आह॥ तावतेति॥ श्रुतिस्मृत्युदितस्याज्ञातिलंघनीयत्वे स्मृतिं दर्शयति॥
श्रुतिस्मृतीति ७९ आज्ञत्वापीश्वरस्याज्ञीतहेतुत्वमुक्तमित्याह॥ ईश्वरस्याज्ञीतिहेतुत्वं किमर्थमुक्तमित्याशंक्य सर्वेश्वर
त्वस्यांतर्यामित्वतः पार्थक्यासिद्ध्य इति मत्वाह॥ सर्वेश्वरत्वेपि ८०॥ वह्निरंतश्चेश्वरश्चावतियामकत्वत्र श्रुतिद्वयमाह

तावता मुक्तिरित्याहुः श्रुतयः स्मृतयस्तथा॥ श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरभाषितं ७९॥
आज्ञया प्रीतिहेतुत्वं भीषास्मादिति हि श्रुतं॥ सर्वेश्वरत्वमेतस्यांतर्यामित्वतः पृथक् ८०॥
एतस्य वाक्षरस्य प्रशासने इति श्रुतिः॥ अंतःप्रविष्टः शास्ता यं जनानामिति च श्रुतिः॥ ८१॥
जगद्योनिर्भवेदेष प्रभवाप्ययकृत्वतः॥ आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ॥ ८२॥

एतस्येति॥ ८१॥ क्रमप्राप्तस्यैवयोनिरित्यस्यार्थमाह जगद्योनिरिति॥ प्रतिज्ञातार्थे प्रभवाप्ययौ हि कृतानामिति वाक्यहे
तुत्वेन योजयति॥ प्रभवाप्ययावुत्पत्तिप्रलयौ॥ तत्कर्तृत्वाज्जगद्योनिरित्यर्थः॥ उत्पत्तिप्रलयशब्दयोर्विवक्षितमर्थ
माह॥ आविर्भावेति॥ उत्पत्तिप्रलयौ आविर्भावतिरोभावौ मतावितियोजना॥ ८२॥ ॥ ॥ ॥ ॥ ॥

आविर्भावकारित्वं सदृष्टान्तमुपपादयति । आविर्भावयतीति । यथा संकुचितचित्रपटः स्वस्य प्रसरणेन स्वनिष्ठानि चि-
त्राण्याविर्भावयति तद्वदीशोपीत्यर्थः ॥८३॥ तस्यैव प्रलयकारणत्वं दर्शयति । पुनस्तिरोभावयतीति । स एव पटः । सं-
कुचितश्चित्राणि यथा तिरोभावयति तद्वदित्यर्थः ॥८४॥ आविर्भावतिरोभावयोर्दृष्टान्तान्तराणि दर्शयति । रात्रिघस्राविति ॥

आविर्भावयति स्वस्मिन्विलीनं सकलं जगत् । प्राणिकर्मवशादेष पटो यद्वत्प्रसारितः ॥८३॥
पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत् । प्राणिकर्मक्षयवशात्संकोचितपटो यथा ॥८४॥
रात्रिघस्रौ सुप्तिबोधावुन्मीलननिमीलने । तूष्णीम्भावमनोराज्ये इव सृष्टिलयाविमौ ॥८५॥
आविर्भावतिरोभावशक्तिमत्त्वेन हेतुना । आरम्भपरिणामादिचोद्यानां नात्र संभवः ॥८६॥
अचेतनानां हेतुः स्याज्जाड्यांशेनेश्वरस्तथा । चिदाभासांशतस्त्वेष जीवानां कारणं भवेत् ॥८७॥

घस्राविति ॥८५॥ नन्वीश्वरस्य जगद्योनित्वं किमारम्भकत्वेन किं वा तदाकारपरिणामित्वेन । नाद्यः । अद्वितीयस्यारम्भकत्वायोगात् । न द्वितीयः । निरवयवस्य परिणामासंभवादित्याशंक्य विवर्त्तवादाश्रयणेनोभयं दोषं परिहरति । आविर्भावेति ॥८६॥ नन्वेकस्येश्वरस्य कथं चेतनाचेतनजगदुपादानत्वं संभाव्यत इत्याशंक्य स्वप्राधान्येनोपाधिप्राधान्येन चेतनाचेतनोपादानत्वं संभवतीत्याह । अचेतनानामिति ॥८७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु मायाविन ईश्वरस्य जगत्कारणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचार्यैः परमात्मन एव तदभिधानादिति शंकते तमःप्रधान इति ८८ तमःप्रधानस्तमोगुणप्रधानमायोपाधिकः क्षेत्राणां शरीरादीनां भावनाज्ञानकर्मभिः भावनासंस्काराज्ञानं देवताध्यानादि कर्म पुण्यापुण्यफलदाने तन्निमित्तभूतैरित्यर्थः ८९ त्वंपदार्थस्य तत्पदार्थस्य चाधिष्ठानारोपयोरन्योन्याध्यासस्य विवक्षितत्वान्नैवमिति परिहरति अन्योन्याध्यासेति ९०

तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनां ॥ परः कारणतामेति भावनाज्ञानकर्मभिः ॥ ८८ ॥ इति
वार्त्तिककारेण जडचेतनहेतुता ॥ परमात्मन एवोक्ता नेश्वरस्येति तद्धृष्टेन ॥ ८९ ॥ अन्योन्या
ध्यासमत्रापि जीवकूटस्थयोरिव ॥ ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः ॥ ९० ॥ सत्यं ज्ञा
नमनंतं यद्ब्रह्म तस्मात्समुत्थिताः ॥ खं वाय्वग्निजलोर्व्योषध्यन्नदेहा इति श्रुतिः ॥ ९१ ॥ आपात
दृष्टितस्तत्र ब्रह्मणो भाति हेतुता ॥ हेतोश्च सत्यता तस्मादन्योन्याध्यास इष्यते ॥ ९२ ॥

ननु सुरेश्वराचार्यैरीश्वरब्रह्मणोरन्योन्याध्यासः सिद्धवत्कृत्य व्यवस्थापित इति कुतोऽवगम्यत इत्याशंक्य श्रुत्यर्थपर्यालोचनवशादिति दर्शयितुं श्रुतिमर्थतः पठति सत्यं ज्ञानमिति ९१ भवत्वेषा श्रुतिरेतया कथमन्योन्याध्यासावगतिरित्यत आह आपातदृष्टित इति तत्र तस्यां श्रुतौ सत्यादिलक्षणस्य निर्गुणस्य ब्रह्मणो जगत्कारणस्य मायाधीनाचिदाभासस्य सत्यत्वं मायातः प्रतीयमानमन्योन्याध्यासमंतरेण न घटत इति भावः ९२ ॥ ॥ ॥

एवमन्योन्याध्याससिद्धमीश्वरब्रह्मणोरेकत्वमपर्वेदादृतघट्टितपटदृष्टान्तस्मरणेन द्रढयति अन्योन्याध्यासेति ॥
एवमन्योन्याध्याससिद्धमीश्वरब्रह्मणोरेकत्वं पामरैः ...
५३ ॥ अत्रैतत्कल्पयन्तो दृष्टान्तमपि घायापातदर्शिनां भेदाप्रतीतौ यत्वेकिमेव दृष्टान्तान्तरं दर्शयति ॥ मेघाकाशेति ॥ एकत्वं पश्यं
ति न भेदमित्यर्थः ॥ ५४ कुतस्तर्हि ब्रह्मेशयोर्भेदावगतिरित्यत आह ॥ उपक्रमादिभिरिति ॥ उपक्रमोपसंहारावभ्यासो ऽपूर्वता फ

अन्योन्याध्यासरूपोऽसावन्नलिप्तपटो यथा ॥ घट्टितेनैकतामेति तद्वद्भ्रान्त्यैकतां गतः ॥ ५३ ॥
मेघाकाशमहाकाशौ विविच्येते न पामरैः ॥ तद्वद्ब्रह्मेशयोरैक्यं पश्यन्त्यापातदर्शिनः ॥ ५४ ॥
उपक्रमादिभिर्लिङ्गैस्तात्पर्यस्य विचारणात् ॥ असङ्गं ब्रह्म मायावी सृजत्येष महेश्वरः ॥ ५५ ॥
सत्यं ज्ञानमनन्तं चेत्युपक्रम्योपसंहृतं ॥ यतो वाचो निवर्तन्त इत्यसङ्गत्वनिर्णयः ॥ ५६ ॥ मा
यी सृजति विश्वं सन्निरुद्धस्तत्र मायया ॥ अन्य इत्यपरा ब्रूते श्रुतिस्तेनेश्वरः सृजेत् ॥ ५७ ॥ ५५

अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय इति उक्तैः षड्भिर्लिङ्गैः श्रुतितात्पर्यावधारणे सति ब्रह्मासङ्गं मायावी
सृजेत्यवगम्यत इति शेषः ॥ ५५ श्रुतावुपक्रमोपसंहारैकरूप्यप्रदर्शनेनोक्तं ब्रह्मणोऽसङ्गत्वं स्पष्टयति सत्यं ज्ञा
नमिति ॥ अतो ऽसङ्गत्वनिर्णयो भवतीति शेषः ॥ ५६ मायाविन ईश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति बद्धत्वं दर्शयति मायी
ति ॥ अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्ध इति श्रुतिरीश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति ब
द्धत्वं दर्शयतीत्यर्थः ॥ ५७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ७२ ॥

एवमानंदमयेस्येश्वरस्य जगत्कारणत्वं प्रतिपाद्य तस्माज्जगदुत्पत्तिप्रकारमाह ॥ आनंदमय इति ॥ ईश्वरत्वाच्च हिरण्य-
गर्भरूपोऽभूदित्यन्वयः ॥ तत्र दृष्टांतमाह ॥ सुप्ति स्वप्न इति ॥ ९८ ॥ तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादौ क्रमेण सृ-
ष्टिः श्रवणादिदं सर्वमसृजतेति युगपच्छ्रवणाच्च कस्योपादेयत्वं कस्य वा हेयत्वमित्याकांक्षायां श्रुतियुक्त्युपेतत्वादुभयं
ग्राह्यमित्याह ॥ क्रमेणेति ॥ एषा जगत्सृष्टिर्द्विविधश्रुतिसद्भावात् क्रमेण युगपद्वा यथाश्रुति ज्ञेयेति योजना ॥ तत्रोपप-

आनंदमय ईशोऽयं बहु स्यामित्यवैक्षत ॥ हिरण्यगर्भरूपोऽभूत्सुप्तिः स्वप्नो यथा भवेत् ॥ ९८ ॥ क्रमे-
ण युगपद्वैषा सृष्टिर्ज्ञेया यथाश्रुति ॥ द्विविधश्रुतिसद्भावाद्द्विविधस्वप्नदर्शनात् ॥ ९९ ॥ सूत्रात्मा सू-
क्ष्मदेहाख्यः सर्वजीवघनात्मकः ॥ सर्वाहंमानधारित्वात्क्रियाज्ञानादिशक्तिमान् ॥ २०० ॥

त्तिः द्विविधस्वप्नदर्शनादिति लोके क्रमयुक्तस्य चाक्रमयुक्तस्य च स्वप्नपदार्थजातस्य दर्शनादिति भावः ॥ ९९ ॥ हिरण्यगर्भस्य
रूपं निरूपयति ॥ सूत्रात्मेति ॥ सूत्रात्मा पटे सूत्रमिव जगत्यनुस्यूत आत्मा स्वरूपं यस्य सः सूक्ष्मदेह इत्याख्या यस्य तथाविधः सर्व-
जीवघनात्मकः सर्वेषां जीवानां लिंगशरीरोपाधिकानां घनात्मकः समष्टिस्वरूपः ॥ तत्र हेतुः ॥ सर्वाहंमानधारित्वादिति ॥
॥ र्वाहंमानधारित्वादिति ॥ सर्वेषु व्यष्टिलिंगशरीरेष्वहमभिमानवत्त्वादिति भावः ॥ इच्छाज्ञानक्रियाशक्तिमांश्च ॥ २०० ॥ ॥

ननु द्वैतनिवृत्तिलक्षणायामुक्तेः स्वप्नदृष्टांतेन तत्वबोधसाध्यत्वाभिधानमनुपपन्नं ज्ञाननिवर्त्यत्वस्य द्वैतस्य स्वप्नतुल्यत्वाभा
वादित्याशंक्यान्यथाग्रहणरूपत्वेनास्य स्वप्नतुल्यत्वमस्त्येव ॥ त्रयमेतत् सुषुप्तं स्वप्नं जाग्रत् मायामात्रमिति श्रुत्याभिहितत्वान्नैव
मित्याह ॥ अद्वितीयमिति ॥ ईशजीवादिरूपेण वर्त्तमानं चेतनाचेतनात्मकं पदाखिलं जगदस्ति अयमद्वितीयब्रह्मतत्वे स्वप्न इति योज
शा२५ ना ११ ननु जीवयोर्ब्रह्माभिन्नयोः कथं जगदंतःपातित्वमित्याशंक्य तयोर्मायाकल्पितत्वेन जगदंतःपातित्वमित्याह ॥ आनंदमयेति १२ ॥

अद्वितीयब्रह्मतत्वस्वप्नोयमखिलं जगत् ॥ ईशजीवादिरूपेण चेतनाचेतनात्मकं ॥ ११ ॥ आनंदमय
विज्ञानमयावीश्वरजीवकौ ॥ माययाकल्पितावेतौ ताभ्यां सर्वं प्रकल्पितं ॥ १२ ॥ ईक्षणादिप्रवेशांता
सृष्टिरीशेन कल्पिता ॥ जाग्रदादिविमोक्षांतः संसारो जीवकल्पितः ॥ १३ ॥ अद्वितीयब्रह्मतत्वम
संगं तन्न जानते ॥ जीवेशयोर्मायिकयोर्वृथैव कलहं ययुः ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ताभ्यां सर्वं प्रकल्पितमित्युक्तं ॥ तत्र केन किं प्रकल्पितमित्याकांक्षायामाह ॥ ईक्षणादिति ॥ स ऐक्षत लोकान्नु सृजा इत्यादिकया द्वाराप्रा
पद्यतेत्यंतश्रुत्या प्रतिपादिता सृष्टिरीश्वरकर्तृका तस्य त्रय आवसथा इत्यादिकया ततमेव पुरुषं ब्रह्म ततममपश्यदित्यंतया श्रुत्या प्रति
पादितः संसारो जीवकर्तृक इत्यर्थः ॥ १३ ॥ ननु ब्रह्मण एव पारमार्थिकत्वे वादिनां जीवेश्वरतत्वविषया विप्रतिपत्तिः कुत इत्याशंक्याह
त्रासिद्धतत्वज्ञानस्यान्यत्वादित्याह ॥ अद्वितीयमिति ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥

जीवेश्वरविषयवादिविप्रतिपत्तेरज्ञानमूलत्वेन तथाविधतत्त्वेन ते बोधनीया इत्याशंक्य व्याकुलमतान्नेत्याह ज्ञात्वेति ॥१५॥ ईश्वरे जीवे
च भ्रान्त्या विप्रतिपन्नान्वादिनो विभज्य दर्शयति तृणार्चकादीति ॥१६॥ कुतो भ्रान्तत्वं तेषामित्यत आह अद्वितीयमिति ततः किं तत्राह ते
षामिति परिगृहीतपक्षप्रतिपादनाभिनिवेशेन चित्तविभ्रान्त्यभावान्नो हि कस्यापि सुखं तेषामित्याह क्वेह वा सुखमिति ॥१७॥ ननु ते

ज्ञात्वा सदा तत्त्वनिष्ठाननुमोदामहे वयं ॥ अनुशोचाम एवान्यान्न भ्रान्तैर्विवदामहे ॥१५॥ तृणार्चका
दियोगान्ता ईश्वरभ्रान्तिमाश्रिताः ॥ लोकायतादिसांख्यान्ता जीवविभ्रान्तिमाश्रिताः ॥१६॥ अद्विती
यं ब्रह्मतत्त्वं न जानन्ति यदा तदा ॥ भ्रान्ता एवाखिलास्तेषां क्व मुक्तिः क्वेह वा सुखं ॥१७॥ उत्तमाध
मभावश्चेत्तेषां स्यादस्तु तेन किं ॥ स्वप्नस्थराज्यभिक्षाभ्यां न बुद्धः स्पृश्यते खलु ॥१८॥ तस्मा
न्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः ॥ कार्या किंतु ब्रह्मतत्त्वं विचार्य बुध्यतां च तत् ॥१९॥

षां ब्रह्मविद्याभावेऽपीतराविद्याप्रयुक्त उत्तमाधमभावो दृश्यते ॥ अत उत्तमत्वप्रयुक्तसुखं केषांचित्स्यादित्याशंक्य तस्य मुमु
क्षुभिरनादरणीयत्वं दृष्टान्तेनाह उत्तमाधमभाव इति ॥१८॥ जीवेश्वरवादयोर्मुक्तिहेतुत्वाभावान्न मुमुक्षुभिस्तत्र मतिर्निवेशनी
येत्युपसंहरति तस्मादिति ॥ तर्हि किं कर्तव्यमित्याशंक्य भ्रान्तिविचारेण ब्रह्मबोध एव कर्तव्य इत्याह किंतु ब्रह्मेति ॥१९॥

ननु ब्रह्मतत्त्वानिश्चयाय तयोः स्वरूपं हेयत्वेन ज्ञातव्यमित्याशंक्य तथात्वे जीवेशवादयोरेव बुद्धिर्न परिसमानीयेत्याह पूर्वपक्षत
येति एतावता पूर्वपक्षतया तत्त्वनिर्णयहेतुत्वसंभवेन तयोर्जीवेशवादयोरवशोऽविवेकज्ञानमन्योन्यानिमग्नस्येति योजना २० ननु सांख्ययोग
शास्त्रयोर्जीवेशयोः शुद्धचिद्रूपत्वेन तत्त्ववद्भिरप्युपादेयत्वान्न तयोः पूर्वपक्षत्वमिति शंकते असंगचिद्विभुरिति २१ सांख्ययोगशास्त्रोक्तयोः शु
द्धचिद्रूपत्वेऽपि तयोर्वास्तवभेदस्येतरंगीकाराद्वाक्यमस्मात्सिद्धान्त इत्याह न तत्त्वमोरिति तत्त्वंपदयोरुभावर्थौ अस्मात्सिद्धान्ततां न गताविति यो

पूर्वपक्षतया तौ चेत्तत्त्वनिर्णयहेतुतां ॥ प्राप्नुतोऽस्तु निमज्ज्यस्व तयोर्नैतावता वशः ॥ २० ॥ असंगचि
द्विभुर्जीवः सांख्योक्तस्तादृगीश्वरः ॥ योगोक्तस्तत्त्वमोरर्थौ शुद्धौ ताविति चेच्छृणु ॥ २१ ॥ न तत्त्व
मोरुभावर्थावस्मात्सिद्धान्ततां गतौ ॥ अद्वैतबोधनायैव स कक्षा काचिदिष्यते ॥ २२ ॥ अना
दिमायया भ्रान्ता जीवेशौ सुविलक्षणौ ॥ मन्यंते तद्व्युदासाय केवलं शोधनं तयोः ॥ २३ ॥

जना ननु स्फोटस्य ब्रह्मशब्दाभ्यां शुद्धौ तत्त्वंपदार्थौ अवद्भिरपि निर्णीतौ इति रूपितावित्याशंक्याह अद्वैतबोधनायैवेति लोक
प्रसिद्धभेदानिरासद्वारा तदैक्यप्रतिपादनायैव तौ भेदेनाभ्युदितौ न तु तयोर्भेदः प्रतिपाद्यतर इति भावः २२ तर्हि पदार्थशोधनं किम
र्थमित्यत आह अनादीति अत्र मायाशब्देन स्वाश्रयव्यामोहिकाविद्या लक्ष्यते तया विपरीतज्ञानं प्रापिताः कर्तृत्वादिमत्त्वं जीवस्य सर्वज्ञ
त्वादिगुणयोगित्वं चेश्वरस्य पारमार्थिकं मन्यंते अतस्तन्निवृत्त्यर्थमेव शोधनं क्रियत इत्यर्थः ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥

पदार्थशोधनप्रकारमेवदिदर्शयिषुस्तदुपायत्वेनपूर्वोक्तं दृष्टांतंस्मारयति अत एवात्रेति यतःपदार्थशोधनं कर्तव्यं अतएवेत्यर्थः २४ पदार्थशोधनप्रकारमाह जलाभ्रोपाध्येति येजलाकाशाभ्रेस्वेतेजलाभ्रोपाध्यधीनत्वादेपारमार्थिके तयोराधारभूतौघटाकाशमहाकाशौस्तुनिर्मलो जलाद्युपाधिनिरपेक्षाकाशमात्ररूपावित्यर्थः २५ दार्ष्टांतिकमाह एवमानंदेति २६ न

अतएवात्र दृष्टांतो योग्यः प्राक्समीरितः ॥ घटाकाशमहाकाशजलाकाशाभ्रखात्मकः ॥ २४ ॥
जलाभ्रोपाध्यधीने ते जलाकाशाभ्रखे तयोः ॥ आधारौ तु घटाकाशमहाकाशौ सुनिर्मलौ ॥ २५ ॥
एवमानंदविज्ञानमयौ मायाधियोर्वशौ ॥ तदधिष्ठानकूटस्थब्रह्मणी तु विनिर्मले ॥ २६ ॥ एतत्कद्वोपयोगेन सांख्ययोगौ मतौ यदि ॥ देहोऽन्नमयकद्वात्वादात्मत्वेनाभ्युपेयतां ॥ २७ ॥ आत्मभेदो जगत्सत्यमीशोऽन्य इति चेत्त्रयं ॥ त्यज्यते तैस्तदा सांख्ययोगवेदांतसंगतिः ॥ २८ ॥

ननुपदार्थद्वयशोधनकद्वोपयोगित्वेनापि सांख्ययोगमतद्वयमंगीकार्यमिति चेत् अत्यल्पमिदमुच्यते इतरेषामपि शास्त्राणां तत्तत्कद्वोपयोगित्वेनास्माभिरभ्युपेयत्वादित्याह एतदिति २७ कुतस्तर्हि सांख्ययोगयोर्वेदांतविरोधित्वमित्याशंक्य जीवभेदजगत्सत्यत्वस्वरतातटस्थेश्वरत्वांशत्रयात्याह आत्मभेद इति २८ ॥ ॥ ॥

ननु जीवस्यासंगत्वज्ञानाद्वैतलेदेव मुक्तिसिद्धेः किमद्वैतबोधनेनेत्याशंक्याद्वैतज्ञानमंतरेणासंगत्वादिकं न संभाव्यत इत्यभिसंधिं हृ
दि निधायोत्तरमाह जीवासंगत्वेति २९ आत्मसंधिमाविष्करोति यथेति ३० असंगत्वमेव स्पष्टयति अवश्यमिति फलितमाह कोस्ये
ति ३१ संगनियमनयोरविवेककार्यत्वाद्विवेकज्ञानेन चाविवेकानिवृत्तौ कुतः पुनः संगाद्युत्पत्तिरिति शंकते अविवेकेति एवंसत्य

जीवासंगत्वमात्रेण कृतार्थ इति चेत्तदा ॥ स्रक्चंदनादिनित्यत्वमात्रेणापि कृतार्थता ॥ २९ ॥ यथा स्रगा
दिनित्यत्वं दुःसंपाद्यं तथात्मनः ॥ असंगत्वं न संभाव्यं जीवेतोर्जगदीशयोः ॥ ३० ॥ अवश्यं प्रकृतिः सं
गं पुरेवापादयेत्तथा ॥ नियच्छत्येतमीशोपि कोस्य मोक्षस्तथा सति ॥ ३१ ॥ अविवेककृतः संगो नियम
श्चेति चेत्तदा ॥ बलादापतितो मायावादः सांख्यस्य दुर्मतेः ॥ ३२ ॥ बंधमोक्षव्यवस्थार्थमात्मनानात्व
मिष्यतां ॥ इति चेन्न यतो माया व्यवस्थापयितुं क्षमा ॥ ३३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पसिद्धांतापात इति परिहरति बलादिति अयं भावः अविवेको नाम किं विवेकाभावः किं वा तदन्यस्तद्विरोधी नाद्यः अभावमात्र
स्य भावकार्यजनकत्वायोगात् नाद्वितीयः विवेकादन्यस्य घटादेः संगहेतुत्वादर्शनात् तृतीये तु तस्य भावरूपाज्ञानत्वमेवेति माया
वादप्रसंग इति ३२ अद्वैताभ्युपगमे बंधमोक्षव्यवस्थानुपपत्तेरात्मभेदोंगीकर्तव्य इति चोदयति बंधमोक्षेति एकस्याप्यात्म
नो मायया बंधमोक्षव्यवस्थोपपत्तेर्मैवमिति परिहरति नयतइति ३३ ॥ ॥

११

मायाधिकथंव्यवस्थापयेदित्याशंक्य तस्यदुर्घटकारित्वस्वाभाव्यादित्याह॥ दुर्घटमिति॥ बंधस्याविद्याकल्पितत्वेपिमोक्षोवास्तवोस्तुतथ्य
इत्याशंक्यश्रुतिविरोधान्नैवमित्याह॥ वास्तवाविति॥ नसहतेतरां नैवासहत इत्यर्थः॥ बंधमिवमोक्षमपिवास्तवंनसहत इति भावः॥२४
मोक्षादेर्वास्तवत्वप्रतिषेधिकांश्रुतिंपठति॥ ननिरोधइति॥ निरोधोनाशः उत्पत्तिर्देहसंबंधः॥ बद्धः॥ सुखदुःखादिधर्मवान्॥ साधकः

दुर्घटंघटयामीतिविरुद्धंकिंनपश्यति॥ वास्तवौबंधमोक्षौतुश्रुतिर्नसहतेतरां॥२४॥ ननिरोधोनचो
५२ त्पत्तिर्नबद्धोनचसाधकः॥ नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थता॥२५॥ मायाख्यायाःकामधेनोर्वत्सौ
जीवेश्वरावुभौ॥ यथेष्टंपिबतांद्वैतंतत्त्वंत्वद्वैतमेवहि॥२६॥ कूटस्थब्रह्मणोर्भेदोनाममात्राद्
ऋतेनहि॥ घटाकाशमहाकाशौवियुज्येतेनहिक्वचित्॥२७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्रवणाद्यनुष्ठातामुमुक्षुः साधनचतुष्टयसंपन्नः॥ मुक्तः निवृत्ताविद्यः॥ इत्येतत्सर्वंवस्तुतोनास्तीत्यर्थः॥२५॥ एवंजीवे
श्वरादिभेदस्यमायामयत्वमुपपाद्येदमुपसंहरतिमायेति॥२६॥ ननुजीवेश्वरयोर्मायिकत्वेनतद्भेदस्यमिथ्यात्वेपिकूट
स्थब्रह्मणोःपारमार्थिकत्वेनतद्भेदोपिपारमार्थिकः स्यादित्याशंक्यभेदप्रयोजकस्यस्वरूपभेदलक्षणस्याभावान्नैवमितिपरिह
रति॥ कूटस्थेति॥ नाममात्राद्भेदप्रतीतावपिवस्तुतोभेदाभावेदृष्टांतंपूर्वोक्तंस्मारयति॥ घटाकाशेति॥२७॥ ॥ ॥ ॥ ॥ ॥ ॥

एवं भेदस्य मिथ्यात्वसमर्थनेन किं फलमित्यत आह ।। यदद्वैतमिति ।। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रौतो यदद्विती
यं ब्रह्म प्रतिपादितं तदेव कालत्रयेऽप्यबाध्यत्वेन वास्तवं न भेद इति भावः ।। कुतस्तर्हि भेदाभिनिवेशः क्रियत इत्यत आह ।। व्यामायेति ।। तत्त्व
ज्ञानराहित्यादभिनिवेशं कुर्वन्तीति भावः ।। ३८ ।। ननु प्रपंचस्य मायामयत्वे तत्त्वस्याद्वितीयत्वे च ये वर्णयन्ति तेऽपि संसरन्तो दृश्यन्ते अत
स्तत्त्वज्ञानेन किं प्रयोजनमिति शंकते ।। ये वदन्तीति ।। र्भवशात्केषांचिद्व्यवहारे सत्यपि पूर्ववदभिनिवेशाभावान्नैवमिति परिहरति ।।

यदद्वैतमनन्तं सत्स्वच्छः प्राक्तदेवाद्य चोपरि ।। मुक्तावशीषि तद्व्यामायामयत्वादविज्ञानात् ।। ३८ ।। ये
वदन्तीत्यमेतेऽपि भ्राम्यन्तं विद्ययात्र किं ।। न यथापूर्वमेतेषामत्रभ्रान्तेरदर्शनात् ।। ३९ ।। ऐहिकामु
ष्मिकः सर्वः संसारो वास्तवस्ततः ।। न भाति नास्ति वा द्वैतमित्यज्ञानिविनिश्चयः ।। ४० ।। ज्ञानिनां वि
परीतोऽस्मान्निश्चयः सम्यगिष्यते ।। स्वस्वनिश्चयतो बद्धो मुक्तोऽहं वेति मन्यते ।। ४१ ।।

नयथेति ।। ३९ ।। ज्ञानिनां भ्रान्त्यभावं दर्शयित्वा भ्रमेऽज्ञानिनां निश्चयं तावदाह ।। ऐहिकेति ।। इहलोके भव ऐहिकः पुत्रकलत्रादिरूपः ।। अ
मुष्मिन्परलोके भव आमुष्मिकः स्वर्गस्त्र्याद्यनुभवरूपः ।। ४० ।। तत्त्वविन्निश्चयस्य ततो वैलक्षण्यं दर्शयति ।। ज्ञानिनामिति ।। अद्वैतं पार
मार्थिकं भाति च संसारस्त्वपारमार्थिक इति निश्चय इत्यर्थः ।। ततः किमित्याशंक्य स्वस्वनिश्चयानुसारेण फलं भवतीत्याह ।। स्वस्वेति ।। ४१ ।।

अद्वैतं भातीत्युक्तिः शास्त्रत एव नोत्पन्नवतः अतो न तत्सिद्धिरपि इति शंकते। नाद्वैतमपरोक्षमिति। अनुभवागोचरत्वमसिद्धमिति प
रिहरति। न चिद्रूपेणेति। घटस्फुरति पटस्फुरतीति घटादिष्वनुस्फुरणरूपेण भानादित्यर्थः। ननु चिद्रूपत्वस्य भानेऽपि तत्कार्त्स्न्येन न
प्रतीयत इति शंकते। अशेषेणेति। साकल्येन भानाभावो द्वैतेऽपि समान इत्याह। द्वैतं किमिति। ४२ एवं दोषसाम्यमभिधाय परिहारसाम्य
वैव द्वैतासिद्धेः माह। दिङ्मात्रेणेति। दिङ्मात्रेणैकदेशेन द्वयोर्द्वैताद्वैतयोरित्यर्थः। एतावता कथं परिहारसाम्यमित्याशंक्याह। द्वैतासिद्धिवदिति तेन तव

नाद्वैतमपरोक्षं चेन्न चिद्रूपेण भासनात्। अशेषेण न भातं चेद्द्वैतं किं भासतेऽखिलम्॥ ४२॥ दिङ्मात्रेणावि
भानं तु द्वयोरपि समं खलु। द्वैतासिद्धिवदद्वैतासिद्धिस्तेतावता न किम्॥ ४३॥ द्वैतेन हीनमद्वैतं द्वैतज्ञाने
कथं त्विदम्। चिद्भानं त्वविरोधित्वस्य द्वैतस्यातोऽसमे उभे॥ ४४॥ ॥ ॥ ॥ ॥ ॥

यद्येतावता एकदेशप्रतीतिसद्भावेन द्वैतासिद्धिवत् द्वैतानिश्चय एवाद्वैतसिद्धिरद्वैतानिश्चयोऽपि किं न भवति किंतु भवत्येवेत्यर्थः ४३
पूर्ववादी प्रकारान्तरेणाद्वैतासिद्धिं शंकते। द्वैतेनेति। अद्वैतं द्वैतरहितं तयोः परस्परविरोधात्तथा सति द्वैतप्रतीतावद्वैतं न संभ
वतीत्यर्थः। ननु तर्हि द्वैतस्याप्यद्वैतविरोधित्वादद्वैतप्रतिभासमाने द्वैतस्यासिद्धिरिति चोद्यं समानमित्याशंक्याह पूर्ववादी चिद्भानमि
ति भवन्मते चिद्रूपप्रतीतेरेवाद्वैतप्रतीतित्वात्तस्याद्वैताविरोधित्वाद्भावाभावयोः साम्यमिति भावः॥ ४४॥ ॥ ॥ ॥ ॥

प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभावान्न वास्तवाद्वैताविघातित्वमिति परिहरति। तिस्मिह्राती एवं तर्हीति। प्रसक्तप्रतिषेधेत्वन्यत्राप्रसंगा
च्छिष्यमाणे संप्रत्ययः परिशेषः॥४५॥ परिशेषप्रकारमेव दर्शयति। अचिंत्येति। न चिंत्या अचिंत्या रचनारूपं यस्य तत्तथाविधं सकलं ज
गन्मायैवापिछ्येवेत्यनेनैव प्रकारेणानिर्वचनीयत्वान्मिथ्यात्वं द्वैतस्य निश्चित्य वास्तवमद्वैतं परिशेष्यतामित्यर्थः॥४६॥ नत्वेवमद्वैत

एवं तर्हि श्रुणु द्वैतमसन्मायामयत्वतः। तेन वास्तवमद्वैतं परिशेषाद्विभासते॥४५॥ अचिंत्यरचनारू
पं मायैव सकलं जगत्। इति निश्चित्य वस्तुत्वमद्वैते परिशिष्यतां॥४६॥ पुनर्द्वैतस्य वस्तुत्वं भाति चेत्त्वं
तथा पुनः। परिशीलय को वात्र प्रयासस्तेन ते वद॥४७॥ कियंतं कालमिति चेत् खेदोऽयं द्वैत इष्यतां।
अद्वैते तु न युक्तोऽयं सर्वानर्थनिवारणात्॥४८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ति अथेहापि पुनः पुनर्द्वैतसत्यत्वं पूर्ववासनया भातीत्याशंक्य तन्निवर्तनाय पुनः पुनर्मिथ्यात्वं विचारयेत्याह। पुनर्द्वैतस्ये
ति। आवृत्तिरसकृदुपदेशादिति चतुर्थाध्याये आत्मनः श्रवणाद्यावर्त्तनस्य विहितत्वात् व्यासेनेति भावः॥४७॥ कियंतं कालमित्य
विचारणीयमित्याशंक्य परोक्षा चापरोक्षा च विद्या द्वेधा विचारजा तत्रापरोक्षाविद्याप्तौ विचारोऽयं समाप्यते इति विचारका
लावधेरुक्तत्वान्नाद्वैतविचारेऽयं खेदो युक्तः किंतु द्वैतप्रातिभास एव युक्त इत्याह। कियंतमिति॥४८॥ ॥ ॥ ॥ ॥ ॥

नन्वेवमद्वैतात्मतत्त्वापरोक्षज्ञानवत्त्वेऽपि प्रविद्वत्क्षुत्पिपासाद्यनर्थस्य परिदृश्यमानत्वादनर्थनिवारकत्वमात्मज्ञानस्यासिद्धमिति
शंकते क्षुत्पिपासादय इति किं मच्छब्दवाच्येऽहंकारे दृश्यन्ते उत मच्छब्दोपलक्षिते चिदात्मनीति विकल्प्याद्यमंगीकरोति मच्छ
ब्दवाच्य इति न द्वितीयः तस्यासंगत्वादविषयत्वाच्चेति वदितुरेव द्रष्टव्यं ४९ वस्तुतस्तात्प्रतीत्यज्ञावेऽपि चोत्यात तत्प्रसक्तिः स्यादिति

क्षुत्पिपासादयो दृष्टा यथापूर्वं मयीति चेत् मच्छब्दवाच्येऽहंकारे दृश्यतां नेति को वदेत् ४९
चिद्रूपेऽपि प्रसज्येरंस्तादात्म्याध्यासतो यदि माध्यासं कुरु किन्त्वात्मविवेकं कुरु सर्वदा ५० झटित्य
ध्यास आयाति दृढवासनयेति चेत् आवर्तयेद्विवेकं च दृढं वासयितुं सदा ५१ विवेके द्वैतमि
थ्यात्वं युक्त्यैवेति न भण्यतां अचिन्त्यरचनात्वस्यानुभूतिर्हि स्वसाक्षिकी ५२ ॥ ॥ ॥

शंकते चिद्रूपेऽपीति एवं तर्हि तन्निवृत्तये सदा विवेकः कर्तव्य इत्याह माध्यासमिति ५० अनादिवासनावशा
त्पुनःपुनरध्यासागमने तन्निवृत्तये विवेक एवावर्तनीयः नोपायान्तरमित्याह झटित्यध्यास इति ५१ ननु विचारेण द्वै
तस्य मायामयत्वं युक्त्यैवासिद्ध्यति नानुभवत इत्याशंक्याचिन्त्यरचनात्वलक्षणमिथ्यात्वानुभवस्य स्वसाक्षिकत्वान्नैवमिति परि
हरति विवेके द्वैतमिथ्यात्वमिति ५२

नन्वचिंत्यरचनात्वं मिथ्यापदार्थलक्षणमुक्तं चिदात्मन्यतिव्याप्तमिति शंकते चिदपीति प्रागभावयुतत्वे सति अचिंत्यरचनात्वं मि थ्यात्वलक्षणमिति यदि चिदाकाराचिंत्यरचनात्वमात्मनोंगीकरोति तर्ह्यस्त्विति एवमंगीकारे यासिद्धांतएवेत्याशंक्य परिहरति नोव यमिति, तत्र हेतुमाह नित्यत्वकारणादिति वयं चितिं सुचिंत्यरचनां ब्रूम इति योजना ५३ चितेर्नित्यत्वं कुत इत्याशंक्य प्रागभावाननुभवादित्याह प्रागभाव इति यतश्चितेः प्रागभावो नानुभूतस्ततो नित्येति योजना इदमत्राकूतं चितेः प्रागभा वोस्तीति वदन्प्रष्टव्यः चित्प्रागभावः किं चितानुभूयत उतान्येन नान्त्येन तदन्यस्य जडत्वेनानुभवितृत्वानुपपत्तेः

चिदप्यचिंत्यरचना यदि तर्ह्यस्तु नो वयं चितिं सुचिंत्यरचनां ब्रूमो नित्यत्वका
रणात् ५३ प्रागभावो नानुभूतश्चितेर्नित्या ततश्चितिः द्वैतस्य प्रागभावस्तु चैतन्येनानुभूयते ५४

चितानुभूयत इत्यपि पक्षे किं चिदंतरेण उत स्वेनैव नाद्यः अद्वैतवादे चिदंतरस्यैवाभावात् तत्स्वीकारेपि चित्प्रतियो गिकस्याचिद्ग्रहणमंतरेण ग्रहीतुमशक्यत्वेन तस्या अपि गृह्यमानत्वे घटादिवदचित्त्वापत्तेः नापि द्वितीयः स्वाभावस्य स्वे नग्रहीतुमशक्यत्वादिति ननु द्वैतस्य प्रमात्रादिभेदरूपत्वात्तदभावस्य चैतन्येनानुभवितुं तराभावाच्च चैतन्यवदेव द्वैत स्यापि नित्यत्वापत्तिरित्याशंक्यानुभवं विनं तराभावोसिद्ध इति परिहरति द्वैतस्येति जाग्रदादिद्वैताभावस्य सुषुप्तौ सा क्षिणानुभूयमानत्वात्तमसः सादी सर्वस्य सादीति श्रुतेश्चेति भावः ५४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एवं च प्रागभावयुतत्वे सति अचिंत्यरचनात्वस्य मिथ्यात्वलक्षणस्य सद्भावात् द्वैतं मिथ्यात्वमित्याह । प्रागभावयु
तमिति हेतुगर्भितविशेषणं । द्वैतं प्रागभावयुतत्वात् घटादिवद्रच्यते तथापि रच्यमानत्वेपि तस्यैतस्य रचनाचिंत्यात्तेन रच्यमा
नत्वे सत्यचिंत्यरचनात्वेनेंद्रजालवदिंद्रजालिकाप्रमादादिवन्मिथ्येत्यर्थः । ५५ । चितिस्तावत्स्वप्रकाशत्वेनानित्यापरोक्षमा
चिद ८ मातेरिक्तस्य मिथ्यात्वं तमेव चितानुरूपयत इति तदार्थितं । एवं च सत्यद्वैतस्यापरोक्षं नास्तीति वदतो व्याहतं इदं अस्यादित्याह हू ८

प्रागभावयुतं द्वैतं रच्यते हि घटादिवत् । तथा रचनाचिंत्यात् मिथ्यात्वेंद्रजालवत् ॥ ५५ ॥ चित्प्रत्यक्षा ततो
न्यस्य मिथ्यात्वं चानुभूयते । नाद्वैतमपरोक्षं चेत्येतत्र व्याहतकथं ॥ ५६ ॥ इत्थं ज्ञात्वापि संतुष्टाः केचि
त्तु तरतीर्ष्यतां । चार्वाकादेः प्रबुद्धस्याप्यात्मादेहः कुतो वद ॥ ५७ ॥ ॥ ॥ ॥ ॥ ॥

म२

ह । चित्प्रत्यक्षेति चिद्रूपेणाभासमानादित्यभिहितयुक्तिसमुच्चयार्थः अशब्दः । अद्वैतमपरोक्षं नेत्येतत्कथं न व्याहतं चेति योजना ५६
एवं वेदांतार्थज्ञानजातमपि पुरुषाणां केषांचिदज्ञाविश्वासः कुतो जायत इति पृच्छति । इत्थमिति । संस्यग्विचारप्रत्यत्वादि
तिविवक्षुः प्रतिवंदीग्रहातिचार्वाकादेरिति । आदिशब्देन यामैरागृह्यते । प्रबुद्धस्य ऊहापोहकुशलस्य ५७ ॥ ॥

प्रतिबंदीमोचनं शंकते सम्यगिति सार्धेन समाधत्ते तथा असंतुष्टा इति धीदोषादित्यनुषज्यते तुशब्द एवार्थे ५८ इत्थं
तत्वं विचार्यति ऊन्यतत्वज्ञानफलं विचाराधीनं तत्प्रतिपादिकां श्रुतिं पठति यदा सर्वे इति अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म सम
श्नुत इत्यस्य मंत्रस्योत्तरार्द्धं अस्य मुमुक्षो हृदि श्रिता ये कामास्तादात्म्याध्यासमूला इच्छादयः संति ते सर्वे यदा यस्मिन्काले
प्रमुच्यंते तत्वज्ञानेन अध्यासनिवृत्तौ निवर्तंते अथ तदानीमेव मर्त्यः पूर्वं देहतादात्म्याध्यासेन मरणशीलः पुरुषः अ

सम्यग्विचारो नास्त्यस्य धीदोषादिति चेत्तथा ॥ असंतुष्टा अशास्त्रार्थेन तैर्हंत विशेषतः ॥ ५८ ॥ यदा
सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः ॥ इति श्रोतं फलं दृष्टं नेति चेद्दृष्टमेव तत् ॥ ५९ ॥

मृतोऽध्यासाभावेन तद्रहितो भवति तत्र हेतुमाह अत्र ब्रह्म समश्नुत इति अत्र अस्मिन्नेव देहे ब्रह्मत्यादिलक्षणं स
मश्नुते सम्यग्प्राप्नोतीत्यस्याः श्रुतेरर्थः श्रुतिप्रतिपादितं फलं कामनिवृत्त्यादिलक्षणं नानुभवसिद्धं किंतु शाब्द
मेवेति शंकते इति श्रोतमिति समनंतरश्रुतिवाक्यतात्पर्यालोचनया तस्य दृष्टत्वं सिद्ध्यतीत्यभिप्रायेण परि
हरति दृष्टमेव तदिति ५९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तस्य दृष्टस्य स्वीकरणाय तद्वाक्यमुदाहृत्य तस्यार्थमाह ॥ यदेति ॥ अनेन वाक्यशेषेण कामप्रमोकस्य ग्रंथिभेदत्वे न व्याख्यातत्वाद् ग्रंथिभेदस्य चाहंकारचिदात्मनोस्तादात्म्याध्यासनिवृत्तिलक्षणस्यानुभवसिद्धत्वान्नाप्रत्यक्षतेति भावः ॥ वाक्यशेषत इत्यनेन वाक्येनेत्यर्थः ॥ ६० ॥ ननु लोके कामशब्देनेच्छाभेदेनोच्यते ॥ अतः कथं तस्य ग्रंथित्वेन व्या

यदा सर्वे प्रभिद्यंते हृदयग्रंथयस्त्विति ॥ कामा ग्रंथिस्वरूपेण व्याख्याता वाक्यशे
षतः ॥ ६० ॥ अहंकारचिदात्मानावेकीकृत्याविवेकतः ॥ इदं मे स्यादिदं मे स्यादिती
च्छा कामशब्दिता ॥ ६१ ॥ अप्रवेश्य चिदात्मानं पृथक्पश्यंस्त्वहंकृतिं ॥ इच्छंस्तु को
टिवस्तूनि न बाधो ग्रंथिभेदतः ॥ ६२ ॥ ॥

ख्यानमित्याशंक्याध्याससमन्वितस्यैवेच्छाविशेषकामशब्दवाच्यत्वेनेच्छामात्रस्येत्याह ॥ अहंकारेति ॥ ६० ॥ नन्वध्याससमन्वितस्यैव कामस्य त्याज्यत्वे सतीतरोभ्युपेतव्यः स्यादित्याशंक्याबाधकत्वाभ्युपैतीत्याह ॥ अप्रवेश्येति ॥ अहंकारे चिदात्मानमप्रवेश्य तादात्म्याध्यासेनानानंतरमद्विष्टेत्यर्थः ॥ ६२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नन्वध्यासाभावे कामानामनुदय एव स्यादित्याशंक्य प्रारब्धकर्मवशात्तेषां कामानामुत्पत्तिः संभवतीत्याह ग्रंथिभेदइति॥
तत्र दृष्टांतमाह बुद्ध्वापीति ६२ अध्यासाभावेऽहंकारगतेच्छादेरबाधकत्वे दृष्टांतद्वयप्रदर्शनेन विशदयति अहंकारग
तेति यथा देहगतव्याध्याद्यादिभिरहंकारसाक्षिणो बाधो नास्ति देहसंबंधरहितत्वाद्यथा वृक्षादिगतैर्जन्मादिभिरेवं अध्यास

ग्रंथिभेदेऽपि संभाव्या इच्छाः प्रारब्धदोषतः॥ बुद्ध्वापि पापबाहुल्यादसंतोषो यथा तव॥ ६३॥ अहंका
रगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा॥ वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किं भवेत्॥ ६४॥ ग्रंथिभेदात्पुरा
प्येवमिति चेत्तन्न विस्मर॥ अयमेव ग्रंथिभेदस्तव तेन कृती भवान्॥ ६५॥ नैवं जानंति मूढाश्चेत्सोऽयं ग्रंथि
र्न चापरः॥ ग्रंथितद्भेदमात्रेण वैषम्यं मूढबुद्धयोः॥ ६६॥ प्रवृत्तौ वा निवृत्तौ वा देहेंद्रियमनोधियां॥
न किंचिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः॥ ६७॥ ॥ ॥

निवृत्तावहंकारगतेच्छादिभिरपीतिभावः॥ ६४॥ चिदात्मनोऽसंगत्वस्यैकरूपत्वात्पूर्वमपि कामादिभिर्बाधो नास्तीति शंकते
ग्रंथिभेदादिति॥ एवंविधबोधस्यैव ग्रंथिभेदत्वेनास्माभिरभिधीयमानत्वात् इदं बोधमस्माद्दृष्टेर्न स्मर्तव्यमित्याह तन्नवि
स्मरेति॥ ६५॥ एवंविधज्ञानाभाव एव ग्रंथिरित्याह नैवमिति ननु ज्ञानिनोऽपीच्छाद्युपगमे ज्ञात्यज्ञानिनोः कुतो वैल
क्षण्यमित्याशंक्य ग्रंथिभेदातिरेकेण न कुतोऽपीत्याह ग्रंथितदिति॥ ६६॥ कारणांतराभावमेव विशदयति प्रवृत्तौ चेति॥ ६७॥

उक्तार्थे दृष्टान्तमाह ग्राह्यत्याज्येति ६८ ज्ञानिनो ग्रंथिसत्त्वे गीतावाक्यं प्रमाणयति न द्वेष्टीति संप्रवृत्तानि प्राप्ता-
दुःखानि न द्वेष्टि निवृत्तानि सुखानि न कांक्षतीति उदासीनवत्त्ववर्तितेत्यर्थः ग्रंथिभिदा ग्रंथिभेदः ६९ इदं वाक्यमौदासीन्य-
विधिपरं न तु ग्रंथिभेदे प्रमाणमिति शंकते औदासीन्यमिति विधिपरत्वे वच्छब्दो व्यर्थः स्यादिति परिहरति ज्ञानिदेहादे-
रेकार्यक्षमत्वादप्रवृत्तिर्न तु ग्रंथिभेदादित्याशंक्योपहसति न शक्ता इति ७० भवतु को दोषस्तत्राह तत्त्वबोधमिति असाध्य-

ग्राह्यत्याज्ये तयोर्वेदपारापारकृता भिदा नाधारादावस्ति भेदः सोयं त्यागोत्र योज्यतां ६८ न द्वेष्टि संप्रव-
त्तानि नानिवृत्तानि कांक्षति उदासीनवदासीन इति ग्रंथिभिदोच्यते ६९ औदासीन्यं विधेयं चेद्वच्छ-
ब्दव्यर्थता तदा न शक्ता ह्यस्य देहाद्या इति चेद्रोग एव सः ७० तत्त्वबोधं क्षयव्याधिं मन्यन्ते ये महाधि-
यः तेषां प्रज्ञातिविशदा किं तेषां दुःशकं वद ७१ भरतादेरप्रवृत्तिः पुराणोक्तेति चेत्तदा जक्षत्क्री-
डन्रतिं विंदन्नित्यश्रोषीर्न किं श्रुतिं ७२

मित्यर्थः ७१ ननु स्थाने परिहासोयं ज्ञानिनां प्रवृत्त्यभावस्य पुराणसिद्धत्वादिति शंकते भरतादेरिति श्रुतिमजानानमोद-
पसीति परिहरति जक्षन्निति जक्षत्क्रीडन्नरममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरमिति श्रौतं
वाक्यं नाश्रोषीरित्यर्थः जक्ष भक्ष्यहसनयोरिति धातुः क्रीडन् स्वेच्छया विहरन् रममाणः स्त्रीभिरिति नोपजनं स्मरन्निदं
शरीरमिति उपजनं जनानां समीपवर्तमानमिदं स्वशरीरं न स्मरन्नानुसंदधानित्यर्थः श्लोके रतिं विंदन्निति श्रौतस्य रममाण
इति पदस्य व्याख्यानं ७२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु तर्हि पुराणस्य का गतिरित्याशंक्य पुराणमपि औदासीन्यबोधनपरं न प्रवृत्त्यभावपरमित्यभिप्रेत्याह नह्याहारादि संत्यज्येति १३
संगोऽपि कुतस्त्यज्यत इत्यत आह संगी हीति १४ ननु तर्हि मानससंगस्यैव त्याज्यत्वे ततः संगप्रसक्त्यातो बहिर्व्यवहरतामसत्यादिकं
ज्ञानैः कथमुच्यत इत्याशंक्य शास्त्रतात्पर्यज्ञानमन्यत्वादित्याह अज्ञात्वेति अतो मूढव्यवहारो अविचारणीय इत्याह मूर्खाण

नह्याहारादि संत्यज्य भरतादिः स्थितः क्वचित् ॥ काष्ठपाषाणवत्किंतु संगभीता उदासते ॥ १३ ॥ संगी हि बाध्य-
ते लोके निःसंगः सुखमश्नुते ॥ तेन संगः परित्याज्यः सर्वदा सुखमिच्छता ॥ १४ ॥ अज्ञात्वा शास्त्रहृदयं मूढो
वर्त्यन्यथान्यथा ॥ मूर्खाणां निर्णयस्त्वास्तामस्मत्सिद्धांत उच्यते ॥ १५ ॥ वैराग्यबोधोपरमाः सहायास्ते परस्प-
रं ॥ प्रायेण सह वर्तंते वियुज्यंते क्वचित्क्वचित् ॥ १६ ॥ हेतुस्वरूपकार्याणि भिन्नान्येषामसंकरः ॥ यथाव-
दवगंतव्यः शास्त्रार्थं प्रविविच्यता ॥ १७ ॥ दोषदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता ॥ असाधारणहेत्वाद्या वै-
राग्यस्य त्रयोऽप्यमी ॥ १८ ॥

मिति तर्हि किमनुसंधेयमित्याकांक्षायां शास्त्रहृदयमित्याह अस्मत्सिद्धांत इति १५ कोऽसावित्यत आह वैराग्येति १६ वै-
राग्यादीनामन्योन्यापरिहारेणावस्थानदर्शनाद्भेदाशंकायां तद्धेत्वादीनां भेदाद्भेदोऽवगंतव्य इत्याह हेतुस्वरूपे-
ति १७ तत्र वैराग्यस्य हेत्वादित्रयं दर्शयति दोषदृष्टिरिति १८

इदानीं तत्त्वबोधस्य कारणादीनि दर्शयति ॥ श्रवणादीति ॥ आदिशब्देन मननिदिध्यासने गृह्येते ॥ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो
मंतव्यो निदिध्यासितव्य इत्यात्मदर्शनसाधनत्वेन श्रवणादिविधानात् श्रवणादेर्ज्ञानहेतुत्वं ॥ तत्त्वमिथ्याविवेचनं कूटस्थस्याहंका
रादेश्च भेदज्ञानं ॥ ग्रंथेरनुदयो ऽन्योन्याध्यासानुत्पत्तिः ॥ ७९ ॥ उपरतेस्तानि दर्शयति ॥ यमादिर्धीनिरोध इति ॥ आदिशब्देन यमा
दयो गृह्यंते ॥ धीनिरोधश्चित्तवृत्तिनिरोधलक्षणो योगः ॥ ८० ॥ किमेतेषां समप्राधान्यमुत नेत्याशंक्याह ॥ तत्त्वबोध इति ॥ तमेव वि

श्रवणादित्रयं तद्वत्तत्त्वमिथ्याविवेचनं ॥ पुनर्ग्रंथेरनुदयो बोधस्यैते त्रयो मताः ॥ ७९ ॥ यमादिर्धीनिरोध
श्च व्यवहारस्य संक्षयः ॥ स्युर्हेत्वाद्या उपरतेरित्यसंकर ईरितः ॥ ८० ॥ तत्त्वबोधः प्रधानं स्यात्साक्षान्मोक्षप्रदत्व
तः ॥ बोधोपकारिणावेतौ वैराग्योपरमावुभौ ॥ ८१ ॥ त्रयोऽप्यत्यंतपक्वाश्चेन्महतस्तपसः फलं ॥ दुरि
तेन क्वचित्किंचित्कदाचित्प्रतिबध्यते ॥ ८२ ॥

दित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेरित्यर्थः ॥ इतरयोस्तु उपकारित्वं ॥ ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्वि
ज्ञानार्थं स गुरुमेवाभिगच्छेत् शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिभ्यामवगम्यते ॥ ८२ ॥ प्रायेण स
हवर्त्तिता वियुज्यंते क्वचिदित्युक्तं तत्र कारणमाह ॥ त्रयोऽप्यत्यंतेति ॥ अनेकजन्मार्जितपुण्यपुंजपरिपाकेन त्रयाणां समहत्त्वो भवति अ
न्यथा तु प्रतिबंधकपापानुसारेण पुरुषविशेषेण कस्यचित्प्रतिबंधो भवतीति भावः ॥ ८२ ॥

तत्राऽपि तत्त्वज्ञानप्रतिबंधे मोक्षो नास्तीत्याह ॥ वैराग्योपरतीति ॥ तर्हि वैराग्यादिसंपादनं निःफलमित्याशंक्य प्राप्यपुण्यकृतांल्लोकानुषित्वा शाश्वतीः समाः । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते इति भगवद्वचनात्पुण्यलोकप्राप्तिर्भवतीत्याह ॥ पुण्यलोकस्तपोबलादिति ॥८३॥ वैराग्योपरत्योस्तु प्रतिबंधे जीवन्मुक्तिसुखं न सिद्ध्यतीत्याह ॥ पूर्णे बोधे तदन्याविति ॥८४॥ इदानीं वैराग्यादीनामवधिं

वैराग्योपरती पूर्णे बोधस्तु प्रतिबध्यते ॥ यस्य तस्य न मोक्षोऽस्ति पुण्यलोकस्तपोबलात् ॥८३॥ पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा ॥ मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति ॥८४॥ ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः ॥ देहात्मवत्परात्मत्वदार्ढ्ये बोधः समाप्यते ॥८५॥ सुप्तिवद्विस्मृतिः सीमा भवेदुपरमस्य हि ॥ दिशानयावगंतव्यं तारतम्यमवांतरं ॥८६॥ आरब्धकर्मनानात्वाद्बुद्धानामन्यथान्यथा ॥ वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पंडितैः ॥८७॥

दर्शयति ॥ ब्रह्मलोकतृणीकार इति ॥८५॥ सुप्तिवदिति ॥ अवांतरतारतम्यं स्वस्वबुद्ध्या निश्चेयमित्याह ॥ दिशानयेति ॥८६॥ ननु तत्त्वबोधवतामपि रागादिमत्त्वेन वैषम्योपलंभात् ॥ ज्ञानस्यापि मुक्तिहेतुत्वं नानिश्चेतुं शक्यते इत्याशंक्य रागादेर्व्याध्यादिवदारब्धकर्मफलत्वान्मुक्तिप्रतिबंधकत्वमस्ति ॥ अतो न शास्त्रार्थे विप्रतिपत्तव्यमित्याह ॥ आरब्धकर्मेति ॥८७॥ ॥ ॥ ॥ ॥

किं तर्हि प्रतिपत्तव्यमित्यत आह ॥ स्वस्वकर्मानुसारेणेति सर्वेषां ब्रह्माहमस्मीति ज्ञानमेकाकारं निरवद्यं ब्रह्मस्वरूपेणावस्थानं च
समानमिति भावः ॥ २८८ प्रकरणस्यास्य तात्पर्यं संक्षिप्य दर्शयति ॥ जगच्चित्रमिति ॥ २८९ ग्रन्थाभ्यासफलमाह ॥ चित्रदीपमिति ॥ ९० ॥ इ
ति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यशिष्येण श्रीरामकृष्णाख्यविदुषा विरचिते तात्पर्यबोधिनी

स्वस्वकर्मानुसारेण वर्ततां ते यथा तथा ॥ अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः ॥ २८८ ॥ जगच्चित्रं स्वचैत
न्ये पटे चित्रमिवार्पितं ॥ मायया तदुपेक्ष्यैव चैतन्यं परिशिष्यतां ॥ २८९ ॥ चित्रदीपमिमं नित्यं येऽनुसंदधते बुधाः ॥
पश्यंतोऽपि जगच्चित्रं ते मुह्यंति न पूर्ववत् ॥ ९० ॥ इति श्रीविद्यारण्यविरचितश्चित्रदीपः समाप्तः ॥ ॥ ॥
आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ १ ॥ ॥

नामकं चित्रदीपव्याख्यानं समाप्तं ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥ नत्वा श्री
भारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ क्रियते तृप्तिदीपस्य व्याख्यानं गुर्वनुग्रहात् ॥ २ ॥ तृप्तिदीपाख्यं प्रकरणमारभमाणः ॥
श्रीभारतीतीर्थविद्यागुरुस्तस्य श्रुतिव्याख्यानरूपत्वात् व्याख्येयां श्रुतिमादौ पठति ॥ आत्मानं चेद्विजानीयादिति ॥ १ ॥

रदानीं चिकीर्षितं विचारं तत्फलं च दर्शयति ॥ अस्येति ॥ अत्र तत्वप्रदीपाख्ये ग्रंथे अस्याः आत्मानं चेदित्यादिकायाः श्रुतेरभिप्राय तात्पर्यं सम्यग्विचार्यते ॥ तेनाभिप्रायविचारेण जीवन्मुक्तस्य श्रुतिप्रसिद्धायास्तृप्तेः सा विशदायते स्पष्टीभवतीति ॥ २ पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना आक्षेपस्य समाधानं व्याख्यानं पंचलक्षणं इति व्याख्यानलक्षणस्योक्तत्वात् पत्रसबरातिपदस्यार्थमभिधाय तदुपोद्घातत्वेन स्वरूपं संक्षिप्य दर्शयति ॥ मायाभासेनेति ॥ प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थमर्थांतरवर्णनमुपोद्घातः ॥ अत्र मायाशब्देन चिदानंदमयब्रह्मप्रतिबिंबसमन्विता सत्वरजस्तमोगुणात्मिका जगदुपादानभूता प्रकृतिरुच्यते ॥ सा च सत्वगुणस्य शुद्ध्यविशुद्धि

अस्याः श्रुतेरभिप्रायः सम्यगत्र विचार्यते ॥ जीवन्मुक्तस्य या तृप्तिः सा तेन विशदायते ॥ २ ॥
मायाभासेन जीवेशौ करोतीति श्रुतत्वतः ॥ कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितं ॥ ३ ॥

द्विधा भिद्यमाना क्रमेण माया चाविद्या च भवति ॥ तयोर्मायाविद्ययोः प्रतिबिंबितं ब्रह्मचैतन्यमेवेश्वरो जीवश्चेत्युच्यते ॥ तदिदं तत्वविवेकाख्ये ग्रंथे श्रीमद्विद्यारण्यगुरुभिर्निरूपितं ॥ चिदानंदमयब्रह्मप्रतिबिंबसमन्विता ॥ तमोरजःसत्वगुणा प्रकृतिर्द्विविधा च सा ॥ सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते ॥ मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः ॥ अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा ॥ सा कारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान् इति ॥ एवमेवार्थं मनसि निधाय जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिरपि प्रवृत्ता ॥ अतो जीवेश्वरयोर्मायाकल्पितत्वमन्यस्य तु तज्जगतस्ताभ्यामेव प्रकल्पितं ॥ ३ ॥ ॥ ॥

तत्र केन कियत्प्रकल्पितमित्यत आह॥ ईक्षणादीति॥ तदैक्षत बहु स्यां प्रजायेयेति श्रुतं॥ ईक्षणमादिर्यस्याः सा ईक्षणादिः॥ अनेन जी
वेनात्मनानुप्रविश्येति श्रुतः प्रवेशः अंतो यस्याः सा प्रवेशांता॥ ईक्षणादिश्चासौ प्रवेशांता चेति पञ्चात्मकर्मधारयः॥ सेयं सृष्टिरीशे
न कल्पिता॥ जाग्रदादिर्यस्य संसारस्यासौ जाग्रदादिः॥ विमोक्षो मुक्तिरंतो यस्य स विमोक्षांतः॥ संसारो जीवेन कल्पितः॥ तदभिमानि

ईक्षणादिप्रवेशांता सृष्टिरीशेन कल्पिता॥
जाग्रदादिविमोक्षांतः संसारो जीव कल्पितः॥४॥

त्या जीवस्येत्यर्थः॥ ते च जाग्रदादयो यस्य स्वरूपं श्रूयंते॥ स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं॥ स्त्रियन्नपाना
दिविचित्रभोगैः स एव जाग्रत्परितृप्तिमेति॥ स्वप्नेपि जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके॥ सुषुप्तिकाले सकले विली सकले २
ने तमोभिभूतः सुखरूपमेति॥ पुनश्च जन्मांतरकर्मयोगात्स एव जीवः स्वपिति प्रबुद्धः॥ पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं स
कलं विचित्रं॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते इति॥४॥ ॥ ॥

एवं पुरुषशब्दार्थविवेचनोपयोगिनीं साक्षिणमभिधायेदानीं पुरुषशब्दार्थमाह ॥ भ्रमाधिष्ठानेति ॥ यः कूटस्थासंगचिद्रूपः अवि
कार्यसंगचित्स्वरूपः ॥ भ्रमाधिष्ठानभूतात्मा भ्रमस्य देहेन्द्रियाद्यध्यासस्य अधिष्ठानभूतः अधिष्ठानत्वेन वर्त्तमानः परमात्मासौ संग एव अन्यो
न्याध्यासतः ॥ अन्योन्यस्मिन्नन्योन्यात्मात्मकतां अन्योन्यधर्मांश्चैतत्कार्यैर्निरूपितेन तादात्म्याध्यासेन असंगधीस्थस्य जीवः सेन
परमार्थिकसंबंधशून्यायां बुद्धौ वर्त्तमानो जीवः सन्नत्राज्ञस्याज्ञातो पूरुष इत्युच्यते ॥ स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इति अ
त्वा पुरुषशब्दस्य व्युत्पादितत्वात्पुरुषस्यैव च पुरुषत्वात् पुरुष एव पूरुषः ॥ बुद्ध्यादिकल्पनाधिष्ठानं कूटस्थचैतन्यमेव बुद्धेः प्राति

भ्रमाधिष्ठानभूतात्मा कूटस्थासंगचिद्वपुः ॥ अन्योन्याध्यासतोऽसंगधीस्थजीवोऽत्र पूरुषः ॥ ५ ॥
साधिष्ठानो विमोक्षादौ जीवोऽधिक्रियते न तु ॥ केवलो निरधिष्ठानविभ्रान्तेः क्वाप्यसिद्धितः ॥ ६ ॥

बिंबितत्वेन प्राप्तजीवभावः स तु पुरुषशब्देनोच्यते इत्यभिप्रायः ॥ ५ ॥ ननु च पुरुषशब्देन केवलश्चिदाभासरूपो जीव एवोच्यतां किं प्रेनेन कू
टस्थचैतन्येनाधिष्ठानभूतेनेत्याशंक्य तस्य मोक्षायवाधितत्वासिद्धेः तदपि स्वीकर्त्तव्यमित्याह ॥ साधिष्ठान इति ॥ अधिष्ठानेन कूटस्थ स्था २
चैतन्येन सहितो जीवो विमोक्षादौ मोक्षस्वर्गादिसाधनानुष्ठानेऽधिक्रियते अधिकारी भवति ॥ न तु केवलश्चिदाभासः ॥ कुत इत
त्यत्रैतत्राह ॥ निरधिष्ठानेति ॥ अधिष्ठानरहितस्यारोप्यस्य लोकेऽदृष्टत्वादिति भावः ॥ ६ ॥ ॥ ॥ ॥ ॥

रदानीं साधिष्ठानस्यैतस्य संसारादेर्न्वयित्वं तं श्लोकद्वयेन विभज्य दर्शयति ॥ अधिष्ठानांशेति ॥ जीवो यदाऽधिष्ठानांशसंयुक्तं
कूटस्थसहितं भ्रमांशं चिदाभासोपेतं शरीरद्वयमवलंबते ॥ स्वस्वरूपत्वेन स्वीकरोति ॥ तदाहं संसारीत्येवमभिमन्यते ५ यदा पुन
र्भ्रमांशस्य देहद्वयसहितस्य चिदाभासस्य तिरस्कारात् ॥ मिथ्यात्वज्ञानेनानादरणाद् अधिष्ठानता अधिष्ठानभूतस्यैव कूटस्थस्य
स्वरूपं जीवेन स्वीक्रियते ॥ तदाहं चिदात्माऽसंगोऽस्मीति बुध्यते जानाति ॥ न त्वधिष्ठानचैतन्यस्य जीवत्वरूपत्वस्वीकारे चि

अधिष्ठानांशसंयुक्तं भ्रमांशमवलंबते ॥ यदा तदाहं संसारीत्येवं जीवोऽभिमन्यते ॥ ७ ॥ भ्र
मांशस्य तिरस्काराद् अधिष्ठानप्रधानता ॥ यदा तदा चिदात्माहमसंगोऽस्मीति बुध्यते ॥ ८ ॥
नासंगेऽहंकृतिर्युक्ता कथमस्मीति चेत् श्रृणु ॥ एको मुख्यो द्वावमुख्यावित्यर्थस्त्रिविधोऽहमः ॥ ९ ॥

दात्माहमसंगोऽस्मीति बुध्यते इति यदुक्तं तदनुपपन्नं स्यात् ॥ असंगचिद्रूपस्य कूटस्थस्याहंप्रत्ययविषयत्वाभावादिति
शंकते ॥ नासंगेऽहमिति ॥ असंगे चिदात्मनि अविषये अहंप्रत्ययो न युज्यते ॥ यतोऽतः कथमहमस्मीति जानीयात् कथमपी
त्यर्थः ॥ मुख्यया वृत्त्याहंप्रत्ययविषयत्वाभावेऽपि लक्षणयात्तदस्मीति विवक्षया अहंशब्दार्थतावच्छिन्न जानीते ॥ श्रृण्विति अहंश
ब्दस्यैत्यर्थः ॥ ९ ॥

कीदृशो मुख्योऽर्थस्तं कालाद्यातं दर्शयति ॥ अन्योन्याध्यस्तेति ॥ कूटस्थचिदाभासयोः स्वरूपमन्योन्याध्यासेनैकं प्राप्तमहंशब्दस्य वाच्यत्वेन मुख्योऽर्थो भवति ॥ अस्य कुतो मुख्यत्वमित्यत आह ॥ तत्र मूढा इति ॥ तत्र तस्मिन्नविविक्ते कूटस्थचिदाभासयोः स्वरूपे यतोऽविवेकज्ञानमत्त्वैः सर्वैरप्यहंशब्दः प्रयुज्यते ततोऽस्य मुख्यत्वमित्यर्थः ॥४०॥ इदानीममुख्यौ तौ दर्शयति ॥ पृथगाभासेति ॥ आभासकूटस्थौ प्रत्येकमहंशब्दार्थत्वेन यदा विवक्षितौ तदा अमुख्यार्थौ भवतः ॥ तयोरमुख्यत्वे कारणमा

अन्योन्याध्यस्तरूपेण कूटस्थाभासयोर्वपुः ॥ एकीभूय भवेन्मुख्यस्तत्र मूढैः प्रयुज्यते ॥४०॥
पृथगाभासकूटस्थावमुख्यौ तत्र तत्त्ववित् ॥ पर्यायेण प्रयुङ्क्तेऽहंशब्दं लोके च वैदिके ॥४१॥
लौकिके व्यवहारेऽहं गच्छामीत्यादिके बुधः ॥ विविच्यैव चिदाभासं कूटस्थात्तं विवक्षति ॥४२॥

ह ॥ तत्र तत्त्वविदिति ॥ अत्रापि यत इत्यध्याहारः तत्त्वविद्यतस्तत्र तयोः कूटस्थचिदाभासयोरहंशब्दं लोके लौकिके वैदिके च व्यवहारे पर्यायेण प्रयुङ्क्त इति योजना ॥ अयं भावः ॥ चिदाभासकूटस्थयोरविविक्तरूपस्य सर्वजनीनव्यवहारविषयत्वात् मुख्यार्थत्वं ॥ विविक्तरूपस्य तु कतिपयज्ञनैः कदाचिदेव व्यवह्रियमाणत्वात्तदस्मुख्यार्थत्वमिति ॥४१॥ पर्यायेण प्रयुङ्क्त इत्युक्तमेवार्थं प्रपंचयति प्रतिपादित्सोकर्यायश्लोकद्वयेन ॥ लौकिके व्यवहार इति ॥ बुधो विद्वानहं गच्छामीत्यादिके लौकिकव्यवहारे कूटस्थाच्चिदाभासं विविच्य तमेवाहंशब्देन विवक्षति वक्तुमिच्छति ॥४२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अयमेव बुधः शास्त्रीयदृष्टितो वेदांतश्रवणजनितज्ञानेन केवलं चिदाभासाद्विविक्ते कूटस्थे असंगोऽहं चिदात्माहमिति लक्षणया अहं
शब्दं प्रयुंक्ते अतो लक्षणया अहंशब्दार्थत्वेनाहंप्रत्ययविषयत्वसंभवाद् असंगोऽहमस्मीति ज्ञानमुपपद्यते इत्यभिप्रायः ॥१३॥ ननु प्र
थं गोभासकूटस्थावहंशब्दस्य मुख्यार्थावित्युक्तं तयोर्मध्ये कूटस्थः किमज्ञाननिवृत्तये असंगोऽस्मीति किं वा चिदाभासः न ता
वत्कूटस्थस्तस्यासंगचिद्रूपत्वेन ज्ञानित्वाज्ञानित्वयोरनुपपत्तेः ॥ अतश्चिदाभासस्य ज्ञानित्वादिकं वक्तव्यं तथा च सति कूटस्था
तो

असंगोऽहं चिदात्माहमिति शास्त्रीयदृष्टितः ॥ अहंशब्दं प्रयुंक्तेऽयं कूटस्थे केवलं बुधः ॥१३॥ ज्ञानिताज्ञानि
ते त्वात्माभासस्यैव न चात्मनः ॥ तथा च कथमाभासः कूटस्थोऽस्मीति बुध्यते ॥१४॥ नायं दोषश्चिदाभासः कू
टस्थैकस्वभाववान् ॥ आभासत्वस्य मिथ्यात्वात्कूटस्थत्वावशेषणात् ॥१५॥ कूटस्थोऽस्मीति वाक्योऽपि मि
थ्या चेन्नेति को वदेत् ॥ न हि सत्यतयाभीष्टं रज्जुसर्पविसर्पणं ॥१६॥ ॥ ॥ ॥ ॥ ॥

दन्यश्चिदाभासोऽहं कूटस्थोऽस्मीति न ज्ञातुमर्हतीति शंकते ॥ ज्ञानिताज्ञानते इति ॥१४॥ तस्य कूटस्थादन्यत्वमेवासिद्धमिति परिहरति
नायं दोषश्चिदाभास इति ॥ तत्रोपपत्तिमाह ॥ आभासत्वस्येति यथा दर्पणे प्रतीयमानस्य मुखाभासस्य ग्रीवास्थमुखमेव तत्त्वं तद्वदिति
भावः ॥१५॥ ननु चिदाभासस्य मिथ्यात्वे चिदाभासाभिन्नः कूटस्थोऽस्मीति ज्ञानमपि मिथ्या स्यादिति शंकते ॥ कूटस्थोऽस्मीति ॥ कूटस्थ
स्वरूपादतिरिक्तस्य स्वरूपस्यापि मिथ्यात्वाभ्युपगमान्न मिथ्यात्वमस्माकमनिष्टमेवेति परिहरति ॥ नेति को वदेदिति ॥ उक्तार्थं दृष्टां
तेन स्पष्टयति ॥ न हि सत्यतयेति रज्ज्वां कल्पितस्य सर्पस्य गत्यादिकमपि प्रतीयमानं वास्तवं नांगीक्रियते यथा तद्वदिति भावः ॥१६॥ ॥ ॥

ज्ञानस्याभिघ्यात्वे तेन संसारस्य निवृत्तिर्न स्यादित्याशंक्य निवर्त्यस्य संसारस्यापि तथात्वान्निवृत्तिरुपपद्यते ॥ स्वप्नव्याघ्रदर्शनेन
निद्रानिवृत्तिवदित्यभिप्रायेणाह ॥ तादृशेनेति तत्र यादृशो यक्षस्तादृशो बलिरिति लौकिकगाथां संवादयति ॥ यदानुरूप इति ॥१७॥ उ
पपादितमर्थमुपसंहरति ॥ तस्मादात्मस्मरतीति यस्मात्कूटस्थ एव चिदात्मा सस्यानिजं स्वरूपं तस्मात्पुरुषशब्दवाच्यः ॥ कूटस्थस्साहित
श्चिदात्मा स संकूटस्थं मिथ्यात्मतात्त्वस्माद्विविच्य लक्षणया कूटस्थोऽहमस्मीति ज्ञातुं शक्नोतीत्यभिप्रायेणाऽऽकृतिरस्मीत्युक्तो व

तादृशेनापि बोधेन संसारो विनिवर्त्तते ॥ यदानुरूपो हि बलिरित्याहुर्लौकिका जनाः ॥१७॥
तस्मादात्मा सः पुरुषः स कूटस्थो विविच्यते ॥ कूटस्थोऽस्मीति विज्ञातुमर्हतीत्यन्यथा श्रुतिः ॥१८॥
अस्मदीयो विपर्यस्तबोधो देहात्मनीक्ष्यते ॥ तद्वदेवेति निर्दिष्टमयमित्यभिधीयते ॥१९॥ ॥

तीत्यर्थः ॥१८॥ एवं पुरुषोऽस्मीति पदद्वयप्रयोगाभिप्रायमभि[illegible]धायाथाभीति पदप्रयोगाभिप्रायमाह ॥ अस्मदीय इति ॥ लौकिका
नां प्रसिद्धे देहरूपे अनात्मनि संशयविपर्ययपराहितो योऽहमस्मीति बोधो यद्वदुपलभ्यते ॥ अत्र प्रत्यगात्मनि विषये तद्वत्तथा
विधं ज्ञानं मुमुक्षोस्सिद्धये संपाद्याभीति निर्दिष्टमय[illegible]मित्यभिधीयते श्रुत्येति शेषः ॥१९॥ ॥ ॥ ॥ ॥ ॥ ॥

ईदृशस्यैव बोधस्य मोक्षसाधनत्वे आचार्यवाक्यं संपादयति ॥ देहात्मज्ञानेति ॥ अहं मनुष्य इति देहात्मविषयो दृढप्रत्ययो यथा ए-
वं प्रत्यगात्मन्येव देहात्मज्ञानापबाधनेन ब्रह्माहमस्मीति ज्ञानं यस्य जायते स विद्वान्नेच्छन्नपि मोक्षेच्छारहितोऽपि मुच्यते
संसारहेतोरज्ञानस्य ज्ञानेनोपबाधितत्वादिति भावः ॥ १९ ॥ स्वयमितिपदप्रयोगस्याभिप्रायांतरं शंकते ॥ स्वयमिति ॥ यथायं घट इत्यादिप्रयो-
गेष्विदमा निर्दिष्टस्य वस्तुन आपरोक्ष्यं दृष्टं तथायमस्मीत्यत्रापीति भावः ॥ तदप्यस्माकमिष्टमेवेत्याह ॥ तदुच्यतामिति कुत इत्यत आह

देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं ॥ आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते ॥ २० ॥
स्वयमित्यपरोक्षत्वमुच्यते चेत्तदुच्यतां ॥ स्वयंप्रकाशचैतन्यमपरोक्षं सदा यतः ॥ २१ ॥
परोक्षमपरोक्षं च ज्ञानमज्ञानमित्यदः ॥ नित्यापरोक्षरूपेऽपि द्वयं स्याद्दशमे यथा ॥ २२ ॥

स्वयमिति ॥ साधनांतरनिरपेक्षतया वर्तमाने चैतन्ये व्यवधायकाभावान्नित्यापरोक्षमित्यस्माभिरभ्युपेतत्वादित्यर्थः ॥ २१ ॥ नन्वा-
त्मनः स्वप्रकाशचिद्रूपत्वेन नित्यापरोक्षत्वाभ्युपगमे स्वयमितिपदप्रयोगस्याभिप्रायवर्णनांगीकारबलादवगतमात्मनः ॥ परोक्षवि-
षयत्वमपरोक्षविषयत्वं सर्वेषां ज्ञानाज्ञानाश्रयत्वं चानुपपन्नं स्यादित्याशंक्य दशम इव सर्वमुपपद्यत इत्याह ॥ परोक्षमिति परोक्षवि-
षयत्वमपरोक्षविषयत्वं चेत्येकं युगलं ॥ ज्ञानमज्ञानमित्यपरं ॥ इदं द्वयं नित्यापरोक्षात्मनि दशम इव स्यादित्यर्थः ॥ २२ ॥

दृष्टान्तं व्युत्पादयति नवसंख्येति परिगणनीयपुरुषनिष्ठया नवसंख्ययापहृतविवेकज्ञानो दशमस्तदा तान्परिगणनीयान्नवसंख्या
कान् वीक्षमाणोऽपि सम्यक्पश्यन्नपि अत्यागणनाकर्तारं स्वात्मानं दशमोऽहमस्मीति न वेत्तीत्यर्थः २३ एवं दशमेऽज्ञानं प्रदर्श्य तत्कार्यमाव
रणं दर्शयति नभातीति तदा दशमः स्वं दशमं स्वं तं दशमो न भाती नास्तीति मत्वा वक्ति अस्य व्यवहारस्य यत्कारणं तदज्ञानकृतमज्ञा

नवसंख्याहृतज्ञानो दशमो विभ्रमात्तदा ॥ न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव ॥ २३ ॥ न भाति नास्ति दश
म इति स्वं दशमं तदा ॥ मत्वा वक्ति तदज्ञानकृतमावरणं विदुः ॥ २४ ॥ नद्यां ममार दशम इति शोचन्प्ररोदिति
अज्ञानकृतविक्षेपं रोदनादिं विदुर्बुधाः ॥ २५ ॥ न मृतो दशमोऽस्तीति श्रुत्वाप्तवचनं तदा ॥ परोक्षत्वेन द
शमं वेत्ति स्वर्गादिलोकवत् ॥ २६ ॥ त्वमेव दशमोऽसीति गणयित्वा प्रदर्शितः ॥ अपरोक्षतया ज्ञात्वा हृष्यत्येव न

नकार्यमावरणं विदुर्बुधा इति शेषः २४ अज्ञानस्यैव कार्यविशेषं विक्षेपं दर्शयति नद्यामिति २५ दशमस्यास्तित्वांशनिवर्त्तकं परोक्ष
ज्ञानमाह नमृतो दशम इति २६ तस्यैवाभानांशनिवर्त्तकमपरोक्षज्ञानं दर्शयति त्वमेवेति स्वेन परिगणितैर्नवभिः सह स्वात्मा
नं गणयित्वा त्वमेव दशमोऽसीति प्रदर्शितः अहं दशमोऽस्मीति अपरोक्षतया ज्ञात्वा हर्षं प्राप्नोति रोदनं च त्यजति २७ ॥ ॥

तृप्तिदीप

एवं दृष्टांतमत्ते दशमे प्रदर्शितमवस्थासप्तकमन्यदार्ष्टान्तिक आत्मन्यपि तद्योजनीयमित्याह ॥ अज्ञानावृतीति ॥ अज्ञानं चाव
तिश्च विक्षेपश्च द्विविधज्ञानं च हृष्टिश्शोकेति द्वंद्वसमासः ॥२८॥ तत्रात्मन्यज्ञानादिकं क्रमेण दर्शयति संसारासक्तेत्यादिना ॥ संसारासक्त
चित्त इति ॥ अयं चिदाभासो विषयसंपादनादिष्वासक्तचित्तः सन्न कदाचनस्वात्मविचारात्स्वं कदापि स्वतत्त्वं स्वस्यान्निजरूपं स्वप्रकाशचि
द्रूपं कूटस्थं प्रत्यगात्मानं नैव वेत्ति न जानाति इति यत्तदज्ञानं ॥२९॥ चिदात्मा विषये प्रसंगे जाते कूटस्थो नास्ति न भातीति मत्वा ब्रू

अज्ञानावृतिविक्षेपद्विविधज्ञानहृष्टयः ॥ शोकापगम इत्येते योजनीयाश्चिदात्मनि ॥२८॥ संसारासक्तचि
त्तः सञ्चिदाभासः कदाचन ॥ स्वयंप्रकाशकूटस्थं स्वतत्त्वं नैव वेत्त्ययं ॥२९॥ न भाति नास्ति कूटस्थ इति वक्ति प्रसं
गतः ॥ कर्त्ता भोक्ताहमस्मीति विक्षेपं प्रतिपद्यते ॥३०॥ अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्तया ॥ पश्चात्कूट
स्थ एवास्मीत्येवं वेत्ति विचारतः ॥३१॥ कर्त्ता भोक्तेत्येवमादि शोकजातं प्रमुंचति ॥ कृतं कृत्यं प्रापणीयं प्राप्त

ते इदमज्ञानकार्यमावरणं ॥ कूटस्थासत्त्वाभानाभिधानवत्कर्तृत्वादिकमात्मन्यारोपयति ॥ अस्यारोपस्य हेतुर्देहद्वययुताश्चि
दाभासोऽयं विक्षेपः ॥३०॥ परेणबोधितः कूटस्थोऽस्तीति जानाति ॥ इदं परोक्षज्ञानं ॥ श्रवणादिपरिपाकवशात्कूटस्थोऽहमेवास्मीति जा
नाति इदमपरोक्षज्ञानं कूटस्थस्य प्रत्यगात्मज्ञानानंतरं कर्तृत्वादिशोकजातं त्यजतीति यदयं शोकापगमः कृतं कर्त्तव्यजातं कृतं नि
ष्पादितं प्रापणीयफलजातं प्राप्तं लब्धमिति तुष्यतीति यदयं तृप्तिरित्यर्थः ॥३२॥ ॥ ॥

दार्ष्टांतिके व्यक्तामवस्थासप्तकमनुवदति ॥ अज्ञानमिति ॥२३॥ ननूक्तावस्थासप्तकस्यात्मधर्मत्वांगीकारे तस्य कूटस्थत्वं व्याहन्ये
तेत्याशंक्य एताः सप्तावस्था आभासस्यैव न कूटस्थस्येत्याह ॥ सप्तावस्था इति ॥ सर्ववाक्यं सावधारणमिति न्यायेन कूटस्थस्यैवे
मा२ त्यवगम्यते ॥ आभासमात्रोपन्यासो व्यर्थ इत्याशंक्य न व्यर्था बंधमोक्षकारित्वद्योतनफलत्वादुपन्यासस्येत्यभिप्रायेणाह ॥ तास्विमौ इ
ति ॥ किमासां सप्तानामप्यविशेषेण बंधमोक्षकारित्वं नेत्याह ॥ तत्रेति ॥ अज्ञानावरणविक्षेपरूपास्तिस्र इत्यर्थः ॥२४॥ आसां बंधका

अज्ञानमावृतिस्तद्वद्विक्षेपश्च परोक्षधीः ॥ अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशा ॥२३॥ सप्तावस्था इमाः सं
ति चिदाभासस्य तास्विमौ ॥ बंधमोक्षौ स्थितौ तत्र तिस्रो बंधकृतः स्मृताः ॥२४॥ न जानामीत्युदासीनव्यवहारस्य
कारणं ॥ विचारप्रागभावेन युक्तमज्ञानमीरितं ॥२५॥ अमार्गेण विचार्याथ नास्ति नो भाति चेत्यसौ ॥ विपरीतव्य
वहृतिरावृतेः कार्यमिष्यते ॥२६॥ ॥ ॥ ॥ ॥

रित्वदर्शनाय तिसृणामपि स्वरूपं प्रत्येकं कार्यप्रदर्शनेन स्पष्टीचिकीर्षुरज्ञानस्य स्वरूपं तावद्दर्शयति ॥ न जानामीति ॥ आत्मत
त्वविचारस्य प्रागभावसहितमुदासीनव्यवहारस्य कारणं न जानामीत्यनुभूयमानमज्ञानमीरितमित्यर्थः ॥२५॥ आवृ
तिकार्यं दर्शयति ॥ अमार्गेणेति ॥ शास्त्रोक्तप्रकारमतिलंघ्य केवलं तर्केण विचार्यानंतरं कूटस्थो नास्ति न भातीत्येवंरूपो वि
परीतव्यवहार आवरणकार्यमित्यर्थः ॥२६॥ ॥ ॥ ॥ ॥ ॥

विक्षेपस्य स्वरूपं तत्कार्यं च दर्शयति ॥ देहद्वयेति स्थूलसूक्ष्माख्यशरीरद्वयसहितश्चिदाभास एव विक्षेपो बंधहेतुः संसाराख्य
कर्तृत्वाद्यखिलः शोकः अस्य चिदाभासस्य कार्यमिति शेषः ॥ कर्तृत्वादीत्यादिशब्देन प्रमातृत्वादयो गृह्यंते ॥ ३७ ॥ ननु सर्वा अवस्था
श्चिदाभासस्येत्युक्तमनुपपन्नं अज्ञानावरणयोर्विक्षेपोत्पत्तेः पुरा स्थितत्वाच्चिदाभासस्य च विक्षेपांतःपातित्वात्तदवस्थात्वानु
पपत्तेरित्याशंक्याह ॥ अज्ञानमावृतिरिति ॥ अनयोर्विक्षेपात्प्राक् पुरा स्थितत्वेपि नात्मावस्थात्वं तस्यासंगत्वेनावस्थावत्त्वानुपपत्तेः
अतः परिशेषाच्चिदाभासावस्थात्वमेव तयोर्वक्तव्यमिति भावः ॥ ३८ ॥ अवस्थावतो विक्षेपस्य तदानीमभावात्तदवस्थात्वाभिधानमनुप

देहद्वयचिदाभासरूपो विक्षेप ईरितः ॥ कर्तृत्वाद्यखिलः शोकः संसाराख्योऽस्य बंधकः ॥ ३७ ॥ अज्ञानमावृ
तिस्त्वेते विक्षेपात्प्राक्प्रसिद्ध्यतः ॥ यद्यप्यथाप्यवस्थेते विक्षेपस्यैव नात्मनः ॥ ३८ ॥ विक्षेपोत्पत्तितः पूर्वमपि
विक्षेपसंस्कृतिः ॥ अस्त्येव तदवस्थात्वमविरुद्धं ततस्तयोः ॥ ३९ ॥ ब्रह्मण्यारोपितत्वेन ब्रह्मावस्थे इमे इति ॥ न
शंकनीयं सर्वासां ब्रह्मण्येवाधिरोपणात् ॥ ४० ॥

पन्नमित्याशंक्याविक्षेपाभावेपि तत्संस्कारस्य तदानीं सत्त्वाद्विक्षेपावस्थात्वाभिधानं न विरुध्यत इत्याह ॥ विक्षेपोत्पत्तित इति
ततः कारणात्तयोस्तदवस्थात्ववर्णनमविरुद्धमिति योजना ॥ ३९ ॥ न च प्रसिद्धसंस्काराभ्युपगमद्वारा विक्षेपावस्थात्ववर्णनाद्वर
मधिष्ठानतया प्रसिद्धब्रह्मावस्थात्ववर्णनमित्याशंक्यातिप्रसंगान्नैवमिति परिहरति ब्रह्मणीति ॥ ४० ॥

ननु ब्रह्मण्यारोपितत्वाविशेषेपि विद्योत्पत्त्युत्तरकालभाविनीनां संसारित्वाद्यवस्थानां जीवाश्रितत्वेनानुभूयमानत्वान्न ब्रह्मावस्थात्वमिति शंकते ॥ संसारीति ॥ संसारी कर्तृत्वादिधर्मवान् विशुद्धसत्त्वसाक्षात्कारवान् निःशोकः शोकरहितः ॥ तुष्टः वक्ष्यमाणस्वातन्त्र्यत्वादिजनितसंतोषवानहमस्मीति उत्तरावस्था जीवगा जीवाश्रिता भांति न ब्रह्माश्रिता इत्यर्थः ॥

संसार्यहं विशुद्धोहं निःशोकस्तुष्ट इत्यपि ॥ जीवगा उत्तरावस्था भांति न ब्रह्मगा यदि ॥ ४१ ॥
तर्ह्यज्ञोहं ब्रह्मसत्वभाने मद्दृष्टितो नहि ॥ इति पूर्वे अवस्थे च भासेते जीवगे खलु ॥ ४२ ॥
अज्ञानस्याश्रयो ब्रह्मेत्यधिष्ठानतया जगुः ॥ जीवावस्थात्वमज्ञानाभिमानित्वादवादिषं ॥ ४३ ॥

४१ एवं तर्ह्यज्ञानावरणयोरपि जीवाश्रितत्वेनानुभूयमानत्वाज्जीवावस्थात्वमेवेति परिहरति ॥ तर्हीति ॥ मद्दृष्टितो ममानुभवेनेत्यर्थः ॥ ४२ ननु तर्ह्यज्ञानाश्रयत्वं ब्रह्मणः पूर्वाचार्यैः कथमुक्तमित्याशंक्य तद्विवक्षां दर्शयति ॥ अज्ञानस्येति ॥ ब्रह्मणोज्ञानाधिष्ठानत्वविवक्षया तदाश्रयत्वमुक्तमित्यर्थः ॥ मया ऽपि तर्हि किं विवक्षया जीवावस्थात्वमुक्तमित्याशंक्य स्वविवक्षां दर्शयति ॥ जीवावस्थेति ॥ ४३ ॥

एवंबंधहेतुमवस्थात्रयंप्रदर्श्यावशिष्टास्ववस्थासुमध्येपूर्वोक्ताज्ञानावरणनिवृत्तिद्वारामुक्तेर्हेतुमवस्थाद्वयंदर्शय
ति ज्ञानद्वयेनेतिपरोक्षत्वापरोक्षत्वलक्षणेनज्ञानद्वयेनावरणकारणेऽज्ञानेनष्टेसतितत्कृतावृतिः॥ तेनाज्ञानेनोत्पादितंनभातिना
स्तीतिव्यवहारकारणंद्विविधमप्यावरणंकारणाभावान्नश्यतीति॥४४॥ कस्यांशस्यकेननिवृत्तिरित्यपेक्षायामुभयंविभज्यदर्शयति
परोक्षेति कूटस्थोस्तीत्येवंरूपात्परोक्षज्ञानादज्ञानस्यासत्त्वावरणकारणत्वंनिवर्त्तते॥ कूटस्थोस्मीत्यपरोक्षज्ञानेनकूटस्थोन

ज्ञानद्वयेननष्टेस्मिन्नज्ञानेतत्कृतावृतिः॥ नभातिनास्तिचेत्येषाद्विविधापिविनश्यति॥४४॥ परोक्षज्ञानतो
नश्येदसत्त्वावृतिहेतुता॥ अपरोक्षज्ञाननाश्याह्यभानावृतिहेतुता॥४५॥ अभानावरणेनष्टेजीवत्वारोपसंक्षया
त्॥ कर्तृत्वाद्यखिलःशोकःसंसाराख्योनिवर्त्तते॥४६॥ निवृत्तेसर्वसंसारेनित्यमुक्तत्वभासनात्॥ निरंकुशा
भवेत्तृप्तिःपुनःशोकासमुद्भवात्॥४७॥ ॥ ॥

भातीत्येवरूपावरणकारणत्वंनिवर्त्तते॥४५॥ इदानींज्ञानस्यफलरूपमवस्थाद्वयेप्रथमामवस्थामाह॥ अभानेति अभानावर
णेनिवृत्तेभ्रान्त्याप्रतीयमानस्यजीवत्वस्यापिनिवृत्तत्वात्तन्निमित्तकःकर्तृत्वादिलक्षणःसंसाराख्यःशोकःसर्वोपिनिवर्त्ततइत्य
र्थः॥४६॥ एवंशोकापगमरूपावस्थांप्रदर्श्यनिरंकुशतृप्तिलक्षणांद्वितीयांदर्शयति॥ निवृत्तइति॥४७॥ ॥ ॥ ॥

९२

तत्त्वात्मानं चेद्विजानीयादिति मंत्रव्याख्याने प्रवृत्तत्वात्तद्विभागमध्ये ज्ञानाद्यवस्थासप्तकनिरूपणं प्रकृतासंगतमित्याशंक्यात्मा-
नं चेदित्यस्याः श्रुतेस्तात्पर्यनिरूपणशेषत्वेनात्रेदं तत्त्वान्न प्रकृतासंगतमित्यभिप्रेत्य श्रुतितात्पर्यमाह॥ अपरोक्षेति॥ चिदाभासस्येतिद्वं
पदवस्थासप्तकमध्ये अपरोक्षज्ञानशोकनिवृत्तिलक्षणमवस्थाद्वयं प्रतिपादयितुमयं मंत्रः प्रवृत्त इत्यभिप्रायः॥४८॥ अयमित्यप-
रोक्षत्वमित्यत्रायमितिपदेनात्मनोऽपरोक्षत्वमुच्यते इत्युक्तं॥ तथा सति अपरोक्षज्ञानविषयत्वमेवस्यान्न परोक्षज्ञानविषयत्वमित्या-

अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे॥ अवस्थे जीवगे ब्रूत आत्मानं चेदिति श्रुतिः॥४८॥
अयमित्यपरोक्षत्वमुक्तं तत् द्विविधं भवेत्॥ विषयस्वप्रकाशत्वाद्धियाप्येवं तदीक्षणात्॥४९॥
परोक्षज्ञानकालेऽपि विषयस्वप्रकाशता॥ समं ब्रह्म स्वप्रकाशमस्तीत्येवं विबोधनात्॥५०॥

शंक्य तद्रूपपादितनायापरोक्षं विभजते॥ अयमितीति॥ द्वैविध्ये कारणमाह॥ विषयस्वप्रकाशत्वादिति॥ विषयस्य चिद्रूप-
स्यात्मनः स्वप्रकाशत्वात्तस्य व्यवहारे साधनांतरनिरपेक्षत्वाद्धियाप्युद्धा एवं स्वप्रकाशत्वेन तदीक्षणात् तस्य विषयस्यात्म-
नोऽवलोकनाच्चेत्यर्थः॥४९॥ एवं तु द्वैविध्ये तावता परोक्षज्ञानाविषयत्वे किमायातमित्याशंक्य विषयस्वप्रकाशत्वपरोक्षज्ञा-
नाविषयत्वे विरोधि न भवतीत्याह॥ परोक्षज्ञानकाल इति॥ अपरोक्षज्ञानकाल इव परोक्षज्ञानकालेऽपि विषयस्य ब्रह्मणः स्वप्र-
काशता स्यैव॥ तत्रोपपत्तिमाह॥ ब्रह्म स्वप्रकाशमस्तीति॥५०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रत्यगभिन्नब्रह्मगोचरस्य ज्ञानस्य कृतपरोक्षत्वमित्याशंक्य प्रत्यगंशाग्रहणादित्याह ॥ अहमिति ॥ नन्विदं भ्रांतमित्याशंक्यास्य भ्रांतत्वे किं बाध्यत्वात् उत व्यक्त्यनुल्लेखाद् यथा ॥ अपरोक्षेण ग्रहणयोग्यस्य पारोक्ष्येण ग्रहणात् ॥ यद्वांशाग्रहणादिति चतुर्धा विकल्प्य प्रथमं प्रत्याह ॥ तत भ्रांतमिति ॥ ५१ ॥ हेतुं विवृणोति ॥ ब्रह्म नास्तीति ॥ ५२ ॥ द्वितीयमतिप्रसंगेन दूषयति ॥ व्यक्त्यनुल्लेखेति ॥ अयं

अहं ब्रह्मेत्यनुल्लिख्य ब्रह्मास्तीत्येवमुल्लिखन् ॥ परोक्षज्ञानमेतन्न भ्रांतं बाधानिरूपणात् ॥ ५१ ॥
ब्रह्म नास्तीति मानं चेत्स्याद्बाध्येत तदा ध्रुवं ॥ न चैवं प्रबलं मानं पश्यामोतो न बाध्यते ॥ ५२ ॥ व्यक्त्य
नुल्लेखमात्रेण भ्रमत्वे स्वर्गधीरपि ॥ भ्रांतिः स्याद्व्यक्त्यनुल्लेखात्सामान्योल्लेखदर्शनात् ॥ ५३ ॥
अपरोक्षत्वयोग्यस्य न परोक्षमतिर्भ्रमः ॥ परोक्षमित्यनुल्लेखादर्थात्पारोक्ष्यसंभवात् ॥ ५४ ॥

स्वर्ग इत्येवमाकारेण ग्रहणाभावात् किंतु स्वर्गोस्तीत्येवं सामान्याकारेण प्रतीते स्वर्गबुद्धेरपि भ्रमत्वप्रसंग इत्यर्थः ॥ ५३ ॥ तृतीयं निराकरोति ॥ अपरोक्षत्वेति ॥ अपरोक्षत्वेन ग्रहणयोग्यप्रत्यगभिन्नब्रह्मविषयस्य परोक्षज्ञानस्य भ्रमत्वं न संभवति ॥ कुत इत्यत आह ॥ परोक्षमिति ॥ ब्रह्मस्य परोक्षमित्येवमाकारेण ग्रहणाभावात् कुतस्तर्हि तस्य परोक्षत्वमित्याशंक्याह ॥ अर्थात्पारोक्ष्येति ॥ इदं ब्रह्मेवं व्यक्त्युल्लेखाभावसामर्थ्यात्परोक्षत्वसिद्धिरिति भावः ॥ ५४ ॥ ॥ ॥ ॥

चरमभ्राशंकते अंशेति ॥ ब्रह्मांशग्रहणेपि प्रत्यगंशाग्रहणाद्भ्रमत्वमित्यर्थः ॥ एवं तर्हि घटादिज्ञानस्यापि भ्रमत्वप्रसंग इति परिहर
ति ॥ घटज्ञानमपि आंतरावयवानामग्रहणादिति भावः ॥ ननु घटस्य सावयवत्वादंशाग्रहणेपि अंशाग्रहणं भवति ब्रह्मणस्तु निरंशत्वा
त्कथमंशाग्रहणं संभवे इत्याशंक्य व्यावृत्त्यंशोपाधिनिमित्तकं सांशत्वं तस्य संभवतीत्याह ॥ निरंशस्येति ॥ ५५ ॥ कोसौ व्यावृत्त्यंशावि
त्याकांक्षायामाह ॥ असत्त्वांश इति ॥ ५६ ॥ परोक्षत्वेन ग्रहणयोग्यविषयं परोक्षज्ञानं भ्रमो न भवतीत्येतद्दृष्टांतप्रदर्शनेनोपपादयति द

अंशाग्रहीति चेत्तर्हि घटज्ञानं भ्रमो भवेत् ॥ निरंशस्यापि सांशत्वं व्यावृत्त्यंशविभेदतः ॥ ५५ ॥
असत्त्वांशो निवर्त्येत परोक्षज्ञानतस्तथा ॥ अभानांशनिवृत्तिः स्यादपरोक्षधिया कृता ॥ ५६ ॥ दशमोस्ती
त्यविभ्रांतं परोक्षज्ञानमीक्ष्यते ॥ ब्रह्मास्तीत्यपि तद्वत्स्यादज्ञानावरणं समं ॥ ५७ ॥ आत्मा ब्रह्मेति वा
क्यार्थे निःशेषेण विचारिते ॥ व्यक्तिरुल्लिख्यते यद्वद्दशमस्त्वमसीत्यतः ॥ ५८ ॥ ॥ ॥

शम इति ॥ दशमोस्तीत्याप्तवाक्यजन्यं ॥ परोक्षज्ञानमभ्रांतं यथा ब्रह्मास्तीति वाक्यजन्यज्ञानमपि तद्वदभ्रांतं स्यात् अज्ञानकृतस्यासत्त्वाव
रणांशस्य समत्वादिति भावः ॥ ५७ ॥ ननु वाक्यात्परोक्षज्ञानमुत्पद्यते चेत् अपरोक्षज्ञानं कुतो जायत इत्याशंक्य विचारसहिता
द्वाक्याद्भवेत्याह ॥ आत्मेति ॥ अयमात्मा ब्रह्मेति महावाक्यार्थे सम्यग्विचार्यमाणे पूर्वमस्तीति परोक्षतया अवगतस्य ब्रह्मणः प्र
त्यगभिन्नत्वं साक्षात्क्रियते तत्र दृष्टांते यद्वद्दशम इति ॥ दशमस्त्वमसीत्यतो वाक्यात्स्वात्मानं दशमत्वेन यथा साक्षात्क्रियते तद्वदित्यर्थः
॥ ५८ ॥

ने।

विचारसहकृतेन वाक्येनापरोक्षज्ञानोत्पत्तिप्रकारं सदृष्टान्तमाह॥ दशम इति॥ त्वयास्तीति निरूपितो दशमः क इति प्रश्ने सत्येतस्य त्वमेवेति परिहारेऽभिहिते स्वात्मना सह नरान्नव गणयित्वाहं दशमोऽस्मीति स्वमेव दशमं स्मरेदित्यर्थः॥५८॥ अस्य दशमोऽस्मीति ज्ञानस्य विचारसहितवाक्यजनितत्वान्न विपर्ययादिरूपतेत्याह॥ दशमोऽस्मीति॥ अस्य दशमस्य त्वमेव दशमोऽसीति वाक्यात्परिगणनादिलक्षणविचारसहितादुत्पन्नाऽहं दशमोऽस्मीति बुद्धिर्न विहन्यते॥ न केनापि ज्ञानेन बाध्यते परिगणनक्रियायां च नवानामादिम

दशमः क इति प्रश्ने त्वमेवेति निराकृते॥ गणयित्वा स्वेन सह स्वमेव दशमं स्मरेत्॥५९॥ दशमोऽस्मीति वाक्योत्था न धीरस्य विहन्यते॥ आदिमध्यावसानेषु न नवत्वस्य संशयः॥६०॥ सदेवेत्यादिवाक्येन ब्रह्मसत्त्वं परोक्षतः॥ गृहीत्वा तत्त्वमस्यादिवाक्याद्व्यक्तिं समुल्लिखेत्॥६१॥

ध्यावसानेषु परिगणनेऽप्यहं दशमो न वेति संशयश्च न भवेदतः सा दृढापरोक्षरूपेत्यर्थः॥६०॥ एतत्सर्वं दार्ष्टान्तिके योजयति॥ सदेवेत्यादिवाक्येनेति द्वाभ्याम्॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिवाक्येन ब्रह्मसद्भावं प्रथमं निश्चित्य तस्य जीवरूपेण प्रवेशादियुक्तिपर्यालोचनया प्रत्यग्रूपत्वं संभाव्य तत्त्वमसीति वाक्येनाद्वितीयब्रह्मरूपमात्मानमहं ब्रह्मास्मीति साक्षात्कुर्यात्॥६१॥

तेऽत्रे इयमात्मनो ब्रह्मत्वबुद्धिः पंचानां कोशानामादिमध्यावसानेष्वात्मनो व्यवहारेपि नैवान्यथा भवति। अतोस्या बुद्धेरपरोक्षज्ञा
नत्वं सुस्थितमित्यर्थः ॥६२॥ नन्वेवं प्रथमतः केवलवाक्यात्परोक्षज्ञानमुत्पद्यते पश्चाद्विचारसहितादपरोक्षज्ञानमित्येतत्कुतोवग
म्यत इत्याशंक्य तैत्तिरीयकादिश्रुत्यर्थपर्यालोचनयेत्याह। जन्मादीनि ऽगुणामेकः कश्चिद्दृष्टिपुरा यतो वा इमानि भूतानि जाय

आदिमध्यावसानेषु स्वस्य ब्रह्मत्वधीरियं। नैव व्यभिचरेत्तस्मादापरोक्ष्यं प्रतिष्ठितं ॥६२॥
जन्मादिकारणत्वाख्यलक्षणात्तेन भृगुः पुरा। पारोक्ष्येण गृहीत्वाथ विचाराद्व्यक्तिमेवात ॥६३॥
यद्यपि त्वमसीत्यत्र वाक्यं नोचे भृगोः पिता। तथाप्यन्नप्राणमिति विचार्यस्थलमुक्तवान् ॥६४॥

ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति इति वाक्यश्रुतेन जगज्जन्मादिकारणत्वाख्यलक्षणतो न जग
त्कारणं ब्रह्म परोक्षतयावगम्यान्नमयादिपंचकोशविचाराद्व्यक्तिं प्रत्यगात्मनो रूपं ब्रह्म दृष्टवानित्यर्थः ॥६३॥ नन्वस्मिन्प्रकर
णे तत्त्वं ब्रह्मासीत्येवमाद्युपदेशकवाक्याभावात्कथं भृगोरात्मतत्त्वसाक्षात्कार इत्याशंक्यात्मसाक्षात्कारहेतुविचारयोग्यस्थलद
र्शनादिह। यद्यपीति ॥६४॥

नन्वन्नमयादिकोशेषु विचारितेषु प्रतीचः साक्षात्कारो भवतु ब्रह्मणस्तु कथमित्याशंक्य प्रतीच एव ब्रह्मत्वात्पंचकोशविचारेणानं
दात्मव्याप्तिं साक्षात्कृत्य आनंदाद्ध्येव खल्विमानि भूतानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंतीत्येवं ब्रह्मल
क्षणमपि प्रतीच्येव योजितवानित्याह ॥ अन्नप्राणादिकोशेष्विति ॥६५॥ ननु ब्रह्मलक्षणस्यानंदात्मरूपेण प्रतीचि वियोजनं न घटते
ब्रह्मणस्तटस्थत्वेन प्रतीचो भिन्नत्वादित्याशंक्य न भेदः सत्यादिलक्षणस्य ब्रह्मणः प्रत्यग्रूपेणावस्थानश्रवणादित्याह ॥ सत्यं ज्ञान
मनंतमिति ॥ सत्यं ज्ञानमनंतं ब्रह्म स्वलक्षणं ब्रह्मणः स्वरूपलक्षणमभिधाय यो वेद निहितं गुहायां परमे व्योमन्नित्यनेन वाक्येन पं

अन्नप्राणादिकोशेषु सविचार्य पुनः पुनः ॥ आनंदव्याप्तिमीक्षित्वा ब्रह्मलक्ष्माप्ययूयुजत् ॥६५॥ सत्यं ज्ञानमनंतं चेत्येवं ब्रह्मस्वलक्षणं ॥ उक्त्वा गुहाहितत्वेन कोशेष्वेतत्प्रदर्शितं ॥६६॥ पारोक्ष्येण विबुध्येंद्रो य आत्मेत्यादिलक्षणात ॥ अपरोक्षीकर्तुमिच्छंश्चतुर्वारं गुरुं ययौ ॥६७॥

चकोशगुहायां स्थितत्वेन तस्यैव प्रत्यग्रूपत्वमभिहितमित्यर्थः ॥६६॥ एवं तैत्तिरीयश्रुतिपर्यालोचनया ब्रह्मणः परोक्षज्ञानस्य श्रवणवि
चारजन्यत्वं साक्षात्कारस्य दर्शयित्वा छांदोग्यश्रुतिपर्यालोचनेनापि तद्दर्शयति ॥ पारोक्ष्येणेति ॥ इंद्रो य आत्मापहतपाप्मा विजरो वि
शोक इत्यादिवाक्यप्रतिपादितलक्षणेनात्मानं परोक्षतयावगत्य विचाराच्छरीरत्रयनिराकरणेन तत्साक्षात्करणाय गुरुं ब्रह्माणं
चतुर्वारमुपासन्न इति छांदोग्योपनिषद्यष्टमाध्याये श्रूयते ॥६७॥

इदानीमैतरेयकश्रुतावपि तद्दर्शयति ॥ आत्मा वा इदमिति ॥ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषदित्यनेन वाक्येन ब्रह्म
णो लक्षणमभिधाय स ईक्षत लोकान्नु सृजा इत्युपक्रम्य तस्य त्रय आवसथाः त्रयः स्वप्नाः अयमावसथोयमावसथोयमावसथ इत्यनेन
परमात्मनि जगदध्यारोपणप्रकारमभिधाय स जातो भूतान्यभिव्यैख्यत् किमिहान्यं वावदिषदिति तस्यारोपितस्यापवादमभिधाय
स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिती इति प्रत्यगात्मनो ब्रह्मस्वरूपत्वमभिहितं पुनरपि पुरुषे ह वेत्यादिना ज्ञानसाधनवै

आत्मा वा इदमित्यादौ परोक्षं ब्रह्म लक्षितं ॥ अध्यारोपापवादाभ्यां प्रज्ञानं ब्रह्म दर्शितं ॥ ६८ ॥
अवांतरेण वाक्येन परोक्ष्य ब्रह्मधीर्भवेत् ॥ सर्वत्रैव महावाक्यविचारेणापरोक्षधी ॥ ६९ ॥
ब्रह्मापरोक्ष्यसिद्ध्यर्थं महावाक्यमितीरितं ॥ वाक्यवृत्तावतो ब्रह्मापरोक्ष्ये विमतिर्न हि ॥ ७० ॥

राग्यजननाय गर्भवासादिदोषं प्रदर्श्य कोयमात्मेति वयमुपास्महे इत्यादिना विचारेण तत्पदार्थपरिशोधनपुरःसरं प्रज्ञानं ब्र
ह्मेति प्रज्ञानरूपस्यात्मनो ब्रह्मत्वं दर्शितमित्यर्थः ॥ ६८ ॥ उक्तन्यायमितरासु श्रुतिष्वतिदिशति ॥ अवांतरेणेति ॥ सर्वत्र सर्वासु श्रु
तिष्वित्यर्थः ॥ ६९ ॥ ननु महावाक्यविचारस्यापरोक्षज्ञानजनकत्वं स्वकपोलकल्पितमित्याशंक्य वाक्यवृत्तावाचार्यैरस्यार्थस्य प्रतिपा
दितत्वात्मैवमित्याह ॥ ब्रह्मापरोक्ष्येति ॥ अतो वाक्याद्ब्रह्मापरोक्ष्यज्ञाने विप्रतिपत्तिर्नास्तीत्यर्थः ॥ ७० ॥ ॥ ॥ ॥ ॥ ॥

वाक्यवृत्त्याकृ[illegible]प[illegible]पादनप्रकारं दर्शयति ॥ आलंबनतयेति ॥ योंतःकरणसंभिन्नबोधः अंतःकरणोपाधिकोभिदात्मा सोस्मत्प्रत्यय
शब्दयोरहमितिज्ञानस्याहं ॥ शब्दस्य चालंबनतया विषयत्वेन भाति स तथाविधो बोधस्त्वंपदाभिधस्त्वमिति पदमभिधायकं यस्य स त्वंपदाभि
धास्त्वंपदवाच्य इत्यर्थः ॥ एवं त्वंपदवाच्यार्थमभिधाय तत्पदवाच्यार्थमाह ॥ मायोपाधिरिति पारोक्ष्यशबलः परोक्षत्वधर्मविशिष्ट इत्यर्थः ॥

आलंबनतया भाति योस्मत्प्रत्ययशब्दयोः ॥ अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥११॥
मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः ॥ पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥१२॥
प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता ॥ विरुध्येते यतस्तस्माल्लक्षणा संप्रवर्तते ॥१३॥ ॥

एवं तटस्थलक्षणमभिधाय स्वरूपलक्षणमाह ॥ सत्याद्यात्मक इति ॥ सत्यमादिर्येषां ज्ञानादीनां ते सत्यादय आत्मा स्वरूपं यस्य स तथा
विधस्तत्पदाभिधस्तत्पदमभिधायकं यस्य तत्प[illegible]दाभिधस्तत्पदवाच्य इत्यर्थः ॥१२॥ एवं पदार्थावभिधाय वाक्यार्थावबोधनाय लक्षणावृत्तिरा
श्रयणीयेत्याह प्रत्यगिति ॥ प्रत्यक्परोक्षता साद्वितीयत्वेन सहिता पूर्णतेति मध्यमपदलोपी समासः ॥ सद्वितीयत्वपूर्णत्वे चैकस्य वस्तुनो
यतो विरुध्येते अतो लक्षणावृत्तिराश्रयणीयेत्यर्थः ॥१३॥ ॥ ॥

सा च कीदृशीत्यत आह ॥ तत्त्वमस्यादिवाक्येष्विति ॥ भागलक्षणा भागत्यागलक्षणा भागत्यागलक्षणेत्यर्थः ॥ तत्र दृष्टांतः ॥ सोऽयमिति ॥ सोऽयं देवद-
त्त इति वाक्यस्थयोः सोऽयमिति पदयोर्यथा जहदजहल्लक्षणा व्यतिरिक्ता नापरा न जहल्लक्षणा नाप्यजहल्लक्षणा तद्वदत्रापीत्यर्थः ॥७४॥ न-
नु गामानयेत्यादिवाक्येषु लक्षणां विनापि वाक्यार्थबोधो दृश्यते तद्वदत्रापि किं न स्यादित्याशंक्याह ॥ संसर्गो वेति ॥ यथा लोके गा-
मानयेत्यादिपदैः स्मारितानामाकांक्षासंनिध्यादिमतां गवादिपदार्थानामन्योन्यवाक्यार्थत्वेन स्वीकृतः यथा वा नीलं महदुत्पल-

तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा ॥ सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा ॥७४॥
संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः ॥ अखंडैकरसत्वेन वाक्यार्थो विदुषां मतः ॥७५॥
प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः ॥ अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ॥७६॥

मित्यादौ नीलत्वादिविशिष्टस्योत्पलस्य वाक्यार्थत्वं स्वीकृतं नैवमत्र महावाक्येषु संसर्गविशिष्टयोरन्यतरस्य वाक्यार्थत्वमभ्युपगम्यते ॥
किंतु ॥ अखंडैकरसत्वेन स्वगतादिभेदशून्यवस्तुमात्ररूपेण वाक्यार्थो विद्वद्भिरभ्युपेयते तो लक्षणाश्रयणीयेत्यर्थः ॥७५॥ अखंडैक-
रसं वाक्यार्थं दर्शयति ॥ प्रत्यग्बोधो य इति ॥ यः प्रत्यग्बोधः सर्वांतरश्चिदात्माभाति बुद्ध्यादिसाक्षित्वेन स्फुरति सोऽद्वयानंदलक्षणो द्वि-
तीयशून्यानंदरूपः परमात्मेत्यर्थः ॥ अद्वयानंदरूपश्च तथाविधः परमात्मा प्रत्यग्बोधैकलक्षणश्चिदेकरस प्रत्यगात्मेत्यर्थः ॥७६॥ ॥

एवमखंडार्थबोधने किं स्यादत आह । इत्थमित्यादि त्वमर्थस्य प्रत्यगात्मनो ब्रह्मत्वं ज्ञातं सिद्धं अब्रह्मरूपता तदर्थस्य ब्रह्मणः आप
रोक्ष्यं परोक्ष्यज्ञानेन विषयत्वं च निवर्तेत ततोपि किमिति पृष्टे सतीति यदेवं तत इति । शृणु पूर्णानंदैकेति ।।७७।।७८। ननु समन्वय
क्तेन सम्यक् अपरोक्षज्ञानसाधनमागम इत्यागमनैपुण्यमतो वाक्यस्यापरोक्षज्ञानजनकत्वं कथमुच्यत इत्याशंक्य सिद्धांतपरिज्ञान

इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् । अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ।।७७।।
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु । पूर्णानंदैकरूपेण प्रत्यग्बोधोवतिष्ठते ।।७८।।
एवं सति महावाक्यात्परोक्षज्ञानमीर्यते । यैस्तेषां शास्त्रसिद्धांतविज्ञानशोभितांतरां ।।७९।।
आस्तां शास्त्रस्य सिद्धांतो युक्त्या वाक्यात्परोक्षधीः । स्वर्गादिवाक्यवन्नैवं दशमे व्यभिचारतः ।।८०।।

अन्योन्यमिति मनसि निधायोपहसति । एवं सतीति । एवं वदंतः सिद्धांतरहस्यं ते न जानंतीत्यर्थः ।।७९।। ननु सिद्धांतस्तावत्तिष्ठतु वा
क्यस्य परोक्षज्ञानजनकत्वं त्वनुमानसिद्धमिति शंकते । आस्तामिति । विमतं वाक्यं परोक्षज्ञानजनकं भवितुमर्हतीति वाक्यत्वात् स्वर्गादि
प्रतिपादकवाक्यवदित्यनुमानेन परोक्षज्ञानजनकत्वसिद्धमित्यर्थः । अनैकांतिकोयं हेतुरिति परिहरति । नैवमिति । दशमस्त्वमसी
ति वाक्ये वाक्यत्वे सत्यपरोक्षज्ञानजनकत्वस्योपलंभादिति भावः ।।८०।।

किं च त्वंपदार्थस्य जीवस्यापरोक्षत्वात्तत्रावप्रसंगादपि न महावाक्यं परोक्षज्ञानजनकमित्यंगीकार्यमित्याह स्वतोपरोक्षेति ८१
इत्यापत्तिरित्याशंक्याह बुद्धिमद्भिरिति ८२ ननु सोपाधिकत्वाज्जीवस्यापरोक्षत्वं युक्तं ब्रह्मणस्तु निरुपाधिकस्य तन्न युज्य
त इति शंकते अंतःकरणेति ८३ ब्रह्मणो निरुपाधिकत्वमसिद्धमिति परिहरति नैवमिति जीवस्य ब्रह्मरूपताज्ञा

स्वतोपरोक्षजीवस्य ब्रह्मत्वमभिवांछतः ॥ नश्येत्सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ॥ ८१ ॥
बुद्धिमद्भिर्वतोमत्तमधुनास्माभिरीदृशं ॥ लौकिकं वचनं सार्थं संपन्नं त्वत्प्रसादतः ॥ ८२ ॥ अंतः
करणसंभिन्नबोधो जीवोपरोक्षतां ॥ अर्हत्युपाधिसद्भावान्न तु ब्रह्मानुपाधितः ॥ ८३ ॥ नैवं
ब्रह्मत्वबोधस्य सोपाधिविषयत्वतः ॥ यावद्विदेहकैवल्यमुपाधेरनिवारणात् ॥ ८४ ॥ अंतः
करणसाहित्यराहित्याभ्यां विशिष्यते ॥ उपाधिर्जीवभावस्य ब्रह्मतायाश्च नान्यथा ॥ ८५ ॥

नैवमिति तस्य सोपाधिकवस्तुविषयत्वात्तद्विषयस्य ब्रह्मणोपि सोपाधिकत्वं ज्ञानस्य सोपाधिक[illegible]विषयत्वं च ज्ञेयस्य सोपाधि
त्वमंतरेण न घटत इति भावः तदेव कुत इत्यत आह यावदिति ८४ ननु तर्हि जीवब्रह्मणोर्विलक्षणमुपाधिद्वयं वक्तव्य
मित्याशंक्याह अंतःकरणेति जीवभावब्रह्मभावयोरंतःकरणसाहित्यराहित्ये एवोपाधी इत्यर्थः ८५

नन्वंतःकरणसंबंधस्य भावरूपत्वादुपाधित्वमस्तु नाम भावरूपस्य तद्ग्राहित्वस्य तदुचितमित्याशंक्य यावत्कार्यमवस्थायिभे-
दहेतोरुपाधितेत्युक्तोपाधिलक्षणस्य साहित्यराहित्ययोरुभयोरपि सत्त्वादुचितमेवोपाधित्वमित्यभिप्रायेणापरिहरति ॥ यथेति ॥
विधिर्भावरूपोंतःकरणसंबंधो यथा उपाधिः स्यात्तथा प्रतिषेधोऽभावरूपोंतःकरणवियोगो ना किमुपाधिर्न स्यात् किं स्यादेवे-
त्यर्थः ॥ तथापि भावाभावरूपत्वलक्षणमवांतरभेलक्षणं दृश्यत एवेत्याशंक्य तस्याकिंचित्करत्वेनानादरणीयत्वमित्यभिप्रेत्य दृ-
तमाह ॥ सुवर्णेति ॥ पुरुषप्रचारनिरोधकत्वांशेनोपयुक्तं सुवर्णलोहत्वादिवैलक्षण्यं यद्वदनादरणीयं तद्वदित्यर्थः ॥८६॥ विधे-

यथा विधिरुपाधिः स्यात्प्रतिषेधस्तथा न किं ॥ सुवर्णलोहभेदेन शृंखलात्वं न भिद्यते ॥८६॥
अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च ॥ वेदांतानां प्रवृत्तिः स्याद्द्विधेत्याचार्यभाषितं ॥८७॥

रिव निषेधस्यापि ब्रह्मबोधोपायत्वेन ब्रह्मोपाधित्वं दृढयितुं विधिनिषेधयोरुभयोरपि ब्रह्मबोधोपायत्वमाचार्यैर्निरूपि-
तमिति दर्शयति ॥ अतद्व्यावृत्तिरूपेणेति ॥ तच्छब्देन तदतिरिक्तमज्ञानादि व्यावृत्तिर्निरसनं तदेवंरूप उपायस्तेन साक्षाद्विधिमु-
खेन च विधिर्विधानं साक्षाद्वाचकशब्दप्रयोगः सत्यं ज्ञानमनंतमित्येवमादिरूपस्तेन च विधिमुखेन द्वारेणापीत्यर्थः वेदांताना-
मुपनिषदां प्रवृत्तिः प्रवर्तनं प्रतिपादनं ब्रह्मणीति शेषः ॥८७॥ ॥ ॥ ॥

ननु वेदांतानामतद्व्यावृत्त्या ब्रह्मबोधकत्वांगीकारेऽहंशब्दार्थस्य कूटस्थस्यापि त्यागप्रसंगादहं ब्रह्मास्मीति सामानाधिकरण्येन ज्ञानं नोदेतुमर्हतीति शंकते ॥ अहमर्थेति ॥ अहंशब्दार्थस्य सर्वस्यात्यक्तत्वान्नैवमिति परिहरति ॥ नैवमिति ॥ हि यस्मात्कारणाद्भागलक्षणया जहदजहल्लक्षणयांशस्याहंशब्दार्थैकदेशस्य जडांशस्य त्याग ईरितः न कूटस्थस्यातोऽहं ब्रह्मास्मीति ज्ञानमुपपद्यत इत्यर्थः ॥ ८८ ॥ अंशत्यागेन बोधनप्रकारमभिनीय दर्शयति ॥ अंतःकरणेति ॥ ८९ ॥ ननु केवलस्य प्रत्यगात्मनः स्वप्रकाशत्वाद्बुद्धिवृत्तिविषयत्वं घटत इत्याशंक्याह ॥ स्वप्रकाशोऽपीति ॥ अन्यवद्घटवदित्यर्थः ॥ स्वप्रकाशोऽहमित्येवं बुद्धिसंभवादिति भावः ॥ तर्ह्यपसिद्धांत इत्याशंक्याह

अहमर्थपरित्यागादहं ब्रह्मेति धीः कुतः ॥ नैवमंशस्य हि त्यागो भागलक्षणयोदितः ॥ ८८ ॥ अंतःकरणसंत्यागादवशिष्टे चिदात्मनि ॥ अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणीक्ष्यते ॥ ८९ ॥ स्वप्रकाशोऽपि साक्ष्येव धीवृत्त्या व्याप्यतेऽन्यवत् ॥ फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ॥ ९० ॥ बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं ॥ तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥ ९१ ॥

ह सर्वाचार्यैरपि वृत्तिव्याप्यत्वस्यांगीकृतत्वान्नापसिद्धांत इति परिहरति ॥ फलेति ॥ फलं वृत्तिप्रतिबिंबितश्चिदाभासः तद्व्याप्यत्वमेव स्वप्रत्यगात्मनो निवारितं स्वस्यैव स्फुरणरूपत्वादिति भावः ॥ ९० ॥ आत्मनि फलव्याप्यत्वाभावं दर्शयितुमनात्मनो वृत्त्या फलेन च व्याप्यत्वं दर्शयति ॥ बुद्धितत्स्थेति ॥ उभयव्याप्तेः प्रयोजनमाह ॥ तत्राज्ञानमिति ॥ तत्र तयोर्बुद्धिचिदाभासयोर्मध्ये धिया बुद्धिवृत्त्या प्रमाणगतयाऽज्ञानं नश्यति ज्ञानाज्ञानयोर्विरोधात् ॥ आभासेन चिदाभासेन घटः स्फुरेत् जडत्वेन स्वतःस्फुरणायोगादिति भावः ॥ ९१ ॥

इदानीमात्मानि ततो वैलक्षण्यं दर्शयति ॥ ब्रह्मण्येति ॥ प्रत्यग्ब्रह्मणोरेकत्वस्याज्ञानेनावृतत्वात्तस्याज्ञानस्य निवृत्तये वाक्यज
न्यया अहं ब्रह्मास्मीत्येवमाकारया धीवृत्त्या व्याप्तिरपेक्ष्यते ॥ स्वस्यैव स्फुरणरूपत्वात्तस्य स्फुरणाय चिदाभासो नापेक्ष्यते अ
तो युज्यमानोऽपि चिदाभासो नोपयुज्यत इत्यर्थः ॥ ९२ ॥ उक्तमर्थं दृष्टान्तप्रदर्शनेन विशदयति ॥ चक्षुर्दीपाविति ॥ अन्धकारावृतघटादिद

ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥ स्वयंस्फुरणरूपत्वान्नाभास उपयुज्यते ॥ ९२ ॥
चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शने यथा ॥ न दीपदर्शने किंतु चक्षुरेकमपेक्ष्यते ॥ ९३ ॥
स्थितोऽप्यसौ चिदाभासो ब्रह्मण्येकीभवेत्परं ॥ न तु ब्रह्मण्यतिशयं फलं कुर्याद्घटादिवत् ॥ ९४ ॥

र्शने चक्षुर्दीपावुभावप्यपेक्ष्येते दीपदर्शने तु तथा न किंतु एकं चक्षुरेवापेक्ष्यते यथा तथा ब्रह्मण्यज्ञाननाशायेति पूर्वेण सं
बंधः ॥ ९३ ॥ ननु बुद्धिस्थितवृत्तीनां चिदाभासवैशिष्ट्यस्याभाव्यात् घटादिष्विव ब्रह्मण्यपि फलव्याप्तिर्वक्तव्येत्याशंक्याह ॥
स्थितोऽप्यसाविति ॥ यद्यपि घटाद्याकारवृत्तिवत् ॥ ब्रह्मगोचरवृत्तावपि चिदाभासोऽस्ति ॥ तथापि नासौ ब्रह्मणो भेदभासते ॥
किंतु प्रचंडातपमध्यवर्तिप्रदीपप्रभावत्तेनैकीभूतं भवति ॥ अतो न स्फुरणलक्षणातिशयजनको ब्रह्मणीत्यर्थः ॥ ९४ ॥

ननु ब्रह्मणि फलव्याप्तिर्नास्ति वृत्तिव्याप्तिस्तु विधीयते इत्युक्तं तत्र किं प्रमाणमित्याशंक्य प्रमाणमित्याह अप्रमेय-
मिति निर्विकल्पमनंतं च हेतुदृष्टांतवर्जितं अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते बुध इत्यत्रास्मिन्मंत्रे श्रुत्या अमृताबिंदूपनि-
निषदि अप्रमेयशब्देनेदं फलव्याप्तिराहित्यमुक्तं मनसैवेदमाप्तव्यं नेह नानास्ति किंचनेति कठवल्ल्यां धीव्याप्यत्वं श्रुतमित्यर्थः॥

अप्रमेयमनादिं चेत्यत्र श्रुत्येदमीरितं॥ मनसैवेदमाप्तव्यमिति धीव्याप्य-
ता श्रुता॥९५॥ आत्मानं चेद्विजानीयादयमस्मीति वाक्यतः॥ ब्रह्मात्मव्यक्तिमुल्लिख्य यो
बोधः सोऽभिधीयते॥९६॥

आत्मानं चेद्विजानीयादिति मंत्रेणापरोक्षज्ञानशोकातिवृत्त्याख्यं जीवगतमवस्थाद्वयमभिधीयते इत्युक्तं अपरोक्षज्ञानशोक-
निवृत्त्याख्ये द्वे इमे अवस्थे जीवगे श्रुते आत्मानं चेदिति श्रुतिरित्यनेन श्लोकेन तत्राकियतांशेनापरोक्षज्ञानमुच्यत इ-
त्यपेक्षायामाह आत्मानमिति ब्रह्मात्मव्यक्तिं सत्यादिलक्षणं ब्रह्माभिन्नप्रत्यगात्मेति स्वरूपमुल्लिख्य विषयीकृत्य यो
बोधो जायते ब्रह्माहमस्मीति सोऽभिधीयतेऽनेन वाक्येनेत्यर्थः॥९६॥

ननु तर्हि पूर्वोक्तरीत्या सच्छास्त्रवाक्यविचारादेवापरोक्षज्ञानसिद्धेरावृत्तिरसकृदुपदेशादित्यादौ विहितं श्रवणाद्यावर्त्तनमन
नर्थकं स्यादित्याशंक्य ज्ञानदार्ढ्याय तदावर्त्तनानुष्ठानस्याचार्यैरभिहितत्वादनुष्ठेयमेवेत्याह ॥ अस्तु बोध इति ॥ अत्र ब्रह्मा
त्मनो विषये महावाक्यात्सत्तर्कविचारसहितादपरोक्षबोधोऽस्तु भवत्वेवं तथापि नासौ दृढः अतः श्रवणाद्यावर्त्तनीयं श्रीमच्छं
कराचार्यैः पुनर्वाक्यार्थज्ञानोत्पत्त्यनन्तरमपि श्रवणाद्यावर्त्तनाभिधानादित्यर्थः ॥ ज्ञानदार्ढ्यायेत्यपेक्ष्यते ॥ ९७ ॥ आचार्यैः के

अस्तु बोधोऽपरोक्षोऽत्र महावाक्यात्तथाप्यसौ । न दृढः श्रवणादीनामाचार्यैः पुनरीर
णात् ॥ ९७ ॥ अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् । शमादिसहितस्तावदभ्यसेत्श्रव
णादिकं ॥ ९८ ॥ बाढं सन्ति ह्यदार्ढ्यस्य हेतवः श्रुत्यनेकता । असंभाव्यत्वमर्थस्य विपरीता च भा
वना ॥ ९९ ॥

न वाक्येनाभिहितमित्याशंक्य तद्वाक्यं पठति ॥ अहं ब्रह्मेति ॥ ९८ ॥ ननु वाक्यप्रमाणजनितज्ञानस्यादार्ढ्यं कुत इत्याशंक्या
ह ॥ बाढमिति ॥ हि यस्मात्कारणात् श्रुत्यनेकता श्रुतीनां नानात्वमेको हेतुः अर्थस्यापरोक्षैकरसस्यालौकिकत्वेना
संभावितत्वमपरः ॥ विपरीता भावना च पुनः कर्तृत्वाभिमानरूपा तृतीया इत्येवं त्रिविधादार्ढ्यस्य हेतवो बाढं सन्ति सर्वथा विद्यंते
अतोऽपरोक्षानुभवदार्ढ्याय श्रवणादिकमावर्त्तनीयमिति भावः ॥ ९९ ॥

एवं त्रिविधानंदावाप्तिहेतोरनुपपत्त्यस्य श्रुतिनानात्वप्रयुक्तोदाहृतिनिवृत्तये श्रवणावृत्तिः कर्त्तव्येत्याह ॥ शाखाभेदादिति ॥ य
था शाखाभेदात्कर्मभेदः श्रूयते ॥ बह्वृचैर्वहौत्रं क्रियते यजुर्भिराध्वर्यवं साम्नौद्गात्रमिति ॥ यथा वा कामभेदात्कारीर्यादिष्टिका
यजेत् ॥ शतकृष्णलमायुष्काम इत्यादिकामभेदः श्रौतः एवमुपनिषत्स्वपि प्रतिपाद्यतस्य भेदशंका तन्निवारणाय श्रवणं पु
नःपुनः कर्त्तव्यमित्यर्थः ॥१॥ किं तच्छ्रवणमित्याकांक्षायां तल्लक्षणमाह ॥ वेदांतानामिति ॥ सर्वासामप्युपनिषदामुपक्रमोप

शाखाभेदात्कामभेदाच्छ्रुतं कर्मान्यथान्यथा ॥ एवमत्रापि माशंकीत्यतः श्रवणमाचरेत् ॥१॥
वेदांतानामशेषाणामादिमध्यावसानतः ॥ ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत् ॥१॥
समन्वयाध्याय एतत्सूत्रैर्धीस्वास्थ्यकारिभिः ॥ तर्कैः संभावनार्थस्य द्वितीयाध्याय ईरिता ॥२॥

वार

संहारादिपर्यालोचनायां ब्रह्मरूपे प्रत्यगात्मन्येव तात्पर्यमैदंपर्यं तत्पर्यवसानमित्येवंरूपो निश्चयः श्रवणमित्यर्थः ॥१॥
एवंविधं श्रवणं कुत्र निरूपितमित्यत आह ॥ समन्वयेति ॥ एतच्छ्रवणं समन्वयाध्याये सूत्रैर्व्यासादिभिरिति शेषः ॥ अ
र्थसंभावनानिवृत्तिहेतुर्मननं तु द्वितीयाध्याये निरूपितमित्याह ॥ धीस्वास्थ्येति ॥ प्रमेयगतानुपपत्तिपरिहारद्वारा
बुद्धिस्वास्थ्यकारिभिस्तर्कैर्युक्तिशब्दाभिधेयैरर्थस्य संभावना संभावितत्वानुसंधानं द्वितीयाध्याये मननं निरूपितमित्यर्थः
॥२॥

रदात्मनो विपरीतभावनां ॥ तन्निवृत्त्युपायं च दर्शयति बहुजन्मदृढाभ्यासादिति सार्धेन ॥ विपरीतभावनानिवर्तकं च यदैकाग्र्यं
तत्कुतो जायत इत्याशंक्याह तत्त्वोपदेशादिति ॥ एतदैकाग्र्यं ब्रह्मोपदेशात्प्रागेव सगुणब्रह्मोपासनाद्भवत्येवेदित्यर्थः ॥ ३ ॥ ४ ॥ नन्वे
तत्कुतोऽवगतमित्याशंक्योपासनाविचारस्य वेदान्तशास्त्रे कृतत्वादित्याह उपास्तय इति ॥ अतोपास्तिः कस्य भवेत्यत आह ॥ प्रागन
भ्यासिन इति ॥ पश्चाद्ब्रह्माभ्यासश्च कीदृश इत्याकांक्षायामाह ॥ तच्चिन्तनमिति ॥ ६ ॥ एतदेकपरत्वं विशदयितुं श्रुतिमाह ॥ तमेव धीरो विज्ञा

बहुजन्मदृढाभ्यासाद्देहादिष्वात्मधीः क्षणात् ॥ पुनः पुनरुदेत्येवं जगत्सत्यत्वधीरपि ॥ ३ ॥ विपरीता
भावनेयमैकाग्र्यात्सा निवर्तते ॥ तत्त्वोपदेशात्प्रागेव भवत्येतदुपासनात् ॥ ४ ॥ उपास्तयोऽत एवात्र ब्रह्म
शास्त्रेऽपि चिन्तिताः ॥ प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भवेत् ॥ ५ ॥ तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोध
नं ॥ एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥ ६ ॥ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ॥ नानुध्यायाद्बहू
न्शब्दान्वाचो विग्लापनं हि तत् ॥ ७ ॥

येति धीरो ब्रह्मचर्यादिसाधनसंपन्नो ब्राह्मणो ब्रह्मवित् मुमुक्षुः तमेव प्रत्यगभिन्नं परमात्मानमेव विज्ञाय संशयाद्यभावो य
था भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मात्मैकत्वज्ञानसंततिरूपमैकाग्र्यं कुर्वीत संपादयेत् ॥ अनात्मगोचरान्बहून्शब्दान्नानुस्मरेत् ध्यानेना
भिधानमप्युपलक्ष्यते नाभिदध्याच्च अन्यथा शब्दध्यानेन वाग्विग्लापनानुपपत्तेः ॥ कुत इत्यत आह ॥ वाचो विग्लापनं हि तदिति हि
यस्मात्तदभिधानमनेन स्मरणमप्युपलक्ष्यते इति वाचः मनसोऽप्युपलक्षणं विग्लापनं विशेषेण ग्लापनं श्रमहेतुः श्रयमभिप्रायः एतच्छब्दा
पयतीति ॥

ग

एवमैकाग्र्यप्रतिपादिकां श्रुतिमभिधाय स्मृतिमप्याह ॥ अनन्या इति ॥ ये जना अनन्याः अहं ब्रह्मास्मीति ज्ञानेन मदभिन्नाः सन्तस्त
थैव मां चिंतयंतः पर्युपासते परितः सर्वेष्वपि कालेषु उपासते मद्रूपतया वर्त्तते नित्याभियुक्तानां सदा मच्चित्तानां तेषामहं तदा
त्मत्वेनानुसंधीयमानोऽहं योगक्षेमं ममलक्ष्य परिरक्षणरूपौ योगक्षेमौ वहामि संपादयामीत्यर्थः ॥ ८ ॥ उदाहृतयोः श्रुतिस्मृत्यो
त्मानं लक्ष्य

अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥ ८ ॥
इति श्रुतिस्मृती नित्यमात्मन्येकाग्रतां धियः । विधत्तो विपरीतायां भावनायां क्षयाय हि ॥ ९ ॥
यद्यथा वर्त्तते तस्य तत्त्वं हित्वान्यथा त्वधीः । विपरीता भावना स्यात्पित्रादावरिधीर्यथा ॥ १० ॥

स्तात्पर्यमाह ॥ इति श्रुतीति ॥ एते श्रुतिस्मृती विपरीतभावनानिवृत्तये आत्मनि सदा चित्तैकाग्र्यं प्रतिपादयत इत्यर्थः ॥ ९ ॥ ननु दे
हाद्यात्मत्वबुद्धेः जगत्सत्यत्वबुद्धेश्च कुतो विपरीतभावनात्वमित्याशंक्य तल्लक्षणयोगादिति दर्शयितुं तस्या लक्षणमाह ॥ य
द्यथेति ॥ यद्वस्तुशुक्त्यादि यथा येन शुक्त्यादिरूपत्वं परित्यज्यान्यथा तस्य रजतादिरूपत्वस्य धीर्ज्ञानं विपरीतभावना स्यात्
अतस्मिंस्तद्बुद्धिरिति यावत् तामुदाहरति पित्रादावरिधीर्यथेति ॥ १० ॥ ॥ ॥ ॥ ॥

उक्तलक्षणं प्रकृते योजयति ॥ आत्मा देहादीति ॥ अयमात्मा वस्तुतो देहादिति ॥ अयमात्मा वस्तुतो देहादिभिन्नः इदं जगच्च मिथ्या
एवं सत्यपि तयोरात्मजगतोर्यथाक्रमं देहादिरूपत्वबुद्धिः सत्यत्वबुद्धिश्च या सा विपरीतभावनारूपः ॥११॥ एवमेकाग्र्यात्मा-
निर्वक्तीति सामान्येनोक्तमर्थं विशेषाकारेणाह ॥ तत्वभावनयेति ॥ सा देहाद्यात्मत्वजगत्सत्यत्वधीरूपा विपरीतभावना । या आ-
त्मनो देहादिव्यतिरिक्तत्वस्य जगतो मिथ्यात्वस्य च भावनया निरंतरध्यानेन पश्येत् ॥ अत आत्मनो देहाद्यतिरिक्तत्वं देहादेर्जग-
तो मिथ्यात्वं च सदा भावयेदित्युक्तं ॥१२॥ तत्र जपादाविव नियमापेक्षास्ति वा न वेति पृच्छति ॥ किं मंत्रेति ॥ आत्मभेदधीरात्मनो देहा-

आत्मा देहादिभिन्नोऽयं मिथ्या चेदं जगत्तयोः ॥ देहाद्यात्मत्वसत्यत्वधीर्विपर्ययभावना ॥११॥ तत्वभावनया न-
श्येत्सा रतो देहातिरिक्ततां ॥ आत्मनो भावयेत्तद्वन्मिथ्यात्वं जगतोऽनिशं ॥१२॥ किं मंत्रजपवन्मूर्तिध्यानवद्वा-
त्मभेदधीः ॥ जगन्मिथ्यात्वधीश्चात्र व्यावर्त्यास्याद्युतान्यथा ॥१३॥ अन्यथेति विजानीहि दृष्टार्थत्वेन भु-
क्तिवत् ॥ बुभुक्षोऽपि वह्नेस्तेन कश्चिन्नियमः क्वचित् ॥१४॥

दिभ्यो विभिन्नत्वज्ञानं जगतो मिथ्यात्वानुसंधानं च मंत्रजपवत् देवताध्यानादिवत् किं नियमेनानुष्ठातव्यं उत लौकिकव्यवहारव-
न्नियममंतरेणापि कर्तुं शक्यत इति ॥१३॥ दृष्टफलकत्वान्नात्र नियमः कश्चिदस्तीत्याह ॥ अन्यथेति ॥ अन्यथा नियमं विनेत्यर्थः ॥ तत्र
हेतुमाह ॥ दृष्टार्थत्वेनेति ॥ तत्र दृष्टांतमाह ॥ भुक्तिवदिति ॥ दृष्टार्थेऽपि भोजने नियमाः श्रुतिस्मृत्योरुपलभ्यंत इत्याशंक्याह ॥
बुभुक्षोरिति ॥ क्षोदयनयनाय भोक्तुमिच्छतो पुरुषो जयं कुर्वाणः एवानियमेन न भुंक्ते अपि तु यथा कोऽप्याधोपशांतिः स तु यथा भो-
गं न करोतीत्यर्थः ॥१४॥

प्र

एतदेवं प्रपंचयति ॥ अस्नातिवा न वेति ॥ अस्नाति वान्हो स्याति कदाचिद्भुक्तो न वा स्नाति तस्मिन्ने स्याति क्रोधादिस्मारकयतादि चेष्टया
अनस्नान्नेवकालं नयति ॥ अन्यथा वा तिष्ठन् शयानो वा स्वेच्छया भुक्तो एवं येन केन प्रकारेण तात्कालिकीं क्रोधाद्याम्यपने
तुमिच्छति ॥ अयमभिसंधिः क्रोधाद्याधिवाक्तिल्लक्षणदृष्टफलाय प्रयोजनं कार्यमेव नियमास्तु परलोकहेतव इति ॥ १५ ॥ जपादौमे
जनादेकत्वमेवं दर्शयति ॥ नियमेनेति ॥ तत्र हेतुमाह ॥ अकृताविति त्रवत्वेव मकारणे प्रत्यवायः अन्यथाकरणे तु सनानीत्या

अस्नाति वा न वा स्नाति भुक्तो वा स्वेच्छयान्यथा ॥ येन केन प्रकारेण क्रुधाद्यमपनीयति ॥ १५ ॥
नियमेन जपं कुर्यादकृते प्रत्यवायतः ॥ अन्यथाकरणेनर्थः स्वरवर्णविपर्ययात् ॥ १६ ॥
क्रोधेवरदृष्टबाधाकृद्विपरीता च भावना ॥ जेयाकेनाप्युपायेन नास्त्यजान्तादृष्टे तेक्रमः ॥ १७ ॥

शंक्याह ॥ अन्यथाकरण इति ॥ मंत्रोहीनस्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ॥ सवाग्वज्रो यजमानं हिनस्ति यथेंद्र
शत्रुः स्वरतोपराधादित्युक्तत्वादिति भावः ॥ १६ ॥ ननु क्रोधाद्याधाया दृष्टबाधाहेतुत्वान्निवर्त्तयेन्नियमेनापि भोक्तव्य
मेव विपरीतभावनया स्तु तथात्वाभावात् न्निवर्त्तकं ध्यानं अदृष्टफलाया नियमेनानुष्ठेयमित्याशंक्याह क्रोधेवेति
विपरीतभावनाया दृष्टदुःखहेतुत्वस्यानुभवासिद्धत्वादिति भावः ॥ १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ह्रिं द्रस्पशत्रुः
ह्रिं द्रशत्रुः
ह्रिं द्राशत्रुप
सासः ह्रिं द्र
शत्रुः

तर्हि स उपायः प्रदर्शनीय इत्याशंक्य पूर्वमेव प्रदर्शित इत्याह ॥ उपाय इति ननु जपवत्प्राङ्मुखत्वादि तिय मो मामह ध्यानवदेवैतदे
कपरत्वं लक्षणैकाग्रता निर्बंधोसीत्याशंक्याह ॥ एतदेकेति १८ ननु ध्यानस्य ध्येयाचिंतनात्मकत्वात्तत्र को निर्बंध इत्याशंक्य ध्या
नेनिर्बंधं दर्शयितुं ध्यानस्वरूपं तावदाह ॥ मूर्तिप्रत्ययेति ॥ धियो बुद्धेः संबंधिनां मूर्तिप्रत्ययानां देवतादिमूर्तिगोचराणां प्रत्ययानां
तदन्या४ यत्संतत्यमविच्छिन्नतया वर्त्तमानं तैलधारितं अन्यैर्न विजातीयप्रत्ययैरव्यवहितं ध्यानमित्युच्यते ॥ एवं ध्यानस्वरूपं निरूप्य तत्र निर्बं

उपायपूर्वं मे वोन्तः सच्चिन्ताकथनादिकः ॥ एतदेकपरत्वेपि निर्बंधो ध्यानवत्त्र हि ॥ १८ ॥ मूर्तिप्रत्य
यसंतत्यमन्यानन्तरितं धियः ॥ ध्यानं तत्रातिनिर्बंधो मनसश्चंचलात्मनः ॥ १९ ॥ चंचलं हि मनः कृ
ष्णप्रमाथि बलवद्दृढं ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं ॥ २० ॥ अयच्छिपानान्महतः सुमे
रून्मूलनादपि ॥ अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः ॥ २१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

धंदर्शयति ॥ तं चेति ॥ सदा पर्यटनशीलस्य करितुरगादेरेकत्र स्तंभादौ बंधने यथोपरोधस्तद्वदिति भावः ॥ १९ ॥ मनसश्चाचल्यादौ गी
तावाक्यं प्रमाणयति ॥ चंचलमिति ॥ प्रमाथि प्रमथनशीलं पुरुषस्य व्याकुलत्वकारणं बलवत् समर्थं दुर्निग्राह्यमित्यर्थः ॥ दृढं सत्य
सति विषये वासनां गुंठतत उद्धर्तुमशक्यमित्यर्थः ॥ अतस्तस्य मनसो निग्रहो वायोर्निग्रहवत्सुदुष्करः ॥ २० ॥ मनसो दुर्निग्रहत्वे वाशि
ष्ठवाक्यमपि प्रमाणयति ॥ अप्यब्धीति २१

प्रवर्तेत ततो वैषम्यं दर्शयति कथनादाविति शृङ्खलाबद्धदेहस्य यथा निर्बन्धः न तथा कथनादावित्यर्थः आदिशब्देन तद्वित
नादिकं गृह्यते न केवलं निर्बन्धाभावः प्रत्युत धीवृत्तिनोदनमित्याह किंत्वनन्तेति इतिहासः पूर्वेषां कथा आख्यायिका लौकिकक
था अनुकूलयुक्तिदृष्टान्तप्रदर्शनादिनानन्तेत्यनन्ता ये इतिहासाद्यास्तैः धीवृत्तेः बुद्धेर्विनोदो क्री
डाविशेषो भवति तत्र दृष्टान्तः नाद्यवदिति नृत्याक्रियायां नेरीद्यणामिवेत्यर्थः ननु कथादिभिरप्येतदेकपरत्वविघात स्या

कथनादौ न निर्बन्धः शृङ्खलाबद्धदेहवत्। किंत्वनन्तेतिहासाद्यैर्धीविनोदो नाद्यवद्रियः॥ २१॥
चिदेवात्मा जगन्मिथ्येत्यत्र पर्यवसानतः॥ निदिध्यासनविक्षेपो नेतिहासादितो भवेत्॥ २३॥ कृषिवाणि
ज्यसेवादौ काव्यतर्कादिकेषु च॥ विक्षिप्यते प्रवृत्ता धीस्तैस्तत्त्वस्मृत्यसंभवात्॥ २४॥ अनुसंदधतैवात्र
भोजनादौ प्रवर्तितुं॥ शक्यतेऽत्यन्तविक्षेपाभावादाशु पुनःस्मृतेः॥ २५॥ ॥ ॥ ॥ ॥ ॥

दित्याशंक्याह चिदेवात्मेति॥ इतिहासादीनामात्मा चिन्मात्ररूपो न देहादिरूपः॥ जगच्च मिथ्येत्येतस्मिन्नर्थे पर्यवसानात् न तैरेतदे
कपरत्वशब्दान्निदिध्यासनस्य विक्षेपकर इत्यर्थः २३ न त्विति इतिहासानामङ्गीकारे कृष्यादेरपि प्रसक्तिः स्यादित्याशंक्याह
कृषीति २४ कृष्यादीनां तत्त्वानुसंधानविघातित्वेन त्याज्यत्वं भोजनादेरपि तथात्वात्तदपि त्याज्यमेवेत्याशंक्याह॥ अनुसंदधतेति
कुत इत्यत आह अत्यन्तेति॥ विक्षेपाभावोऽपि कुत इत्यत आह॥ आशु पुनरिति २५॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु तदानीं विदेयाभावे विस्मृते सद्भावात्पुरुषार्थहानिः स्यादित्याशंक्याह ॥ नत्वेति ॥ कुतस्तर्ह्यनर्थ इत्यत आह ॥ किंत्विति ॥ विस्मरणे स
ति विपर्ययोऽपि स्यादित्याशंक्याह ॥ विपर्ये तु इति ॥ २६ ॥ ननु मे जनादिप्रवृत्तस्यैव तर्काद्यभ्यासप्रवृत्तस्यापि तत्त्वस्मरणं किं न स्यादित्याशं
क्याह ॥ तत्त्वस्मृतेरिति ॥ न केवलं तत्त्वानुसंधानावसराभाव एव किंतु काव्यतर्काद्यभ्यासस्य तत्त्वाभ्यासविरोधित्वात्तदानीं ॥ स्मर
तमपि तत्त्वं क्वाप्युपेक्ष्यते इत्याह ॥ प्रस्तुतेति ॥ २७ ॥ तत्त्वानुसंधानविरोधिवाग्व्यवहारस्य त्याज्यत्वे प्रमाणं तेन तमेवैकं जानथ आत्मा

तत्त्वविस्मृतिमात्रान्नानर्थः किं तु विपर्ययात् ॥ विपर्येतुं न कालोऽस्ति झटिति स्मरतः क्वचित् ॥ २६ ॥ तत्त्वस्मृते
रवसरो नास्त्यन्याभ्यासशालिनः ॥ प्रस्तुताभ्यासघातित्वाद्धृतात्तत्त्वमुपेक्षते ॥ २७ ॥ तमेवैकं विजानीथ ह्यन्या
न्या वाचो विमुंचथ ॥ इति श्रुतं तथान्यत्र वाचो विग्लापनं त्विति ॥ २८ ॥ आहारादि त्यजन्नैव जीवेच्छास्त्रांतरं
त्विति त्यजन् ॥ किं न जीवसि येनैवं करोष्यत्र दुराग्रहं ॥ २९ ॥ जनकादेः कथं राज्यमिति चेद्दृढबोधतः ॥ तथा
तवापि चेत्तर्कं पठ यद्वा कृषिं कुरु तथ्यातवापीति ॥ ३० ॥

नमन्या वाचो विमुंचथ अमृतस्यैष सेतुरिति श्रुतिवाक्यमर्थतः पठति ॥ तमेवैकमिति ॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्ला
पनं हि तदपि वाक्यं श्रूयत इत्याह ॥ तथान्यत्रेति ॥ २८ ॥ ननु तत्त्वानुसंधानातिरिक्तमाहारादि यथा न त्यज्यते एवमितरशास्त्राद्यभ्या
सोऽपि क्रियतामित्याग्रहं कुर्वाणं प्रत्याह ॥ आहारादीति ॥ २९ ॥ ननु तर्हि जनकादीनां कथं राज्यपरिपालनादौ प्रवृत्तिरिति शंके ॥ क
जनकादेरिति ॥ दृढापरोक्षज्ञानित्वात्तेषां सा न बाधिकेत्यभिप्रायेण परिहरति ॥ दृढेति ॥ तर्हि ममापि दृढबोधोऽस्तीति वदंतं प्रत्याह ॥ ३० ॥

एवं विषयाणां दुःखहेतुत्वप्रदर्शी शोभनत्वं च क्वचिद्दर्शयति ॥ मांसपाञ्चालिकायास्त्विति ॥ एवमादिष्विति ॥ स्नायवः शिरा अस्थीनि प्रसिद्धानि ग्रन्थयो मांसानि च यस्याः रूपाः नितंबस्तनादयः तैः सहिता मांसपाञ्चालिका या योषित् तो यन्त्रलोले ॥ यन्त्रवच्चञ्चलशीलेऽङ्गपञ्जरेऽङ्गान्येव पञ्जरं नीडं तस्मिञ्छरीरे किं शोभनमिव न किमपीत्यर्थः ॥ ४० ॥ एवमादिष्वित्यादिशब्देन त्वङ्मांसरक्तबाष्पाम्बु पृथक्कृत्वा विलोचने समालोकय रम्यं चेत्किं मुधा परिमुह्यसीत्येवमादयो गृह्यन्ते ॥ ४१ ॥ विषयदोषदर्शने सति भो

मांसपाञ्चालिकायास्तु यन्त्रलोलेऽङ्गपञ्जरे ॥ स्नाय्वस्थिग्रन्थिशालिन्याः स्त्रियाः किमिव शोभनं ॥ ४० ॥
एवमादिषु शास्त्रेषु दोषाः सम्यक् प्रपंचिताः ॥ विमृशन्ननिशं तानि कथं दुःखेषु मज्जति ॥ ४१ ॥
क्षुधया पीड्यमानोपि न विषं ह्यत्तुमिच्छति ॥ मिष्टान्नध्वस्ततृड् जानन्नामूढस्तज्जिघत्सति ॥ ४२ ॥
प्रारब्धकर्मप्राबल्याद्भोगेष्विच्छा भवेद्यदि ॥ क्लिश्यन्नेव तदाप्येष भुंक्ते विष्टिगृहीतवत् ॥ ४३ ॥ किंकरवत्
भुंजाना वा अपि बुधाः श्रद्धावन्तः कुटुंबिनः ॥ नाद्यापि कर्म नश्छिन्नमिति क्लिश्यन्ति संततं ॥ ४४ ॥

गेच्छाभावे युक्तिसहितं दृष्टान्तमाह क्षुधयेति स्वयममूढः विवेकी मिष्टान्नभोजनेन ध्वस्ता विनष्टा तृट् तृष्णा आकांक्षा यस्य स तथोक्तः इदं विषमित्येवं जानन्नपि जिघत्सति नात्तुमिच्छतीत्यर्थः ॥ ४२ ॥ ननु प्रारब्धकर्मणः प्रबलत्वात् ज्ञानिनोऽपीच्छा भवेदित्याशंक्य सत्यामपीच्छायां प्रीतिपुरःसरं न भुङ्क्त इत्याह प्रारब्धकर्मेति ॥ ४३ ॥ कथमेतदवगम्यत इत्याशंक्य लोके दर्शनादित्याह ॥ भुंजाना वा अपीति ॥ ४४ ॥

ननु तत्त्वविदो संसारनिमित्तकस्तापोऽनुपपन्नः ज्ञानवैयर्थ्यापातादित्याशंक्याह ॥ नायं क्लेश इति ॥ अयं क्लेशो नाधाधि
कर्मणोक्लिन्नाभितो वमनुतापात्मसंसारतापो न भवति किं तु संसारे विरक्तता आसक्तिरहितता ॥ तापत्वाज्ञावे
युक्तिमाह ॥ भ्रान्तिज्ञानेति द्वितीयस्याकारणात्संसारिकस्तापो भ्रान्तिज्ञाननिदानः भ्रान्तिज्ञानकारणकः स्मृतः पर्वाचार्यैः ॥ अ
यं तु विवेकज्ञानभक्तत्वान्न तथाविध इत्यर्थः ॥ ४५ ॥ अयं क्लेशो विवेकभक्तो वेति कुतो वगम्यत इत्याशंक्य कामनिवर्तकत्वा

नायं क्लेशो न संसारतापः किं तु विरक्तता ॥ भ्रान्तिज्ञाननिदानो हि तापः सांसारिकः स्मृतः ॥ ४५ ॥ विवेकेन परिक्लिश्य
न्नल्पभोगेन तृप्यति ॥ अन्यथानन्तभोगेऽपि नैव तृप्यति कर्हिचित् ॥ ४६ ॥ न जातु कामः कामानामुपभोगेन शाम्य
ति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ ४७ ॥ परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये ॥ विज्ञाय सेवितश्चोरो मै
त्रीमेति न चोरताम् ॥ ४८ ॥

द्विवेकभक्त इत्याह ॥ विवेकेनेति ॥ ~~विवेकेन परिक्लिश्य~~ विवेकिन इवाविवेकेनोपभोगेन वन्तृप्तिः स्यादतो विवेको प्रयोजक
इत्याशंक्य भोगस्य तृप्तिहेतुत्वाभावप्रतिपादिकां श्रुतिं न जातु काम इति ॥ ४७ ॥ विवेकभक्तस्य भोगस्य तृप्तिहेतुत्वमनुभवसिद्धमि
त्याह परिज्ञायेति अयं भोगस्तावानेवं प्रयास स्वास्थ्यरत्येवमनुभवपर्वकमिदं त्वं बुद्धिहेतुर्हि दृश्यत इत्यर्थः ॥ ननु तत्साहेतो
भोगस्य विवेकसाहचर्यमात्रेण कथं तुष्टिकरत्वमित्याशंक्य सहकारिविशेषवशाद्विपरीतकार्यकरत्वं लोके दृष्टमित्याह ॥ वि
ज्ञायेति अयं चोर इति ज्ञात्वा तेन सह वर्तमानस्य पुरुषस्य न चौरो भवति किं तु मित्रतामेतीत्यर्थः ॥ ४८ ॥

ननु कामनास्वरसत्वान्मनसः कथं स्वल्पभोगेन तृप्तिः स्यादित्याशंक्य निदिध्यासनेन निगृहीतस्य तथात्वाद्बहुतृप्तिरित्याह ॥ मन इति ॥ निगृहीतस्य योगाभ्यासेन वशीकृतस्य मनसोऽल्पकोऽपि ह्यल्पोऽपि लीलाभोगः लीलानुभवो योऽस्ति अलब्धविस्तारमप्राप्तबाहुल्यं तमेव भोगं क्लिष्टत्वाद्दोषयुक्तत्वाद्बहु मन्यते अधिकत्वेन जानातीत्यर्थः ॥ ४९ ॥ निगृहीतस्य मनसः स्वल्पेनापि भोगे

मनसो निगृहीतस्य लीलाभोगोऽल्पकोऽपि यः ॥ तमेवालब्धविस्तारं क्लिष्टत्वाद्बहु मन्यते ॥ ४९ ॥ बद्धमुक्तो महीपालो ग्राममात्रेण तुष्यति ॥ परैरबद्धो नाक्रान्तो न राष्ट्रं बहु मन्यते ॥ ५० ॥ विवेके जाग्रति सति दोषदर्शनलक्षणे ॥ कथमारब्धकर्मापि भोगेच्छां जनयिष्यति ॥ ५१ ॥ नैष दोषो यतोऽनेकविधं प्रारब्धमीक्षते ॥ इच्छानिच्छापरेच्छा च प्रारब्धं त्रिविधं स्मृतं ॥ ५२ ॥ अपथ्यसेविनश्चोरा राजदाररता अपि ॥ जानन्त एव स्वानर्थमिच्छन्त्यारब्धकर्मतः ॥ ५३ ॥

न तृप्तिर्भवतीत्यत्र दृष्टान्तमाह ॥ बद्धमुक्त इति ॥ ५० ॥ ननु आरब्धकर्मप्राबल्याद्भोगेच्छा भवेद्यदीत्यत्र कर्मवशादिच्छा भवेद्यदीत्युक्तं तदनुपपन्नं इच्छाविद्यातितिविवेकज्ञाने सति तदसत्यसंभवादिति शंकते ॥ विवेक इति ॥ ५१ ॥ दोषदर्शने सत्यपीच्छाजन्म संभविष्यति प्रारब्धस्य नानाप्रकारत्वादिति परिहरति ॥ नैष दोष इति ॥ नानाप्रकारत्वमेव दर्शयति ॥ इच्छानिच्छेति ॥ इच्छाजनकमनिच्छया भोगप्रदं परेच्छया भोगप्रदं च त्रिविधमित्यर्थः ॥ ५२ ॥ इच्छाप्रारब्धं दर्शयति ॥ अपथ्यसेविन इति ॥ ५३ ॥

अपथ्यसेवादीच्छायाः प्रारब्धफलत्वं कुतो वगम्यत इत्याशंक्यापरिहार्यत्वादित्यभिप्रेत्याह ॥ नचात्रेति ॥ अत्रास्मिंल्लोके अपथ्यादीच्छेति
त्येतत्कुत इत्यत आह ॥ यत ईश्वर इति ५४ ॥ गीतावाक्यं पठति ॥ सदृशमिति ॥ विवेकज्ञानवानपि पुरुषः स्वस्याः स्वकीयायाः प्रकृतेः सदृश
मनुरूपं चेष्टते प्रकृतिर्नाम पूर्वकृतधर्माधर्मादिसंस्कारो वर्तमानजन्मादावभिव्यक्तः पुनः सर्वस्तस्मात्प्रकृतिं यान्ति भूतानि निग्रहः प्रकृति
निरत्यो निरोधो मयान्येन वा कृतः किं करिष्यति ॥ न किमपीत्यर्थः ॥ ५५ ॥ तीव्रप्रारब्धस्यापरिहार्यत्वे वचनांतरसंमतिमाह ॥ अवश्यमि

नचात्रैतद्वारयितुमीश्वरेणापि शक्यते ॥ यत ईश्वर एवाह गीतायामर्जुनं प्रति ॥ ५४ ॥ सदृशं चेष्टते स्व
स्याः प्रकृतेर्ज्ञानवानपि ॥ प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ५५ ॥ अवश्यंभाविभावानां प्रतीकारो
भवेद्यदि ॥ तदा दुःखैर्न लिप्येरन्नलरामयुधिष्ठिराः ॥ ५६ ॥ नचेश्वरत्वमीशस्य हीयते वता यतः ॥ अ
वश्यंभाविताप्येषामीश्वरेणैव निर्मिता ॥ ५७ ॥ प्रश्नोत्तराभ्यामेवैतद्गम्यतेऽर्जुनकृष्णयोः ॥ अनिच्छापूर्व
कं चास्ति प्रारब्धमिति तच्छृणु ॥ ५८ ॥

ति अवश्यंभाविभावानां दुःखादीनामित्यर्थः ॥ ५६ ॥ प्रारब्धस्यापरिहार्यत्वे तत्परिहारासमर्थस्येश्वरस्यानीश्वरत्वप्रसंग इत्याशं
क्याह ॥ नचेनेश्वरत्वमिति कुत इत्यत आह ॥ यतः अवश्यमिति ॥ यतः कारणादेषां दुःखादीनामवश्यंभाविताऽपि ईश्वरेणैव निर्मिता ॥ अ
तो नानीश्वरत्वप्रसंग इत्यर्थः ॥ ५७ ॥ एवं सप्रपंचमिच्छाप्रारब्धमभिधायानिच्छाप्रारब्धं वक्तुमारभते प्रश्नोत्तराभ्यामि
ति ॥ अनिच्छापूर्वकं च प्रारब्धमस्ति एतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेव ज्ञायते इति योजना ॥ तदवधानाय शिष्यमभिमुखीक

तत्रार्जुनस्य प्रश्नं तावद्दर्शयति ॥ अथ केनेति ॥ हे वार्ष्णेय वृष्णिसंबोधन अयं पुरुषः केन प्रयुक्तः प्रेरितः अनिच्छन्नपि स्वयम
कुर्वन्नपि राजा बलान्नियोजित इव पापं चरति आचरतीति ॥ ३६ ॥ अस्योत्तरमाह ॥ काम एष इति ॥ एष पुरुषप्रवर्तकः रजो
गुणात्समुद्भव उत्पत्तिर्यस्य स रजोगुणसमुद्भवः कामः एष प्रसिद्धोयं कामः कदाचित्क्रोधरूपेणापि परिणमते ततः क्रोधः स
पुनः कीदृशः महाशनः महदशनं विषयजातं यस्य स महाशनः ॥ महापाप्मा ॥ महतः पापस्य हेतुत्वादुपचारान्महापाप्मत्वमस्य
अत इह संसारे एनं कामं क्रोधरूपं वैरिणं विद्धि अयमभिप्रायः प्रारब्धवशादुद्रिक्तो रजोगुणकार्ययोः कामक्रोधयोरन्यतरस्यैव

अथ केन प्रयुक्तोयं पापं चरति परुषः ॥ अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥ काम एष क्रोध एष र
जोगुणसमुद्भवः ॥ महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ॥ ३७ ॥ स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ॥
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत् ॥ ३८ ॥ नानिच्छन्तो न चेच्छन्तः परदाक्षिण्यसंयुताः ॥ सुखदुःखे
भजन्त्येते तत्परेच्छापर्वं कर्मभिः ॥ ३९ ॥

पुरुषप्रवर्त्तकत्वेन प्रवृत्तीच्छाया इति ॥ ३७ ॥ नन्वत्र कामक्रोधयोरेव पुरुषप्रवर्तकत्वमुपलभ्यते नानिच्छाप्रारब्धस्येत्याशंक्य तस्यै
व प्रवर्त्तकत्वप्रतिपादकं तद्वाक्यं पठति ॥ स्वभावजेनेति ॥ हे कौन्तेय स्वेनैवानुष्ठितेन अतएव स्वकीयेन प्रारब्धेन कर्मणा निबद्धः
सन् यत्कर्तुं नेच्छसि तदपि मोहादविवेकतः अवशः परवशः करिष्यसीत्यतो निच्छाप्रारब्धमस्तीत्यभ्युपगंतव्यमिति भा
वः ॥ ३८ ॥ इदानीं परेच्छाप्रारब्धमप्यस्तीत्याह ॥ नानिच्छन्त इति ॥ अनिच्छन्तोपि न भवन्ति इच्छन्तोपि न भवन्ति ॥ किंतु परदाक्षिण्यसंयु
ताः संतस्तत्प्रीत्यर्थमेव सुखदुःखे भजन्ति अतस्तत्सुखादीनामिह भोगहेतुत्वं परेच्छापूर्वकप्रारब्धप्राप्तिरूपमित्यर्थः ॥ अ
तएव दोषदर्शने सत्यपि प्रारब्धस्यापरिहार्यत्वात् तस्येच्छाजनकत्वं नानिवारयितुं शक्यतीति भावः ॥ ३९ ॥

ननु तत्वविदोपीछांगीकारे किमिछन्निति विरोध इति शंकते ॥ कथं तर्हीति ॥ किमिछन्नित्यनेन वाक्येन कथमिछाभावो वर्णित इत्यर्थः ॥
नानेनेछाभावोभिधीयते ॥ किंतु सत्याअपि तस्याः समर्थप्रवृत्तिजनकत्वं नास्तीति बोध्यते इति परिहरति ॥ नेछानिषेध इति ॥
स्वरूपेण सत्याअपि तस्याः सामर्थ्यराहित्ये दृष्टांतमाह ॥ भर्जितेति ॥ ६३ ॥ ...दोषेणोक्तमर्थं प्रपंचयति ॥ यथा भर्जितानि वीजानि स्वरू-
पेण विद्यमानान्यपि नांकुरादिकार्यकराणि भवंति ॥ तथा विद्वदिछा स्वयं विद्यमानापीष्यमाणपदार्थस्यासत्वज्ञानेन बाधि-

कथं तर्हि किमिछन्नित्येवमिछा निषिध्यते ॥ नेछा निषेधः किं त्विछाबाधो भर्जितवीजवत् ॥ ६३ ॥ भर्जिता-
नि तु वीजानि संत्यकार्यकराणि च ॥ विद्वदिछा तथेष्टव्यासत्वबोधान्न कार्यकृत् ॥ ६४ ॥ दग्धवीजमरोहेपि
भक्षणायोपयुज्यते ॥ विद्वदिछाप्यल्पभोगं कुर्यान्न व्यसनं बहु ॥ ६५ ॥ भोगेन चरितार्थत्वात्प्रारब्धं कर्म ही-
यते ॥ भोक्तव्यसत्यताभ्रांत्या व्यसनं तत्र जायते ॥ ६६ ॥

तत्वान्न व्यसनादिकार्यदामेत्यर्थः ॥ ६४ ॥ ननु तर्हि विदुष इछैव नांगीकर्तव्या फलाभावादित्याशंक्य फलाभावोसिद्धो भोगरूदाण
फलस्य सद्भावादिति दृष्टांतमाह ॥ दग्धवीजमिति ॥ दग्धं भर्जितमितियावत् ॥ व्यसनं विपदादिरूपं बहुविधं व्यसनं वियादिभ्रंशदोषाका-
मजकोपजरत्वाभिधानात् ॥ ६५ ॥ ननु कर्मैव भोगद्वारा व्यसनमपि जनयेदित्याशंक्याह ॥ भोगेनेति ॥ प्रारब्धकर्मणो भोगमात्रहेतु-
त्वान्न व्यसनजनकत्वमित्यर्थः ॥ कुतस्तर्हि व्यसनजन्मेत्यत आह भोक्तव्येति ॥ तत्र तस्मिन्विषये ॥ ६६ ॥

व्यसनहेतुं भ्रमं दर्शयति ॥ माविनश्यत्विति ॥ अयं भोगो मा विनश्यतु उत्तरोत्तरं वर्द्धतां । विघ्नाश्चैनं मा प्रतिबध्नंतु अस्य प्रतिबंधं
मा कुर्वंतु अस्मादेव भोगादहं धन्यः कृतार्थोऽस्मीत्येवंरूपो भ्रमो भवति ॥ ततश्च व्यसनमित्यर्थः ॥ ६७ ॥ प्रसंगादस्य परिहारोपायमाह ॥
यदभावीति ॥ यदभावीति ॥ यद्भावि तु मया भोग्यं तन्न भवेदेव भावि तु योऽयं चेत्तदन्यथा न भवेदेवेत्येवंरूपश्चिंता विषघ्नः ॥ इदं मे श्रेयः क

मा विनश्यत्वयं भोगो वर्धतामुत्तरोत्तरं ॥ मा विघ्नाः प्रतिबध्नंतु धन्योऽस्म्यस्मादिति भ्रमः ॥ ६७ ॥ यदभावि न
तद्भावि भावि चेन्न तदन्यथा ॥ इति चिंता विषघ्नोऽयं बोधो भ्रमनिवर्तकः ॥ ६८ ॥ समेऽपि भोगे व्यसनं भ्रांतो गच्छे
न्न बुद्धवान् ॥ अशक्यार्थस्य संकल्पात् भ्रांतस्य व्यसनं बहु ॥ ६९ ॥ मायामयत्वं भोगस्य बुद्ध्वास्थामुपसंहरन्
भुंजानोऽपि न संकल्पं कुरुते व्यसनं कुतः ॥ ७० ॥

दाभविष्यति इदमनिष्टं कदा निवर्तिष्यते इत्येवमादिचिंतैव विषमिव संसारपुरुषस्य नाशहेतुत्वाद्विषं तद्विषं हंतीति चिंता
विषघ्नः एवंभूतो यो बोधः सोऽयं भ्रमनिवर्तकः ॥ सर्वोक्तस्य भ्रमस्य निवर्तक इत्यर्थः ॥ ६८ ॥ ननु विद्वदविदुषोरुभयोरपि भोगित्वावि
शेषादेकस्य व्यसनमपरस्य तु नेत्येतत्कुत इत्याशंक्य विपरीतज्ञानसत्वासत्वाभ्यां तत्सिद्धिरित्याह ॥ समेऽपि भोग इति ॥ बुद्धवान्
ज्ञातवान् ज्ञानीत्यर्थः ॥ भ्रांतेः कथं व्यसनहेतुत्वमित्यत आह ॥ अशक्यार्थस्येति ॥ ६९ ॥ विवेकिनस्तदभावं दर्शयति ॥ मायामयत्वमिति
॥ ७० ॥

प्रत्वा

ननु मायात्वबोधे सत्यपि भोगस्य तदानीतनसुखहेतुत्वात्कुतस्तस्योपसंहार इत्याशंक्य बहुविधदोषदर्शनादित्याह ॥ स्वप्नें-
द्रजालेति ॥७१॥ ननूक्तस्वप्नेंद्रजालसादृश्यादि भोगे सत्यासत्यत्वभावो न भवेत्तदेव कुतो ज्ञायत इत्याशंक्य तज्ज्ञानोपायमा-
ह ॥ स्वस्वप्नेति द्वाभ्यां ॥ स्वकीयं स्वप्नमपरोक्षतया दृष्ट्वा स्वकीयं च जागरमनुभवन् स्वप्नजागरावुभावपि अप्रमत्तः सन्न-
नुमुहुश्चिंतयेत् स्वप्नतुल्योयं जागर इति ॥७२॥ एवं तयोः सर्वसाम्यं तात्कालिकभोगहेतुत्वपरिणतिचिरसत्वविनाशित्वादिलक्ष-

स्वप्नेंद्रजालसदृशमचिंत्यरचनात्मकं ॥ दृष्टनष्टं जगत्पश्यन्कथं तत्रानुरज्यति ॥७१॥ स्वस्वप्नमपरो्क्षे-
ण दृष्ट्वा पश्यन्स्वजागरं ॥ चिंतयेदप्रमत्तः सन्नुभावनुदिनं मुहुः ॥७२॥ चिरं तयोः सर्वसाम्यमनुसंधाय
जागरे ॥ सत्यत्वबुद्धिं संत्यज्य नानुरज्यति पूर्ववत् ॥७३॥ इंद्रजालमिदं द्वैतमचिंत्यरचनत्वतः ॥ इत्यविस्मर-
तो हानिः का वा प्रारब्धभोगतः ॥७४॥

णं चिरमनुसंधाय जागरेपि सत्यत्वबुद्धिं परित्यज्य जाग्रद्वस्तुष्वपि पूर्ववज्जगत्सत्यत्वज्ञानदशायामिव नानुरज्यति पुरु-
रक्तो न भवतीत्यर्थः ॥७३॥ ननु प्रपंचगोचरस्य मिथ्यात्वज्ञानस्य विषयसत्यत्वस्य त्वोपजीविनो भोगस्य च परस्परविरोधान्मिथ्या-
त्वज्ञाने सति कथं भोगसिद्धिरित्याशंक्य भोगस्य विषयसत्यत्वापेक्षाभावान्नाविरोध इति परिहरति ॥ इंद्रजालमिति ॥ इदं द्वैत-
भोग्यजातमचिंत्यरचनत्वादिंद्रजालवन्मिथ्येति युक्त्यानुसंधाय अविस्मरतोपि दुष्प्रारब्धकर्मफलयोः सुखदुःखयोर- ३
नुभवेन मिथ्यात्वानुसंधानस्य का हानिः यद्वा मिथ्यात्वानुसंधानेन वा भोगस्य का हानिः विभिन्नविषयत्वादिति भावः ॥७४॥

।विभिन्नाविषयत्वमेवदर्शयति ॥ निर्वंधइति ॥ तत्वविद्यायाजगत्तत्वगोचरस्यज्ञानस्यइंद्रजालवज्जगतोमिथ्यात्वानुसंधानेननिर्वंधन
त्वेभोगा।पल्मायेप्रारब्धकर्मणःजीवस्यसुखदुःखयोःप्रदानेआग्रहःनतुभोग्यसत्यत्वापादनइतिभावः ७५ एवंविभिन्नाविषयत्वंप्र
दर्शयप्रयोगमाह ॥ विद्यारब्धइति ॥ विद्याप्रारब्धकर्मणोःपरस्परंनाविरुद्ध्येते विभिन्नाविषयत्वात् संप्रतिपन्नरूपरसज्ञानवदित्यर्थः ॥
भोग्यमिथ्यात्वज्ञानंभोगबाधकंनभवतिइत्येतत्क्वदृष्टमित्याशंक्याह ॥ जानद्भिरिति ॥ ऐंद्रजालकोविनोदइंद्रजालसंबंधिचमत्कारविशे

॥ ७५ ॥

निर्वंधस्तत्वविद्याया इंद्रजालत्वसंस्मृतौ ॥ प्रारब्धस्याग्रहो भोगे जीवस्य सुखदुःखयोः ॥ विद्यारब्धे
विरुद्ध्येते न भिन्नाविषयत्वतः ॥ जानद्भिरप्यैंद्रजालविनोदो दृश्यते खलु ॥ ७६ ॥ जगत्सत्यत्वमापाद्य
प्रारब्धं भोजयेद्यदि ॥ तदा विरोधि विद्याया भोगमात्रान्नसत्यता ॥ ७७ ॥

षो जानद्भिरप्यवलोक्यत इति प्रसिद्धमित्यर्थः ७५ ॥ किंचविद्याप्रारब्धकर्मणोः विरोधोस्तीति वदन्प्रष्टव्यः किं प्रारब्धकर्मविद्या
विरोधीत्युच्यते उत विद्याप्रारब्धकर्मविरोधिनीति ॥ नाद्य[illegible]इत्यर्थः जगत्सत्यत्वमिति ॥ प्रारब्धंकर्मजगतोभोग्यजात
स्यसत्यत्वमबाध्यत्वमापाद्ययदिभोजयेज्जीवस्यसुखदुःखेदद्यात्तदाविद्याविषयस्यमिथ्यात्वस्यापहाराद्विद्याविरोधिस्या
न्नचतथाकरोति किंतुभोगमेवप्रयच्छति ॥ अतोनविद्याविरोधिप्रारब्धमितिभावः ॥ भोगबलादेवभोग्यस्यसत्यत्वमपिस्यादित्याशं
क्याह ॥ भोगमात्रेति ॥ विमतंसत्यंभोग्यत्वादित्यत्रदृष्टांताभावइतिभावः ॥ ७७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु मिथ्यापदार्थभोगो भवतीत्यत्रापि दृष्टान्तो नास्तीत्याशंक्याह ॥ अन्यत्र न इति ॥ ७८ ॥ नापि द्वितीय इत्याह ॥ यदीति ॥ विद्या यदि जगद्भोग्य जातमपह्नुवीत नेदं रजतमिति निषेधज्ञानवत्प्रतीयमानस्य भोग्यस्य स्वरूपं विलापयेत् ॥ तदा प्रारब्धकर्मभोगस्य सुखदुःखानुभवस्य साधनापहारेण प्रारब्धकर्मविघातिनी स्यान्न च तथा करोति किं तु मिथ्यात्वमव बोधयति अतो न प्रारब्धकर्मविरोधिनीति भावः ननु मिथ्यात्वबोधनादेव प्रपंचस्वरूपमपि विलापयेदित्याशंक्याह ॥ नन्विति मायात्वेति इंद्रजालादौ स्वरूपाविलापनमंतरेणापि मिथ्यात्वज्ञानदर्शनादिति भावः ॥ ७९ ॥ एतदेव प्रपंचयति ॥ अनपह्नुत्येति लोकाजनासादिंद्रजालस्वरूपमनपह्नुत्य अनिरस्य इंद्रजालमिति

अन्यत्र नो जायते भोगः कल्पितैः स्वप्नवस्तुभिः ॥ जाग्रद्वस्तुभिरप्येवमसत्यैर्भोग इष्यतां ॥ ७८ ॥ यदि विद्यापह्नुवीत
जगत्प्रारब्धघातिनी ॥ तदा स्यान्न तु मायात्वबोधेन तदपह्नवः ॥ ७९ ॥ अनपह्नुत्य लोकास्तदिंद्रजालमिदं त्विति ॥
जानन्त्येवानपह्नुत्य भोगं मायात्वधीस्तथा ॥ ८० ॥ यत्र त्वस्य जगत्स्वात्मा पश्येत्कस्तत्र केन किं ॥ किं जिघ्रेत्किं वदेदि

जानंत्येव यथा तथा भोगं भोग्यमनपह्नुत्य अविलाप्य मायात्वधीः जगन्मिथ्यात्वज्ञानं भवतीत्यर्थः ॥ ८० ॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिः ईक्ष्वदर्शनदृश्याभावं बोधयत्यतो विद्योत्पद्यमाना जगद्विलापयेदेव ॥ एवं सति विदुषो भोगः कथं स्यादिति श्रुत्यवष्टंभेन शंकते श्लोकद्वयेन यत्र त्वस्येति ॥ यत्र यस्यां विद्यावस्थायां तु त्वं जगदस्य विदुषः स्वात्मैवाभूदिदं सर्वं यदयमात्मेति ज्ञानेन स्वरूपमेव भवति तत्र तस्यां दशायां को द्रष्टा केन साधनेन चक्षुषा किं दृश्यरूपजातं पश्येदेवं घ्राणेन्द्रियेण किं कुसुमादिकं जिघ्रेत्किं वाक्यं केन वागिंद्रियेण वा वदेदेवमितरेन्द्रियव्यापाराभावद्योतनाय वा शब्दस्त्वेवंप्रकारेण अतो बहुवारमभिहितमित्यर्थः ॥ ८१ ॥

ततः किमित्यत्राह ॥ तेन द्वैतमिति स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हीत्यस्मिन्सूत्रे ॥ यत्र त्वस्येत्युदाहृताया श्रुतेः सुषुप्तिमो
क्षयोरन्यतरविषयत्वेन व्याख्याततत्त्वान्नाविद्यया जगदपह्नव इति परिहरति ॥ श्रुत्युक्तसुषुप्तिविषयेति स्वाप्ययः सुषुप्तिः संपत्ति
र्मुक्तिरित्यर्थः ॥ ८२ ॥ ८३ ॥ अस्याः श्रुतेः सुषुप्त्यादिविषयत्वानंगीकारे बाधकमाह ॥ अन्यथेति तत्रोपपत्तिमाह ॥ द्वैतदृष्टाविति ॥ या
ज्ञवल्क्यादिर्यदि द्वैतं पश्येत्तर्हि तदद्वैतज्ञानाभावान्नाचार्यो भवेत् ॥ अथ द्वैतं न पश्यति तर्हि बोध्यशिष्याद्यनुपलंभादाचार्यवाक्याशि

मा तेन द्वैतमपह्नुत्य विद्योदेति न चान्यथा ॥ तथा च विदुषो भोगः कथं स्यादिति चेच्छृणु ॥ ८२ ॥ सुषुप्तिविषया मुक्तिवि
षया वेति श्रुतिः ॥ उक्तं स्वाप्ययसंपत्त्योरिति सूत्रे ह्यतिस्फुटं ॥ ८३ ॥ अन्यथा याज्ञवल्क्यादेराचार्यत्वं न संभवेत् ॥
द्वैतदृष्टावविद्वत्ताद्वैतादृष्टौ न वाग्भवेत् ॥ ८४ ॥ निर्विकल्पसमाधौ तु द्वैतादर्शनहेतुतः ॥ सैवापरोक्षविद्येति
चेत्सुषुप्तिस्तथा न किं ॥ ८५ ॥

ष्यं प्रति बोधनाय न प्रवर्तेत ततो विद्यासंप्रदायोच्छेदप्रसंग इति भाव ॥ ८४ ॥ ननु याज्ञवल्क्यादीनामाचार्यत्वदशायां विद्यमान
स्य ज्ञानस्य विद्यात्वमस्त्येव तथापि तस्य नापरोक्षविद्यात्वं द्वैतप्रतीतिसद्भावान्निर्विकल्पकसमाधौ तु द्वैतदर्शनाभावा
त्सैवापरोक्षविद्येति शंकते ॥ निर्विकल्पकेति ॥ द्वैताप्रतीतेरतिप्रसंगापादकत्वान्नैवमिति परिहरति ॥ सुषुप्तिस्तथा न
किमिति ॥ ८५ ॥

अतिप्रसंगपरिहारं शंकते ॥ आत्मतत्वमिति ॥ सुषुप्तौ द्वैतदर्शनाभावेपि आत्मगोचरज्ञानाभावान्नाविद्यात्वं तस्येत्यर्थः ॥ तर्हि प्राप्तप्रा
प्तविवेकेन ज्ञानस्यैवाविद्यात्वेन द्वैतदर्शनाभावस्येत्याह ॥ तदात्वयेति ॥ ८६ ॥ ननु द्वैतादर्शनात्मज्ञानयोरुभयोर्मिलितयोरेवाविद्यात्वे
नैकैकस्येति शंकते ॥ उभयमिति ॥ द्वैतविस्मृतेरप्यविद्यांशत्वांगीकारे जडस्याप्यर्द्धविद्यावत्वप्रसंग इति परिहरति ॥ तर्हि घटादयस्ति
अत्रोपपत्तिमाह ॥ सकलेति ॥ ८७ ॥ अस्मिन्नेव पदे समाधिमतां पुरुषाणामर्द्धविद्यावत्वप्रसंगस्तत्रापि न स्यादिति सोपहासमाह ॥ मश
कध्वनीति ॥ घटादीनां यथा द्वैतविस्मरणं दृढं तथा तव समाधौ द्वैतविस्मरणं न संभवति ध्वन्यादीनामनेकेषां विक्षेपाणां सद्भा

आत्मतत्वं न जानाति सुप्तौ यदि तदा त्वया ॥ आत्मधीरेव विद्येति वाच्यं न द्वैतविस्मृतिः ॥ ८६ ॥
उभयं मिलितं विद्या यदि तर्हि घटादयः ॥ अर्द्धविद्याभाजिनः स्युः सकलद्वैतविस्मृतेः ॥ ८७ ॥ मश
कध्वानिमुख्यानां विक्षेपाणां बहुत्वतः ॥ तव विद्या तथा न स्याद्घटादीनां यथा दृढा ॥ ८८ ॥ आ
आत्मधीरेव विद्येति यदि तर्हि सुखी भव ॥ दुष्टचित्तं निरुध्याच्चेन्निरुन्धि त्वं यथा सुखं ॥ ८९ ॥
त५ बोदिच्छमे स्वव्यं मायामयत्वस्य समीक्षणात् ॥ इ[illegible]न्नप्यजवन्नेच्छेत्किमिच्छन्निति हि श्रुतेः ॥ ९० ॥

वादित्यर्थः ॥ ८८ ॥ ननु आत्मज्ञानस्यैव विद्यात्वेन द्वैतविस्मृतेरिति शंकते ॥ आत्मधीरिति ॥ तदसौ कामिष्टमित्यभिप्रायेणाशीर्वा
दयति ॥ तर्हि सुखी भवेति ॥ नन्वात्मधीरेव विद्या सा न दुष्टचित्ते संभवत्यतश्चित्तदोषपरिहाराय चित्तवृत्तिनिरोधः कार्य इति शंका
मनूद्य भाषते ॥ दुष्टचित्तमिति ॥ तदंगीकरोति ॥ निरुन्धि त्वमिति ॥ अस्माकमपीति शेषः ॥ एष्टव्यमयेति ॥ चित्तदोषापगमे सति अद्वितीयात्मज्ञा
नापेक्षमाणां जगन्मायामयत्वसम्यग्धीरुत्ते यत्र अश्नतेरस्मात्स्थमित्यर्थः ॥ एवं किमिच्छन्निति मंत्रांशेनाभिप्रेतमर्थमुपपादितमुपसंहरति

एवमभिप्रायं वर्णनेकारणमाह रागइति तत्वविदो रागनिषेधपरं शास्त्रं २१।२२ शास्त्रार्थस्येति तस्यैव रागांगीकारपरं च शास्त्रं
एवं सति तत्वविदो दृढरागाभावे सति शास्त्रद्वयं सार्थमर्थवद्भवति अविरोधतः रागनिषेधपरस्य शास्त्रस्य दृढरागविष
यत्वात् दृष्ट्युपगमपरस्य शास्त्रस्य रागाभासविषयत्वादिति भावः २३ एवं किमिच्छन्नित्यंशस्याभिप्रायमुपवर्ण्य कस्य कामायेत्यं
त्यंशस्याभिप्रायमाह जगन्मिथ्यात्वेति यथा जगन्मिथ्यात्वबोधेन वास्तवकाम्याभावविवक्षया किमिच्छन्नित्युक्तं एवमात्मनोसंग

रागो लिंगमबोधस्य संतु रागादयो बुधे इति शास्त्रद्वयं सार्थमेवं सत्यविरोधतः २१ रागो लिंगमबोध
स्याचित्तव्यायामभूमिषु कुतः शाद्वलता तस्य यस्याग्निः कोटरे तरोः २२ शास्त्रार्थस्य समाप्तत्वान्मुक्तिः
स्यात्तावता मुनेः रागादयः संतु कामं न तद्भावोपराध्यते इति २३ जगन्मिथ्यात्ववदात्मासंगत्वस्य
समीक्षणात् कस्य कामायेति वचो भोक्त्रभावविवक्षया २४ पतिजायादिकं सर्वं तद्भोगाय नेच्छति

त्वबोधेन वास्तवभोक्त्रभावविवक्षया कस्य कामायेत्युक्तमित्यर्थः २४ न त्वात्मनो भोक्तृत्वे स्वप्रतिषेधस्तत्रस
क्तिपूर्वको वक्तव्य सोत्र नाविद्यते असंगत्वादात्मन इत्याशंक्य तस्य स्वानुभवसिद्धत्वान्नैवमित्यभिप्रेत्य तदनुवादिकां श्रुति
मर्थतोनुक्रामति पतिजायादीति न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यनेन वाक्य
द। सर्वेषां पतिजायादिकस्य प्रपंचस्यात्मनो भोगसाधनत्वं प्रतिपाद्यते तत्रात्मनो भोक्तृत्वप्रसक्तिरित्यर्थः २५

एवमात्मनो भोक्तृत्वं प्रदर्श्य तदपवादाय भोक्तारं विकल्पयति किं कूटस्थस्य इति किं कूटस्थस्य भोक्तृत्वं चिदाभासस्य किं वो
भयात्मकस्येति विकल्पार्थः ॥ तत्र प्रथमं प्रत्याह ॥ तत्रेति २६ असंगत्वं नन्वस्तु भोक्तृत्वमप्यस्तु को दोष इत्याशंक्याह सुखित्वदुःखि
त्वाभिमानलक्षणो विकारो भोगः सोऽसंगस्य कूटस्थस्य न युज्यते कूटस्थत्वविकारित्वयोरेकत्र समावेशायोगादित्यर्थः २७ न
नु तर्हि विकारिणश्चिदाभासस्य भोक्तृत्वं स्यादित्याशंक्य विकारित्वेऽपि निरधिष्ठानस्य तस्यैवासिद्धेर्मैवमिति परिहरति चिदाभास
स्य विकारिबुद्ध्युपाध्यधीनत्वात् स्वस्मिन् विकारे संभवत्यपि तस्यापि तत्स्वरूपत्वेनाधिष्ठानभूतकूटस्थं विहाय स्वातंत्र्येणावस्था

किं कूटस्थश्चिदाभासोऽथवा किं वोभयात्मकः ॥ भोक्ता तत्र न कूटस्थोऽसंगत्वाद्भोक्तृतां व्रजेत् ॥ २६ ॥ सुखिदुःख्यभि
मानाख्यो विकारो भोग उच्यते ॥ कूटस्थश्च विकारी चेत्येतन्न व्याहतं कथं ॥ २७ ॥ विकारिबुद्ध्यधीनत्वादाभासे वि
कृतावपि ॥ निरधिष्ठानविभ्रान्तिः केवला न हि तिष्ठति ॥ २८ ॥ उभयात्मक एवातो लोके भोक्ता निगद्यते ॥ तादृगात्मा

नाभवात्केवलचिदाभासस्यापि भोक्तृत्वेन संभवतीति भावः २८ तस्मात्तृतीयः पक्षः पारिशेष्यत इत्याह उभयात्मक इति यत एकै
कस्य भोक्तृत्वेन संभवति अत उभयात्मकः साधिष्ठानश्चिदाभास एव लोके व्यवहारदशायां भोक्तृत्वेनाभिधीयते परमार्थतस्तूभया
त त्मकत्वमेव न घटत इति भावः नन्वसंगो ह्ययं पुरुष इत्यादावसंगत्वस्यैव योऽयं विज्ञानमयः प्राणेष्वित्यादौ बुद्धिसाक्षिकत्वस्याश्रव
णादुभयात्मकं भोक्तृस्वरूपमपि पारमार्थिकमेव स्यान्न तु लोकव्यवहारमात्रसिद्धमित्याशंक्य श्रुतेस्तात्पर्याभावान्नैवमित्याह
तादृगिति तादृगात्मानं बुद्ध्युपाधिकं भोक्तारमात्मानमारभ्यान्वय कूटस्थबुद्ध्यादिकल्पनाधिष्ठानभूतश्चिदात्मा शेषितः कुत्राप्य
नात्मनिरसनेन परिशेषितः श्रुतौ व्यवहारएवकारादित्यर्थः २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तत्र बृहदारण्यकवाक्यार्थं तावत्संक्षिप्य दर्शयति ॥ आत्मेति ॥ जनकेन कतम आत्मेत्येवमात्मनि पृष्टे सति याज्ञवल्क्यस्तं विबोधयन् योऽयं विज्ञानमयः प्राणेष्वित्यादिना विज्ञानमयमुपक्रम्यासंगो ह्ययं पुरुष इत्यसंगं कूटस्थं परिशेषितवानित्यर्थः ॥२००॥ एवं बृहदारण्यके संगात्मपरिशेषप्रकारं प्रदर्श्येतरेयादिश्रुत्यन्तरेष्वपि तं दर्शयति ॥ कोऽयमिति ॥ कोऽयमात्मेति वयमुपास्महे कतरः स आत्मेत्येवमादावात्मविचारेऽन्तःकरणोपाधिकमात्मानमारभ्य प्रज्ञानमात्मा कूटस्थः परिशेषितः एवमन्यत्रापि द्रष्टव्यं ॥ एवं युक्तिश्रुतिप

आत्मा कतम इत्युक्त्वा याज्ञवल्क्यो विबोधयन् ॥ विज्ञानमयमारभ्यासंगं तं पर्यशेषयत् ॥२००॥
कोऽयमात्मेत्येवमादौ सर्वत्रात्मविचारतः ॥ उभयात्मकमारभ्य कूटस्थः शेष्यते श्रुतौ ॥१॥
कूटस्थसत्यतां स्वस्मिन्नध्यस्यात्माविवेकतः ॥ तात्त्विकीं भोक्तृतां मत्वा न कदाचिज्जिहासति ॥२॥

र्यालोचनयोभयात्मकस्य भोक्तुर्मिथ्यात्वं पारमार्थिकस्यासंगस्य कूटस्थस्याभोक्तृत्वं सिद्धं ॥१॥ नन्वेतारीत्या भोक्तुर्मिथ्यात्वे प्राणिनां तस्मिन्सत्यत्वबुद्धिः कुतो जायत इत्याशंक्याह ॥ कूटस्थेति ॥ आत्मा लोकप्रसिद्धो भोक्ताविवेकतः स्वस्य कूटस्थाद्विवेकज्ञानाभावेन कूटस्थनिष्ठसत्यत्वमात्मन्यध्यस्य तद्द्वारा स्वनिष्ठस्य भोक्तृत्वस्यापि सत्यतां मत्वा भोगं कदाचिदपि न हातुमिच्छति ॥२॥ ॥ ॥ ॥ ॥

ननु तर्ह्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यात्मशेषत्वं भोग्यस्य कथं प्रतिपाद्यते इत्याशंक्य न स्फुटं स्यात्मशेषत्वं प्रतिपाद्यते
किं तु लोकप्रसिद्धं भयात्मकं भोक्तृत्वशेषत्वमेव श्रुत्यानूद्यत इत्याह भोक्तेति लोके यो भोक्ता स स्वस्यैव भोगाय पतिजायादिभो
गोपकरणमिच्छतीत्येवं लौकिकवत्तातः श्रुत्या सम्यगनूदितः नात्वर्थान्तरं प्रतिपाद्यत इत्यर्थः २ अनुवादः किमर्थमित्याशंक्य भो
क्तर्येव प्रेम्णो विधानायेत्याह भोग्यानामिति भोग्यानां पतिजायादीनां भोक्तुः स्वस्य भोगोपकरणत्वाद्भोग्येष्वनुरागो न कर्त्तव्यः

भोक्तास्वस्यैव भोगाय पतिजायादिमिच्छति ॥ एवं लौकिकवत्तातः श्रुत्या सम्यगनूदितः ॥ २ ॥
भोग्यानां भोक्तृशेषत्वान्मा भोग्येष्वनुरज्यतां ॥ भोक्तर्येव प्रधाने तोनुरागं तं विधित्सति ॥ ४ ॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी ॥ त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥ ५ ॥

किं तु प्रधाने भोक्तर्येवानुरागः कर्त्तव्य इति विधानायेत्यर्थः ४ भोग्येषु प्रेमत्यागपुरःसरमात्मप्रेम कर्त्तव्यतायां दृष्टांतत्वेने
श्वरे प्रेमप्रार्थनापुरःसरं पुराणवचनमुदाहरति याप्रीतिरिति अविवेकानामात्मज्ञानरहितानां विषयेष्वनपायिनी दृढा या प्री
तिस्त्वा रक्षि हे माप हे लक्ष्मीनीयते सा प्रीतिस्त्वामनुस्मरतस्तत्त्वां सदा चिन्तयतो मे हृदयान्मनसः सर्पतु अपगच्छतु मम मनो विष
यैषासक्तिं परित्यज्य त्वय्येव सदा तिष्ठत्वित्यर्थः यद्वा अविवेकानां विषयेषु दृढा या यादृशी प्रीतिरस्ति सा तादृशी विषयेषु विद्यमाना
प्रीतिस्त्वामनुस्मरतो मे हृदयान्मापसर्पतु मापगच्छतु सदा तिष्ठत्वित्यर्थः ५ ॥ ॥

श्री २

न चैवं पुराणे श्रुतौ किमायातमित्यत आह इतीति इत्यनेन पुराणोक्तन्यायेन सर्वस्माद्भोग्यजातात्पतिजायादिलक्षणाद्विरक्ता
धीर्यस्यासौ विरक्तधीः पुरुषस्तां भोग्यगोचरां प्रीतिं त्वोक्तार्थात्मन्युपसंहृत्य एवमात्मानं बुभुत्सते बोद्धुमिच्छति ॥६॥ एवमात्मन्येव प्रेमो
पसंहारे फलितं सदृष्टान्तमाह स्रक्चंदनेति पामरः पथजनः स्रगादिविषयेषु यथा प्रसक्तः सावधानो भवति एवं मुमुक्षुरप्या
त्मनि विषये न प्रमाद्यत्यनवधानं न करोति किंतु तच्चिंतयैव वर्तत इत्यर्थः ॥७॥ अनवधानाभावमेव बहुभिर्दृष्टान्तैः स्पष्टयति काव्य

इति न्यायेन सर्वस्माद्भोग्यजाताद्विरक्तधीः ॥ उपसंहृत्य तां प्रीतिं त्वात्मन्येवं बुभुत्सते ॥६॥ स्रक्चंदनवधू
वस्त्रसुवर्णादिषु पामरः ॥ अप्रमत्तो यथा तद्वन्न प्रमाद्यति तत्परे ॥७॥ काव्यनाटकतर्कादिमभ्यस्यति निरंतरं ॥
विजिगीषुर्यथा तद्वन्मुमुक्षुः स्वं विचारयेत् ॥ जपयागोपासनादि कुरुते श्रद्धया यथा ॥ स्वर्गादिवांछ
या तद्वत्श्रद्दध्यात्स्वे मुमुक्षया ॥९॥ चित्तैकाग्र्यं यथा योगी महायासेन साधयेत् ॥
अणिमादिप्रेप्सयैवं विविच्यात्स्वं मुमुक्षया ॥१०॥

नाटकेति यथा विजिगीषुः प्रतिवादिजयकामः स्वलोके प्रधानतः पुरुषो निरंतरं काव्यादीनभ्यस्यति एवं मुमुक्षुरपि सदा स्वात्मानं वि
चारयेत् ॥८॥ जपेति यथा वैदिकः स्वर्गादिप्रीतिसाधनानि जपादीनि श्रद्धापुरःसरमनुतिष्ठति तथा मुमुक्षुर्मोक्षेच्छया स्वे श्रो
तव्यात्मनि विश्वासं कुर्यात् ॥९॥ चित्तेति चित्तैकाग्र्यमिति योगी योगाभ्यासवानणिमाद्यैश्वर्यलाभेच्छया महायासेन चित्तैकाग्र्यं यथा संपादयेत्तद्व
द्धृदयमध्यात्मानं सदा विविच्याद्देहादिभ्यो विविच्य जानीयादित्यर्थः ॥१०॥

न२

नन्वेवमेतेषां सदाभ्यासेन किं फलमित्यत आह कौशलानीति यथा तेषां काव्याद्यभ्यासपाटवं तस्मिन्विषये कौशलानि
विवर्द्धन्ते एवमस्यापि मुमुक्षोरभ्यासाद्विवेको देहादिभ्य आत्मनो भेदज्ञानं विशदायते स्पष्टं भवति ११ विवेकवैशद्यस्य फलमाह विवि
त च्यतेति अन्वयव्यतिरेकाभ्यामतः तत्त्वं तत्त्वमतः परमार्थिकस्वरूपं विविच्यतां भोगस्याजडज्ञातेभ्यो भेदेन तापुरुषेण जाग्रदादिषु जाग्रत्स्वप्नसु जान ३
षुप्तिषु अवस्थासु साक्षिणि एव संगतमध्यवसीयते निश्चीयत इत्यर्थः १२ अन्वयव्यतिरेकौ दर्शयति यत्रेति जाग्रदादिषु मध्ये यत्र यास्मि
न्नवस्थाने जाग्रति स्वप्ने सुषुप्तौ वा यत्र स्थूलं सूक्ष्ममानं दृश्येति त्रिविधं भोज्यं द्रष्टा साक्षिणा दृश्यते अनुभूयते तेन दृश्यं तत्रैव तस्यामेवावस्था

कौशलानि विवर्द्धन्ते तेषामभ्यासपाटवात् यथा तद्वद्विवेकोस्याप्यभ्यासाद्विशदायते ११ विविच्यतामतस्तत्वं
जाग्रदादिषु संगतम् अन्वयव्यतिरेकाभ्यां साक्षिण्यध्यवसीयते १२ यत्रैव दृश्यते द्रष्टा जाग्रत्स्वप्नसुषुप्तिषु य २
तत्रैव तन्नेतरत्रेत्यनुभूतिर्हि संमता १३ स यत्तत्र दृते किंचित्तेनानन्वागतो भवेत् दृष्ट्वैव पुण्यं पापं चे
त्येवं श्रुतिषु डिंडिमः १४

यां तिष्ठति इतरत्र इतरस्यामवस्थायां नास्ति द्रष्टा सर्वत्रानुगततया वर्तत इत्यनुभव सर्वसंमतः हि प्रसिद्धमेतदित्यर्थः १३ न केवलमनु
स्यां व ४ नुभवः किं तु आगमोपीत्यभिप्रायेण स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुषः स वा एतस्मिन्संप्रसादे रत्वा चरित्वा
दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवतीत्यादि वाक्यद्वयमर्थतः पठति स यत्तत्रेति तत्र तस्यामवस्थायां यत्किंचिद्रोग्यमीक्षय
ते पश्यति तेन दृश्येनानन्वागतो भवेदननुसत्य गतो न भवेत् किं तु स्वयमेवावस्थान्तरं गच्छतीत्यर्थः पुण्यं पुण्यफलं सुखं पापं तत्फलं
दुःखं च दृष्ट्वैव याता दायेत्यर्थः १४

भोक्तृत्वात्तत्त्वविवेचनपराणि श्रुत्यंतराणि दर्शयति॥ जाग्रदित्यादिना यत्सत्यज्ञानानंदलक्षणं ब्रह्म साक्षिरूपेणावस्थितं तत् जाग्रदादिप्र-
पंचं प्रकाशते प्रकाशयति॥ तद्ब्रह्माहमस्मि न बुद्धिचिदाभासाद्यहमस्मीति ज्ञात्वा श्रुत्यनुभवाभ्यां निश्चित्य सर्वप्रतिबंधैः प्रमातृत्वा- व३॥
दिभिः प्रमुच्यते प्रकर्षेण सर्वात्मना मुच्यते १५ जाग्रदादिष्ववस्थासु एक एवात्मा मंतव्यः एवं विवेकज्ञानेनावस्थानत्रयव्यतीतस्यावस्था-
नत्रयाद्विविक्तस्यात्मनः पुनर्जन्म न विद्यते॥ एतच्छरीरपातानंतरं शरीरांतरप्राप्तिर्नास्तीत्यर्थः॥ १६ त्रिषु धामसु त्रिष्ववस्थाने-

जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते॥ १५॥ एक एवात्मा मंतव्यो
जाग्रत्स्वप्नसुषुप्तिषु॥ स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते॥ १६॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्॥
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः॥ १७॥ एवं विवेचिते तत्त्वे विज्ञानमयशब्दितः॥ चिदाभासो विका-
रीयो भोक्तृत्वं तस्य शिष्यते॥ १८॥ ॥ ॥ ॥ ॥

षु यद्भोग्यं स्थूलप्रविविक्तानंदरूपं यश्च भोक्ता विश्वतैजसप्राज्ञरूपो यश्च भोगस्तदनुभवरूपश्चेति ये विद्यंते तेभ्यः स्थानादिभ्यो विल-
क्षणो यश्चिन्मात्ररूपः साक्षी सदाशिवो निरतिशयानंदरूपत्वेन सर्वदा शोभमानः परमात्मास्ति सोऽहमस्मीत्यर्थः॥ १७॥ एवं विवेके-
नात्मतत्त्वे संगे निश्चिते सति भोक्तृत्वं कस्येत्यत आह॥ एवमिति॥ यो विज्ञानमयशब्देनाभिधीयमानश्चिदाभासस्तस्य विकारित्वाद्भोक्तृ-
त्वमित्यर्थः॥ १८॥ ॥ ॥

ननु चिदाभासस्य भोक्तृत्वाङ्गीकारे कस्य कामायेति वचो भोक्त्रभावाविवक्षयेति पूर्वोक्तं व्याहन्येतेत्याशङ्क्य तस्य वचनस्य पारमार्थिकभोक्त्र-
भावपरत्वमभिप्रेत्य भोक्तुश्चिदाभासस्य मिथ्यात्वं साधयति मायिकोऽयमिति अयं चिदाभासो मायिको मृषात्मकः श्रुतेः जीवेशावाभासेन
करोतीति श्रुतेः अनुभवादपि द्रष्ट्रादित्रितयमध्यवर्त्तित्वेनानुभूयमानत्वादपीत्यर्थः तदेवोपपादयति ॥ इन्द्रजालमिति इन्द्रजालवन्मि-
थ्याभूतं जगत् तस्मात् तदन्तःपातित्वादस्यापि मिथ्यात्वं तदुक्तमनुभूयते विद्वद्भिरिति शेषः यस्माज्जगदन्तःपातीति अतो मृषेति योजना १९ अस्य ज-
गद्वद्विनाशित्वानुभवादपि मृषात्वमित्याह विलय इति मूर्च्छादिरादिशब्दार्थः भवतु मृषात्वं ततः किमित्यत आह एतादृशमिति ॥

स्व २

मायिकोऽयं चिदाभासः श्रुतेरनुभवादपि ॥ इन्द्रजालं जगत्प्रोक्तं तदन्तःपात्ययं यतः ॥ १९ विलयोऽप्य-
स्य सुप्त्यादौ साक्षिणा ह्यनुभूयते एतादृशं स्वस्वभावं विविनक्ति पुनः पुनः ॥ २० विविच्य नाशं निश्चित्य पु-
नर्भोगं न वाञ्छति ॥ मुमूर्षुः शायितो भूमौ विवाहं कोऽभिवाञ्छति २१ ॥ जिह्रेति व्यवहर्तुं च भोक्ताहमिति पू-
र्ववत् ॥ छिन्ननास इव ह्रीतः क्लिश्यन्नारब्धमश्नुते २२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यदा कूटस्थाद्विवेचितश्चिदाभासो मायिको जातस्तदा स्वस्वभावं स्वतत्त्वमेतादृशं मृषात्मकं पुनःपुनर्विविनक्ति कूटस्थाद्विविच्य जानाति व२॥
२॰ ततोऽपि किमित्यत आह विविच्येति स्वविनाशं निश्चित्य भोगेच्छाभावे दृष्टान्तमाह मुमूर्षुरिति २१ किंच पूर्ववदहं भोक्तेति व्यवह-
र्तुमपि लज्जत इत्याह जिह्रेतीति तर्हि ज्ञानोत्पत्त्यनन्तरं प्रारब्धावसानपर्यन्तं कथं व्यवहरतीत्यत आह छिन्ननास इति ह्रीतो ल-
ज्जितः क्लिश्यन्निदानीं मायिकमर्हणीयत इति क्लेशमनुभवन् प्रारब्धमश्नुते प्रारब्धकर्मफलं भुङ्क्त इत्यर्थः २२ ॥ ॥ ॥

इदानीं ज्ञानानंतरं साक्षिणो भोक्तृत्वाभावः कैमुतिकन्यायसिद्ध इत्याह यदा स्वस्यापीति ॥ अयं चिदाभासः स्वस्यापि भोक्तृत्वं मंतुमहं भोक्तेति मंतुं जिह्रेति विलज्जते यदा तदा गतं स्वगतं भोक्तृत्वं साक्षिण्यपि संगे आरोपयेदिति वक्तव्या कथार्थं प्रत्या केवन कापीत्यर्थः ॥ २३ ॥ उक्तमर्थमाश्रुत्यारूढं करोति इत्यभिप्रेत्येति ॥ कस्य कामायेति श्रुतिरित्यर्थः ॥ कूटस्थस्य चिदाभासस्य व्यापारमार्थिकभोक्तृत्वाभावमभिप्रेत्याविशंकयाशंकाराहित्येन भोक्तारमाक्षिपति निराकरोति ॥ भवत्वेवं भोक्त्रभावस्ततः किमित्यत आह अत इति ॥ ज्वरो ज्वरणं संतापः ॥ २४ ॥ तत्वविदः

यदा स्वस्यापि भोक्तृत्वं मंतुं जिह्रेत्ययं तदा ॥ साक्षिण्यारोपयेदेतदिति कैव कथा वृथा ॥ २३ ॥ इत्यभिप्रेत्य भोक्तारमाक्षिपत्यविशंकया ॥ कस्य कामायेत्यतः शरीरानुज्वरो नहि ॥ २४ ॥ स्थूलसूक्ष्मकारणं च शरीरं त्रिविधं स्मृतं ॥ अवश्यं त्रिविधोस्त्येव तत्र तत्रोचितो ज्वरः ॥ २५ ॥ वातपित्तश्लेष्मजन्या व्याधयः कोटिशस्तनौ ॥ दुर्गंधित्वं कुरूपत्व दाहभंगादयस्तथा ॥ २६ ॥ कामक्रोधादयः शांतिदांत्याद्या लिंगदेहगाः ॥ ज्वरा द्वयेपि बाधंते प्राप्याप्राप्य नरं क्रमात् ॥ २७ ॥

शरीरानुज्वराभावं दर्शयितुं शरीरभेदं तत्र तत्र ज्वरसद्भावं च दर्शयति स्थूलमिति ॥ २५ ॥ तत्र स्थूलशरीरे ज्वरं तावदाह वातपित्तेति ॥ २६ ॥ सूक्ष्मशरीरे ज्वरान्दर्शयति कामक्रोधादय इति ॥ कामादीनां शांत्यादीनां च ज्वरत्वमुपपादयति द्वयेपीति ॥ द्वयेपि द्विधा अपि क्रमेण प्राप्याप्राप्य प्राप्तिमप्राप्तिं नरं बाधंते ततो ज्वरसाम्यात् ज्वरा इत्युच्यंते इत्यर्थः ॥ २७ ॥

कारणशरीरगतो ज्वरः छांदोग्यश्रुतावुक्त इत्याह॥ स्वं परं चेति॥ नहि खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि वि
नाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति वाक्येन स्वपरज्ञानस्यान्यत्वमज्ञानेन नष्टप्रायत्वं परेष्वागामि दुःखबीजवासनासद्भावं चें
द्रेण शिष्येण गुरोः प्रजापतेः पुरतो निवेदितमित्यर्थः॥२८॥ एवं त्रिष्वपि देहेषु ज्वरानभिधाय तेषामपरिहार्यत्वमाह॥ एते ज्वरा इति॥ त्रि
ष्वपि शरीरेषु प्रतीयमाना एते ज्वराः शरीरैः सहोत्पन्नत्वेन स्वाभाविकाः संमताः॥ स्वाभाविकत्वं व्यतिरेकमुखेन द्रढयति॥ वियोगे त्विति॥
यतः कारणादेभिर्ज्वरैः संघा शरीराणां वियोगे तानि शरीराणि नासते एवेनैव भवंति अतः स्वाभाविका इत्यर्थः॥२९॥ तत्र दृष्टांतमाह॥

स्वं परं च न वेत्त्यात्मा विनष्ट इव कारणे॥ आगामि दुःखबीजं चेत्येतदिंद्रेण दर्शितं॥२८॥ एते ज्वराः शरीरेषु स्वाभा
विका मताः॥ वियोगे तु ज्वरैस्तानि शरीराण्येव नासते॥२९॥ तंतोर्वियुज्येत पटो वालेभ्यः कंवलो यथा॥ मृदो घ
टस्तथा देहो ज्वरेभ्योपीति दृश्यतां॥३०॥ चिदाभासे स्वतः कोपि ज्वरो नास्ति यतश्चितः॥ प्रकाशैकस्वभावत्वमेव दृष्टं न
चेतरत्॥३१॥ चिदाभासेप्यसंभाव्या ज्वराः साक्षिणि का तथा॥ एवमप्येकतां मेने चिदाभासो ह्यविद्यया॥३२॥ चिदा

तंतोरिति॥३०॥ इदानीं कूटस्थे ज्वराभावं कैमुतिकन्यायेन दिदर्शयिषुश्चिदाभासे तावज्ज्वराभावं दर्शयति॥ चिदाभास इति॥ चिदाभासे स्वतः शरीरत्र
यगतज्वरसंबंधमंतरेण न कोपि ज्वरो विद्यते॥ कुत इत्यत आह॥ यतश्चित इति॥ चितः प्रकाशैकस्वभावस्य विद्वदनुभवसिद्धत्वात्तत्प्रति
बिंबस्यापि चिदाभासस्य तथात्वमेव दृष्टमिति भावः॥३१॥ पदर्थ्यचिदाभासे ज्वराभावं उपपादितस्तदिदानीं दर्शयति॥ चिदाभास इति॥ यदा चि
दाभासेपि ज्वरा न संभाव्यंते तदा न साक्षिणि संभवंतीति किमु वक्तव्यमिति भावः॥ ननु तर्हि देहं ज्वराभिमानित्वमनुभवस्य का गतिरित्यत आह॥ एवमि ग्रं १
एवमिति ३२

एकत्वमेव ज्ञातिसंदेहे पैलोक्त मर्घ्यं प्रपंचयति ॥ साक्षिसत्यत्वेति ॥ चिदाभासः स्वेन सहिते शरीरत्रये साक्षिगतसत्यत्वमध्यस्य तत्सर्वं व
रवच्छरीरत्रयं स्वस्य वास्तवं रूपमिति मन्यत इत्यर्थः ॥ २३ ॥ एवं भ्रांतिज्ञाने सति किं भवतीत्यत आह ॥ एतस्मिन्निति ॥ अयं चिदाभा
सः अस्यां भ्रांतिवेलायां शरीरनिष्ठं ज्वरं स्वात्मन्यारोपयतीत्यर्थः ॥ तत्र दृष्टांतमाह ॥ कुटुंबिवदिति ॥ २४ ॥ दृष्टांतं विशदयति पुत्रदा
रेष्विति ॥ २५ ॥ एवमविवेकदशायां चिदाभासे भ्रांत्या ज्वरं दर्श्य ॥ विवेकदशायां तदभावं दर्शयति ॥ विविच्येति ॥ चिदाभासः कूटस्थसा

साक्षिसत्यत्वमध्यस्य स्वेनोपेते वपुस्त्रये ॥ तत्सर्वं वास्तवं स्वस्य स्वरूपमिति मन्यते ॥ २३ ॥ एतस्मिन्भ्रांतिका
लेऽयं शरीरेषु ज्वरत्स्वयं स्वयमेव ज्वरामीति मन्यते हि कुटुंबिवत् ॥ २४ ॥ पुत्रदारेषु तप्यत्सु तपामीति यथा
तथा ॥ मन्यते पुरुषस्तद्वच्चिदाभासोप्यभिमन्यते ॥ २५ ॥ विविच्य भ्रांतिमुज्झित्वा स्वमप्यगणयन्सदा ॥ चिंतय
न्साक्षिणं कस्माच्छरीरमनुसंज्वरेत् ॥ २६ ॥ अयथावस्तु सर्पादिज्ञानं हेतुः पलायने ॥ रज्जुज्ञाने हि धीध्व
स्तौ कृतमप्यनुशोचति ॥ २७ ॥

तस्मान्न शरीरादिभ्यश्च विविच्य भेदेन ज्ञात्वा इदं सर्वमवास्तवं रूपमिति मन्यत इत्युक्त्वा भ्रांतिं परित्यज्य स्वस्याभासरूपत्वज्ञानेन स्वस्मिन्नास्था
दरमकुर्वन् ॥ स्वस्य निजरूपं ज्वरादिरहितं साक्षिणं सदा चिंतयन् शरीरमनुसंज्वरेच्छरीरमनुसृत्य स्वयं कस्मात्संज्वरेन्न संज्वरे
देवेत्यर्थः ॥ २६ ॥ भ्रांतिज्ञानतत्त्वज्ञानयोर्ज्वरतदभावकारणत्वं दृष्टांतप्रदर्शनेन स्पष्टयति ॥ अयथेति ॥ रज्ज्वादौ कल्पितस्य सर्पादे
र्ज्ञानं पलायनं कारणं भवति भ्रांतिदशायां तेन स्याभ्यो कल्पितभ्रांतो रोगं गृह्यते ॥ ज्वरादिज्ञानेन सर्पादिबुद्धिनिवृत्तौ तदपि पलायन

साक्षिणं सदा चिंतयन्निति उक्तमर्थं दृष्टांतेन स्पष्टयति ॥ मिथ्येति ॥ यथा लोके मिथ्याभियोगकर्त्ता तद्दोषस्य प्रायश्चित्तसिद्ध्यर्थं मिथ्याभियुक्तं
पुनः पुनः तमापयति ॥ एवमयं चिदाभासोपि साक्षिणमसंगात्मनि अभियोक्त्वाध्यारोपजन्न तं मिथ्याभियोगदोषप्रायश्चित्तार्थं साक्षिणमा
त्मानं तमापद्येत वा शरणं गतः ॥ ३८ ॥ तत्रैव दृष्टांतरांतरमाह ॥ आवृत्तेति ॥ यथा पापकारिणा पुरुषेणावृत्तपापापनुत्त्यर्थं मंत्रस्य तत्पापापनो
दाय विहितं तत्स्नानादिकं प्रायश्चित्तमावर्त्यते पुनः पुनरनुष्ठीयते यथा तथायमपि चिरं साक्षिणि संसारित्वारोपणदोषपरिहा

जा१ मिथ्याभियोगदोषस्य प्रायश्चित्तत्वसिद्धये ॥ तमापद्येत वात्मानं साक्षिणं शरणं गतः ॥ ३८ ॥ आवृत्तपापनुत्त्य
र्थं स्नानाद्यावर्त्यते यथा ॥ आवर्त्तयन्निव ध्यानं सदा साक्षिपरायणः ॥ ३९ ॥ उपस्थकुष्ठिनी वेश्या विलासेषु वि
लज्जते ॥ जानतोग्रे तथाभासः स्वप्रख्यातौ विलज्जते ॥ ४० ॥ गृहीतो ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरन्पुनः ॥ म्लेच्छैः
संकीर्यते नैव तथाभासः शरीरकैः ॥ ४१ ॥ यौवराज्ये स्थितो राजपुत्रः साम्राज्यवांछया ॥ राजानुकारी भवति त
थासाक्ष्यनुकार्ययं ॥ ४२ ॥

रायध्यानं परिवर्त्तयन्निव सदा साक्षिपरायणो भवति ॥ ३९ ॥ एवं साक्षिपरत्वं दृष्टांतेनोपवर्ण्य स्वगुणप्रख्यापने लज्जालुत्वं सदृष्टां
तमाह ॥ उपस्थेति ॥ ४० ॥ इदानीं शरीरत्रयाद्विवेचितस्य चिदाभासस्य पुनस्तैः सह तादात्म्यभ्रमाभावे दृष्टांतमाह ॥ गृहीत इति ॥ ४१ ॥
न केवलं स्वापराधनिवृत्तये साक्ष्यनुसरणं किंतु महत्प्रयोजनसिद्ध्यर्थमपीति सिंहावलोकनन्यायेन सदृष्टांतमाह ॥ यौवरा
ज्य इति ॥ राजानुकारी भवति राजेव प्रजारंजनादिगुणवान्भवतीत्यर्थः ॥ ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु युवराजस्य राजानुसरणे साम्राज्यफलं दृश्यते नैवं साक्ष्यनुसरणेऽप्यतस्तदनुसरणे कथं प्रवर्त्तत इत्याशंक्याह योब्र
ह्मेति सयोह वैतत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति। तरति शोकं तरति पाप्मानं गुहाग्रंथिभ्यो विमुक्तोऽम
तो भवतीति श्रुतेः ब्रह्मभावादिरूपस्य फलस्य वांछया साक्ष्यनुसरणे प्रवर्त्तनं युक्तमित्यर्थः ४३ ननु ब्रह्मज्ञानेन ब्रह्मभावप्रा
प्तौ चिदाभासत्वमेव विनश्येदतः स्वनाशाय कथं प्रवर्त्तत इत्याशंक्याह। देवत्वेति यथा लोके देवत्वप्राप्तिकामाः मनुष्या ऽग्न्याग्नि प्रयागगंगा
प्रवेशादौ प्रवर्त्तते एवं साक्षिरूपेणावस्थानलक्षणस्याधिकफलस्य विद्यमानत्वाच्चिदाभासत्वापगमहेतौ ब्रह्मज्ञानेऽपि प्रवृत्तिर्घट

योब्रह्म वेद ब्रह्मैव भवत्येष इति श्रुतिं। श्रुत्वा तदेकचित्तः सन् ब्रह्म वेत्ति न चेतरत्। ४३। देवत्वकामा ह्यग्न्या
दौ प्रविशन्ति यथा तथा। साक्षित्वेनावशेषाय स्वविनाशं स वांछति। ४४। यावत्स्वदेहदाहं स नरत्वं नैव मुंच
ति। यावदारब्धदेहं स्यान्नाभासत्वविमोचनं। ४५। रज्जुज्ञानेऽपि कंपादिः शनैरेवोपशाम्यति। पुनर्मदांधका

त एवेत्यर्थः। ४४। ननु तत्वज्ञाने नाभासत्वमेव गच्छति चेत्कथं तत्वविदां जीवत्वव्यवहार इत्याशंक्य प्रारब्धकर्मक्षयपर्यंतं तदुपपत्तिं स
दृष्टांतमाह। यावदिति यथाग्न्यायप्रविष्टः पुरुषो दाहादिना स्वदेहनाशपर्यंतं नरत्वे नरव्यवहारयोग्यतां नैव मुंचति। एवं प्रारब्ध
कर्मक्षयपर्यंतं चिदाभासत्वव्यवहारो न निवर्त्तत इत्यर्थः। ननु भोक्तृत्वादिभ्रमोपादानस्याज्ञानस्य निवृत्तत्वात्पुनः कथं भोगानुवृ
त्तिः कथं वा मर्त्योऽहमिति विपरीतप्रतीतिरित्याशंक्य दृष्टांतप्रदर्शनेन एतत्संभावयति। रज्जुज्ञान इति। ४६।

दार्ष्टांतिके योजयति ॥ एवमिति ॥४७॥ ननु पुनर्मर्त्यत्वबुद्ध्युदये तेन तत्त्वज्ञानं बाध्यत इत्याशंक्याह ॥ नैतावतेति ॥ कदाचिदहं मर्त्य इत्येवं विज्ञानोदयमात्रेणागमप्रमाणजनिततत्त्वज्ञानं न बाध्यते ॥ कुत इत्यत आह ॥ जीवन्मुक्तिव्रतमिति ॥ इदं मर्त्यत्वबुद्ध्यनुकरणलक्षणं जीवन्मुक्तिव्रतं तितियमेनानुष्ठेयं न भवति किंतु सम्यग्ज्ञानेन भ्रांतिज्ञाननिवृत्तावित्ययं वस्तुस्वभावः अतः कदाचिन्मर्त्यत्वबुद्धावपि पुनस्तत्त्वज्ञानोत्तरेण तस्या एव बाध्यत्वमिति भावः ॥४८॥ भवतु रज्जुसर्पादिस्थाने विपरीतज्ञाननिवृत्तावपि तत्कार्यकंपाद्यनुवृ

एवमारब्धभोगोपि शनैः शाम्यति नो हठात् ॥ भोगकाले कदाचित्तु मर्त्योहमिति भासते ॥४७॥ नैतावतापराधेन तत्त्वज्ञानं विनश्यति ॥ जीवन्मुक्तिव्रतं नेदं किंतु वस्तुस्थितिः खलु ॥४८॥ दशमोपि शिरस्ताडं रुदन्बुद्ध्वा न रोदिति ॥ शिरोव्रणं तु मासेन शनैः शाम्यति नो तदा ॥४९॥ दशमामृतिलाभेन जातो हर्षो व्रणव्यथां ॥ तिरोधत्ते मुक्तिलाभस्तथा प्रारब्धदुःखितां ॥५०॥

त्तिः ॥ प्रकृतदृष्टांते दशमस्त्वमसीति वाक्यविचारजन्यज्ञानेन भ्रमनिवृत्तौ तत्कार्यानुवृत्तिर्नोपलभ्यत इत्याशंक्याह दशम इति ॥ दशमोस्मीति ज्ञानोदये सति शिरस्ताडनपूर्वकरोदनमात्रं निवर्त्तते ॥ ताडनजन्यव्रणस्तु अनुवर्त्तत एवेत्यर्थः ॥४९॥ ननु ज्ञानोत्तरकालेपि संसारानुवृत्तौ जीवन्मुक्तिः कुतः पुरुषार्थ इत्याशंक्य मुक्तिलाभजन्यहर्षस्य तत्र दुःखबाधकस्य सत्त्वात्पुरुषार्थतेति दृष्टांतपूर्वकमाह दशमेति ॥५०॥

जीवन्मुक्तिव्रतं नेदमित्युक्तं तत्र व्रतत्वाभावे किमायातमित्यत आह व्रताभावादिति पुनःपुनर्विचारकरणे दृष्टांतमाह रससेवीतिय
था रससेवी नर एकस्मिन्नेव दिने क्षुद्बाधापरिहाराय पुनःपुनर्भुंक्ते तद्वदध्यासतिवृत्तये पुनःपुनर्विवेकः क्रियतामित्यर्थः ॥५१॥
ज्ञानेनानिवर्त्तस्य प्रारब्धकर्मफलस्य केन तन्निवृत्तिरित्याशंक्य ताउनजौ त्यव्रणस्यौषधेनेव ज्ञो जेनैव निवृत्तिरित्याह श
मयतीति ॥५२॥ अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे अवस्थे जीव उत्पन्ने आत्मानं चेदिति श्रुतिरित्यनेन श्लोकेन आत्मानं चेद्विजानी
स्मृ५॥ यादयमस्मीति पूरुषः किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदित्यनेन च परोक्षज्ञानशोकनिवृत्त्याख्ये जीवावस्थे द्वे अभिहिते इ

व्रताभावाद्यदाध्यासस्तदाभ्यासो विविच्यतां ॥ रससेवी दिनेऽभुक्त्वा भूयोभूयो यथा तथा ॥५१॥ शमयत्यौषधे
नायं दशमः स्ववृणं यथा ॥ ज्ञो जेन शमयित्वेतत्प्रारब्धं मुच्यते तथा ॥५२॥ किमिच्छन्निति वाक्योक्तः शोकमो
क्ष उदीरितः ॥ आभासस्य ह्यवस्थैषा षड्वीतृप्तिस्तु सप्तमी ॥५३॥ सांकुशा विषये तृप्तिरियं तृप्तिर्निरंकुशा ॥

त्युक्तं ॥ इदानीं तदभिधानसूचितां जीवस्य सप्तमीं तृप्तिलक्षणामवस्थां वृत्तानुकीर्त्तनपूर्वकं वक्तुमारभते किमिच्छन्नितीति किमिच्छन्नित्यु
त्तरार्द्धेनाभिहितोऽयं शोकमोक्षः एतावता ग्रंथसंदर्भेण उदीरित अभिहितः ॥ एवमपरोक्षज्ञानमावृत्तिस्तद्वदिहोक्ता अपरोक्षधीः अपरोक्षा
मतिः शोकमोक्षस्तृप्तिर्निरंकुशेत्यनेन श्लोकेन अभिहितास्तु सप्तस्तु जीवावस्थास्तु षट्स्थीत्याहा आभासस्येति सप्तमी व्याख्यायत इति
शेषः ॥५३॥ अपरोक्षज्ञानजन्यायास्तृप्तेर्निरंकुशत्वं प्रातियोगिप्रदर्शनपुरःसरं प्रतिजानीते सांकुशेति ॥ विषयकामजन्यायास्तृ
प्तेर्विषयांतरकामनया कुंठितत्वात्सांकुशत्वं ॥ अस्यास्तु तदभावान्निरंकुशत्वं तदेव दर्शयति कृतं कृत्यमिति ॥५४॥ स

ज्ञातज्ञातव्यत्वमेवोपपादयति ते हि केति अस्याविदुषस्तत्त्वज्ञानोदयात्पूर्वमिहलोकस्वर्गप्राप्तये अनिष्टनिवृत्तये वाभिवाणिज्यादि
कं स्वर्गादिसिद्धये यागोपासनादिकं मोक्षसाधनज्ञानसिद्धये श्रवणादिकं चेति बहुविधकर्त्तव्यमासीत् इदानीं तु सांसारिकफलेच्छा
भावाद् ब्रह्मानंदसाक्षात्कारस्यासिद्धत्वाच्च तत्सर्वं क्षयि यागश्रवणादिकं कृतं कृतप्रायमभूदितः परमनुष्ठेयत्वाभावादीत्यर्थः ५५
एवं ज्ञातज्ञातव्यत्वमुपपाद्य तत्फलं कृतकृत्यतामपि दर्शयति तदेतदिति प्रतियोगीपुरःसरं प्रतियोग्यनुसंधानपूर्वकं यथा भवति तथा एवं

ते हि कामुष्मिकव्रातसिद्धौ मुक्तेश्च सिद्धये बहुकृत्यं पुरास्यान्मे तत्सर्वमधुना कृतं ५५ तदेतत्कृतकृत्य
त्वं प्रतियोगिपुरःसरं अनुसंदधदेवायमेवं तृप्यति नित्यशः ५६ दुःखिनो ज्ञाः संसरं तु कामं पुत्राद्यपेक्ष
या परमानंदपूर्णोऽहं संसरामि किमिच्छया ५७ अनुतिष्ठंतु कर्माणि परलोकयियासवः सर्वलोकात्म
नु२॥ कः कस्मादनुतिष्ठामि किं कथं ५८ व्याचक्षतां ते शास्त्राणि वेदानध्यापयंतु वा येऽत्राधिकारिणो मे तु नाधिकारोऽक्रि

वक्ष्यमाणप्रकारेण सर्वदा तृप्यति ५६ तदेवानुसंधानं प्रपंचयति दुःखिनो ज्ञा इत्यादिना कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया [illegible]रित्व
तः प्राक्तनेन ग्रंथेनात्र तावद्देहिकसुखार्थिभ्यो वैलक्षण्यं स्वस्य दर्शयति दुःखिन इति ५७ स्वर्गाद्यर्थकर्मानुष्ठातृभ्यो वैलक्षण्यमा
ह अनुतिष्ठंत्विति ५८ ननु स्वार्थप्रवृत्त्यभावेऽपि परार्था प्रवृत्तिः किं न स्यादित्याशंक्याधिकाराभावात्सापि नास्तीत्याह व्याचक्षता
मिति ५९

ननु स्वदेहनिर्वाहार्थं भिक्षाहरणादिकं परलोकार्थं स्नानादिकं च भवता क्रियमाणमुपलभ्यते तेनोक्तिप्रयत्नमसिद्धमित्याशंक्य तदपि स्वदृष्ट्या नैवास्ति किं त्वन्यैरेव कल्प्यत इत्याह ॥ निद्राभिक्षेति ॥६०॥ अन्यकल्पनयापि बाधोस्तीत्याशंक्य तदभावे दृष्टान्तमाह ॥ गुंजापुंजादीति ॥६१॥ ननु फलांतरेच्छाभावे कर्मानुष्ठाने माभूत् तत्त्वसाक्षात्काराय श्रवणादिकं कर्त्तव्यमेवेत्याशंक्याज्ञानाद्यभावाच्छ्रवणादिकर्तृत्वमपि नास्तीत्याह ॥ श्रृण्वंत्विति ॥ अज्ञाततत्त्वा अज्ञातब्रह्मैकत्वलक्षणं तत्त्वं येस्ते तथाभूताः श्रवणं कुर्वन्तु तत्त्वमित्थमन्यथा वेति संशयवन्तो

निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च ॥ द्रष्टारश्चेत्कल्पयंति किं मे स्यादन्यकल्पनात् ॥६०॥ गुंजापुंजादि दह्येत नान्यारोपितवह्निना ॥ नान्यारोपितसंसारधर्मानेवमहं भजे ॥६१॥ श्रृण्वंत्वज्ञाततत्त्वास्ते जानन्कस्माच्छृणोम्यहं ॥ मन्यंतां संशयापन्ना न मन्येहमसंशयः ॥६२॥ विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्यये ॥ देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहं ॥६३॥ अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुं ॥ विपर्यासं चिराभ्यस्तवासनातोवकल्प्यते ॥६४॥ ॥

मननं कुर्वन्तु मम तु तदुभयाभावान्नोभयत्र प्रवृत्तिरित्यर्थः ॥६२॥ माभूतां श्रवणमनने विपर्ययनिरासार्थं निदिध्यासनं कर्त्तव्यमित्याशंक्य देहादावात्मबुद्धिलक्षणस्य विपर्ययस्याभावात्तदपि नानुष्ठेयमित्याह ॥ विपर्यस्त इति ॥६३॥ ननु विपर्ययाभावे हं मनुष्य इति व्यवहारः कथं घटत इत्याशंक्य वासनावशाद्भवतीत्याह ॥ अहं मनुष्य इत्यादीति ॥६४॥ ॥ ॥ ॥ ॥

तर्ह्यस्य व्यवहारस्य निवृत्तिसिद्धये ध्यानं संपादयामीत्याशंक्य प्रारब्धक्षयमंतरेणास्य निवृत्तिर्नास्तीत्याह प्रारब्धेति ९५ ननु प्रारब्ध
निमित्तकस्य व्यवहारस्य विरलत्वाय ध्यानं कर्त्तव्यमेवेत्याशंक्य व्यवहारस्याबाधकत्वदर्शनात्तन्निवृत्तये ध्यानमननुष्ठेयमित्याह
विरलत्वमिति ९६ ध्यानस्याकर्त्तव्यत्वेपि विक्षेपपरिहाराय समाधिः कर्त्तव्य इत्याशंक्य विक्षेपसमाधानयोर्मनोधर्मत्वान्न विक्षेपो नैवा
रकेपि समाधौ ममाधिकार इत्याह विक्षेप इति ९७ ननु समाधिफलमनुभवः संपादनीय इत्याशंक्य तस्य मत्स्वरूपत्वान्न संपाद्यत इत्याह नि

प्रारब्धकर्मणि क्षीणे व्यवहारो निवर्त्तते कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः ९५ विरल
त्वं व्यवहृतेरिष्टं चेद्ध्यानमस्तु ते अबाधिकां व्यवहृतिं पश्यन्ध्यायाम्यहं कुतः ९६ विक्षेपो नास्ति
यस्मान्मे न समाधिस्ततो मम विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ९७ नित्यानुभवरूपस्य
को मेऽत्रानुभवः पृथक् कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः ९८ व्यवहारो लौकिको वा शास्त्री
यो वान्यथापि वा ममाकर्त्तुरलेपस्य यथारब्धं प्रवर्त्ततां ९९

त्यानुभवेति उपपादितं कृतकृत्यत्वं निगमयति कृतं कृत्यमिति एवं सर्वज्ञकर्त्तृत्वानभ्युपगमे नियतव्यावृत्तत्वं प्रसज्येतेत्याशंक्य
७२ प्रारब्धवशात्प्राप्तनियतव्यावृत्तित्वमंगीकरोति व्यवहार इति लौकिकोऽन्नाहारादिः शास्त्रीयो जपसमाध्यादिरन्यथापि वा प्रतिषि
द्धहिंसादिर्वा व्यवहारः कर्त्तृत्वाभिमानरहितस्य मम प्रारब्धकर्मानतिक्रम्य प्रवर्त्ततामित्यर्थः ९९

१२
पं॰ द॰

एवं वस्तुतत्त्वमभिधाय प्रौढवादेनाह अथवेति लोकानुग्रहकाम्यया प्राप्तेऽप्यनुग्रहेच्छयेत्यर्थः ॥७०॥ शास्त्रीय एव मार्गे प्रवर्त्तनांगीकारे तर्हि तदभिमानप्रयुक्तो विकारः स्यादेवेत्याशंक्याह देवार्चनेत्यादिवाक्यश्लोकद्वयेन तारं प्रणवं आम्नायमस्तकं वेदान्तशास्त्रं ॥७१॥७२ फलितमाह एवमिति ॥७३॥ विभिन्नविषयत्वमेवस्पष्टयति वपुरिति ॥७४॥ अथापि योज्ञानिकर्मिणोः कलहं कुर्वाते तौ वि

॥७४॥

अथवा सन्ततस्त्वोऽपि लोकानुग्रहकाम्यया शास्त्रीयेणैव मार्गेण वर्त्तेऽहं काममङ्गतिः ॥७०॥ देवार्चनस्नानशौचभिक्षादौ वर्त्ततां वपुः तारं जपतु वाक् तद्वत्पठत्वाम्नायमस्तकं ॥७१॥ विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानन्दे विलीयतां साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये ॥७२॥ एवं च कलहः कुत्र संभवेत्कर्मिणो मम विभिन्नविषयत्वेन पूर्वापरसमुद्रवत् ॥७३॥ वपुर्वाग्धीषु निर्बन्धः कर्मिणो न तु साक्षिणि ज्ञानिनः साक्षिरूपत्वे निर्बन्धो नेतरत्र हि ॥७४॥ एवं चान्योन्यवृत्तान्तानभिज्ञौ बधिराविव विवदेतां बुद्धिमन्तो हसन्त्येव विलोक्य तौ ॥७५॥ यं कर्मी नाभिजानाति साक्षिणं तस्य तत्त्ववित् ब्रह्मत्वं बुध्यतां तत्र कर्मिणः किं विहीयते ॥७६॥ देहवाग्बुद्धयस्त्यक्ता ज्ञानिनानृतबुद्धितः कर्मी प्रवर्त्तयत्वाभिर्ज्ञानिनो हीयते नु किं ॥७७॥

बुद्धिः परिहसनीयावित्याह एवं चेति ॥७५॥ कुतः परिहास्यत्वमित्याशंक्य निर्विषयकलहकारित्वादित्याह यं कर्मीत्यादिना कर्मी यं साक्षिणं कमपि स्थानोपयोगिदेहवाग्बुद्ध्यतिरिक्तं प्रत्यगात्मानं नाविजानाति तत्त्वविदा तस्य ब्रह्मत्वे बुद्धे कर्मिणः कर्मानुष्ठाने किं हीयते ॥७६॥ ज्ञानिनामिथ्यात्वबुद्ध्या परित्यक्तानि देहवाग्बुद्ध्यादिभिः कर्मानुष्ठाने ज्ञानिनो वा किं हीयते अतो निर्विषयकलहकारि

कर्मानुष्ठानं प्रयोजनशून्यत्वान्न ज्ञानिनोऽभ्युपगम्यत इति शंकते प्रवृत्तिरिति उपयोगाभावो निवृत्तावपि समान इति परिह
रति निवृत्तिरिति निवृत्तेर्बोधहेतुत्वान्नोपयोगाभाव इति शंकते बोधहेतुरिति तर्हि प्रवृत्तिरपि बुभुत्साहेतुत्वादुपयोगवतीत्या
ह बुभुत्सायामिति ७८ ननु बुद्धस्य बुभुत्साभावात्प्रवृत्तेरनुपयोगित्वमिति पुनः शंकते बुद्धश्चेदिति तर्हि बुद्धस्य पुनर्बोधा
भावात्तद्धेतुनिवृत्तिरपि बुद्धं प्रत्यनुपयोगिनीत्याह नाप्यसाविति सकृज्ज्ञातस्य बोधस्यास्थिरत्वाद्यन्निवृत्तिरपेक्ष्यत इत्याशंक्य

प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः कोपयुज्यते बोधहेतुर्निवृत्तिश्चेद्बुभुत्सायां तथेतरा ७८ बुद्धश्चेन्न बुभुत्से
त नाप्यसौ बुध्यते पुनः अबाधादनुवर्तेत बोधो नत्वन्यसाधनात् ७९ नाविद्या नापि तत्कार्यं बोधं बाधि
तुमर्हति पुरैव तत्वबोधेन बाधिते ते उभे यतः ८० बाधितं दृश्यतामक्षैस्तेन बाधो न शक्यते जीवन्नाखुर्न

स्थिरत्वबाधकाभावत्रयेत्तातेन साधनांतरमित्याह अबाधादिति वाक्यप्रमाणजन्यज्ञानस्य बलवता प्रमाणेन बाधाभावादनुवृत्तिः
स्यादेव अतो न साधनांतरं तदर्थमनुष्ठेयमित्यर्थः ७९ ननु प्रमाणांतरेण बाधाभावेप्यविद्यया तत्कार्येण कर्तृत्वाध्यासेन वा
बाधः स्यादित्याशंक्याह नाविद्येति तत्र हेतुमाह पुरैवेति ८० नन्वविद्याया बाधितत्वेपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वा
संभवात्तेन बोधस्य बाधो भवेदित्याशंक्य उपादानानिवृत्तौ च तस्यापि बाधितत्वान्न तेनापि बाधः शंकितुं शक्यत इत्याह बा
धितमिति तत्र दृष्टांतमाह जीवन्निति आखुर्मूषकः ८१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

द्वैतदर्शनेन तत्त्वबोधस्य बाधाभावं कैमुतिकन्यायप्रदर्शनेन दृढयितुं तदनुकूलं दृष्टान्तमाह अपि पाशुपतास्त्रेणेति ॥ पा: स मर्थः पा
शुपतास्त्रेणापि विद्धोऽपि न ममार चेतः किं तु स प्रतिः फलं बुद्धिं तु त्रागः शल्यरहितेन बाणेन व्यथितदेहः सन् तद्यतीति नाशं प्राप्स्यती
त्यत्र का प्रमा प्रमाणं नास्तीत्यर्थः ८२ दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति आदाविति आदौ अविद्याभ्यासवशमये चिचैर्बहु
विधैस्तत्कार्यैः प्रमातृत्वकर्तृत्वादिभिर्जन्यमानया विवर्द्धमानया विद्यया बोधो बुद्धो बुद्धः स्ततातमजयत् स एवाभ्यासपाटवे

अपि पाशुपतास्त्रेण विद्धश्चेन्न ममार यः । निःफले बुद्धिबाणोघोऽन्नं दयतीत्यत्र का प्रमा ॥ ८२
आदावविद्यया चित्रैः स्वकार्यैर्जन्यमानया । बुद्धो बोधो जयत्येषा सुदृढो बाध्यतां कथं ॥ ८३
तिष्ठत्वज्ञानतत्कार्यशवा बोधेन मारिताः । सन्तीतिर्बोधसम्राजः कीर्तिः प्रत्युत तस्य ताः ॥ ८४
एवं मतिभ्रमेणैव बोधेन न वियुज्यते । प्रवृत्त्या वा निवृत्त्या वा देहादिगतयास्य किं ॥ ८५ ॥

न हि दृढो ये दानीमविद्यानिवृत्तौ सत्यां तिमिरकल्पेन तत्कार्येणाभ्यासेन कथं बाध्यतां न कथमपि बाध्यत इत्यर्थः ८३ उपपादितमर्थं
श्लोकेन कुर्वन् दुःखरोहायदृष्टिं विरूपकेणाह तिष्ठत्विति ८४ एवं तत्त्वे प्रकृते किमायातमित्यत आह एवमिति ॥ पा: प्रमानेव मकृत्प्र
कारेणातिभ्रमेण विद्यातत्कार्यघातकेन बोधेन ब्रह्मात्मैकत्वज्ञानेन न वियुज्यते न कदापि वियुक्तो भवति तस्य पुंसो दे
हादिवृत्त्या प्रवृत्त्या वा किं न किमपीत्य मतिर्यथेत्यर्थः ८५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तर्हि ज्ञानिवदज्ञानिनोऽपि प्रवृत्तावाग्रहो न युक्त इत्याशङ्क्याह प्रवृत्ताविति ८६ यत्रोपपत्तिमाह स्वर्गापवर्गेति विदुषश्चाग्रहो
न युक्त इत्युक्तं तर्हि कर्मिणां मध्ये वर्त्तमानेन तेन किं कर्त्तव्यमित्यत आह विद्वानिति विद्वांस्तादृशां कर्मिणां मध्ये तिष्ठेच्चेत्तदनु
रोधतस्तेषामनुसारेण शरीरादिभिः सर्वाः क्रियाः करोतु ते तान् कर्मिणो न निवारयेत् इत्यर्थः ८७ अस्यैव तत्त्वबुभुत्सूनां मध्ये व

प्रवृत्तावाग्रहो न्याय्यो बोधहीनस्य सर्वथा स्वर्गाय वापवर्गाय पतितव्यं यतो नृभिः ८६ विद्वांस्तादृ
शां मध्ये तिष्ठेच्चेत्तदनुरोधतः कायेन मनसा वाचा करोत्वेवाखिलाः क्रियाः ८७ एष मध्ये बुभुत्सूनां य
दा तिष्ठेत्तदा पुनः बोधायैषां क्रियाः सर्वा दूषयंस्त्यजतु स्वयं ८८ अविद्वदनुसारेण वृत्तिर्बुद्धस्य
युज्यते स्तनंधयानुसारेण वर्त्तते तत्पिता यतः ८९ अधिक्षिप्तस्ताडितो वा बालेन स्वपिता तदा
न क्लिश्नाति न कुप्येच्च बालं प्रत्युत लालयेत् ९०

स्थितस्य कर्त्तव्यमाह एषमध्य इति एष विद्वान् बुभुत्सूनां मध्ये यदा तिष्ठेत्तदा एषां बुभुत्सूनां बोधाय तत्त्वज्ञानजननाय ताः
क्रियाः सर्वा दूषयन् स्वयमपि त्यजतु ८८ कुत एवं कर्त्तव्यमित्यत आह अविद्वदनुसारेणेति अज्ञान्यनुसारेण ज्ञानि
नो वर्त्तनमुचितं कृपालुत्वात्तेषामनुकंपनीयत्वाच्चेति भावः एवं कुत इत्यत आह स्तनंधयेति स्तनंधयाः स्तनपा
नकर्त्तारः शिशवः इत्यर्थः ८९ पितुः स्तनंधयानुसारित्वमेव दर्शयति अधिक्षिप्त इति ९०

नाट्र

दार्ष्टान्तिके योजयति निन्दित इति विद्वानसौ निन्दितः स्तूयमानो वा स्वयं न निन्दति न स्तौति किं त्वेषामज्ञानां यथाबोध उपजायते
तेन तथाचरेत् ९१ एवमाचरणे निमित्तमाह येनायमिति अयमज्ञानी अज्ञोस्मिन्लोके विदुषा येन यादृशेन नटनेनाचरणेन बुध्यते
तत्त्वमवगच्छति तदाचरणं तेन कर्त्तव्यमेव तर्हि तद्वदेव कार्यान्तरमपि प्रसज्येतेत्यत आह अज्ञप्रबोधादिति एतस्माद्विदस्तत्त्व
विदः अत्र लोके अज्ञप्रबोधादन्यत्कर्त्तव्यं नैवास्त्यतस्तदनुसरणेन तद्बोधनं कर्त्तव्यमित्यर्थः ९२ उक्तवक्ष्यमाणयोस्ता
त्पर्यमाह कृतकृत्यतयेति असौ विद्वानुक्तप्रकारेण कृतकृत्यतया कृतं कृत्यजातं येनासौ कृतकृत्यस्तस्य भावस्तत्ता तया तृप्तः

निंदितः स्तूयमानो वा विद्वानेष न निंदति॥ न स्तौति किं तु तेषां स्याद्यथाबोधस्तथाचरेत्॥९१॥
येनायं नटनेनात्र बुध्यते कार्यमेव तत्॥ अज्ञप्रबोधान्नैवान्यत्कार्यमस्त्यत्र तद्विदः॥९२॥
कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः॥ तृप्यन्नेवं स्वमनसा मन्यतेसौ निरंतरं॥९३॥
धन्योहं धन्योहं ब्रह्मानंदो विभाति मे नित्यं स्वात्मानमंजसा वेद्मि॥ धन्योहं धन्योहं ब्रह्मानं

स तृ। सन् वक्ष्यमाणप्रकारेण प्राप्तप्राप्यतया प्राप्तं प्राप्यं यस्य स प्राप्तप्राप्यस्तस्य भावस्तत्ता तया तृप्यन् तृप्तो भवन् स्वमनसा निरंतरमेवं मन्यते ९३ किं
मन्यत इत्यत आह धन्योहमित्यादिना धन्यः कृतार्थः आदरार्थे वीप्सा नित्यमनवरतं स्वात्मानं स्वस्यात्मस्वरूपं देशाद्य
नवच्छिन्नं प्रत्यगात्मानमंजसा साक्षात्तत्त्वतो वेद्मि जानाम्यतो धन्य इत्यर्थः एवमात्मज्ञानलाभनिमित्तां तुष्टिमभिधाय तत्फ
ललाभनिमित्तां तुष्टिं दर्शयति धन्योहमिति ब्रह्मानंदः ब्रह्मभूतानंदः मे स्पष्टं विभाति स्पष्टं यथा भवति तथा स्फुरतीत्यर्थः
९४

त ३॥

एवमिदं प्राप्य तुष्टिमभिधायातिस्पष्टनिवृत्त्या पितुष्यतीत्याह धन्योऽहमिति ॥ अद्येदानीं दुःखस्वरूपं संसारं न वीक्षे न पश्या
म्यतः कृतार्थ इत्यर्थः ॥ दुःखाप्रतीतौ कारणमाह धन्योऽहमिति ॥ अनेकवासनाजालमज्ञानं क्वापि पलायितं नष्टमित्यर्थः ॥ ९५ ॥
अज्ञाननिवृत्तिफलं कृतकृत्यत्वं प्राप्तप्राप्यत्वं च दर्शयति धन्योऽहमिति ॥ ९६ ॥ इदानीं कृतकृत्यत्वमित्यादिना जातायास्तृप्ते

धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्षेऽद्य । धन्योऽहं धन्योऽहं स्वस्याज्ञानं पलायितं क्वापि ॥ ९५ ॥
धन्योऽहं धन्योऽहं कर्तव्यं मे न विद्यते किंचित् । धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वमद्य संपन्नम् ॥ ९६ ॥
धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके । धन्योऽहं धन्योऽहं धन्यो धन्यः पुनः पुनर्धन्यः ॥ ९७ ॥
अहो पुण्यमहो पुण्यं फलितं फलितं दृढम् । अस्य पुण्यस्य संपत्तेरहो वयमहो वयम् ॥ ९८ ॥ अहो
शम शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः । अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखम् ॥ ९९ ॥

र्निरतिशयत्वमाह धन्योऽहमिति इतः परं वक्तव्यादर्शनात्तृप्तिरेव परिस्फुरतीति दर्शयति धन्योऽहमिति ॥ ९७ ॥ अस्य सर्व
स्य कारणं ज्ञातं पुण्यपुंजपरिपाकमनुस्मृत्य तुष्यतीत्याह अहो पुण्यमिति ॥ एवं पुण्यसंपादकमात्मानमनुस्मृत्य तुष्यति
अस्येति ॥ ९८ ॥ इदानीं सम्यक् ज्ञानसाधनं शास्त्रं तदुपदेष्टारमाचार्यं चानुस्मृत्य तुष्यति अहो शास्त्रमिति ॥ पुनश्च शास्त्रज
न्यं ज्ञानं तज्जन्यं सुखं चानुस्मृत्य संतुष्यति अहो ज्ञानमिति ॥ ९९ ॥

ग्रंथाभ्यासफलमाह तृप्तिदीपमिति ॥२९८॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्य
किंकरेण रामकृष्णाख्यविदुषा विरचिता तृप्तिदीपव्याख्या समाप्ता ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ । कु
र्वे कूटस्थदीपस्य व्याख्यां तात्पर्यदीपिकां ॥१॥ मुमुक्षोर्मोक्षसाधनस्य ब्रह्मात्मैकत्वज्ञानस्य त्वंपदार्थशोधनपूर्वकत्वा
त्त्वंपदार्थशोधनपरं कूटस्थदीपाख्यं ग्रंथमारभमाण आचार्यस्तस्य ग्रंथस्य वेदांतप्रकरणत्वेन तदीयैरेव विषयादिभिस्त
द्वत्तासिद्धिमभिप्रेत्य त्वंपदलक्ष्यवाच्यौ कूटस्थजीवौ सदृष्टांतं भेदेन निर्दिशति स्वादित्येति स्वादित्यदीपिते स्वे आदित्यः स्वादित्यः

तृप्तिदीपमिमं नित्यं येऽनुसंदधते बुधाः । ब्रह्मानंदे निमज्जंतस्ते तृप्यंति निरंतरं ॥२९८॥ इति श्रीमत्परम
हंसविरचितस्तृप्तिः समाप्तः ॥ स्वादित्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत् । कूटस्थभासितो देहो धी
स्थजीवेन भास्यते ॥१॥ अनेकदर्पणादित्यदीप्तीनां बहुसंधिषु । इतराव्यज्यते तासामभावेऽपि प्रकाशते ॥२॥

प्रसिद्धः सूर्य इत्यर्थः तेन च तत्संबंध्यालोको लक्ष्यते । तेन दीपिते प्रकाशिते कुड्ये दर्पणादित्यदीप्तिवत् दर्पणोत्पतितप्रत्यपर्याव
त्तैः कुड्यसंबद्धैरादित्यरश्मिभिस्तत्प्रकाशनमिव कूटस्थभासितः कूटस्थेनाविकारिचैतन्येन भासितः प्रकाशितो देहो धीस्थजीवेन संधौ संधौ
बुद्धिस्थचिदाभासेन भास्यते प्रकाश्यते अनेन सामान्यतो विशेषतश्च कुड्यावभासकादित्यप्रकाशद्वयमिव देहावभासकचैतन्यद्वयम
स्तीति प्रतिज्ञातं भवतीति ॥१॥ ननु तत्र दर्पणादित्यदीप्तिव्यतिरेकेण स्वादित्यदीप्तिर्नोपलभ्यते इत्याशंक्य तामस्ता विभज्य दर्शयति अ
नेकेति यान्यनेकानि बहूनि दर्पणजन्याः कुड्ये तत्र तत्र मंडलाकारा विशेषप्रभा दृश्यंते तासां मध्ये मध्ये इतरा सामान्यप्रकाशरूपा स्वादित्य
प्रभा व्यज्यते अभिव्यक्तोपलभ्यते तासां दर्पणजन्यप्रभाणामभावे दर्पणापगमादिना संलेपेच सर्वसंधिप्रकाशते ॥२॥

दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति चिदाभासेति तथा तेन प्रकारेण चिदाभासविशिष्टानां चित्प्रतिबिम्बयुक्तानाम
नेकधियामनेकबुद्धिवृत्तीनां घटज्ञानादिशब्दवाच्यानां संधिमन्तरालं जाग्रदादौ धियामभावं बुद्धिवृत्तीनामभावं च
सुषुप्त्यादौ भासयन्प्रकाशयन्नसौ कूटस्थः प्रविविच्यतां तान्योन्यभेदेन ज्ञायतामित्यर्थः ३ इदानीं देहान्तःकूटस्थचि
दाभासयोर्भेदप्रदर्शनाय देहाद्बहिरपि चिदाभासब्रह्मणोर्विभागं दर्शयति घटैकाकारेति घटैकाकारधीस्था चित् घटस्यै
कस्याकार एवाकारो यस्याः सा घटैकाकारा तथाविधा या बुद्धेर्वर्तमानश्चिदाभासो घटमेवावभासयेत् तस्य घटस्य ज्ञात
ताख्यो धर्मः घटो ज्ञात इति व्यवहारहेतुर्यः स घटकल्पनाधिष्ठानेन ब्रह्मचैतन्येन साधनज्ञतेनावभास्यते प्रकाश्यत इत्यर्थः ४

चिदाभासविशिष्टानां तथानेकधियामसौ । संधिं धियामभावं च भासयन्प्रविविच्यतां ३ घटैकाकारधी
स्था चिद्घटमेवावभासयेत् घटस्य ज्ञातता ब्रह्मचैतन्येनावभास्यते ४ अज्ञातत्वेन ज्ञातोयं घटो बुद्ध्युद
यात्पुरा ब्रह्मणैवोपरिष्टात्तु ज्ञातत्वेनेत्यसौ भिदा ५ चिदाभासान्तधीवृत्तिर्ज्ञानं लोहान्तकुन्तवत् जाड्य

ननु ज्ञातताऽवभासकचैतन्येनैव घटप्रतीतिसंभवाद्बुद्धिः किमर्थेत्याशंक्य घटस्य ज्ञाततादिभेदसिद्ध्यर्थेत्याह अज्ञातत्वेनेति बु
द्ध्युदयात्पुरायं घटो ब्रह्मणैवाज्ञातत्वेन प्रकाशितो बुद्ध्युत्पत्तेरुपरिष्टात् ज्ञातत्वेन ब्रह्मणैव प्रकाश्यत इत्ययानेव भेदो नान्य इत्य
र्थः ५ ननु एकस्यैव घटस्य ज्ञातत्वाज्ञातत्वलक्षणं द्वैरूप्यं कथं संभवतीत्याशंक्य तदवबोधनाय ज्ञातताज्ञाततानिमित्तयोर्ज्ञा
नाज्ञानयोः स्वरूपं तावद्दर्शयति चिदाभासेति चिदाभासान्तधीवृत्तिः चित्ताभासश्चिदाभासः चित्प्रतिबिम्बः सोन्ते पुरोभागे यस्याः सा
धीवृत्तिर्ज्ञानमित्युच्यते बोधकत्वाद्बुद्धिरित्याचार्यैरभिधानात् तत्र दृष्टान्तो लोहान्तकुन्तवदिति यथा अग्रस्थतः स्फुरिरिति तत्वमज्ञा
नमित्युच्यते एताभ्यां व्याप्तः सर्वतः संबद्धः कुंभो ज्ञातज्ञात इति चोच्यते इत्यर्थः ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु ज्ञातस्य कुंभस्याज्ञातव्याप्तत्वाद्भवतु ब्रह्मावभास्यत्वं ज्ञातव्याप्तस्य तु ज्ञातस्य कुंभस्य कुतो ब्रह्मचैतन्यावभास्य- तू ज्ञा २
त्वमित्याशंक्याज्ञातस्याज्ञातताजननवज्ज्ञातस्यापि ज्ञातताजननमात्रोपक्षीणत्वादज्ञातकुंभवद्धि तस्यापि ब्रह्मावभास्य-
त्वं भवतीत्याह । अज्ञात इति । यथाज्ञातकुंभो ब्रह्मणाभास्यस्तथा ज्ञातः कुंभो न किं ब्रह्मणावभास्यो न भवति किंत्ववत्येवेत्य-

अज्ञातो ब्रह्मणाभास्यो ज्ञातः कुंभस्तथा न किं । ज्ञातत्वजननेनैव चिदाभासपरिक्षयः ॥७॥
आभासहीनया बुद्ध्या ज्ञातत्वं नैव जन्यते । तादृग्बुद्धेर्विशेषः को मृदादेः स्याद्विकारिणः ॥८॥
ज्ञात इत्युच्यते कुंभो मृदा लिप्तो न कुत्रचित् । धीमात्रव्याप्तकुंभस्य ज्ञातत्वं नेष्यते तथा ॥९॥

र्थः । कुत इत्यत आह । ज्ञातत्वेति । ननु ज्ञातताजननायाज्ञानमिव ज्ञातताजनने हीनयापि बुद्ध्या वालं किमनेन चिदाभासे-
नेत्याशंक्य चिदाभासरहितया बुद्ध्या घटादिवदप्रकाशरूपत्वेन ज्ञातताजननं न संभवतीत्याह । आभासहीनयेति ॥८॥ चि-
दा॰ दाभासरहितबुद्धिव्याप्तस्य घटस्य ज्ञातत्वाभावं दृष्टांतप्रदर्शनेन स्पष्टयति । ज्ञात इति । लोके कुत्रादाचिदपि घटो मृदा
स्थूलाकारेण स्वरूपया लिप्तो लेपनं प्राप्तो ज्ञात इति नोच्यते यथा चिदाभासरहितबुद्धिव्याप्तस्यापि कुंभस्य ज्ञातत्वं नाभ्यु-
पगम्यत इति भावः ॥९॥

फलितमाह ज्ञातत्वमिति यतः केवलाया बुद्धेर्ज्ञातत्वजननासमर्थत्वमतः कुंभे चिदाभासलक्षणस्य फलस्योत्पत्तिरेव ज्ञातत्वं नाम प्रसिद्धमित्यर्थः ननु यथा चिदाभासो लक्षणत्वनीयो ब्रह्मचैतन्यस्यैव फलस्य सद्भावादित्याशंक्याह नफलमिति ब्रह्मचैतन्यं फलं घटादिस्फुरणं न भवतीति कुत इत्यत आह मानात्प्रागपि प्रमाणप्रवृत्तेः पूर्वमपि विद्यमानत्वात्फलस्य तदुत्तरकालीनत्वनियमादिति भावः १० नन्विदं परागर्थप्रमेयेष्वित्यादिसुरेश्वरवार्त्तिकविरुद्धमित्याशंक्य तद्विवक्षानभिज्ञस्येदं चोद्यमिति परिहरति परागर्थेत्यादिना अस्यायमर्थः परागर्था बाह्या घटादयः पदार्थास्तेषु प्रमेयेषु प्रमाणविषयेषु सत्सु या प्रमाणफल

ज्ञातत्वं नाम कुंभे तच्चिदाभासफलोदयः। न फलं ब्रह्मचैतन्यं मानात्प्रागपि सत्वतः॥ १० परागर्थप्रमेयेषु या फलत्वेन संमता। संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः॥ ११ इति वार्त्तिककारेण चित्सादृश्यं विवक्षितं। ब्रह्मचित्फलयोर्भेदः सहस्र्यां विश्रुतो यतः॥ १२ आभास उदितस्तस्माज्ज्ञातत्वं जनयेद्घटे। तत्पुनर्ब्रह्मणा भास्यमज्ञातत्ववदेव हि॥ १३

त्वेनाभ्युपेता संविदस्ति सैवेहास्मिन् शास्त्रे वेदान्तोक्तिप्रमाणतः वेदान्तवाक्यलक्षणप्रमाणेन मेयो ज्ञातव्योऽर्थः इत्यनेन वार्त्तिकेन ब्रह्मचैतन्यसदृशश्चिदाभासः प्रमाणफलत्वेन विवक्षितो न ब्रह्मचैतन्यमिति भावः ११ वार्त्तिककारेणेदृशी विवक्षेति कुतोऽवगम्यत इत्याशंक्य तत्र हेतुः श्रीमदाचार्यैरुपदेशसाहस्र्यां ब्रह्मचैतन्यचिदाभासयोर्भेदस्य प्रतिपादितत्वादित्याह ब्रह्मेति ब्रह्मविच्च फलं च ब्रह्मवित्फले तयोरिति विग्रहः १२ एवं च स[illegible]ति प्रकृते किं मायातमित्यत आह आभास इति यस्माद्ब्रह्मवित्फलयोर्भेदः सिद्धस्तस्माद्घटे उदित उत्पन्न आभासश्चिदाभासस्तत्र घटे ज्ञातत्वं जनयेत् उत्पन्नं ज्ञाततत्वं पुनरज्ञातत्ववद्ब्रह्मणैव भास्यं भवति हि प्रसिद्धमित्यर्थः १३

एवं ब्रह्मचिदाभासयोर्भेदमुपपादितं विषयभेदप्रदर्शनेन स्पष्टयति ॥ धीवृत्त्येति ॥ चिता ब्रह्मचैतन्येनेत्यर्थः ॥ चिदाभासस्य कुं
भमात्रनिष्ठफलरूपत्वात्तेनाभासेन एक एव स्फुरेत् आभास एतेत्यर्थः ॥ २४ ॥ कुंभस्य चिदाभासब्रह्मोभयभासत्वेऽपि भेदमाह चैत
न्यमिति ॥ अतो घटस्य ब्रह्मचिदाभासोभयभास्यत्वेन कुंभे ज्ञातत्वेन द्विगुणं चैतन्यं भाति ॥ इदमेव घटज्ञाततावभासकं चैत
न्यं तार्किकैर्नामांतरेण व्यवह्रियत इत्याह ॥ अन्ये इति ॥ यथोदितं यथोक्तमेतदेव ब्रह्मचैतन्यमन्ये तार्किका अनुव्यवसा

धीवृत्त्याभासकुंभानां समूहोऽध्यस्यते चिता ॥ कुंभमात्रफलत्वात्स एकोऽभासतः स्फुरेत् ॥ २४ ॥
चैतन्यं द्विगुणं कुंभे ज्ञातत्वेन स्फुरत्यतः ॥ अन्येऽनुव्यवसायाख्यमाहुरेतद्यथोदितं ॥ २५ ॥ घ
टोऽयमित्यसावुक्तिराभासस्य प्रसादतः ॥ विज्ञातो घट इत्युक्तिर्ब्रह्मानुग्रहतो भवेत् ॥ २६ ॥ आ
भासब्रह्मणी देहाद्बहिर्यद्वद्विवेचिते ॥ तद्वदाभासकूटस्थौ विविच्येतां वपुष्यपि ॥ २७ ॥ अ
हंवृत्तौ चिदाभासः कामक्रोधादिकास्तु च ॥ संव्याप्य वर्त्तते तप्ते लोहे वह्निर्यथा तथा ॥ २८ ॥

याख्यं ज्ञानांतरमाहुरिति योजना ॥ २५ ॥ अयं घट इति ज्ञातो घट इति व्यवहारभेदादपि चिदाभासब्रह्मणोर्भेदोऽवगंतव्य इत्या
ह ॥ घटोऽयमिति ॥ २६ ॥ देहाद्बहिश्चिदाभासब्रह्मणी विविच्येते यथा तथा देहांतश्चिदाभासकूटस्थौ विवेचनीयावित्या
ह ॥ आभासब्रह्मणी ॥ २७ ॥ ननु देहाद्बहिश्चिदाभासव्याप्यघटाकारवृत्तिवदांतरविषयगोचरवृत्त्यभावात्कथंत
व्यापकश्चिदाभासोऽन्युपगम्यत इत्याशंक्य विषयगोचरवृत्त्यभावेऽप्यहमादिवृत्तिसद्भावात्तद्व्यापकश्चिदाभा
सोऽभ्युपगंतुं शक्य इति दृष्टांतमाह ॥ अहंवृत्ताविति ॥ २८ ॥

व

अहमादिवृत्तीनां एवंविदाभासजाभासात्वं दृष्टांतप्रपंचनेन स्पष्टयति ॥ स्वप्नमात्रमिति १९ एवं विदाभासं व्युत्पाद्य कूटस्थरूपं व्युत्पा
दयितुं तदुपयोगिनं वृत्त्यभावावसरं दर्शयति ॥ ऊर्माविति २० ननु त्वेवं समाध्यादौ वृत्तिविलयेऽनेन कथं कूटस्थोऽवगम्यते इत्याशंक्य वृ
त्त्यभावसाक्षित्वेनासाववगम्यत इत्याह ॥ संधय इति वृत्तिसंधयो वृत्त्यभावाश्च येन चैतन्येनावभास्यंते स कूटस्थोऽवगंतव्य इत्यर्थः २१ ए
वं च सति किं फलितमित्यत आह ॥ घटे इति बाह्ये घटे यथा घटमात्रावभासकश्चिदाभासो घटस्य ज्ञाततावभासकं ब्रह्मचैतन्यं चेति ॥ द्विगुणं

स्वप्नाज्ञं भासयेत्तपं कोऽहं नान्यत्कदाचन ॥ एवमाभाससहिता वृत्तयः स्वस्वमात्रसिकाः ॥१९॥ ऊर्मयो द्विंद्विविद्यजा
यंते वृत्तयोऽखिलाः ॥ सर्वा अपि विलीयंते सुषुप्तिमूर्छासमाधिषु ॥२०॥ संधयोऽखिलवृत्तीनामभावाश्चावभासिताः ॥ नि
र्विकारेण तेनासौ कूटस्थ इति चोच्यते ॥२१॥ घटे द्विगुणचैतन्यं यथा बाह्ये तथांतरे ॥ वृत्तिष्वपि ततस्तत्र वैशद्यं सं
धितोऽधिकं ॥२२॥ ज्ञातताज्ञातते न स्तो घटवद्वृत्तिषु क्वचित् ॥ स्वस्य स्वेनाग्रहीतत्वात्तत्राज्ञाननाशनात् ॥२३॥

तथांतरेऽहंकारादिवृत्तिष्वपि कूटस्थचैतन्यं वृत्त्यावभासकश्चिदाभासश्चेति द्विगुणं चैतन्यमस्ति ॥ तत्रोपपत्तिमाह ततस्तत्रेति ॥ यतो
द्विगुणं चैतन्यमस्ति ततः संधिभ्यस्तत्र वृत्तिषु वैशद्यमधिकं दृश्यत इति शेषः २२ ननु तत्रापि घटादिष्विव ज्ञातताज्ञातताव भासकत्वे
न कूटस्थः किं नेष्यत इत्याशंक्य तत्र ज्ञातताद्यभावादेवेत्याह ॥ ज्ञाततेति ॥ तत्रोपपत्तिमाह स्वस्येति ज्ञानाज्ञानव्याप्तिभ्यां ज्ञातताज्ञात
ते न भवतः ॥ वृत्तीनां तु स्वप्रकाशत्वेन ज्ञानव्याप्तिर्नास्ति ता सिद्धवृत्तिभिः स्वोत्पत्तिमात्रेण स्वगोचराज्ञानस्य निवर्तितत्वादज्ञानस्य व्याप्तिरपि नास्तीति

ननु कूटस्थचिदाभासयोरुभयोरपि चित्त्वे समाने एकस्य कूटस्थत्वमपरस्य त्वकूटस्थत्वमित्येतत्कुत इत्याशंक्य चिदाभासातिरूपयोर्जन्मनाशयोरनुभूयमानत्वादकूटस्थत्वमितरस्य विकारित्वप्रमाणाभावात्कूटस्थत्वमित्याह॥ द्विगुणीति २४। चिदाभासव्यतिरिक्तो कूटस्थाभ्युपगम॥ स्वकपोलकल्पित इत्याशंक्याचार्यैः कूटस्थस्योपपादितत्वान्नैवमित्याह॥ अतःकरणेति॥ अंतःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः॥ आनंदरूपः सत्यः सन्किं नात्मानं प्रपद्यसे इत्यादावित्यर्थः॥ २५॥ कूटस्थातिरिक्तश्चिदाभासोपि तैर्वर्णित इत्याह॥ आत्माभासेति॥ आत्मा चात्माभासश्चात्माभासौ आश्रयश्च आत्माभासाश्रयाश्चेति द्वंद्वसमासः॥ मुखाभासाश्रया इत्यत्रापि तथा मुखं च प्रसिद्धमाभासो मुखप्रतिबिंबमाश्र

द्विगुणीकृतचैतन्ये जन्मनाशानुमानतः॥ अकूटस्थं तदन्यत्तु कूटस्थमविकारितः॥ २४॥ अंतःकरणतद्वृत्तिसाक्षीत्यादावनेकधा॥ कूटस्थ एव सर्वत्र पूर्वाचार्यैर्विनिश्चितः॥ २५॥ आत्माभासाश्रयाश्चैवं मुखाभासाश्रया यथा॥ गम्यंते शास्त्रयुक्तिभ्यामित्याभासश्च वर्णितः॥ २६॥ बुद्ध्यवच्छिन्नकूटस्थो लोकांतरगमागमौ॥ कर्तुं शक्तो घटाकाशवदाभासेन किं वद॥ २७॥ ॥ ॥

योदर्पणादिश्चेति त्रयं यथा प्रत्यक्षेणावगम्यते एवमात्मा कूटस्थ आभासश्चाश्रयोंतःकरणादिरिति त्रयोपि शास्त्रयुक्तिभ्यामवगम्यंत इत्यर्थः॥ अत्र चाभासशब्देन कूटस्थातिरिक्तश्चिदाभासो वर्णित इति भावः॥ मनसः साक्षी बुद्धेः साक्षीति बुद्धिसाक्षिणः प्रतिपादकं शास्त्रं॥ रूपं रूपं प्रतिरूपो बभूवेति चिदाभासप्रतिपादकं॥ विकारित्वाविकारित्वादिरूपा युक्तिः पूर्वमेवोक्तेति भावः॥ २६॥ तत्राविदाभासमादीपाति॥ बुद्ध्यवच्छिन्नेति॥ स्वस्मिन्कल्प्यमानया बुद्ध्यावच्छिन्नः कूटस्थ एव घटद्वारा घटाकाश इव बुद्धिद्वारा लोकांतरे गमनागमने कर्तुं शक्नोति॥ अतश्चिदाभासकल्पना व्यर्थेति भावः॥ २७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

असंगस्य कूटस्थस्य बुद्ध्यवच्छेदमात्रेण जीवत्वं न घटते ऽन्यथाऽतिप्रसंगादिति परिहरति ॥ आभासे संगगति २८ बुद्धिकुड्ययोः स्वा
च्छ्यास्वाच्छ्याभ्यां वैषम्यं शंकते ॥ न कुड्येति ॥ उक्तं स्वच्छत्वं परिच्छेदप्रयोजकं न भवतीत्याह ॥ तथाऽप्यस्त्विति २९ उक्तमर्थं दृष्टान्तेन स्पष्टयति ॥
प्रस्थेनेति दारुकांस्यजन्ययोः प्रस्थयोः स्वच्छत्वास्वच्छत्वे तद्गतपरिमाणे न्यूनाधिकभावहेतू न भवत इत्यर्थः ३० कांस्यप्रस्थगतं उक्तपरिमाणा
धिक्याभावेऽपि प्रतिबिंबलक्षणमाधिक्यमस्तीत्याशंक्य तर्हि कुड्येऽपि चिदाभासो भवत्वेवेत्यंगीकारात् स्यादित्याह ॥ परिमाणेति ३१ प्रतिबिंबांगी

आभासे संगः परिच्छेदमात्राज्जीवो भवेन्न हि ॥ अन्यथा घटकुड्याद्यैरवच्छिन्नस्य जीवता २८ न कुड्यसदृशी बुद्धिः स्वच्छ
त्वादिति चेत्तथा ॥ अस्तु नाम परिच्छेदे किं स्वाच्छ्येन भवेत्तव २९ प्रस्थेन दारुजन्येन कांस्यजन्येन वा न हि ॥ विक्रेतुस्तंडु
लादीनां परिमाणं विशिष्यते ३० परिमाणाविशेषेऽपि प्रतिबिंबो विशिष्यते ॥ कांस्ये यदि तदा कुड्येऽप्याभासोऽभवेद्बुद्धिवदी
त् ३१ ईषद्भासनमाभासः प्रतिबिंबस्तथाविधः ॥ बिंबलक्षणहीनः सन्बिंबवद्भासते स हि ॥ ३२ ससंगत्वविकाराभ्यां
बिंबलक्षणहीनता ॥ स्फूर्तिरूपत्वमेतस्य बिंबवद्भासनं विदुः ॥ ३३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कारे चिदाभासः ॥ कथमंगीकृतः स्यादित्याशंक्य प्रतिबिंबाभासशब्दाभ्यामभिधेयस्यार्थस्यैक्यादित्याह ॥ ईषद्भासनेति ॥ प्रतिबिंबस्या
भासत्वं कथमित्याशंक्याभासलक्षणयोगादित्याह बिंबलक्षणेति ॥ हि यस्मात्कारणात् प्रतिबिंबो बिंबलक्षणरहितो बिंबवद्भासते ततो बिं
बाभास इति भावः ३२ आभासलक्षणयोगित्वमेव स्पष्टयति ससंगत्वेति ॥ एतस्य चिदाभासस्य ससंगत्वविकारित्वाभ्यां बिंबभूतोऽसं
गोऽविकारी चैतन्यलक्षणहीनत्वं स्फुरणरूपत्वं बिंबवदाभासनमित्यर्थः ॥ हेतुलक्षणराहित्ये हेतुवदवभासमाना हेत्वाभासा इतिवत्

रन्यां चिदाभासस्याप्रयोजकतां निराकृत्येदानीं तस्य बुद्धेः पृथक्सत्त्वं साधयितुं पूर्वपक्षमाह ॥ नहीति ॥ यथा मृदि सत्यामेव अन्वयो
न मृदोऽपि घटे तद्वदिति भावः ॥ नत्वेवं तर्हि देहातिरिक्ता धीरपि न सिद्ध्येदिति वंध्या परिहरति ॥ अल्पमिति ॥ २४ ॥ प्रतिवंदीमोचनं शंकते देहे
राति ॥ देहव्यतिरिक्ताया बुद्धेः सविज्ञानो भवतीत्यादिश्रुतिसिद्धत्वान्नाभासत्वमिति भावः ॥ ननु श्रुतिवलाद्देहातिरिक्ता बुद्धिरभ्युपगम्य
ते चेत्तर्हि प्रवेशश्रुतिवलाद्बुद्ध्यतिरिक्तश्चिदाभासोऽभ्युपेयस्त्वाह ॥ तथा सतीति ॥ २५ ॥ ननु बुद्ध्युपाधिकस्यैव प्रवेशो युज्यते नेत

नहि धीभावभावित्वादाभासोऽस्ति धियः पृथक् ॥ इति चेदल्पमेवोक्तं धीरप्येवं स्वदेहतः ॥ २४ ॥ देहे मृतेऽपि बु
द्धिश्चेच्छास्त्रादस्ति तथा सति ॥ बुद्धेरन्यश्चिदाभासः प्रवेशश्रुतिषूक्ततः ॥ २५ ॥ धीयुक्तस्य प्रवेशश्चेन्नैतरेये
धियः पृथक् ॥ आत्मा प्रवेशसंकल्पात्प्रविष्ट इति गीयते ॥ २६ ॥ कथं न्विदं साक्षदेहं मदृते स्यादितीरणात् ॥
विदार्य मूर्द्धसीमानं प्रविष्टः संसरत्ययं ॥ २७ ॥ ॥ ॥

रस्येति शंकते ॥ धीयुक्तस्येति ॥ ऐतरेये पश्रुतौ बुद्ध्यतिरिक्तस्यैव प्रवेशश्रवणान्नैवमिति परिहरति ॥ नैतरेय इति ॥ २६ ॥ तां श्रु
तिमर्थतः पठति कथमिति ॥ अयं परमात्मा साक्षदेहमक्षाणि च देहाश्चाक्षादिदेहास्तैः सह वर्त्तत इति साक्षदेहं इदं जडजातं मदृते चेत
तं मां विहाय कथं नु स्यात् नैतत्कथमपि निर्वहेदिति विचार्य मूर्द्धसीमानं कपालत्रयमध्यदेशं विदार्य स्वसंकल्पसिद्धिमार्गेणात्मा
प्रविष्टः सन् संसरति जाग्रदादिकमनुभवतीत्यर्थः ॥ २७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नुत्वसंगस्यात्मनः प्रवेशो युक्त इति शंकते ॥ कथमिति ॥ इदं चोद्यं सस्त्रावाधिसमानमित्याह ॥ स्रष्टुरिति ॥ स्रष्टृकर्तृ
मायिकत्वान्न दोष इत्याशंक्याथ परिहारः प्रवेशस्थितिसमान इत्याह ॥ मायिकत्वमिति ॥ अनयोर्मायिकत्वे हेतुमसम इत्याह ॥
विनाश इति ॥ ३८ ॥ प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति ॥ औपाधिकरूपस्याविना
शप्रतिपादिकां श्रुतिं दर्शयति ॥ समुत्थायैव इति ॥ एष प्रज्ञानघन आत्मा एतेभ्यो देहेन्द्रियादिरूपेभ्यः पंचभूतकार्येभ्यो निमि

कथं प्रविष्टोऽसंगस्तेन स्रष्टुर्वास्य कथं वद ॥ मायिकत्वं तयोरस्तु त्वं विनाशस्त्वसमस्तयोः ॥ ३८ ॥
समुत्थायैव भूतेभ्यस्तान्येवानुविनश्यति ॥ विसस्य दृष्टमिति मैत्रेय्यै याज्ञवल्क्य उवाच ह ॥ ३९ ॥
अविनाश्ययमात्मेति कूटस्थः प्रविवेचितः ॥ मात्रासंसर्ग इत्येवास्मै मसंगत्वस्य कीर्तनात् ॥ ४० ॥

त्तभूतेभ्य उपाधिभ्यः समुत्थाय जीवत्वाभिधानं प्राप्य तान्येव देहादीनि विनश्यंत्यनुविनश्यति तेषु विनश्यत्सु विनश्य
त्सु तत्स्थं जीवत्वाभिधानं जहातीति ॥ एवंप्रकारेणौपाधिकरूपस्याविनाशित्वं याज्ञवल्क्यो मैत्रेय्या उक्तवानित्यर्थः ॥ ३९ ॥ अविना
शी वा अरेऽयमात्मानुच्छित्तिधर्मा इति श्रुत्या कूटस्थस्ततो विभिन्नः प्रदर्शित इत्याह ॥ अविनाशीति ॥ मात्रासंसर्गस्त्वस्य भवती
ति श्रुत्याविनाशित्वे हेतुमसंगत्वं चोक्तवानित्याह ॥ मात्रासंसर्ग इति ॥ मीयंत इति मात्रा देहादयस्ताभिरस्यात्मनो संसर्गो भ
वतीत्यर्थः ॥ ४० ॥

ननु जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति श्रुत्यास्योपाधिकस्याप्यविनाशित्वं प्रतिपाद्यत इत्याशंक्य तस्याः श्रुतेर्देहांतर
प्राप्तिविषयतया नात्यंतिकनाशाभावपरत्वमित्याह॥ जीवपेतमिति॥ जीवापेतं जीवरहितं जीवेन त्यक्तमिति यावत् वाव एवं स जीवो न म्रि
यत इत्यर्थः ४१ ननु जीवस्याविनाशित्वे हं ब्रह्मास्मीत्यविनाशिब्रह्मतादात्म्यज्ञानं न घटत इति शंकते नाहं ब्रह्मेति बुध्येत इति॥ विनाशी स
जीवो हं ब्रह्मेति ब्रह्मरूपेणात्मानं न बुध्येत न जानीयात् विनाश्यविनाशिनोरेकत्वविरोधादिति चेन्मुख्यसामानाधिकरण्याभावेपि बा पां२
धायां सामानाधिकरण्यसंभवाज्जीवभावबाधेन ब्रह्मभावो वगंतुं शक्यत इत्याह न तदिति ४२ बाधासामानाधिकरण्येन वाक्यार्थप्र

जीवापेतं वाव किल शरीरं म्रियते न सः॥ इत्यत्र न विमोक्षोऽर्थः किंतु लोकांतरे गतिः॥ ४१॥ नाहं ब्रह्मेति बुध्येत
स्याविनाशीति चेत् न तत्॥ सामानाधिकरण्यस्य बाधायामपि संभवात्॥ ४२॥ योऽयं स्थाणुः पुमानेष पुंधिया
स्थाणुधीरिव॥ ब्रह्मास्मीति धिया शेषा ह्यहंबुद्धिर्निवर्त्यते॥ ४३॥ नैष्कर्म्यसिद्धावप्येवमाचार्यैः स्पष्ट
मीरितं॥ सामानाधिकरण्यस्य बाधार्थत्वं ततोऽस्तु तत्॥ ४४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तिपत्तिप्रकारो वार्त्तिककारैः सदृष्टांतोभिहित इतरतीममर्थं तद्वाक्योदाहरणपूर्वकं दर्शयति योयं स्थाणुरिति नैष्कर्म्येति स्थाणारे
रपुमानित्यस्मिन्वाक्ये पुरुषत्वबोधेन स्थाणुत्वबुद्धिर्निवर्त्यते यथा एवमहं ब्रह्मास्मीति बोधेनाहंबुद्धिः कर्त्राहमस्मीत्येवमादिरूपा
सर्वाधिनिवर्त्यत इति एवमुक्तेन प्रकारेणाचार्यैर्वार्त्तिककारैर्नैष्कर्म्यसिद्धौ सामानाधिकरण्यस्य बाधार्थत्वं स्पष्टमीरितमिति फलि
तमाह ततोस्तु तदिति॥ ततः कारणाद् ब्रह्माहमस्मीति वाक्ये तत्सामानाधिकरण्यस्य बाधार्थत्वमास्त्वित्यर्थः॥ ॥४४॥

नन्वेवमपि श्रुतिषु बाधायां सामानाधिकरण्यं न स्यादिति दृष्टमित्याशंक्य सर्वं ह्येतद्ब्रह्मेत्यत्र बाधायां सामानाधिकरण्यं दृष्टमतो ज्ञापि
तद्वृत्तिष्यतीत्याह ॥ सर्वं ब्रह्मेति ॥ ४५ ॥ ननु तर्हि विवरणाचार्यैर्बाधायां सामानाधिकरण्यं कुतो निरास्तमित्याशंक्य तेरहं शब्देन कूटस्थस्य
विवक्षितत्वादित्याह ॥ सामानाधिकरण्यस्येति ॥ ४६ ॥ कूटस्थत्वविवक्षयेत्युक्तमर्थं विवृणोति ॥ शोधितस्त्वमिति ॥ शोधितो नु देहाद्यादि
भ्यो विवेचितस्त्वंपदलक्ष्योर्थः ॥ कूटस्थो वक्ष्यमाणसत्यब्रह्मरूपतामसत्यादिलक्षणब्रह्मरूपतां वक्तुं विवरणादिषु बाधासामाना

सर्वं ब्रह्मेति जगता सामानाधिकरण्यवत् ॥ अहं ब्रह्मेति जीवेन सामानाधिकृतिर्न बेत् ॥ ४५ ॥ सामानाधिकरण्य
स्य बाधार्थत्वं निराकृतं ॥ प्रयत्नतो विवरणे कूटस्थत्वविवक्षया ॥ ४६ ॥ शोधितस्त्वंपदार्थो यः कूटस्थो ब्रह्मरूप
तां ॥ तस्य वक्तुं विवरणे तथोक्तामितरत्र च ॥ ४७ ॥ देहेंद्रियादियुक्तस्य जीवाभासभ्रमस्य या ॥ अधिष्ठानचितिः सैषा
कूटस्थात्र विवक्षिता ॥ ४८ ॥ जगद्भ्रमस्य सर्वस्य यदधिष्ठानमीरितं ॥ त्रय्यंतेषु तदत्र स्याद्ब्रह्मशब्दविवक्षितं ॥ ४९ ॥

धिकरण्यनिराकरणपूर्वकममुख्यसामानाधिकरण्यमुक्तमित्यर्थः ॥ ४७ ॥ इदानीं कूटस्थस्य ब्रह्मणो क्यं संभावयितुं कूटस्थश
ब्देन विवक्षितमर्थमाह ॥ देहेंद्रियादीति ॥ आदिशब्देन मनआदयो गृह्यंते एवं च देहेंद्रियादियुक्तस्य शरीरद्वयसहितस्य जीवाभासभ्र
मस्यादं चिदाभासरूपभ्रमस्य याधिष्ठानचितिर्यदधिष्ठानचैतन्यमस्ति तदत्र वेदांतेषु कूटस्थत्वेन विवक्षितमित्यर्थः ॥ ४८ ॥ ब्रह्म
शब्दस्यार्थमाह ॥ जगद्भ्रमस्येति ॥ कृत्स्नजगत्कल्पनाधिष्ठानं यच्चैतन्यं वेदांतेषु निरूपितं तदत्र ब्रह्मशब्देन विवक्षितमित्यर्थः ॥ ४९ ॥

ननु जीवब्रह्माधिष्ठानं चैतन्यं कूटस्थ इत्युक्तमनुपपन्नं जीवस्यारोपितत्वासिद्धेरित्याशंक्य तस्यारोपितत्वं कैमुतिकन्यायेन साध
यति एतस्मिन्निति जगदेकदेशत्वं च ज्ञानेन जीवेनानुप्रविश्येत्यादिश्रुतिसिद्धं ५० ननु जगदधिष्ठानचैतन्यस्यैकत्वात्तत्त्वंपदार्थभेदा
भावे तत्त्वंपदार्थयोः ऐक्यं न स्यादित्याशंक्य तयोरौपाधिको भेदो वास्तवमैक्यमित्याह जगदिति तदेकदेश इति चाख्या यस्य समारोप्यस्य तत्त
ज्ञाता थाविकवचनं ५१ ननु चिदाभासस्य शुक्तिकारजतादिवदध्यासान्नारोप्यत्वं धर्मद्वयानुपलम्भान्नालक्ष्यमारोपितत्वमित्याशंक्याह क

एतस्मिन्नेव चैतन्ये जगदारोप्यते यदा ॥ तदा तदेकदेशस्य जीवाभासस्य का कथा ॥५०॥ जगत्तदेकदे
शाख्यसमारोप्यस्य भेदतः ॥ तत्त्वंपदार्थौ भिन्नौ स्तो वस्तुतस्त्वेकता चितः ॥५१॥ कर्तृत्वादीन्बुद्धिधर्मा
न्स्फूर्त्याख्यां चात्मरूपतां ॥ दधद्विभाति पुरत आभासोऽतो भ्रमो भवेत् ॥५२॥ का बुद्धिः कोऽयमाभा
सः को वात्मात्र जगत्कथं ॥ इत्यनिर्णयतो मोहः सोऽयं संसार उच्यते ॥५३॥ बुद्ध्यादीनां स्वरूपं यो वि
विनक्ति स तत्त्ववित् ॥ स एव मुक्त इत्येवं वेदान्तेषु विनिश्चयः ॥५४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कर्तृत्वादीनिति बुद्ध्युपाधिद्वारा समारोप्यमाणान्कर्तृत्वभोक्तृत्वप्रमातृत्वादीन्स्फुरणलक्षणमात्मरूपत्वं च दधत्पुरतो भाति स्वस्वरूपप्रति
भासते तस्माभासः कल्पित इत्यर्थः ५२ भ्रमस्य भ्रमस्य किं कारणमित्याकांक्षायां बुद्ध्यादिस्वरूपापरिज्ञानमेवेत्याह का बुद्धिरिति तस्यैनि
वर्तनीयत्वायानर्थहेतुतामाह सोऽयमिति ५३ भ्रमस्य किं निवर्तकमित्याकांक्षायां बुद्ध्यादीनां स्वरूपविवेकज्ञानं निवर्तकमित्यभि
प्रेत्य तद्वान्नेव जानीत तद्वचनं चान्यन्निर्व्यक्तिरित्याह बुद्ध्यादीनामिति ५४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एवं बंधमोक्षयोरविवेकमूलत्वे सत्यद्वैतवदेकस्य बंधः कस्य वा मोक्ष इत्येवमादिरूपास्तार्किकैः क्रियमाणाः कुतर्कमंत्राः प
रिहासा विशेषखंडनोक्तयुक्तिभिस्तैः खंडितैः स्तत्तरत्वापादनेन परिहरणीया इत्याह द्वैतिनी ---- ॥ एवमिति ॥५५॥ एवं श्रुतियु
क्तिभ्यां स्फुटस्वयं बुद्ध्यादिभ्यो विविच्य दर्शयित्वा पुराणोक्षपि तद्विवेकः सूचित इत्याह ॥ व्यक्तेः सन्निहितयेत्यादिना कामादिव्यक्तयुत्पत्तौ सत्वांत
त्साक्षित्वेन व्यक्त्युदयात्पूर्वं तत्प्रागभावसाक्षित्वेन च जिज्ञासापयासत्वात तत्साक्षित्वेन ततः पूर्वमहोऽस्मीत्यनुभूयमानाज्ञानसाक्षित्वेन चापि श
व एव तिष्ठति ॥ सच्चासत्यस्य जगतश्चात्मगगनत्वेनाधिष्ठानत्वेन सत्यः ॥ जडस्य सर्वस्य साधकत्वेनावभासकत्वेनाचिद्रूपः सर्वदा प्रेमविष

एवं सति तु बंधः स्यात्कस्येत्यादिकुतर्कजाः ॥ विडंबना दृढं खंड्याः खंडनोक्तिप्रकारतः ॥५५॥ व्यक्तेः साक्षित
या व्यक्तिप्रागभावस्य चास्थितः ॥ कुतुत्पापास्तथाज्ञोऽस्मीत्याभासाज्ञानवस्तुनः ॥५६॥ असत्यालंबनत्वेन सत्यः
सर्वजडस्य तु ॥ साधकत्वेन चिद्रूपः सदा प्रेमास्पदत्वतः ॥५७॥ आनंदरूपः सर्वार्थसाधकत्वेन हेतुना ॥ सर्वसं
बंधवत्वेन संपूर्णः शिवसंज्ञितः ॥५८॥ ॥ ॥

यत्वात् आनंदरूपः ॥५६॥५७॥ आनंदरूप इति ॥ सर्वार्थावभासकत्वे सर्वसंबंधित्वात्संपूर्ण इत्युच्यते ॥ अत्र चेदमभिप्रेतं विमतः ॥ शिवो व्यत्या
५५२ दिभ्यो भिद्यते व्यक्त्यादिसाक्षित्वात् घटघटद्रष्टृवत् ॥ यद्यदिभ्यो न भिद्यते तत्तद्व्यक्त्यादिसाक्षि न भवति यथा व्यक्त्यादि ॥ विमतः सत्यो भवितुमर्हति ॥ अ
ध्याधिष्ठानत्वात् असत्यरजताधिष्ठानशुक्तिवत् ॥ विमतश्चिद्रूपो जडमात्रावभासकत्वात् यच्चिद्रूपं न भवति तत्सर्वजडावभासकमपि न भवति
यथा घटादिः ॥ विमतः परमानंदरूपः परप्रेमास्पदत्वात् यत्परमानंदरूपं न भवति तत्परप्रेमास्पदमपि न भवति ॥ यथा घटादिः ॥ विमतः परिपूर्णः
सर्वसंबंधित्वात् गगनवत् ॥ सर्वसंबंधित्वं च सर्वार्थसाधकत्वेन विमतः सर्वसंबंधवान् सर्वावभासकत्वात् यः सर्वसंबंधवान् न भवति स सर्वावभास

[illegible]

उदाहृतपुराणवाक्यस्य तात्पर्यमाह । इति शैवपुराणेष्विति । इत्येवंप्रकारेण सूतसंहितादिषु पुराणेषु जीवेश्वरत्वादिकल्पना
रहितः केवलोऽद्वितीयः स्वप्रभः स्वयंप्रकाशश्चैतन्यरूपः शिवः कूटस्थो विवेचित इत्यर्थः ॥ ५८ जीवेश्वरत्वादिराहित्यं कुत इत्याशंक्य
श्रुत्या तयोर्मायिकत्वप्रदर्शनादित्याह । मायाभासेनेति जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिर्मायाविद्याधीन

इति शैवपुराणेषु कूटस्थः प्रविवेचितः । जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः ॥ ५८ ॥ माया
भासेन जीवेशौ करोतीति श्रुतत्वतः । मायिकावेव जीवेशौ स्वच्छौ तौ काचकुम्भवत् ॥ ६० ॥ अन्नज
न्यं मनो देहात्स्वच्छं यद्वत्तथैव तौ । मायिकावपि सर्वस्मादन्यस्मात्स्वच्छतां गतौ ॥ ६१ ॥ ॥

योश्चिदाभासयोर्मायिकत्वं प्रतिपादयतीति भावः ॥ मायिकत्वे तयोर्देहादिभ्यो वैलक्षण्यं न स्यादित्याशंक्य पार्थिवत्वाविशेषेऽपि का
चकुम्भस्य घटादिभ्यो वैलक्षण्यमिवानयोरपि स्यादित्याह ॥ स्वच्छाविति ॥ ६० ॥ ननु घटकाचकुम्भारम्भकयोर्मृद्विशेषयोर्भेदात्तद्वैल
क्षण्यमुचितं जगज्जीवेश्वरभेदहेतोर्मायाया एकत्वात्तयोर्जगतो वैलक्षण्यमनुचितमित्याशंक्यान्नजन्ययोर्देहमनसोर्यथा वैल
क्षण्यं तद्वदित्याह ॥ अन्नजन्यमिति ॥ ६१ ॥

भवतु कार्यादिवत्सदृश्यत्वं चिन्त्यत्वं तु कुत इत्याशंक्यानुभवादित्याह॥ चिद्रूपत्वमिति॥ चित्त्वेन प्रकाशनमपि मायिकयोरनुपपन्नमित्या
शंक्य तस्या दुर्घटकारित्वादुपपन्नमित्याह सर्वकल्पनेति॥ ६२॥ उक्तमर्थं कैमुतिकन्यायेन द्रढयति अस्मिन्निति॥ ईश्वरस्यापि मायिक
त्वे तस्य जीववत्सर्वज्ञत्वादिकं स्यादित्याशंक्य सर्वज्ञत्वादिकमपि माया कल्पयिष्यतीत्याह सर्वज्ञत्वेति॥ तत्रोपपत्तिमाह धर्मिणमि
ति॥ ६४॥ ननु जीवेशयोरिव कूटस्थस्यापि मायिकत्वं प्रसज्येतेत्याशंक्य कूटस्थेऽपीति प्रमाणाभावान्नैवमिति परिहरति मातिशं

चिद्रूपत्वं च संभाव्यं चित्त्वेनैव प्रकाशनात्॥ सर्वकल्पनशक्ताया मायाया दुःशकं न हि॥ ६२॥ अस्मि
त्रे न्निद्रापि जीवेशौ चेतनौ स्वप्नगौ सृजेत्॥ महामाया सृजत्येताविति आश्चर्यं किमत्र ते॥ ६३॥ सर्वज्ञत्वादिके
चेशे कल्पयित्वा दर्शयेत्॥ धर्मिणं कल्पयेद्यास्याः को भारो धर्मकल्पने॥ ६४॥ कूटस्थेऽप्यतिशंका
स्यादिति चेन्मातिशंक्यतां॥ कूटस्थमायिकत्वे तु प्रमाणं न हि विद्यते॥ ६५॥ वस्तुत्वं घोषयन्त्यस्य वेदा
न्ताः सकला अपि॥ सपत्नरूपं वस्त्वन्यन्न सहन्तेऽत्र किंचन॥ ६६॥ श्रुत्यर्थं विशदीकुर्मो न तर्काद्वच्मि
किंचन॥ तेन तार्किकशंकानामत्र कोऽवसरो वद॥ ६७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

क्यतामिति॥ ६५॥ कूटस्थस्य वास्तवत्वेऽपि प्रमाणं नोपलभ्यत इत्याशंक्य श्रुतयः सर्वा अपि प्रमाणमित्याह॥ वस्तुत्वं घोषयन्तीति
अत्र कूटस्थस्य पारमार्थिकत्वे प्रतिपक्षभूतमन्यद्वस्तु किंचन न सहन्त इत्यर्थः॥ ६६॥ ननु कूटस्थस्य जीवेशयोश्चावास्तवत्वं वास्त
वत्वसाधने श्रुतेर्यत्नं वयं कुर्वन्ते॥ न तर्कैः किंचिदपि साध्यत इत्याशंक्य मुमुक्षूणां श्रुत्यर्थविशदीकरणाय प्रवृत्तत्वान्न तर्कोऽपेक्षित इत्याह॥ श्रुत्यर्थ
मिति॥ ६७॥

ततः किमित्यत आह॥ तस्मादिति मुमुक्षुणा इत्यर्थः कीदृशीं तु संधेयरत्यत आह॥ श्रुतावित्यादि॥ श्रुतिषु जीवेशयोर्मायिकत्वमी-
क्षणादिप्रवेशान्तायाः सृष्टेरीश्वरकर्तृकत्वं॥ जाग्रत्स्वप्नसुषुप्तिबंधमोक्षणस्य संसारस्य जीवकर्तृकत्वं॥ कूटस्थस्यासंगत्वादिकम्॥ श्रु-
तिजन्मादिलक्षणस्य व्यवहारजातस्यासत्यत्वं च प्रतिपादितं॥ अतो मुमुक्षुरिममर्थं सर्वदा विचारयेदित्यभिप्रायः॥ ६८ ६९ ७०॥

तस्मात्कुतर्कं संत्यज्य मुमुक्षुः श्रुतिमाश्रयेत्॥ श्रुतौ तु मायाजीवेशौ करोतीति प्रदर्शितं॥ ६८॥ ईक्षणादि
प्रवेशान्ता सृष्टिरीशकृता भवेत्॥ जाग्रदादिविमोक्षान्तः संसारो जीवकर्तृकः॥ ६९॥ असंगत्वकूटस्थः स
र्वदा नास्य कश्चन॥ भवत्यतिशयस्तेन मनस्येवं विचार्यतां॥ ७०॥ न निरोधो न चोत्पत्तिर्न बद्धो न च सा
धकः॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ ७१॥ अवाङ्मनसगम्यं तं श्रुतिर्बोधयितुं सदा॥ जीव
मीशं जगद्वापि समाश्रित्य प्रबोधयेत्॥ ७२॥ यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि॥ सा सैव प्रक्रि

टस्थस्य जन्मातिशयाभावः कुतोऽवगम्यत इत्याशंक्य श्रुतिवाक्यादित्यभिप्रेत्य तद्वाक्यं पठति ७१ ननु तर्हि श्रुतिषु तत्र तत्र जीवे
श्वरादिस्वरूपप्रतिपादनं किमर्थमित्याशंक्यावाङ्मनसगोचरस्यात्मनोऽवबोधनायेत्याह॥ अवाङ्मनसेति ७२ ननु तत्तस्यै
करूपस्य श्रुतिबोधत्वे श्रुतिषु विगानं कुतो दृश्यत इत्याशंक्य न तत्र विगानमस्ति प्रतिपत्तृतद्बोधनप्रकारे तदपि बोध्यपुरु
षचित्तवैषम्यानुसारेण सुरेश्वराचार्यैरुक्तमित्याह॥ ययायेति ७३

ताडि

श्रुत्यर्थस्यैकरूपत्वे तत्प्रतिपादकानामेव कुतो विप्रतिपत्तिरित्याशंक्याह श्रुतितात्पर्यबोधरहितानामेव विप्रतिपत्तिर्न तु तद्विदामित्याह
श्रुतितात्पर्यमिति ७४ तर्हि विवेकिनां निश्चयः कीदृश इत्याकांक्षायामाह मायामेघ इति ७५ ग्रंथाभ्यासफलमाह इममिति ७६ ॥ इ
ति श्रीमत्परमहंसपरिव्राजकाचार्यभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचिता कूटस्थदीपव्याख्या
समाप्ता ॥ ॥ ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियते ध्यानदीपस्य व्याख्या संक्षेपतो मया १ इह तावद्वेदांतशास्त्रेऽनि
त्यानित्यवस्तुविवेकादिसाधनचतुष्टयसंपन्नस्य सम्यक् श्रवणमनननिदिध्यासनानुष्ठानवतस्तत्त्वपदार्थविवेचनपूर्वकं महावाक्यार्थ

श्रुतितात्पर्यमखिलमबुद्ध्वा भ्राम्यते जडः ॥ विवेकी त्वखिलं बुद्ध्वा तिष्ठत्यानंदवारिधौ ॥ ७४ ॥ मायामेघो
जगन्नीरं वर्षत्वेष यथा तथा ॥ चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः ॥ ७५ ॥ इमं कूटस्थदीपं योऽनुसं ८२
धत्ते निरंतरं ॥ स्वयं कूटस्थरूपेण दीप्यते सो निरंतरं ॥ ७६ ॥ इति श्रीविद्यारण्यविरचितः कूटस्थ
दीपः समाप्तः ॥ ॥ संवादिभ्रमवद्ब्रह्मतत्त्वोपास्त्यापि मुच्यते उत्तरे तापनीयेऽतः श्रुतोपास्तिरनेकधा १

परोक्षज्ञानेन ब्रह्मभावलक्षणो मोक्षो भवतीति प्रतिपादितं तत्र श्रुतोपनिषत्कस्यापि बुद्धिमांद्यादिना केनचित्प्रतिबंधेन वाक्यार्थविषयाप
रोक्षप्रतीत्यनुत्पन्नौ सत्यां तदुपास्त्यादिना द्वारा मोक्षफलकोपासनानि निदिदर्शयिषुरादौ तावत्सदृष्टांतं ब्रह्मतत्त्वोपासनयापि मोक्षो भवतीति प्रति
जानीते संवादीति यथा संवादिभ्रमेण प्रवृत्तस्यापि प्रेतार्थलाभो भवति एवं ब्रह्मतत्त्वोपासनयाप्यविलंबितब्रह्मभावलक्षणो मोक्षो भवतीत्य
र्थः तत्र किं प्रमाणमित्यत आह उत्तरे इति यत उपासनयापि मोक्षोऽस्ति अत उत्तरतापनीयोपनिषद्यनेकप्रकारेण ब्रह्मतत्त्वोपासनाऽऽम्नातेत्यर्थः १

प्र २

अथ त्वर्थक्रियायां संवादित्वमविसंवादित्वमुक्तं दृष्टान्तं प्रपंचयितुं संवादित्वमप्रतिपादकं वार्त्तिकं पठति मणिप्रदीपेति मणिप्रदीपप्रभामणि
प्रदीपौ तयोः प्रभे मणिप्रदीपप्रभे तयोरिति विग्रहः मणिप्रभायां दीपप्रभायां च मणिबुद्धिः स्यान्मिथ्याज्ञानमेवातास्मिंस्तु बुद्धित्वादथापि म
णिप्रभायां मणिबुद्ध्याभिधावतः पुरुषस्य मणिलाभो न वा इतरस्य तु नास्तीत्यर्थक्रियायां विशेष इत्यर्थः २ वार्त्तिकं व्याचष्टे दीपोपवरक
२ २॥ स्यान्तरित्यादिना ... दीपो ... ति कस्मिंश्चिन्मन्दिरे अपवरकस्यान्तर्दीपास्तिष्ठति तस्य प्रभा बहिर्द्वारप्रदेशे रत्नमिव वर्तुलोपलभ्यते

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः । मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति २ दीपोऽपवरकस्यान्तर्वर्त्तते
तत्प्रभा बहिः । दृश्यते द्वार्यथान्यत्र तद्वद्दृष्टा मणेः प्रभा ३ दूरे प्रभाद्वयं दृष्ट्वा मणिबुद्ध्याभिधावतोः ।
प्रभायां मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि ४ न लभ्यते मणिर्दीपप्रभां प्रत्यभिधावता प्रभायां धावता
ऽवश्यं लभ्यतैव मणिर्मणेः ५

तथान्यस्मिन्मन्दिरेऽपवरकस्यान्तः स्थितस्य प्रभा बहिर्द्वारप्रदेशे दीपप्रभेव रत्नसमाना उपलभ्यते ३ तथाविधं प्रभाद्वयं दूरतो दृष्ट्वा
यं मणिरिति बुद्ध्या द्वौ पुरुषावभिधावनं कुरुतस्तयोरपि प्रभाविषये जायमानं मणिज्ञानं भ्रान्तिरेव ४ यथापि दीपप्रभायां मणिबुद्धिं
कृत्वा धावता पुरुषेण मणिर्न लभ्यते मणेः प्रभायां मणिबुद्ध्या धावता मणिर्लभ्यतैव ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

२

न वत्वेवं वार्त्तिकार्थः प्रस्तौति किं मा यातमित्यत आह । दीपप्रभेति यादीपप्रभायां मणिभ्रान्तिरस्ति सा विसंवादिभ्रमः स्मृ
तो विद्वद्भिर्मणिबुद्धिर्मणित्वेनाभावाद्दीपप्रभायां मणिबुद्धिरर्थक्रियारहितत्वात् मणिप्रभायां मणिबुद्धिस्तु मणित्वेनाभावादर्थक्रियावत्वात्संवादिभ्रम इत्यु
च्यत इत्यर्थः ६ एवं प्रत्यक्षविषये संवादिभ्रमं दर्शयित्वानुमानविषयेपि तं दर्शयति वाष्पमिति क्वचित्प्रदेशे स्थितं धूम
त्वेनातिभ्रान्त्य तन्मूलकप्रदेशे यं प्रदेशमानं धूमवत्वात् इत्यनुमायप्रवृत्तेन पुरुषेण दैवगत्या पश्चाद्गिरिस्तत्रोपलभ्यते तत दावा

दीपप्रभामणिभ्रान्तिर्विसंवादिभ्रमः स्मृतः ॥ मणिप्रभामणिभ्रान्तिः संवादिभ्रम उच्यते ॥ ६ ॥ बाष्पं
धूमतया बुद्ध्वा तत्रांगारानुमानतः ॥ वह्निर्यदृच्छया लब्धः स संवादिभ्रमो मतः ॥ ७ ॥ गोदावर्यु
दकं गंगोदकं मत्वा विशुद्धये ॥ संप्रोक्ष्य शुद्धिमाप्नोति स संवादिभ्रमो मतः ॥ ८ ॥ ज्वरेणाप्तः संनि
पातं भ्रान्त्या नारायणं स्मरन् ॥ मृतः स्वर्गमवाप्नोति स संवादिभ्रमो मतः ॥ ९ ॥

ष्याविषयं स्मरज्ञानं संवादिभ्रमो मतः ॥ ७ ॥ आगमविषयेपि तं दर्शयति ॥ गोदावरीति गोदावर्युदकस्यापि विशुद्धिहेतुत्वमाग
मसिद्धमतस्तन्त्योदाणदापि शुद्धिरस्त्येव यथापि गोदावर्युदके या गंगोदकबुद्धिः सा भ्रान्तिरेव ॥ ८ ॥ उदाहरणान्तरमाह ॥ ज्व
रेण मरणाति ज्वरेण संनिपातं प्राप्तः पुरुषः रदं नारायणस्मरणं मम स्वर्गसाधकमिति ज्ञानं मतरेणापि संनिपातप्रयुक्तभ्रम
वशात्साधारणपुरुषतयावेद्यादिवन्नारायणं स्मरन्मृतः स्वर्गं प्राप्नोत्येव हरिर्हरति दुष्टचित्तैरपि स्मृतः ॥ विष्णुश्च पुत्रमथ

पापानि ॥

दी॰

एवं त्रिविधं संवादिभ्रमोदाहृतोनस्मिन्नर्थमाह ॥ प्रत्यक्षस्यानुमानस्येति ॥१०॥ विशेषवाध्यं प्रदर्शनेनोक्तमर्थं दृढयति ॥
अन्यथेति ॥ अन्यथा संवादिभ्रमाभावे मृदादयः फलसिद्धये देवतात्वेन परिध्यानमवेयुः अतो देवतात्वाभावादित्यर्थः ॥ बाध
कांतरमाह ॥ अग्नित्वादीति ॥ पंचाग्निविद्यायां योषा वाव गौतमाग्निः पुरुषो वाव गौतमाग्निः पर्जन्यो वाव गौतमाग्निरसौ वा
व द्युलोको गौतमाग्निरित्यादिवाक्यैर्योषित्पुरुषपार्थिवपर्जन्यद्युलोकानामग्नित्वेनोपासनं ब्रह्मलोकावाप्तिफलकं न स्या
टी॰२ देवेत्यर्थः ॥ आदिशब्देन मनो ब्रह्मेत्युपासीत आदित्यो ब्रह्मेत्यादेशः इत्येवमादयो गृह्यन्ते ॥११॥ एतानि व दृष्टांतरूप
पादितं संवादिभ्रमं बुद्धिस्थं कर्तुं संक्षिप्य दर्शयति ॥ अयथेति ॥ विहितादविहिताद्वा यस्मादयथावस्तुविज्ञानाद्विपरीतज्ञाना

प्रत्यक्षस्यानुमानस्य तथा शास्त्रस्य गोचरं ॥ उक्तन्यायेन संवादिभ्रमाः संति हि कोटिशः ॥१०॥ अ
न्यथा मृत्तिकादारुशिलाः स्युर्देवताः कथं ॥ अग्नित्वादिधियोपास्याः कथं वा योषिदादयः ॥११॥ अ
यथावस्तुविज्ञानात्फलं लभ्यत ईप्सितं ॥ काकतालीयतः सोयं संवादिभ्रम उच्यते ॥१२॥ स्वयं भ्र
मोपि संवादी यथा सम्यक्फलप्रदः ॥ ब्रह्मतत्त्वोपासनापि तथा मुक्तिफलप्रदा ॥१३॥ वेदांतेभ्यो ब्र
ह्मतत्त्वमखंडैकरसात्मकं ॥ परोक्षमवगम्यैतदहमस्मीत्युपासते ॥१४॥

दीप्सितं मनिलषितं फलं काकतालीयतो दैवगत्या लभ्यते सोयं संवादिभ्रम इत्यर्थः ॥१२॥ ननु ब्रह्मोपासनस्यायथावस्तुविषय
स्य कथं सम्यग्ज्ञानसाध्यमुक्तिफलप्रदत्वमित्याशंक्य संवादिभ्रमदेवेत्याह ॥ स्वयमिति ॥१३॥ ननु ब्रह्मतत्त्वं ज्ञात्वोपासनं क्रिय
तें ज्ञात्वा वा अज्ञात्वा उपासनावैयर्थ्यं मोक्षसाधनज्ञानस्यैव विद्यमानत्वात् ॥ द्वितीये विषयापरिज्ञानादुपास[...]व न घटत इत्या
शंक्याह ॥ वेदांतेभ्य इति ॥ अयमभिप्रायः ॥ ब्रह्मतत्त्वं कत्वापरोक्षज्ञानस्य मोक्षसाधनस्यानुत्पन्नत्वेनोपासनावैयर्थ्यं ॥ शास्त्रात्परो

उपास्यब्रह्मतत्त्वगोचरस्य परोक्षज्ञानस्य किं रूपमित्याकांक्षायामाह । प्रत्यगिति । प्रत्यग्व्यक्तिं बुद्ध्यादिसाक्षिणमात्मानमनुल्लिख्याप्रवि
षयीकृत्य शास्त्रात् सत्यज्ञानादिवाक्यजातात् ब्रह्मास्तीति एवं सामान्याकारेण ज्ञायमानं ज्ञानमत्रास्यामुपासनायां परोक्षधीः । परोक्षज्ञानं भव
तीत्यर्थः । तत्र दृष्टान्तः । विष्ण्वादिमूर्तिवदिति । विष्ण्वादिमूर्तिप्रतिपादकशास्त्रजन्यज्ञानवदित्यर्थः ॥ १५ ॥ ननु शास्त्रेण विष्ण्वादिमू
र्तेश्चतुर्भुजत्वादिविशेषप्रतीतेः तस्यापि कुतः परोक्षत्वमित्याशंक्याह । चतुर्भुजाद्यवगतावपीति । शास्त्रेण चतुर्भुजत्वादिविशेषप्रतीता
प्र२४ वपि चक्षुरादिभिर्विष्ण्वादिमूर्तिविषयीकुर्वन् पुरुषः परोक्षज्ञान्येव तत्रोपपत्तिमाह । न तदेति । तदोपासनाकाले विष्णुमुपास्यं नेक्षते

प्रत्यग्व्यक्तिमनुल्लिख्य शास्त्राद्विष्ण्वादिमूर्तिवत् । अस्ति ब्रह्मेति सामान्यज्ञानमत्र परोक्षधीः ॥ १५ ॥
चतुर्भुजाद्यवगतावपि मूर्तिमनुल्लिखन् । अक्षैः परोक्षज्ञान्येव न तदा विष्णुमीक्षते ॥ १६ ॥ परो
क्षत्वापराधेन भवेन्नातत्त्ववेदनं । प्रमाणेनैव शास्त्रेण सत्यमूर्तेर्विभासनात् ॥ १७ ॥ सच्चिदानं
दरूपस्य शास्त्राज्ज्ञानेप्यनुल्लिखन् । प्रत्यञ्चं साक्षिणं तच्च ब्रह्म साक्षान्न वीक्षते ॥ १८ ॥

नेन्द्रियैर्विषयीकरोतीत्यर्थः ॥ १६ ॥ ननु विष्ण्वादिगोचरस्य ज्ञानस्य व्यक्तिगोचरत्वाभावाद्भ्रमत्वमित्याशंक्य प्रमाणेन जनितत्वान्न
भ्रमत्वमित्याह । परोक्षत्वेति । परोक्षज्ञानत्वं भ्रांतिज्ञानत्वे कारणं न भवति किंतु विषयासत्यत्वं । इह तु प्रमाणभूतेन शास्त्रेणैव यथा
र्थभूताया विष्ण्वादिमूर्तेरवभासनान्नास्य भ्रमत्वमित्यर्थः ॥ १७ ॥ ननु सच्चिदानंदव्यक्त्युल्लेखिनो ब्रह्मतत्त्वज्ञानस्य शास्त्रजन्यस्यापि कुतः
परोक्षतेत्याशंक्य परोक्षत्वप्रयोजकं प्रत्यक्त्वानुल्लेखित्वमेवेत्याह । सच्चिदानंदेति । सत्यं ज्ञानमनंतं ब्रह्म नित्यः शुद्धो बुद्ध ॥ सत्यामनुल्लेखो

कथं तर्हि तथाविधब्रह्मगोचरस्य तत्त्वज्ञानत्वमित्याशंक्यागमप्रमाणजन्यत्वादित्याह ॥ शास्त्रोक्तेनेति तस्मान्नं परोक्षमपि शास्त्रोक्ते-
नैव प्रकारेण ब्रह्मणः सच्चिदानंदरूपत्वनिश्चायकत्वात्सम्यग्ज्ञानमेव न भ्रम इत्यर्थः ॥१९॥ ननु सत्यज्ञानादिवाक्यैर्ब्रह्मणः सच्चिदानं-
दरूपत्वमिव तत्त्वमस्यादिवाक्यैः प्रत्यग्रूपत्वमपि तस्य बोध्यत एवातः शास्त्रजन्यस्यापि ज्ञानस्य प्रत्यग्व्यक्तिविषयत्वादपरोक्षत्वमे-
वेत्याशंक्याह ॥ ब्रह्म यद्यपीति ॥ यद्यपि वेदांतेषु महावाक्यैर्ब्रह्म प्रत्यगात्मत्वेनैवोपदिष्टं न तावतैव तत्प्रत्यग्रूपत्वमनुभवव्यतिरेको

शास्त्रोक्तेनैव मार्गेण सच्चिदानंदनिर्णयात् ॥ परोक्षमपि तज्ज्ञानं तत्त्वज्ञानं
न तु भ्रमः ॥१९॥ ब्रह्म यद्यपि शास्त्रेषु प्रत्यक्त्वेनैव वर्णितं ॥ महावाक्यैस्तथाप्येतद्
दुर्बोधमविचारिणः ॥२०॥ देहाद्यात्मत्वविभ्रांतौ जाग्रत्यां न हठात्पुमान् ॥ ब्रह्मा-
त्मत्वेन विज्ञातुं क्षमते मंदधीस्ततः ॥२१॥

स्यात्तत्त्वपदार्थविवेकशून्यस्य दुर्बोधं बोद्धुमशक्यमतः केवलाद्वाक्यान्नापरोक्षज्ञानमुत्पद्यत इत्यर्थः ॥२०॥ ननु सम्यग्ज्ञा-
नस्य प्रमाणवस्तुपरतंत्रत्वात्प्रमाणस्य च तत्त्वमस्यादिवाक्यरूपस्य सद्भावाद्वस्तुनश्च ब्रह्मात्मैकत्वलक्षणस्याविद्यमानत्वात्कुतो
विचारमंतरेण दुर्बोधत्वमित्याशंक्याह ॥ देहादाविति ॥ ब्रह्मात्मैकत्वापरोक्षज्ञानविरोधिनो देहेंद्रियादिष्वात्मत्वभ्रमस्याविचार-

ननु तर्हि देहेन्द्रियादिगोचरस्य द्वैतभ्रमस्य सद्भावादद्वितीयब्रह्मगोचरं परोक्षज्ञानमपि नोदीयादित्याशंक्यापरोक्षद्वैतभ्रमस्य परोक्षाद्वैतज्ञानाविरोधित्वाच्छ्रद्धावतः ॥ पुंसः शास्त्रात्परोक्षज्ञानमुत्पद्यत एवेत्याह ॥ ब्रह्ममात्रमिति अपरोक्षद्वैतबुद्धिर्यतः परोक्षाद्वैतबुद्ध्यनुदतो ब्रह्ममात्रं सुविज्ञेयमिति योजना ॥ २२ ॥ अपरोक्षभ्रमस्य परोक्षस्य सम्यक्ज्ञानाविरोधित्वे दृष्टान्तमाह अपरोक्षेति विरोधाभावमेवोदाहरति प्रतिमेति ॥ २३ ॥ केचन विप्रतिपद्यमाना उपलभ्यन्ते इत्याशंक्याह ॥ अश्रद्धालोरिति ॥ कुत इत्यत आह अश्रद्धालोरिति सर्वेषु वेदोक्तानुष्ठानेषु अश्रद्धावतोऽनधिकारित्वादित्यर्थः २४ एतावता परोक्षज्ञाने किमायातमित्य

ब्रह्ममात्रं सुविज्ञेयं श्रद्धालोः शास्त्रदर्शिनः ॥ अपरोक्षद्वैतबुद्धिः परोक्षाद्वैतबुद्ध्यनुत् ॥ २२ ॥ अपरोक्षशिला-
बुद्धिर्न परोक्षेशतां नुदेत् ॥ प्रतिमादिषु विष्णुत्वे को वा विप्रतिपद्यते ॥ २३ ॥ अश्रद्धालोरविश्वासो नोदाहरण-
मर्हति ॥ श्रद्धालोरेव सर्वत्र वैदिकेष्वधिकारतः ॥ २४ ॥ सकृदाप्तोपदेशेन परोक्षज्ञानमुद्भवेत् ॥ विष्णु-
मूर्त्युपदेशो हि न मीमांसामपेक्षते ॥ २५ ॥ कर्मोपास्ती विचार्येते अनुष्ठेयाविनिर्णयात् ॥ बहुशाखाविप्रकीर्णं

आह ॥ सकृदिति ॥ उक्तमर्थं लोकानुभवेन द्रढयति ॥ विष्णुमूर्त्युपदेशो हीति ॥ २५ ॥ ननु तर्हि कुतः शास्त्रेषु विचाराः क्रियन्त इत्याशंक्यानुष्ठेयकर्मोपासनयोः संदेहसंभवान्तन्निर्णयाय विचाराः क्रियन्त इत्याह ॥ कर्मोपास्तीति संदेहसंभवमेवोपपादयति ॥ बहुशाखेति ॥ अनेकासु शाखासु तत्र तत्र चोदितं कर्मोपासनं वा एकत्र समाहृत्य निर्णेतुं मनुष्यादिर्नरः कः प्रभुः समर्थः न कोऽपीत्यर्थः ॥ २६ ॥

ननु तर्हि ननु चैवं यत्त्वमेव कर्मोपासनयोः प्राप्तमित्याशंक्याह॥ निर्णीतोऽर्थ इति जैमिन्यादिभिः पूर्वाचार्यैर्निश्चितोऽर्थोऽनुष्ठानप्रकारः कल्पसूत्रैः संगृहीतोऽस्ति तावता तैर्ग्रथितत्वेनैतेषु विश्वासवान् पुरुषः विचारं विनापि कर्मसम्यगनुष्ठातुं शक्तो भवेत्॥२७॥ ननु तर्ह्युपासनाविचाराभावान्न तदनुष्ठानं संभवेदित्याशंक्याह॥ उपास्तीनामिति आर्षग्रन्थेषु ब्राह्मणवाशिष्ठादिमन्त्रकल्पेषूपासनानुष्ठानप्रकारो वर्णितः॥ तस्माद्विचारासमर्था मनुष्याः कल्पेषूक्तं तदुपासनं गुरुमुखादवगत्यानुतिष्ठन्तीति भावः॥२८॥ ननु तर्हीदानीं तनैरपि कर्मिभिर्वेदवाक्यविचारः कुतः क्रियत इत्याशंक्य स्वबुद्धिपारितोषायैव क्रियते नानुष्ठानासिद्धय इत्याह॥

निर्णीतोऽर्थः कल्पसूत्रैर्ग्रथितस्तावतास्तिकः॥ विचारमन्तरेणापि शक्तोऽनुष्ठातुमञ्जसा॥२७॥ उपास्तीनामनुष्ठानमार्षग्रन्थेषु वर्णितं॥ विचाराक्षममर्त्याश्च तच्छ्रुत्वोपासते गुरोः॥२८॥ वेदवाक्यानि निर्णेतुमिच्छन्मीमांसतां जनः॥ आप्तोपदेशमात्रेण ह्यनुष्ठानं हि संभवेत्॥२९॥ ब्रह्मसाक्षात्कृतिस्त्वेवं विचारेण विना नृणां॥ आप्तोपदेशमात्रेण न संभवति कुत्रचित्॥३०॥ परोक्षज्ञानमश्रद्धा प्रतिबध्नाति नेतरः॥ अविचारो परोक्षस्य ज्ञानस्य प्रतिबंधकः॥३१॥

वेदवाक्येति॥२९॥ ननु ब्रह्मोपासनात् ब्रह्मसाक्षात्कारस्याप्युपदेशमात्रादेव सिद्धिः किं न स्यादित्याशंक्याह॥ ब्रह्मसाक्षादिति॥ आप्तोपदेशमात्रेणोपास्त्यनुष्ठानोपयोगि परोक्षज्ञानमुत्पद्यते अपरोक्षज्ञानं तु विचारमन्तरेण न जायत इत्युक्तं॥३०॥ तत्र कारणमाह॥ परोक्षज्ञानमिति॥ यतः अविश्वासरूपा परोक्षज्ञानं प्रतिबध्नाति नाविचारो तस्मादाप्तवचनसदुपदेशादेव परोक्षज्ञानजन्मोपपद्यते॥ अविचारः प्रतिबध्नात्यपरोक्षज्ञानस्य तु विचारद्वारा तन्निवृत्तिमन्तरेणोत्पत्तिर्न संभवति अतो विचारः कर्त्तव्य इति भावः॥३१॥

नन्वविचारे कृतेपि यदापरोक्षज्ञानं न जायते तदा किं कर्त्तव्यमिति आह विचार्य्याप्येति तत्वपदार्थस्याविचार्यापि वा
क्यार्थं ब्रह्मात्मैकत्वमपरोक्षतया न जानातीति चेत् तदपि पुनः पुनर्विचारणमेव कर्त्तव्यम् अपरोक्षज्ञानहेतोरन्यस्याभावा
दिति भावः २१ नन्वनयोरन्ययोर्विचारेणापि रहस्याद्यात्मकारानुदये सति विचारो व्यर्थः स्यादित्याशंक्याह विचारयन्नि

विचार्य्याप्यापरोक्षेण ब्रह्मात्मानं न वेत्ति चेत् आपरोक्ष्यावसानत्वाद्भूयो भूयो विचा
रयेत् २२ विचारयन्नामरणं नैवात्मानं लभेत चेत् जन्मान्तरे लभेतैव प्रतिबंध
क्षये सति २३ इह वामुत्र वा विद्येत्येवं सूत्रकृतोदितं शृण्वन्तोप्यत्र बहवो यन्न विद्यु
रिति श्रुतेः २४ गर्भ एव शयानः सन् वामदेवोऽवबुद्धवान् पूर्वाभ्यस्तविचारेण यद्वद
ध्ययनादिषु २५ बहुवारमधीतेपि तदा नायाति चेत् पुनः दिनान्तरेऽनधीत्यैव पर्वाधी

ति २३ तन्निदं कुवगतमित्याशंक्य ब्रह्मसूत्रकृता व्यासेनैहिकामुष्मिकमप्रस्तुतप्रतिबंधतदर्शनादित्यस्मिन्सूत्रेऽभि
धानादित्याह इह वेति सति प्रतिबंधे इह जन्मनि नाशो नानुत्पन्नो श्रुतिं दर्शयति श्रुत्वेतरति २४ इह जन्मनि श्रवणादि
कर्तुर्जन्मान्तरे परोक्षज्ञानं भवतीत्यत्रापि गर्भे नु सन्धानेषां अवेदहं देवानां जनिमानि विश्वेत्यादिका श्रुति समर्थितः यद
ति गर्भ इति इह जन्मन्यनुत्पन्नस्य ज्ञानस्य कालान्तरोत्पत्तौ दृष्टान्तमाह यद्वदिति २५ दृष्टान्तं विवृणोति बहुवारमि
ति २६

आदिशब्देन परिगृहीतानि दृष्टांतं तरणमाह कालेनेति दृष्टांतिके योजयति तद्वदिति ३७ वहुवारं विचारितेपि तत्त्वे
प्रतिबंधवशात् साक्षात्कारो न जायत इत्येतद्वार्त्तिककारैरपि निरूपितमित्याह पुनः पुनरिति ३८ तान्येव वार्त्तिकान्युदाहर
ति कुतस्तज्ज्ञानमित्यादिना अत्र तस्य त्रिजन्मभिरित्यंतेन तत्र तावत्पूर्वमुत्पन्नस्य ज्ञानस्येदानीमुत्पत्तौ कारणं पृच्छति कुत इ
ति उत्तरमाह तद्धीति बंधः प्रतिबंधस्तस्य परिक्षयादित्यर्थः सोपि प्रतिबंधोऽतीतो भावी वर्त्तमानश्चेति त्रिविध इत्याह अस्माविति ३९

कालेन परिपच्यंते कृषिगर्भादयो यथा तद्वदात्मविचारोपि शनैः कालेन पच्यते ३७ पुनः पुन
र्विचारेपि त्रिविधप्रतिबंधतः न वेत्ति तत्त्वमित्येतद्वार्त्तिके सम्यगीरितं ३८ कुतस्तज्ज्ञानमिति
चेत्तद्धि बंधपरिक्षयात् असावपि च भूतो वा भावी वा वर्त्तते थवा ३९ अधीतवेदवेदार्थोप्यत
न२ एव मुच्यते हिरण्यनिधिदृष्टांतादिदमेव च दर्शितं ४० अतीतेनापि महिषीस्नेहेन प्रतिबं
धतः भिक्षुस्तत्त्वं न वेदेति गाथा लोके प्रगीयते ४१

अथ त्वेवं त्रिविधप्रतिबंधस्ततः किमित्यत आह अधीतवेदेति अत एव प्रतिबंधसद्भावादेवेत्यर्थः सति प्रतिबंधे ज्ञानं नोदेतीत्ये
तत्र यथाहि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरंतो न विंदेयुः एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्र
ह्मलोकं न विंदंति अनृतेन हि प्रत्यूढा इत्यनया श्रुत्या प्रदर्शितमित्याह हिरण्येति ४० तत्त्वातीतस्य प्रतिबंधकत्वं न दृष्टमित्या
शंक्याह अतीतेनेति अयमर्थः कश्चिद्यतिः पूर्वं गार्हस्थ्यदशायां कस्यांचिन्महिष्यां स्नेहं कृत्वा पश्चात्संन्यासानंतरं श्रवणप्र

[illegible]
[illegible]
[illegible]

५

तर्हि तथाविधस्य तस्य कथं ज्ञानोत्पत्तिरित्यत आह अनुसृत्येति गुरुस्तस्य तत्त्वोपदिष्टा तदीयमहिम्नि स्नेहमनुसृत्य त-
स्यामेव महिम्ना तत्त्वं तत्त्वमस्युपाधिकं ब्रह्मोक्तवान् ततः सोपि महिम्नि स्नेहलक्षणप्रतिबंधकापगमेन गुरूपदिष्टं
तत्त्वं यथावत् शास्त्रोक्तप्रकारेणैव ज्ञातवानित्यर्थः ४२ एवमतीतप्रतिबंधं प्रदर्श्य वर्त्तमानं दर्शयति वर्त्तमानप्रति-
बंधश्चेत्तस्य विषयासक्तिरूपणकः प्रज्ञामांद्यं बुद्धेरसत्वगुणज्ञावः कुतर्कश्च शुष्कतार्किकत्वेन श्रुत्यर्थस्यान्यथोहनं विपर्य-

अनुसृत्य गुरुः स्नेहं महिम्नस्तत्त्वमुक्तवान् ततो यथावद्वेदैष प्रतिबंधस्य संक्ष-
यात् ४२ प्रतिबंधो वर्त्तमानो विषयासक्तिलक्षणः प्रज्ञामांद्यं कुतर्कश्च विपर्य-
यदुराग्रहः ४३ शमाद्यैः श्रवणाद्यैश्च तत्र तत्रोचितैः क्षयं नीतेस्मिन् प्रतिबंधेतः स्वस्य ब्र-
ह्मत्वमश्नुते ४४

यदुराग्रहः विपर्यये आत्मनः कर्तृत्वादिधर्मयुक्तज्ञानलक्षणो दुराग्रहो युक्तिरहितोभिनिवेशः एतेषामन्यतमस्यापि सत्वे ता-
त्त्वं नोदेतीत्यर्थः ४३ अस्यापि प्रतिबंधस्य केन निवृत्तिरित्यत आह शमाद्यैरिति शमादयः शांतो दांत उपरतस्तितिक्षुः समा-
हितो भूत्वेति श्रुत्युक्ताः श्रवणादयः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या प्रतिपादिताः एतैः साधनैस्तत्र तत्र स्वस्वप्रतिबंध- त २ तस्य २
स्यातिवर्त्तने उचितैर्योग्यैस्तस्मिंस्तस्मिन्प्रतिबंधे क्षयं नीते सति विनाशिते सत्यतः प्रतिबंधापगमादेव स्वस्य प्रत्यगात्मनो
ब्रह्मत्वं प्राप्नोतीत्यर्थः ४४

इदानीं भाविप्रतिबंधं दर्शयति आगामीति आगामिप्रतिबंधो जन्मांतरहेतुः प्रारब्धशेष इत्यर्थः तस्य च भोगमंतरेणानिवृत्त्य भावात्तन्निवृत्तौ कालनियमो नास्तीत्याह एकेनेति स च एकेन जन्मना क्षीणो वामदेवस्येति शेषः भरतस्य त्रिजन्मभिः क्षीण इत्यनुषज्यते ४५ नन्वेकेन त्रिजन्मभिरिति नियतकालत्वं न वर्तते योगभ्रष्टस्य त्वित्याशंक्याह योगभ्रष्टस्येति योगभ्रष्टस्तत्त्वसाक्षात्कारपर्यंतविचाररहित इत्यर्थः तर्हि तत्त्वविचारो निःफलः स्यादित्याशंक्याह नेति प्रतिबंधनिवृत्त्यनंतरमेवापरोक्षज्ञानलक्षणफलसंभवादिति भावः ४६ गीतायां प्रतिपादितमर्थं दर्शयति प्राप्य पुण्यकृतामित्यादिना ततो याति परां गतिमित्यंतेन योग

आगामिप्रतिबंधश्च वामदेवे समीरितः एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः ४५ योगभ्रष्टस्य गीतायां प्रतीते बहुजन्मनि प्रतिबंधक्षयः प्रोक्तो न विचारोऽप्यनर्थकः ४६ प्राप्य पुण्यकृतां लोकानात्मतत्त्वविचारतः शुचीनां श्रीमतां गेहे साभिलाषोऽभिजायते ४७ अथवा योगिनामेव कुले भवति धीमतां निस्पृहो ब्रह्मतत्त्वस्य विचारात्तद्धि दुर्लभं ४८

भ्रष्ट आत्मतत्त्वविचारबलादेव पुण्यकृतां पुण्यकारिणां लोकान्स्वर्गविशेषान्प्राप्य तत्र बहुकालं सुखमनुभूय तद्भोगावसाने साभिलाषश्चेदस्मिन्लोके शुचीनां मातृतः पितृतः शुद्धानां श्रीमतां कुलेऽभिजायते ४७ पक्षांतरमाह अथवेति निस्पृहः स्वयमतिविरक्तश्चेद्ब्रह्मतत्त्वविचारादेव धीमतामात्मतत्त्वनिश्चयाविचारवतां योगिनां चैत्तैकाग्र्यवतां कुले भवति जायत इत्यर्थः एवंरूपमुत्पद्यते कोपि स्यात् इत्यत आह तद्धीति द्वितीयस्मात्कारणात्तद्योगिकुले जन्म दुर्लभं अत्यल्पपुण्येनालभ्यमित्यर्थः ४८

तस्य दुर्लभत्वमुपपादयति तत्रेति हि यस्मात्कारणात्तत्र तस्मिन् जन्मनि पौर्वदेहिकं पूर्वदेहस्थं तं बुद्धिसंयोगं तत्वविचारगोचरबुद्धिसंबंधं शीघ्रं लभते प्राप्नोति न केवलं बुद्धिसंबंधमात्रं लाभः किं तु ततः पूर्वस्मात्प्रयत्नाद्भूयो यतते चाधिकं प्रयत्नं करोति तस्मादेतज्जन्म दुर्लभमित्यर्थः ४९ तत्र योगाभ्यासे कारणमाह पूर्वाभ्यासेनेति स योगभ्रष्टस्तेन पूर्वाभ्यासेनैवावशोऽपि स्वाधीनोऽपि ह्रियते आकृष्यते एवं नैकेषु जन्मसु कृतेन प्रयत्नेन संसिद्धस्तत्वज्ञानसंपन्नस्ततस्तस्मात्तत्वज्ञानात्परो शांतिं मुक्तिं याति प्रा

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं ॥ यतते च ततो भूयस्तस्मादेतद्धि दुर्लभं ॥ ४९ ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ॥ अनेकजन्मसंसिद्धस्ततो याति परां गतिं ॥ ५० ॥ ब्रह्मलोकाभिकांक्षायां सम्यक् सत्यां निरुध्यतां ॥ विचारयेद्य आत्मानं न तु साक्षात्करोत्ययं ॥ ५१ ॥ वेदांतविज्ञानसुनिश्चितार्थाः इति शास्त्रतः ॥ ब्रह्मलोके स कल्पांते ब्रह्मणा सह मुच्यते ॥ ५२ ॥ ॥ ॥ ॥ ॥ ॥

प्नोतीत्यर्थः ॥ ५० ॥ आगामिप्रतिबंधांतरं दर्शयति ॥ ब्रह्मलोकेति ॥ ब्रह्मलोकप्राप्तीच्छायां सत्यां तां निरुध्य य आत्मानं विचारयेत्तस्य साक्षात्कारो नैव जायत इत्यर्थः ॥ ५१ ॥ ननु तर्हि तस्य कदापि मुक्तिर्न स्यादित्याशंक्याह वेदांतेति वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वास्ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे ॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यांते कृतात्मानः प्रविशंति परं पदमित्यादिशास्त्रवशात् ब्रह्मलोकप्राप्त्यनंतरं तत्वसाक्षात्कृत्य ब्रह्मणा सह मुक्तिर्भविष्यतीत्यर्थः ॥ ५२ ॥ ॥

स०

एवं तत्त्वविचारे क्रियमाणे प्रतिबंधवशादजसा साक्षात्कारो न जायत इत्यभिप्रायतीव्रपापिनां विचारो दुर्लभ इत्याह केषांचि
दिति तत्र प्रमाणमाह श्रवणेति ५३ यः परमात्मा स बहुभिः पुरुषैः श्रवणायापि श्रोतुमपि न लभ्यः दुर्लभ इत्यर्थः ५४ एताव
ता सति प्रतिबंधे तत्त्वसाक्षात्कारस्तत्साधनभूतो विचार एव न संभवतीत्यभिप्रायेदानीं विचारासमर्थेन पुरुषार्थार्थिना किं कर्तव्य

केषांचित्स विचारोऽपि कर्मणा प्रतिबध्यते श्रवणायापि बहुभिर्यो न लभ्य इति श्रुतेः ५३ अ
त्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवात् यो विचारं न लभते ब्रह्मोपासीत सोऽनिशं ५४
निर्गुणब्रह्मतत्त्वस्य न ह्युपास्तेरसंभवः सगुणब्रह्मणीवात्र प्रत्ययावृत्तिसंभवात् ५५
अवाङ्मनसगम्यं तन्नोपास्यमिति चेत्तदा अवाङ्मनसगम्यस्य वेदनं च न संभवेत् ५६

मित्यपेक्षायां विचारासमर्था अतद्धित्वोपासते गुरोरिति प्राक्प्रतिज्ञातं तदुपपादयति अत्यंतेति सामग्र्यसंभवो नाम तत्त्वो
पदेष्टुर्गुरोरभावात्शास्त्रस्य देशकालादेर्वा असंभवस्तस्मादित्यर्थः ५५ ननु निर्गुणब्रह्मतत्त्वस्य गुणरहितत्वात्तदुपास
नं न घटत इत्याशंक्योपासनस्य प्रत्ययावृत्तिरूपत्वात्सगुणब्रह्मणीव निर्गुणेपि तत्संभवतीत्याह निर्गुणेति ५६
ननु निर्गुणस्य ब्रह्मणोवाङ्मनसोगोचरत्वाभावान्नोपास्यत्वमित्याशंक्य वेदनपक्षेप्ययं दोषः समान इत्याह अवाङ्
मनसेति ५७

ननु ब्रह्म वाङ्मनसगोचरमित्येवं ज्ञातुं शक्यमित्याशंक्यैवमेवोपासितुमपि शक्यमित्याह वागाद्येति ॥५७॥ ब्रह्मण उपास्यत्वे
सगुणत्वं प्रसज्येतेत्याशंक्य वेद्यत्वेपि तत्र गुणत्वस्यौचित्याह ॥ सगुणत्वमिति ॥ तत्सगुणत्वमित्यर्थः ॥ ननु लक्षणावृत्त्याऽप्य
णत्वे वेद्यत्वे सगुणत्वप्रसंगरित्याशंक्य उपासनमपि तथैवाङ्गीक्रियतामित्याह ॥ वेद्यमिति ॥५८॥ ननु ब्रह्मण उपास्यत्वं श्रुत्या निषि

वागाद्यगोचराकारमित्येवं यदि वेत्त्यसौ ॥ वागाद्यगोचराकारमित्युपासीत नो कुतः ॥५७॥ सगु
णत्वमुपास्यत्वाद्यदि वेद्यत्वतोपि तत् ॥ वेद्यं चेल्लक्षणावृत्त्या लक्षितं समुपास्यताम् ॥५८॥ ब्र
ह्म विद्धि तदेव त्वं न त्विदं यदुपासते ॥ इति श्रुतेरुपास्यत्वं निषिद्धं ब्रह्मणो यदि ॥५९॥ वि
दितादन्यदेवेति श्रुतेर्वेद्यत्वमस्य न ॥ यथा श्रुत्यैव वेद्यं चेत्तथा श्रुत्याप्युपास्यताम् ॥६०॥

ध्यत इति शंकते ॥ ब्रह्म विद्धीति ॥ यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति श्रुतिरुपा
स्यस्य ब्रह्मत्वं निषेधतीत्यर्थः ॥ त्वंपदवाङ्मनसागम्यं तदेव ब्रह्म विद्धि इदमिति यन्नुपासते पुरुषास्तन्नेति विद्धीति योजना ॥५९॥
उपास्यत्ववद्वेद्यस्यापि तन्निषेधः समान इत्याह ॥ विदितादिति ॥ अन्यदेव तद्विदितादथो अविदितादधीति ब्रह्मणो वेद्यत्वम
मपि निषेधतीत्यर्थः ॥ विदिताविदिताभ्यामन्यद्ब्रह्मेति श्रुतिः प्रतिपादयति चेत्तर्हि तथैव तज्ज्ञानीयादित्यपशंक्योपास
नेप्येतत्समानमित्याह यथेति ॥६०॥

ननु वेद्यं तद्ब्रह्म निर्गुणं चास्तां तन्नत्रवतीत्याशंक्य उपास्यत्वमपि तथेत्याह अवाच्यवीति ननु वेदनपदोक्तवृत्तेर्ब्रह्माकारत्वमास्तां
नोपासनस्येत्याशंक्य शब्दजन्यात्तदाकारत्वमुभयत्र समानमित्याह वृत्तिव्याप्तिरिति ॥ ६१ ॥ युक्तिफलत्वमुपास्ते न स्वत्वदोषिसम
२३ मानत्वमित्याह कार्येति ननु निर्गुणोपासने प्रमाणं नास्तीत्याशंक्यानेकासु श्रुतिषूपलभ्यमानत्वान्नैवमित्याह मानाभाव इति ॥ ६२ ॥
बहुश्रुतिषु दर्शनादित्युक्तमर्थं विवृणोति उत्तरस्मिन्निति तापनीयोपनिषदि तावद्देवा ह वै प्रजापतिमब्रुवन्नणोरणी
यांसमिममात्मानमोंकारं नो व्याचक्ष्वेत्यादिकया बहुधा निर्गुणोपासनमभिधीयते शैव्यप्रश्ने प्रश्नोपनिषदि पंचमे प्रश्ने

अवाच्यवीवेद्यता चेदुपास्यत्वं तथा न किं ॥ वृत्तिव्याप्तिर्वेद्यता चेदुपास्यत्वेऽपि तत्समं ॥ ६१ ॥ का
र्येष्वाप्तिरुपास्तौ चेत्कास्ते द्वेषस्तादरः ॥ मानाभावो न वाच्योऽस्या बहुश्रुतिषु दर्शनात् ॥ ६२ ॥ उ
त्तरस्मिंस्तापनीये शैव्यप्रश्नेऽथ काठके ॥ मांडुक्यादौ च सर्वत्र निर्गुणोपास्तिरीरिता ॥ ६३ ॥ अ
नुष्ठानप्रकारोऽस्याः पंचीकरण ईरितः ॥ ज्ञानसाधनमेतच्चेन्नेति केनात्र वारितं ॥ ६४ ॥

यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीतेति काठके काठकवल्ल्यां एतद्वै विदा यत्पदमामनंतीत्युपक्र
तीतत्तुर्येपादः म्य एतद्ध्येवाक्षरं ब्रह्म एतदालंबनं श्रेष्ठमित्यादिना प्रणवोपासनमुच्यते ॥ मांडूक्योपनिषदि ओमित्येतदक्षरमिदं सर्वं त
स्योपव्याख्यानमित्यादिना अवस्थात्रयासनमेवाभिधीयत इत्यर्थः आदिशब्देन तैत्तिरीयमुंडकादयो गृह्यंते ॥ ६३ ॥ ननु निर्गुणोपासनं कथमनु
ष्ठेयमित्यत आह अनुष्ठानेति ननु एतदुपासनं ज्ञानसाधनमेव न मुक्तिसाधनमित्याशंक्य ब्रह्मतत्त्वोपास्त्यापि मुच्यते इ
ति वदतामस्माकमनुकूलमित्याह ज्ञानसाधनेति ॥ ६४ ॥

ननु सगुणोपासनमेव सर्वैरनुष्ठीयते न तु निर्गुणोपासनमित्याशंक्य तस्य प्रमाणसिद्धस्यापलापो न युक्त इत्याह नानुतिष्ठतीति ॥६५॥ प्रमाणसिद्धस्याननुष्ठानमात्रेणापरित्याज्यत्वे दृष्टान्तमाह इत इति अयमभिप्रायः यथा सगुणोपासनेभ्यः कालान्तरभाविफलेभ्यः वश्यादिकारिमन्त्रेषु तेषु हि फलप्रदत्वमतिशयं बुद्ध्वा मूढा नितान्तं तज्जपादौ प्रवृत्ता अपि विवेकिभिः सगुणोपासनं न परित्यज्यते यथा वा नियमानुष्ठानपेक्षेभ्यस्तेभ्योऽपि मन्त्रेभ्यः कृष्यादावतिशयं नियमरहितं चेदं मत्वा मूढतराणां तत्र प्रवृत्तावपि न तन्मन्त्रानुष्ठानं त्यज्यत इति तथा संसारिकफलेष्वेव नानिर्गुणोपासनानुष्ठानमात्रेणापि न मुमुक्षुभिर्निर्गुणोपासनं त्यज्यत इति ॥६६॥

नानुतिष्ठति कोप्येतदिति चेन्नानुतिष्ठतु ॥ पुरुषस्यापराधेन किमुपास्तिः प्रदुष्यति ॥६५॥
इतोप्यतिशयं मत्वा मन्त्रान्वश्यादिकारिणः ॥ मूढा जपन्तु तेभ्योऽतिमूढाः कृषिमुपासताम् ॥६६॥
तिष्ठन्तु मूढाः प्रकृता निर्गुणोपास्तिरीर्यते ॥ विद्यैक्यात्सर्वशाखास्थान्गुणानत्रोपसंहरेत् ॥६७॥
आनन्दादेर्विधेयस्य गुणसंघस्य संहृतिः ॥ आनन्दादय इत्यस्मिन्सूत्रे व्यासेन वर्णिता ॥६८॥

एवं प्रासंगिकं परिसमाप्य प्रकृतमनुसरति तिष्ठन्त्विति सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषादिति न्यायेन निर्गुणोपासनस्यैकत्वात्सर्वशाखास्थानामानन्दादीनां गुणानामेकत्रोपसंहृत्योपासनं कर्तव्यमित्याह विद्यैक्यादिति ॥६७॥ ते च गुणा द्विप्रकारा विधेया निषेध्याश्चेति तत्रानन्दो ब्रह्म विज्ञानमानन्दं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनो विभुरद्वय आनन्दः परः प्रत्यगेकरसः नत्यादयो विधेयगुणास्तेषामुपसंहार आनन्दादयः प्रधानस्येत्यस्मिन्नधिकरणे निहित इत्याह आनन्दादेरिति ॥६८॥

पे चास्थूलमनण्वमह्रस्वं यत्तदद्रेश्यमग्राह्यमशब्दमस्पर्शमरूपमव्ययमित्यादयो निषेध्यगुणास्तत्र तत्र श्रुतास्तेषामुप
हारो दक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तमित्यस्मिन्नधिकरणेऽभिहित इत्याह अस्थूलादेरिति ६८ ननु नि
र्गुणब्रह्मविद्यायां न गुणोपसंहार एव युज्यते निर्गुणविद्यात्वविरोधादित्याशंक्य सूत्रकारेणैवमभिहितस्योपसंहारस्यास्मा
भिरधीयमानत्वात्तस्मान्न प्रतीदं चोद्यमुचितमित्याह निर्गुणेति ७० हिरण्यश्मश्रुत्वादिगुणविशिष्टमूर्त्तीनाममनभिधानादिदं

अस्थूलादेर्निषिद्धस्य गुणसंघस्य संहृतिः ॥ तथा व्यासेन सूत्रेऽस्मिन्नुक्ताक्षरधियां त्विति ६९ ॥
निर्गुणब्रह्मतत्त्वस्य विद्यायां गुणसंहृतिः ॥ न युज्यते त्वपाकेनोऽव्यासप्रत्येव मां न तु ७० ॥ हि
रण्यश्मश्रुसूर्यादिमूर्त्तीनामनुदाहृतेः ॥ आविरुद्धं निर्गुणत्वमिति चेदुच्यतां त्वया ७१ ॥ गु
णानां लक्षकत्वेन तत्त्वे न तः प्रवेशनं ॥ इति चेदस्त्वेवमेव ब्रह्मतत्त्वमुपास्यतां ७२ ॥

निर्गुणोपासनमेवेति चेत्तर्हि न विरोध इत्याह ॥ हिरण्यश्मश्रुसूर्यादीति ॥ हिरण्यश्मश्रुसूर्यादिमूर्त्तीनां हिरण्मयानि श्म
श्रूणि यस्यासौ हिरण्यश्मश्रुस्तथाविधः सूर्य आदिर्येषां ते तेषां मूर्त्तयो हिरण्यश्मश्रुसूर्यादिमूर्त्तयस्तासामिति विग्रहः ॥ नन्वान
दादीनामस्थूलादीनां च गुणानामुपास्यतत्त्वांतःप्रवेशाभावात्तद्गुणविशिष्टत्वेन कथमुपास्यत्वमित्याशंक्य तेषां तत्त्वां
तःप्रवेशाभावेऽपि लक्षकत्वसंभवात्तैर्लक्षितं ब्रह्मोपास्यमित्याह ॥ ७२ ॥

तद्ध्योपासनाप्रकारं दर्शयति आनंदादिभिरिति अत्रामुस्मृतिषु योऽखंडैकरस आत्मानंदादिभिरस्थूलादिभिश्च गुणैर्लक्षितः
सोहमस्मीत्येवमुपासते मुमुक्षव इति शेषः ७३ नन्वेवं सति विद्योपासनयोः कुतो भेद इत्याशंक्य वस्तुतंत्रत्वकर्तृतंत्रत्वाभ्यां भेद
इत्याह बोधेति ७४ वैलक्षण्यं तत्र सिद्धबोधस्य हेतुत्वादिकं दर्शयति विचारादिति जायत इत्यादि श्लोकद्वयेन विचाराद्बोधो जाय
ते किंच विचारवतो जायमानं यं बोधमनिच्छापि बोधो मा भूदित्येवं रूपाननिवर्त्ययेन्न निवारयेदुत्पद्यमानश्च बोधः स्वजन्ममा

आनंदादिभिरस्थूलादिभिश्चात्मात्र लक्षितः । अखंडैकरसः सोहमस्मीत्येवमुपासते ७३ बोधोपास्त्योर्विशेषः
क इति चेदुच्यते शृणु । वस्तुतंत्रो भवेद्बोधः कर्तृतंत्रमुपासनं ७४ विचाराज्जायते बोधोऽनिच्छा यं न निवर्तयेत् ।
विचाराज्जायते उत्पत्तिमात्रात्संसारे दहत्यखिलसत्यतां ७५ तावता कृतकृत्यः सन्नित्यतृप्तिमुपागतः । जीव
न्मुक्तिमनुप्राप्य प्रारब्धक्षयमीक्षते ७६ आप्तोपदेशं विश्वस्य श्रद्धालुरविचारयन् । चिंतयेत्प्रत्ययैरन्यैरनं
तरितवृत्तिभिः ७७ यावच्चिंत्यस्वरूपत्वाभिमानः स्वस्य जायते । तावद्विचिंत्य पश्चाच्च तथैवामृति धारयेत् ७८

जातः संसारे खिलस्य प्रपंचस्य सत्यतां दहति नाशयति तावता तत्त्वज्ञानोत्पत्तिमात्रेणातिरतिशयं सुखं प्राप्नोतीत्यर्थः ७५ ७६ उपासना
याश्च बोधाद्वैलक्षण्यं तत्र सिद्धये तद्दर्शयति आप्तोपदेशमिति आप्तस्य गुरोरुपदेशमुपास्यस्वरूपप्रतिपादकवाक्यजातं वि
श्वस्य विश्वासं कृत्वा अविचारयन्नुपास्यतत्त्वं प्रत्ययैर्घटादिविषयैरनंतरितवृत्तिभिरव्यवहितवृत्तिभिश्चिंतयेदिति ७७
कियंतं कालं चिंतयेदित्याशंक्याह यावदिति ७८

उपासकस्य तद्रूपताभिमानमुदाहरणप्रदर्शनेन स्पष्टीकरोति ॥ ब्रह्मचारीति ॥ कश्चित्सर्वगतत्वगुणविशिष्टप्राणोपासको ब्रह्म-
चारी भिक्षाहरणार्थमागत्याधिप्रतारिणामराज्ञः पुरतो महात्मनश्चतुरो देवान्कः कः स जगार भुवनस्य गोपा सतं कापेय नाभि-
तो पश्यंति मर्त्याभिप्रजाभिप्रतारिन्नवहुधा वसंतमिति मंत्रेणात्मनः संवर्गरूपत्वं चित्ते धृतं प्रकटीकृतवान् इति छांदोग्ये श्रूयते तद्वत्सर्वः ॥
७९ ॥ प्राप्तिधारणोपि मित्तं दर्शयन्निध्यायंननिवर्त्तयेदित्युक्तो द्वौ धर्मौ द्विलक्षणमाह पुरुषस्येति ॥ उपास्तिः पुरुषस्योपासक

ब्रह्मचारीमितमात्तोयुतः संवर्गविद्यया ॥ संवर्गरूपतां चित्ते धारयित्वा ह्युपासिता ॥७९॥ पुरुषस्येव
या कर्त्तुमकर्त्तुं कर्त्तुमन्यथा ॥ शक्योपास्तिरतो नित्यं कुर्यात्प्रत्ययसंततिं ॥८०॥ वेदाध्याय्यप्रम
तोधीते स्वप्नेधिवासितः ॥ जपिता तु जपत्येव तथा ध्याताविवासये तु ॥८१॥ विरोधिप्रत्ययं त्यक्तो नैरं
तर्येण भावयन् ॥ लभते वासनावेशात्स्वप्नादावपि भावनां ॥८२॥ भुंजानोपि निजारब्धमास्था
तिशयतो निशं ॥ ध्यातुं शक्तो न संदेहो विषयव्यसनी यथा ॥८३॥ ॥ ॥ ॥

ध्या कर्त्तुमन्यथा कर्त्तुं प्रकारांतरेण वा कर्त्तुं शक्यात ॥ पुरुषस्य ध्याधीनत्वादुपासनं सदा कुर्यादित्यर्थः ॥८०॥ एवं सदाचिंतने किं भवतीत्य
तआह ॥ वेदाध्यायीति ॥ अप्रमत्तो वेदाध्यायी सदाध्ययनशीलो जपिता सदा जपशीलो वा वासितो दृढवासनया स्वप्नादिष्वप्यध्ययनं ज
पं वा करोत्येवमुपासकोपि वासनादार्ढ्यात्स्वप्नादावपि ध्यायीतेत्यर्थः ॥८१॥ स्वप्नादावपि ध्यानानुवृत्ते नै कारणमाह ॥ विरो
धीति ॥ वासनावेशात्संस्कारपाटवात् ॥ भावना ध्यानं ॥८२॥ ननु प्रारब्धकर्मवशात्विषयाननुभवतः कथं नैरंतर्येण भाव
नासिद्धिरित्याशंक्यास्थातिशयेसति विषयव्यसनिवद्भावनासिद्धिः स्यादित्याह भुंजानोपीति ॥८३॥ ॥ ॥ ॥ ॥ ॥ ॥

वक्ष्यंतं विवृणोति परव्यसनिनीति ८४ परसंगास्वादने गृहकृत्यविच्छेदः स्यादित्याशंक्याह परसंगमिति ८५ आपातेनैव वर्त्त
ते इत्युक्तमर्थं विवृणोति गृहकृत्येति ८६ दार्ष्टांतिके योजयति एवमिति ननु तत्वविदपि लौकिकव्यवहारं किं लेशेनाचर
ति किं सम्यगिति विषयव्यवहारस्य तत्वज्ञानाविरोधित्वात्सम्यगेवाचरतीत्याह तत्वविदिति ८७ अविरुद्धत्वमेव दर्शयति
मायामय इति ८८ विरोधाभावमेव प्रपंचयति अपेक्षत इति ८९ कानि तानि व्यवहारसाधनानीत्यत आह मनो वागिति या

परव्यसनिनी नारी व्यग्रापि गृहकर्मणि तदेवास्वादयत्यंतः परसंगरसायनं ८४ परसंगं स्वादयंत्या अ
पि नो गृहकर्म तत् कुंठीभवेदपि त्वेतदापातेनैव वर्त्तते ८५ गृहकृत्यव्यसनिनी यथा सम्यक् करोति तत्
परव्यसनिनी तद्वन्न करोत्येव सर्वथा ८६ एवं ध्यानैकनिष्ठोपि लेशाल्लौकिकमाचरेत् तत्ववित्त्ववि
तृ॰ ४ रोधित्वाल्लौकिकं सम्यगाचरेत् ८७ मायामयः प्रपंचोयमात्मा चैतन्यरूपधृक् इति बोधविरोधः
को लौकिकव्यवहारिणः ८८ अपेक्षते व्यवहृतिर्न प्रपंचस्य वस्तुतां नाप्यात्मजाड्यं किंत्वेषा साध
नान्येव कांक्षति ८९ मनोवाक्कायतद्बाह्यपदार्थाः साधनानि तान् तत्वविन्नोपमृद्नाति व्यवहा
हृ॰ रोस्य नो कुतः ९० उपमृद्नाति चित्तं चेद्ध्यातासौ न तु तत्ववित् न बुद्धिं मर्दयन्दृष्टो घटतत्वस्य वे दिका

ध्याः पदार्था गृहक्षेत्रादयस्तान्मनआदींस्तत्वज्ञानी न निवारयति अतोस्य ज्ञानिनो व्यवहारः कुतो न प्रवर्तित्रवत्येवेत्यर्थः ९० न
नु विषयानुपमर्द्य निरूपितत्वविदा चित्तोपमर्दनं कार्यमित्याशंक्य तथाकरणे तत्वविदेव न स्यादित्याह उपमृद्नातीति ननु
तत्वविदा चित्तं नोपमर्द्यत इत्येतत्क्व दृष्टमित्याशंक्याह न बुद्धिमिति घटतत्वस्य वेदिता बुद्धिं मर्दयन्नपीडयन्नेकाग्र्यं कुर्व
न्पुरुषो नो दृष्टः नोपलब्ध इत्यर्थः ९१

ननु घटस्य स्फुरत्त्वेन स्फुरत्त्वात्तद्दर्शने चित्तवृत्तिर्न प्रत्यपेक्षते ब्रह्मणस्तु तथात्वात्तज्ज्ञाने तदपेक्ष्यत इत्याशंक्य तस्य स्वप्रकाशत्वेन घटादावपि स्फुरत्त्वाच्चित्तरोधनं नैवापेक्ष्यत इत्याह स्फुरदिति २१ ननु ब्रह्मणः स्वप्रकाशत्वेऽपि तज्ज्ञोचरायां बुद्धिवृत्तेरेव तत्त्वज्ञानत्वात्तस्याः प्रदार्णिकत्वेन ब्रह्मणि पुनः पुनरवस्थानमपेक्षत इत्याशंक्य इदं चोद्यं घटादिष्वपि समानमित्याह स्वप्रकाशतयेति २२ घटादिज्ञानस्य क्षणिकत्वेऽपि सकृन्निश्चितस्य घटस्य सर्वदा व्यवहर्तुं शक्यत्वात्तज्ज्ञाने स्थैर्यसंपादनमप्रयो

स्फुरत्स्फुरत्वमात्रेण घटस्फूर्तिस्सदा ॥ स्वप्रकाशोऽयमात्मा किं घटवच्च न भासते ॥ २२ ॥ स्वप्रकाशतया
किं ते तद्बुद्धिस्तत्त्ववेदनं ॥ बुद्धिः क्षणिकनाशेयमिति चोद्यं तुल्यं घटादिषु ॥ २३ ॥ घटादौ निश्चिते बु
द्धिर्नश्यत्वेव ~~हि तत्त्ववित् २५ उपासक~~ यदा घटः ॥ इष्टो नेतुं तदा शक्य इति चेत्सममात्मनि ॥ २४ ॥
निश्चित्य सकृदात्मानं यदापेक्षा तदैव तं ॥ वक्तुं मन्तुं तथा ध्यातुं शक्नोत्येव हि तत्त्ववित् ॥ २५ ॥
उपासक इव ध्यायन्लौकिकं विस्मरेद्यदि ॥ विस्मरत्वेव सा ध्यानाद्विस्मृतिर्न तु वेदनात् ॥ २६ ॥
ध्यानं त्वैच्छिकमेतस्य वेदनान्मुक्तिसिद्धितः ॥ ज्ञानादेव तु कैवल्यमिति शास्त्रेषु डिंडिमः ॥ २७ ॥

जकमित्याशंक्येदमात्मन्यपि समानमित्याह घटादाविति २४ सकृदात्मनीत्युक्तमर्थं विवृणोति निश्चित्येति २५ ननु तत्त्वविदप्युपासकवदात्मानुसंधानवशाज्जगदनुसंधानरहितो दृश्यत इत्याशंक्य सोऽनुसंधानाभावो ध्यानप्रयुक्तो न वेदनप्रयुक्त इत्याह उपासक इव ध्यायन्निति २६ ननु तत्त्वविदोऽपि मुक्तिसिद्ध्यै ब्रह्मध्यानं कर्त्तव्यमित्याशंक्य ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय ज्ञात्वा देवं मुच्यते सर्वपाशैरित्यादिशास्त्र

स९॥

तत्वविदोध्यानानभ्युपगमे तस्य सतः बहिःप्रवृत्तिः स्यादित्याशंक्य बाधकत्वात्प्रवृत्तेः स्यात्सुपेयतरत्याह तत्वविदिति ॥२८॥ ब
हिःप्रवृत्त्यभ्युपगमेतिप्रसंगः स्यादित्याशंक्य प्रसंगस्य दुर्निरूपत्वान्नैवमिति परिहरति अतीति नप्रसंगो दुर्निरूपः विधि
शास्त्रस्य प्रसंगशब्देन विवक्षितत्वादिति चेन्न तस्याज्ञानिविषयत्वेन तत्वविद्विषयत्वाभावादित्याह प्रसंग इति ॥२९॥ विधिशास्त्रमित्यु
पलक्षणं निषेधशास्त्रस्यापि विधिशास्त्रस्याविद्वद्विषयत्वमेव दर्शयति वर्णाश्रमेति ॥ ननु तत्वविदोपि देहधारित्वेन वर्णाश्र
माद्यभिमानित्वमस्तीत्याशंक्याह वर्णाश्रमादय इति १ ननु तत्वविन्निश्चयस्तावत्तिष्ठतु शास्त्रं तु तस्य कर्तव्यं प्रतिपाद

तत्वविद्यदि नध्यायेत्प्रवर्तेत तदा बहिः ॥ प्रवर्ततां सुखेनायं को बाधोस्य प्रवर्तने ॥२८॥ अतिप्रसंग
इति चेत्प्रसंगं तावदीरय ॥ प्रसंगो विधिशास्त्रं चेन्नैतत्तत्वविदं प्रति ॥२९॥ वर्णाश्रमवयोवस्था
भिमानो यस्य विद्यते ॥ तस्यैव च निषेधाश्च विधयः सकला अपि ॥१॥ वर्णाश्रमादयो देहमा
ययापरिकल्पिताः ॥ नात्मनो बोधरूपस्येत्येवं तस्य विनिश्चयः ॥१॥ समाधिमथ कर्माणि मा
करोतु करोतु वा ॥ हृदयेनात्तसर्वास्थो मुक्त एवोत्तमाशयः ॥२॥ ॥ ॥ ॥ ॥ ॥ दे २

यतीत्याशंक्य तदापि तस्य कर्तव्याभावमेव बोधयतीत्याह समाधिमिति यो हृदयेन बुद्ध्यात्तसर्वास्थोस्ताः परित्यक्ता अ
शेषा आस्था आसक्तिविशेषा यस्य स तथाविधः ॥ अत एवोत्तमाशय उत्तम आशयः अभिप्रायो निर्मलं ज्ञानं यस्य स तथो
क्तः स मुक्त एव अतः समाधिमथ कर्माणीत्यन्वयः ॥२॥

विदुषः कर्तव्यं नास्तीत्यत्र वचनांतरमुदाहरति नैष्कर्म्येति नैष्कर्म्यं कर्मराहित्यं तेन कर्मत्यागेनेत्यर्थः समाधानंसमा
धिः जप्यं जपः २ ननु विदुषामपि वासनानिवृत्तये ध्यानं कर्तव्यमित्याशंक्य सम्यग्ज्ञानिनो वासनैव नास्तीत्याह ३ आत्मेति
४ नवत्वेवं प्रस्तुते किं मायात्वमित्यत आह एवमिति कस्य तर्ह्यतिप्रसंग इत्यत आह प्रसंग इति ५ एवं कुत इत्यत आह

मनः

नैष्कर्म्येण न तस्यार्थस्तस्यार्थोस्ति न कर्मभिः॥ न समाधानजप्याभ्यां यस्य निर्वासनं मनः॥ आत्मासंगस्ततो
न्यत्स्यादिंद्रजालं हि मायिकं॥ इत्यचंचलनिर्णीते कुतो मनसि वासना॥ ४ एवं नास्ति प्रसंगोपि कु
तो स्यातिप्रसंजनं प्रसंगो यस्य तस्यैव शंक्येतातिप्रसंजनं॥ विध्यभावान्न बालस्य दृश्यतेतिप्र
संजनं॥ ५ स्यात्कुतोतिप्रसंगोस्य विध्यभावे समे सति॥ न किंचिद्वेत्ति बालश्चेत्सर्वं वेत्त्येव त
त्ववित्॥ ६ अल्पज्ञस्यैव विधयः सर्वे स्युर्नान्ययोर्द्वयोः॥ ७ शापानुग्रहसामर्थ्यं यस्यासौ त
त्वविद्यदि तत्र शापादिसामर्थ्यफलं स्यात्तपसो यतः॥ ८॥

विध्यभावादिति दार्ष्टांतिके योजयति स्यात्कुत इति ६ बालस्य विध्यभावप्रयोजकमज्ञत्वमस्ति न विदुष इत्याशंक्य तस्या
ज्ञत्वाभावेपि विध्यभावप्रयोजकं सर्वज्ञत्वमस्तीत्याह न किंचिदिति तर्हि विध्यधिकारः कस्येत्याशंक्याह अल्पज्ञस्यै
वेति ७ ननु व्यासादिवच्छापानुग्रहसामर्थ्यं यस्य स एव तत्त्ववित्नान्य इति शंकते शापानुग्रहेति हरति तत्रेति त
त्र हेतुमाह शापादी[illegible]ति ८॥

ननु व्यासादीनां तत्त्वविदामपि शापादिसामर्थ्यं दृश्यते इत्याशंक्य तेषां न तत्त्वज्ञानफलं अपितु तपःफलमित्याह व्या-
सादेरिति॥ ननु तर्हि तपो सा ब्रह्मविजिज्ञासस्येति अतेस्त्वयोरहितस्य तत्त्वज्ञानस्य पिन घटे इत्याशंक्य शापादिकारणाद-
ल्यस्य तस्य तपसः सत्त्वाद्दैवमित्याह शापादीति॥९॥ तर्हि तेषां व्यासादीनां तत्त्वज्ञानित्वे शापादिकारणत्वं च कथं दृश्यते
इत्याशंक्य उभयविधतपसः सद्भावादित्याह द्वयमिति॥१०॥ ननु यः शापादिसामर्थ्यरहितस्तस्य विध्यभावे विहितानु-

व्यासादेरपि सामर्थ्यं दृश्यते तपसो बलात्॥ शापादिकारणादन्यत्तपो ज्ञानस्य कारणं॥
९॥ द्वयं यस्यास्ति तस्यैव सामर्थ्यं ज्ञानयोर्जितिः॥१०॥ केचित्तु तपः कुर्वन्ति केवलं न ते फलं
॥१०॥ सामर्थ्यहीनो निंद्यश्च द्यतिभिर्विधिवर्जितः॥ निंद्यते यत्नतोप्यन्यैरनिशं भोगलंपटैः
॥११॥ त्रिदोषवस्त्वादिरहो पुर्यद्यते भोगिलक्षणे॥ अहो यतित्वमेतेषां वैराग्यभरमंथरं॥१२॥
वर्णाश्रमपरा रूढा निंदंति त्युच्यते यदि देहात्ममतयो बुद्धं निंदंत्याश्रममानिनः॥१३

ष्ठानात् निंद्यत्वं स्यादित्याशंक्य तेषामपि विषयलंपटैर्निंद्यत्वं स्यादित्याह सामर्थ्यहीन इति॥ एतेभिर्यद्भोगिलक्षद्या यं विषयान् सं-
दधयेयुरिति शंक्यते तदा तेषां पतित्वमेव द्वीये तेत्यभिप्रायेणोपहसति त्रिदोषवस्त्रादीति विषयलंपटैः पामरैरनुक्रियमाणया निंद-
या क्रियापराणां विशिष्टानां हानिर्नास्तीत्युच्यते चेत्तर्हि देहाभिमानिभिः क्रियमाणया निंदया तत्त्वविदोपि न हानिरित्याह वर्णाश्र-
मेति॥१३॥

प्रासंगिकं परिसमाप्य प्रकृतमनुसरति ॥ तदित्थमिति तत्तस्मात्कारणादित्थमुक्तेन प्रकारेण तत्त्वविज्ञाने सति साधनानुपम
र्दनाल्लौकिकव्यवहारसाधनानां मनआदीनामविलापनाल्लौकिकं राज्यादि राज्यपरिपालनादि कर्म वा ज्ञानिना सम्यगाच
रितुं शक्यमित्यर्थः ॥ ननु तत्त्वविदः प्रपंचमिथ्यात्वज्ञानेन तत्रेच्छैव नोदियादिति चेत्तर्हि स्वकर्मानुसारेण वर्ततामित्याह ॥ मि
थ्यात्वेति ॥ १४ ॥ इदानीमुपासकस्यातो वैलक्षण्यं दर्शयति ॥ उपासक इति ॥ तत्रोपपत्तिमाह ॥ यत इति ॥ यतः कारणात्तस्य ब्रह्मत्वं ध्यानेनै
व कृतं न प्रमाणेन प्रमितमतो ध्यायिना सदा ध्यानं कर्तव्यमर्थः ॥ तत्र दृष्टांतः ॥ विष्णुतादिवदिति ॥ यथा स्वास्मिन्ध्यानेन संपादितस्य विष्णुत्वा कृ४

तदित्थं तत्त्वविज्ञाने साधनानुपमर्दनात् ॥ ज्ञानिनाचरितुं शक्यं सम्यग्राज्यादिलौकिकं ॥ १४ ॥ मिथ्यात्व
बुद्ध्या तत्रेच्छा नास्ति चेत्तर्हि मास्तु तत् ॥ ध्यायत्वाथ व्यवहरत्वथारब्धं वसत्वयं ॥ १५ ॥ उपासकस्तु
सततं ध्यायन्नेव वसेत्यतः ॥ ध्यानेनैव कृतं तस्य ब्रह्मत्वं विष्णुतादिवत् ॥ १६ ॥ ध्यानेनापादनं
यत्तद्ध्यानाभावे विलीयते ॥ वास्तवी ब्रह्मता नैव ज्ञानाभावे विलीयते ॥ १७ ॥ ततोभिज्ञापकं ज्ञानं न
नित्यं जनयत्यदः ॥ ज्ञापकाभावमात्रेण नहि सत्यं विलीयते ॥ १८ ॥

देः पारमार्थिकत्वं नास्ति तद्वदित्यर्थः ॥ १५ ॥ ध्यानसंपादितस्य पारमार्थिकत्वं किं न स्यादित्याशंक्य ध्यानसंपादितस्य वाग्धेनुत्वा
देर्ध्यानापायेऽपगमदर्शनान्नैवमित्याह ॥ ध्यानेनेति ॥ ज्ञानेन प्रकाशितस्य ब्रह्मत्वस्य ततो वैलक्षण्यमाह ॥ वास्तवीति ॥ हेतुगर्भि
तविशेषणं ॥ यतो ब्रह्मत्वं वास्तवमतो ज्ञापकज्ञानाभावे सति नैव विलीयते ॥ १६ ॥ वास्तवत्वादेव ज्ञानेन नैव जन्यत इत्याह
तत इति ॥ यतोऽदो ब्रह्मत्वं नित्यं ततो ज्ञानं तस्याभिज्ञापकं इत्यर्थः ॥ तत्रोपपत्तिं व्यतिरेकमुखेनाह ॥ ज्ञापकेति ॥ अयमभिप्रायः ॥
ब्रह्मत्वं यदि ज्ञानजन्यं स्यात्तर्हि ज्ञाननाशे स्वयं विलीयते न चाविलीयते तो न जन्यत इत्यर्थः ॥ १८ ॥

ननु ज्ञातिवदुपासकस्यापि ब्रह्मत्वं वास्तवमस्त्येवेति शंकते अस्त्येवेति अत्यल्पमिदमुच्यत इत्यभिप्रायेणाह पामराणामि
ति पामरादीनां विद्यमानमपि ब्रह्मत्वमज्ञाततत्वान्न पुरुषार्थोपयोगीत्याशंक्याज्ञातत्वेनापुरुषार्थोपयोगित्वमुपासकस्यापि
समानमित्याह अज्ञानादिति ननु तर्ह्युपासनं किमर्थमभिधीयत इत्याशंक्येतरानुष्ठानेभ्यः श्रेष्ठत्वाभिप्रायेणोक्तमिति दृष्टांतपू
र्वकमाह उपवासादिति २० इतरानुष्ठानाच्छ्रैष्ठ्यमेव दर्शयति पामराणामिति २१ उत्तरोत्तरश्रैष्ठ्ये कारणमाह यावदिति निर्गुणोपा

अस्त्येवोपासकस्यापि वास्तवी ब्रह्मतेति चेत् पामराणां तिरश्चां च वास्तवी ब्रह्मता न किं १९ अज्ञानादपुमर्थत्व
मुभयत्रापि तत्समम् उपवासाद्यथा भिक्षा वरं ध्यानं तथान्यतः २० पामराणां व्यवहृतेर्वरं कर्माद्य
नुष्ठितिः ततोपि सगुणोपास्तिर्निर्गुणोपासनं ततः २१ यावद्विज्ञानसामीप्यं तावच्छ्रैष्ठ्यं विवर्द्ध
ते ब्रह्मज्ञानायते साक्षान्निर्गुणोपासनं शनैः २२ यथा संवादिविभ्रान्तिः फलकाले प्रमायते वि
द्यायते तथोपास्तिर्मुक्तिकालेतिपाकतः २३ संवादिभ्रमतः पुंसः प्रवृत्तस्यान्यमानतः प्रमेति चे

सनस्य सर्वश्रैष्ठ्ये कारणमाह ब्रह्मज्ञानायत इति उक्तमर्थं दृष्टांतप्रदर्शनपूर्वकं द्रढयति यथेति विद्यायत इति २२ ननु संवादिविभ्रा
न्तिः स्वयमेव न प्रमा भवति किंतु तया प्रवृत्तस्येंद्रियार्थसन्निकर्षात्प्रमा जायत इति शंकते संवादीति अस्तु तर्हि निर्गुणोपासनमपि
निदिध्यासनरूपं सद्वाक्यजन्यात्तु तया परोक्षज्ञाने कारणं भविष्यति इत्याह तथेति मानांतरे मानांतरे वाक्यजन्यापरोक्षज्ञाने कार
णं भविष्यतीत्यर्थः ननु त्वेवं सति मननिदिध्यासनादेरपि चित्तैकाग्रतासंपादनद्वारा अपरोक्षज्ञानसाधनत्वं स्यादिति चेत्तदप्यंगीक्रियत इत्याह ॥
मन्त्रिरिति २३ २४

तर्हि निर्गुणोपासने कोतिशय इत्यत आह ॥ तथाप्यत्रेति प्रत्यासत्तिः सामीप्यं ज्ञानं प्रतीति शेषः २५ प्रत्यासत्तिप्रकारमेव दर्शयति । निर्गुणोपासनमिति निर्गुणोपासनं यदा पक्वं भवति तदा सविकल्पकसमाधिः स्यात्ततः सविकल्पकसमाधेर्निरोधाख्यो यस्तस्यापि निरोधे सर्वनिरोधान्निर्बीजसमाधिरिति सूत्रोक्तलक्षणो निर्विकल्पकः समाधिः सोऽनायासेन लभ्यते २६ भवत्वेवं निर्विकल्पकलाभस्ततः किमित्यत आह । निरोधेति ततोपि किमित्यत आह पुनःपुनरिति अस्मिन्नसंगे वस्तुनि पुनःपुनर्वासिते भाविते सति वाक्या

मूर्तिध्यानस्य मंत्रादेरपि कारणता यदि ॥ अस्तु नाम तथाप्यत्र प्रत्यासत्तिर्विशिष्यते ॥२५॥ निर्गुणोपासनं पक्वं समाधिः स्याच्छनैस्ततः ॥ यः समाधिर्निरोधाख्यः सोऽनायासेन लभ्यते ॥२६॥ निरोधलाभे पुंसोऽन्तरसंगं वस्तु शिष्यते ॥ पुनःपुनर्वासितेऽस्मिन्वाक्याज्जायेत तत्त्वधीः ॥२७॥ निर्विकारासंगनित्यस्वप्रकाशैकपूर्णताः ॥ बुद्धौ झटिति शास्त्रोक्ता आरोहंत्यविवादतः ॥२८॥ योगाभ्यासस्त्वेतदर्थोऽमृतबिंद्वादिषु श्रुतः ॥ एवं च दृष्टद्वारापि हेतुत्वादन्यतो वरं ॥२९॥ उपेक्ष्य तत्तीर्थयात्रां जपादीनेव कुर्वतां ॥ पिंडं समुत्सृज्य करं लेढीति न्याय आपतेत् ॥३०॥

त्त्वमस्यादिलक्षणात्तत्त्वधीस्तत्त्वज्ञानमहं ब्रह्मास्मीत्येवमाकारं जायेतेत्यन्वयः ॥२७॥ तत्त्वज्ञानस्वरूपमेव विशदयति । निर्विकारेति २८ ननु निर्विकल्पकसमाधिवशादपरोक्षज्ञानमुदेतीत्यत्र किं प्रमाणमित्याशंक्यामृतबिंद्वादिश्रुतयः प्रमाणमित्याह योगाभ्यास इति ॥ फलितमाह एवमिति एवं च सति निर्गुणोपासनस्यापरोक्षज्ञानप्रत्यासत्तिसंभवे सति दृष्टद्वारापि निर्विकल्पकसमाधिलाभद्वारेणापि शब्दाददृष्टद्वारापि हेतुत्वात् ज्ञानसाधनत्वादन्यतः सगुणोपासनादिभ्यो वरं श्रेष्ठमित्यर्थः २९ एवं निर्गुणोपासनस्यापरोक्षज्ञानसाधनत्वे सिद्धे सति तत्परित्यज्यान्यत्र प्रवृत्तानां वरं यथा भ्रमः स्यादिति लौकिकन्यायप्रदर्शनेनाह उपेक्ष्येति ३०

नन्वात्मतत्त्वविचारं परित्यज्य निर्गुणोपासनं कुर्वतामप्ययं न्यायः समान इत्यंगीकरोति ॥ उपासकानामिति ॥ तर्हि निर्गुणोपा
सनं कुतः प्रतिपद्यते इत्यत आह ॥ तस्मादिति यस्मादुक्तन्यायप्रसंगस्तस्माद्विचारासंभवे योग उपासनमुक्तमित्यर्थः ॥ २१ ॥ विचारा
संभवे कारणमाह ॥ बहुव्याकुलचित्तानामिति ॥ यतो विचारो न संभवति अतो योगः कर्तव्य इत्याह ॥ योग इति ॥ मुख्यत्वे कारणमा
ह ॥ धीदर्प इति ॥ तेन योगेन यतो धीदर्पो नश्यत्यतो मुख्य इत्यर्थः ॥ २२ ॥ एवं व्याकुलचित्तानां योगस्य मुख्यत्वमभिधाय तद्दि

उपासकानामप्ययं विचारस्त्यागतो यदि ॥ वाढं तस्माद्विचारस्यासंभवे योग ईरितः ॥ २१ ॥ बहुव्या
कुलचित्तानां विचारात्तत्त्वधीर्न हि ॥ योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति ॥ २२ ॥ अव्याकु
लधियां मोहमात्रेणाछादितात्मनां ॥ सांख्यनामा विचारः स्यान्मुख्यो झटिति सिद्धिदः ॥ २३ ॥ य
त्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ २४ ॥ त
त्कारणं सांख्ययोगाभिपन्नामिति हि श्रुतिः ॥ यस्तु श्रुतेर्विरोधः आभासः सांख्ययोगयोः ॥ २५ ॥ उ ९२
पास्यनं नैति पक्वमिह यस्य परत्र स ॥ मरणे ब्रह्मलोके वा तत्त्वं विज्ञाय मुच्यते ॥ २६ ॥ ॥ ॥

तानां विचारणा वमुख्य इत्याह ॥ अव्याकुलधियामिति ॥ सांख्यनामा विचारः सांख्यशब्दवाच्यस्तत्त्वविचारो मुख्यः ॥ कुत इ
त्यत आह ॥ झटितीति ॥ २३ ॥ योगसांख्ययोरुभयोरपि तत्त्वज्ञानद्वारा मुक्तिसाधनत्वे गीतावाक्यं प्रमाणयति ॥ यदिति ॥ यः सां
ख्यं च योगं च फलत एकं पश्यति स शास्त्रार्थं सम्यक् पश्यतीत्यर्थः ॥ २४ ॥ न केवलं गीतावाक्यं किं तु तत्कलत्मता श्रुतिरप्य
स्तीत्याह ॥ तत्कारणमिति ॥ ननु सांख्ययोगयोस्तत्त्वज्ञानसाधनत्वे नांगीकारे तच्छास्त्रप्रतिपादितानां तत्त्वानामपि स्वीकार्यत्वं स्यादि
त्याशंक्याह ॥ २५ ॥ २६ ॥ ॥

यास्त्विति आत्मासौ बाध्यत इत्यर्थः ॥ ननूपासनं कुर्वाणस्य तत्त्वज्ञानादर्वाङ् मरणे सति मोक्षो नास्तीत्याशंक्याह ॥ उपास
नमिति ॥ मरणावसरे ज्ञानान्मुक्तिलाभे प्रमाणमाह ॥ यमिति यच्चित्तस्तेनैव प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथाक
ल्पितं लोकं नयतीति वाक्यादित्यर्थः ॥ ३७ ॥ ननूदाहृताभ्यां श्रुतिस्मृतिवाक्याभ्यामंतप्रत्ययतो भाविजन्माभिधीयते न ज्ञाना
न्मुक्तिरित्याशंक्य मुखतस्तथाभिधानमंगीकरोति ॥ अंतप्रत्ययत इति ॥ कथं तर्हि मरणकाले ज्ञानान्मोक्षो भवतीत्यत्रे
दं वाक्यद्वयं प्रमाणत्वेनोपन्यस्तमित्याशंक्याह ॥ तथेति ॥ तथा सति अंतप्रत्ययाद्भाविजन्मेति निश्चये सति सगुणोपासक

यं यं वापि स्मरन् भावं त्यजत्यंते कलेवरं ॥ तं तमेवैति यच्चित्तस्तेन यातीति शास्त्रतः ॥ ३७ ॥ अंतप्रत्ययतो नूनं
भाविजन्म तथा सति ॥ निर्गुणप्रत्ययोपि स्यात्सगुणोपासने यथा ॥ ३८ ॥ नित्यनिर्गुणरूपं तन्ना
ममात्रेण जायतां ॥ अर्थतो मोक्ष एवैष संवादिभ्रमवन्मतः ॥ ३९ ॥ तत्सामर्थ्याज्जायते धीर्मूलावि
द्यानिवर्तिका ॥ अविमुक्तोपासनेन तारकब्रह्मबुद्धिवत् ॥ ४० ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्य यथा मरणावसरे पूर्वाभ्यासवशात्सगुणब्रह्माकारः प्रत्ययो जायते एवं निर्गुणोपासकस्यापि निर्गुणब्रह्मगोचरः प्रत्य
यो जनिष्यत इत्यर्थः ॥ ३८ ॥ ननु निर्गुणप्रत्ययाभ्यासवशान्निर्गुणब्रह्मप्राप्तिरेव न त्वेव तन्मुक्तिरित्याशंक्य ब्रह्मप्राप्तिमुक्त्यो
शब्दमात्रेण भेदो नार्थत इत्याह ॥ नित्येति ॥ तद्ब्रह्म नित्यमिति निर्गुणमिति नाममात्रेणोच्यतामर्थतस्त्वेष मोक्ष एव स्वरूपा
वस्थितिर्मुक्तिरित्यभिधानादिति भावः ॥ तत्र दृष्टांतमाह ॥ संवादीति ॥ यथा संवादिभ्रमो नाममात्रेण भ्रम इत्युच्यते न वस्तुतस्त
त्वज्ञानमेव तद्वदित्यर्थः ॥ ३९ ॥ ननु निर्गुणोपासनस्य मानसक्रियारूपस्य मुक्तिसाधनत्वाभिधानं विरुद्धमित्याशंक्य तदन्यज्ञा

नस्य मोक्षसाधनत्वाभिधानान्न विरोध इत्याह ॥ तदिति ॥ तत्र दृष्टांतमाह ॥ अविमुक्त इति ४॰ यथा अविमुक्ते सगुणब्रह्मोपासनसामर्थ्यात्तारकब्रह्मविद्या जायते एवं निर्गुणोपासनान्निर्गुणब्रह्मज्ञानं जायत इत्यर्थः +

ननु निर्गुणोपासनस्य मोक्षः फलमित्यत्र किं प्रमाणमित्याशंक्याह सोऽकामो निष्काम आप्तकामो न तस्य प्राणा उत्क्रामंत्यत्रैव सम
व[illegible]लीयंते ब्रह्मैव सन् ब्रह्माप्येति अ[illegible] शरीरो निरिंद्रियोऽप्राणो ह्यमनाः सच्चिदानंदमात्रः स स्वराड् भवति य एवं वेदा चि[illegible]न्यो ह्युप
मोंकारश्चिन्मयमिदं सर्वं तस्मात्परमेश्वर एवैकमेतद्भवत्येतदमृतमभयमेतद्ब्रह्माभयं हि ब्रह्म भवति। य एवं वेदेति रहस्यमित्याथ
।तिबदि४ दिवाकैस्तापनीयोपनिर्गुणोपासनस्य मोक्षः फलत्वेन श्रूयत इत्यर्थः ॥४१॥ ननूपासनयापि मुक्तिः स्याच्चेन्नान्यः पंथा विद्यतेऽयना

सोऽकामो निष्काम इति ह्यशरीरो निरिंद्रियः ॥ अभयं हीति मुक्तत्वं तापनीये फलं श्रुतं ॥४१॥ उपासन
स्य सामर्थ्याद्विद्योत्पत्तिर्भवेत्ततः ॥ नान्यः पंथा इति ह्येतत् शास्त्रं वै न विरुध्यते ॥४२॥ निष्का
मोपासनान्मुक्तिस्तापनीये समीरिता ॥ ब्रह्मलोकः सकामस्य शैव्यप्रश्ने समीरितः ॥४३॥ य
उपास्ते त्रिमात्रेण ब्रह्मलोके स नीयते ॥ स एतस्माज्जीवघनात्परं पुरुषमीक्षते ॥४४॥ ॥

ष८ येति श्रुतिविरोध इत्याशंक्य विद्याव्यवधानेन मोक्षप्रदत्वाभिधानान्नाविरोध इत्याह ॥ उपासनस्येति ॥४२॥ मरणो ब्रह्मलोके वा तत्त्व
विज्ञाय मुच्यत इत्युक्तार्थे श्रुतिद्वयं प्रमाणयति ॥ निष्काम इति ॥४३॥ तत्र सोऽकामो निष्काम इत्यादिना तापनीयवाक्यं दर्शयित्वोदाहृत
म् ॥ इदानीं शैव्यप्रश्नोपनिषद्वाक्यमर्थतः पठति ॥ उपास्त इति ॥ यः पुनरेतं त्रिमात्रेणोमित्येतेनाक्षरेण परं पुरुषमभिध्यायीत
ष२ स तेजसि सूर्ये संपन्नो यथा पादोदरः ॥ त्वचा विनिर्मुच्यते ॥ एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्
माज्जीवघनात्परं पुरिशयं पुरुषमीक्षते सकामस्य ब्रह्मलोकप्राप्तिः श्रूयत इत्यर्थः ॥४४॥ ॥ ॥ ॥ ॥ ॥ ॥

तनुशैव्यप्रश्ने सकामस्य ब्रह्मलोकातिरेव प्रतीयत इत्याशंक्य तत्र तत्त्वसाक्षात्कारस्याश्रूयत इत्याह॥ स इति ब्रह्मलोकं गतः स उपा
सक एतस्माज्जीवघनात् जीवसमष्टिरूपाद्धिरण्यगर्भात्परं मुख्यं निरुपाधिकं चैतन्यं परमात्मानमीक्षते साक्षात्करोतीत्यर्थः॥ किंच
अप्रतीतिकालंबनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्चेत्यत्र कामानुसारेण फलप्राप्तिर्भवतीति प्रतिपादितं तस्माद
पि सकामस्य ब्रह्मलोकप्राप्तिरस्तीत्याह॥ अप्रतीकेति ४५ तर्हि सकामस्य तत्त्वज्ञानं कुतो जायत इत्याशंक्याह॥ निर्गुणोपास्तीति॥
इमं मानवमावर्त्तं नावर्त्तन्ते न स पुनरावर्त्तते॥ ब्रह्मणा सह ते सर्वे इत्यादिश्रुतिस्मृतिसद्भावात्तस्य पुनः संसारप्राप्तिः॥ किंतु मुक्ति

अप्रतीकाधिकरणे तत्क्रतुन्यायईरितः॥ ब्रह्मलोकफलं तस्मात्सकामस्येति वर्णितं॥ ४५॥ निर्गुणो
पास्तिसामर्थ्यात्तत्र तत्त्वमवेक्षते॥ पुनरावर्त्तते नायं कल्पांते तु विमुच्यते॥ ४६॥ प्रणवोपास्तयः
प्रायो निर्गुणा एव वेदगाः॥ क्वचित्सगुणतापुक्ता प्रणवोपासनस्य हि॥ ४७॥ परापरब्रह्म
रूप ओंकार उपवर्णितः॥ पिप्पलादेन मुनिना सत्यकामाय पृच्छते॥ ४८॥ एतदालंबनं ज्ञा
त्वा यो यदिच्छति तस्य तत्॥ इति प्रोक्तं यमेनापि पृच्छते नचिकेतसे॥ ४९॥ इह वा मरणे चास्य
ब्रह्मलोकेप्यवाप्नवेत्॥ ब्रह्मसाक्षात्कृतिः सम्यगुपासीनस्य निर्गुणं॥ ५०॥ ॥ ॥ ॥

रेवेत्याह॥ पुनरिति॥ इदानीं प्रणवोपासनप्रसंगाद्बुद्धिस्थं तद्द्वैविध्यं दर्शयति॥ प्रणवेति॥ ४७॥ द्वैविध्ये प्रमाणमाह॥
परापरेति॥ एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकार इति श्रुते तेनैवायतनेनैकतरमन्वेतीति उभयरूप
त्वं प्रतिपादितमित्यर्थः॥ ४८॥ यमेनापि कठवल्ल्यामेतदालंबनं ज्ञात्वेत्यादिना द्वैविध्यमुक्तमित्याह॥ एतदिति॥ ४९॥
उक्तमर्थमुपसंहरति॥ इह वेति॥ विचारात्तत्त्वज्ञानसंपादनासामर्थ्यान्निर्गुणब्रह्मध्यानेधिकार इत्ययमर्थः॥ ५०॥

आत्मगीतायां सम्यगभिहित इत्याह ॥ अर्थोयमिति ॥ ५१ ॥ आत्मगीतावाक्यान्येवोदाहरति ॥ साक्षादिति ॥ ५२ ॥ ध्यानस्य
सम्यग्ज्ञानोपायत्वे दृष्टांतमाह ॥ यथेति ॥ दार्ष्टांतिके योजयति ॥ मल्लाभयति ॥ ५३ ॥ व्यतिरेकेणोक्तमन्वयमुखेनाह ॥ देहोप
लमिति ॥ ५४ ॥ ज्ञानेऽसमर्थस्य ध्यानेधिकार इत्यत्र वाक्यांतरे पठति ॥ अनुभूतेरिति ॥ ध्यानाद्ब्रह्मप्राप्तौ कैमुतिकन्याय

अर्थोयमात्मगीतायामपि स्पष्टमुदीरितः ॥ विचाराक्षम आत्मानमुपासीतेति संततं ॥ ५१ ॥ साक्षात्कर्तु
मशक्तोपि चिंतयेन्मामशंकितः ॥ कालेनानुभवारूढो भवेयं फलितो ध्रुवं ॥ ५२ ॥ यथागाधनिधेर्लब्
धौ नोपायः खननं विना ॥ मल्लाभेपि तथा स्वात्मचिंतां मुक्त्वा न चापरः ॥ ५३ ॥ देहोपलमपाकृत्य
बुद्धिकुद्दालकात्पुनः ॥ खात्वा मनोभुवं भूयो गृह्णीयान्मां निधिं पुमान् ॥ ५४ ॥ अनुभूतेरभावेपि ब्र
ह्मास्मीत्येव चिंत्यतां ॥ अप्यसत्प्राप्यते ध्यानान्नित्याप्तं ब्रह्म किं पुनः ॥ ५५ ॥ अनात्मबुद्धिशैथिल्यं
फलं ध्यानाद्दिने दिने ॥ पश्यन्नपि न चेद्ध्यायेत्कोपरोस्मात्पशुर्वद ॥ ५६ ॥ देहाभिमानं विध्वस्य
ध्यानादात्मानमद्वयं ॥ पश्यन्मर्त्योमृतो भूत्वा ह्यत्र ब्रह्म समश्नुते ॥ ५७ ॥ ॥ ॥ ॥

माह ॥ अप्यसदिति ॥ उपासकस्य पूर्वमविद्यमानमपि देवत्वादिकं ध्यानात्प्राप्यते किमु स्वस्वरूपत्वेन नित्यप्राप्तं सर्वात्मकं ब्रह्म
ध्यानात्प्राप्यत इति किमुत वक्तव्यमित्यर्थः ॥ ५५ ॥ ब्रह्मध्यानफलस्य प्रत्यक्षसिद्धत्वादपि ध्यानं कर्तव्यमित्याह ॥ अनात्मेति ॥
इदानीमुपपादितमर्थं संक्षिप्य दर्शयति ॥ देहाभिमानमिति ॥ मरणशीले देहेऽहमभिमानपरित्यागात्स्वयममृतो भूत्वा

ध्यानदीपानुसंधानफलमाह ॥ ध्यानदीपमिति ५८ इतिश्रीमत्परमहंसपरिव्राजकाचार्यभारतीतीर्थविद्यारण्यमुनि
वर्यकिंकरेण रामकृष्णाख्यविदुषा विरचिता ध्यानदीपव्याख्या समाप्ता ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्व
रौ ॥ ग्रंथोऽयं नाटकदीपस्य मया संक्षिप्य वक्ष्यते १ चिकीर्षितस्य ग्रंथस्य निःप्रत्यूहपरिपूरणायाभिमतदेवतातत्वा
नुस्मरणलक्षणं मंगलमाचरन्नादावधिकारिणमनायासेन निःप्रपंचब्रह्मात्मतत्वप्रतिपत्तिसिद्धये अध्यारोपापवादाभ्यां
निःप्रपंचं प्रपंच्यते शिष्याणां बोधसिद्ध्यर्थं तत्वज्ञैः कल्पितः क्रमः इति न्यायमनुसृत्यात्मन्यारोपयंस्तावदाह ॥ परमेति ॥ सर्वस्वेदं ॥

ध्यानदीपमिमं सम्यक्परामृशति यो नरः ॥ मुक्तसंशय एवायं ध्यायति ब्रह्म संततं ५८ इति श्रीध्या
नदीपः समाप्तः ॥ परमात्माद्वयानंदपूर्णः पूर्वं स्वमायया ॥ स्वयमेव जगद्भूत्वा प्राविशज्जीवरूप
तः १ विष्ण्वाद्युत्तमदेहेषु प्रविष्टो देवताऽभवत् ॥ मर्त्याद्यधमदेहेषु स्थितो भजति देवतां २

स्वा

प्रागद्वयानंदपूर्णः सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं विज्ञानमानंदं ब्रह्म ॥ पूर्णमदः पूर्णमिदमित्यादिश्रुतिप्रसि
द्धः स्वगतादिभेदशून्यः परमानंदरूपः परिपूर्णः परमात्मा स्वमायया ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुत्यु
क्तया स्वशक्तिस्वरूपया शक्त्या स्वयमेव जगद्भूत्वा तदात्मानं स्वयमकुरुत सच्च त्यच्चाभवदित्यादिश्रुतेः स्वयमेव जगदाकारतां प्राप्य जी
वरूपतः प्राविशत् तत्सृष्ट्वा तदेवानुप्राविशत् अनेन जीवेनात्मनानुप्रविश्येत्यादिश्रुतेः जीवरूपेणैव प्रविष्टवानित्यर्थः १ न
नु परमात्मनाऽप्येकस्य सर्वशरीरेष्वनुप्रविष्टत्वे पूज्यपूजकादिभावेन प्रतीयमान उत्तमाधमभावो विरुद्ध्येतेत्याशंक्याह ॥ विष्ण्वादी
ति नायं स्वाभाविक उत्तमाधमभावः किंतु शरीरोपाधिनिबंधनो तो न विरोध इति भावः २ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इत्यमात्मन्यध्यारोपं संक्षेपेण प्रदर्श्य ससाधनं तदपवादं संक्षिप्य दर्शयति । अनेकेति । अनेकजन्मभजनात् अनेकेषु जन्मसु अनुष्ठितानां कर्मणां ब्रह्मणि समर्पणरूपाद्भजनात् स्वविचारं स्वस्यात्मनो ब्रह्मरूपस्य ज्ञानसाधनं श्रवणादिकं चिकीर्षति कर्त्तुमिच्छति । ततः स्वविचारेण विचारजनितज्ञानेन मायायां स्वस्याद्वयानंदत्वादिरूपाच्छादिकायामज्ञानाविद्यादिशब्दवाच्यायां विनष्टायां निवृत्तायां सत्यां स्वयमद्वयानंदपूर्णः परमात्मैवावशिष्यते । ननु तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते इत्यादिश्रुतिभिर्बंधनिवृत्तिलक्षणस्य मोक्षस्य ज्ञानफलत्वाभिधानात् परमात्मावशेषणस्य तत्फलताभिधानमनुपपन्नमित्याशंक्याह । अद्वयानंदेति ।

अनेकजन्मभजनात्स्वविचारं चिकीर्षति । विचारेण विनष्टायां मायायां शिष्यते स्वयं ३ अद्वयानंदरू
पस्य सद्वयत्वं च दुःखिता । बंधः प्रोक्तः स्वरूपेण स्थितिर्मुक्तिरितीर्यते ४ अविचारकृतो बंधो विचारे
ण निवर्त्तते । तस्माज्जीवपरात्मानौ सर्वदैव विचारयेत् ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अद्वितीये ब्रह्मणि वास्तवस्य बंधस्य मोक्षस्य वा दुर्निरूपत्वात् दुःखित्वादिरूपमेवं बंधः स्वरूपावस्थितिलक्षणा तन्निवृत्तिरेव मोक्षो तो न श्रुतिविशेष इति भावः ४ ननु कर्मणैव हि संसिद्धिमास्थिता जनकादय इति स्मृतेर्मोक्षस्य कर्मसाधनत्वावगमात् किमनेन विचारजनितज्ञानेनेत्यत आह । अविचारेति । विचारप्रागभावोपलक्षिताज्ञानकृतस्य बंधस्य न विचारजन्यज्ञानानादन्यतो निवृत्तिरुपपद्यते । उदाहृतस्मृतौ च संसिद्धिशब्देन चित्तशुद्धिरेवाभिधीयते न मोक्ष इति भावः । विचारेण बंधनिवृत्तिरुक्ता किंविशेषयेण विचारेणेत्यत आह । तस्मादिति । तत्त्वसाक्षात्कारपर्यंतं सर्वदा विचारं कुर्यादित्यर्थः ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तत्र जीवस्वरूपं तावन्निरूपयति अहमिति। चिदाभासविशिष्टोऽहंकारो व्यवहारदशायां देहादावहमित्यभिमन्यते। असौ
कर्त्ता कर्त्तृत्वादिधर्मविशिष्टो जीव इत्यर्थः॥ तस्य किं करणमित्यपेक्षायामाह तस्येति। कामादिवृत्तिमानंतःकरणभागो मनः॥
करणस्य क्रियाव्याप्तत्वात्तत्क्रियां दर्शयति तस्येति॥६॥ अनयोः स्वरूपं विषयं च विविच्य दर्शयति अंतर्मुखाहमिति इदमित्ये
बिति वहिर्वृत्तिः स्वरूपाभिनयः। अवशिष्टेन विषयप्रदर्शनं बाह्यं देहाद्बहिर्वर्त्तमानामिदं तया निर्दिश्यमानं वस्त्वंगुलिरेखेन विष
यी कुर्यादित्यर्थः॥७॥ ननु मनस एव सर्वव्यवहारसिद्धौ चक्षुरादिवैयर्थ्यं प्रसज्येतेत्याशंक्याह इदम इति। मनसा इदमिति सामान्य

अहमित्यभिमंता यः कर्त्तासौ तस्य साधनं। मनस्तस्य क्रिये अंतर्वहिर्वृत्ती क्रमोत्थिते॥६॥ अंतर्मुखाहमित्येषा
वृत्तिः कर्त्तारमुल्लिखेत्। वहिर्मुखेदमित्येषा वाह्यं वस्त्विदमुल्लिखेत्॥७॥ इदमो ये विशेषास्युर्गंधरूपरसादयः॥
असांकर्येण तान्भिंद्यात् घ्राणादींद्रियपंचकं॥८॥ कर्त्तारं च क्रियां तद्वद्व्यावृत्तविषयानपि॥ स्फोरयेदेक
यत्नेन योसौ साक्ष्यत्र चिद्वपुः॥९॥ ईक्षे शृणोमि जिघ्रामि स्वादयामि स्पृशाम्यहं। इति भासयते सर्वं नृत्यशाला
स्थदीपवत्॥१०॥

मात्रं गृह्यते न तु तद्विशेषो गंधादिः अतस्तद्ग्रहणे घ्राणादिकमुपयुज्यत इत्यर्थः॥८॥ एवं सोपकरणं जीवस्वरूपं निरूप्य परमात्मा
नं निरूपयति कर्त्तारमिति। कर्त्तारं पूर्वोक्तमहंकाररूपं क्रियामहमिदमात्मकमनोवृत्तिरूपां व्यावृत्तविषयानपि व्यावृत्तानन्यो
न्यविलक्षणान् घ्राणादिग्राह्यान् गंधादीन् विषयांश्च एकयत्नेन योसौ युगपदेव यश्चिद्वपुश्चिद्रूप एव सन् स्फोरयेत् प्र
काशयेदसौ अत्र वेदांतशास्त्रे साक्षीत्युच्यत इत्यर्थः॥९॥ साक्षिण एकयत्नेन सर्वस्फोरकत्वमभिनीय दर्शयति ईक्षे रूपमहं पश्यामी
त्येवं द्रष्टृदर्शनदृश्यलक्षणां त्रिपुटीमेकयत्नेन भासयते। एवं शृणोमीत्यादावपि योज्यं। युगपदविकारित्वेनानेकावभासकत्वे दृष्टां

अहंकारो

दृष्टांतं स्फुटयति ॥ नृत्यशालास्थित इति ॥ अविशेषेण प्रभ्वादिविषयविशेषावभासनाय च हर्षादिविकारमंतरेणेति
पावत् ॥ ११ ॥ दार्ष्टांतिके योजयति ॥ अहंकारमिति ॥ सुषुप्त्यादौ अहंकाराद्यभावेपि तत्साक्षि तथा भात्येवेत्यर्थः ॥ १२ ॥ ननु प्रकाश
रूपाया बुद्धेरेवाहंकारादिसर्वावभासकत्वसंभवात् तद्व्यतिरिक्तसाक्षिकल्पनया इत्याशंक्याह ॥ निरंतरमिति ॥ कूटस्थेऽवि
विकारे साक्षिणि ज्ञप्तिरूपतः स्वप्रकाशचैतन्यरूपतया निरंतरं भासमाने सदा स्फुरति सति इयं बुद्धिस्तद्भासा तस्य साक्षिणः स्व

नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीं ॥ दीपयेदविशेषेण तदभावेपि दीप्यते ॥ ११ ॥ अ
हंकारं धियं साक्षी विषयानपि भासयेत् ॥ अहंकाराद्यभावेपि स्वयं भात्येव पूर्ववत् ॥ १२ ॥ नि
रंतरं भासमाने कूटस्थे ज्ञप्तिरूपतः ॥ तद्भासा भास्यमानेयं बुद्धिर्नृत्यत्यनेकधा ॥ १३ ॥ अ
हंकारः प्रभुः सभ्या विषया नर्तकी मतिः ॥ तालादिधारीण्यक्षाणि दीपः साक्ष्यवभासकः ॥ १४ ॥

रूपं चैतन्येन भासमाना प्रकाश्यमानेयं बुद्धिरनेकधा घटोयमित्यादिज्ञानाकारेण नृत्यति विक्रियते ॥ अयं भावः ॥ यतो बुद्धेर्विकारि
तया जडत्वात् स्वतः स्फूर्तिराहित्यमतस्तदतिरिक्तः सर्वावभासकः साक्षी अभ्युपगंतव्य इति ॥ १३ ॥ उक्तमर्थं श्रोतृबुद्धिसौकर्या
य नाटकत्वेन रूपयति ॥ अहंकार इति ॥ विषयभोगसाकल्यवैकल्याभिमानप्रयुक्तहर्षविषादवत्त्वान्नृत्याभिमानिप्रभुतुल्य
त्वमहंकारस्य परिसरवर्तित्वेपि विषयाणां तद्राहित्यात्सभ्यपुरुषसाम्यं नानाविधविकारवत्त्वान्नर्तकीसाम्यं धियः ॥ धीवि
क्रियाणामनुकूलव्यापारवत्त्वात्तालादिधारिसमानत्वमिंद्रिया
मेतत्सर्वावभासकत्वात्साक्षिणो दीपसादृश्यमिति द्रष्टव्यं ॥ १४ ॥

नच साक्षिणोऽप्यहंकारादिवद्भासकत्वे तेन तेन संबंधादागमापायरूपविकारवत्त्वं स्यादित्याशंक्याह स्वस्थानेति दीपो यथा गमनादिविकाररहितः स्वदेश एव स्थित एव सन् स्वसंनिहितान् अखिलपदार्थानवभासयति तद्वत्साक्ष्यपीति भावः १५ ननु साक्षिणो वहिरन्तरे च भासकत्वाभिधानमनुपपन्नमपरिच्छिन्नस्य परमनन्तरमवाह्यमिति श्रुत्या तस्य वाह्याभ्यंतरविभागाभावाभिधानादित्याशंक्याह वहिरिति कस्य वाह्यत्वं कस्यांतरत्वमित्यत आह विषया इति १६ ननु स्थिरस्थायी तथा साक्षी वहिरंतः प्रकाशयेदित्यविकारिणः सतो वहिरंतरभासकत्वोक्तिरयुक्ता हं घटं पश्यामीत्यजाहमित्यंतरहंकारसाक्षितया प्रथमतो भासकस्या

स्वस्थानसंस्थितो दीपः सर्वतो भासयेद्यथा ॥ स्थिरस्थायी तथा साक्षी वहिरंतः प्रकाशयेत् ॥ १५ ॥ वहिरंतर्विभागोयं देहापेक्षो न साक्षिणि ॥ विषया वाह्यदेशस्था देहस्यांतरहंकृतिः ॥ १६ ॥ अंतस्था धीः सहैवाक्षैर्वहिर्याति पुनः पुनः ॥ भास्यबुद्धिस्थचांचल्यं साक्षिण्यारोप्यते वृथा ॥ १७ ॥ गृहांतरगतः स्वल्पो गवाक्षादातपोऽचलः ॥ तत्र हस्ते नर्त्यमाने नृत्यतीवातपो यथा ॥ १८ ॥

नन्वरं घटं पश्यामीति घटाकारवृत्तिस्फुरणरूपेण वहिर्निर्गमानुभवादित्याशंक्याह अंतस्था धीरिति दृक्कुर्ग्राहकत्वेन देहांतरवस्थिता बुद्धिः रूपादिग्रहणाय चक्षुरादिद्वारा भूयो भूयो निर्गच्छति तथा च तन्निष्ठं चांचल्यं तद्भासके साक्षिण्यारोप्यते इतो न वास्तवं साक्षिणश्चांचल्यमिति भावः १७ भासके भास्यचांचल्यारोपः क्व दृष्ट इत्याशंक्याह गृहांतरगत इति गवाक्षाद्गृहांतरागतः स्वल्पातपोऽचल एव वर्त्तते तत्र तस्मिन्नातपे पुरुषेण हस्ते नर्त्यमाने इतस्ततश्चाल्यमाने यथा तपोऽनृत्य

दार्ष्टांतिकमाह । निजस्थानेति १९ । निजस्थान इत्यनेन किं वा बाह्यादिदेशस्य त्वमेवोच्यते नेत्याह नवाह्यो नांतर इति न च देहे
माहा बुद्धेरिति तर्हि किं विवक्षितमित्यत आह बुद्ध्यादीति आदिशब्देनेंद्रियादयो गृह्यंते संशांतिशब्देन तत्प्रतीत्युपरतिर्विवक्षि
त २० ननु सर्वव्यवहारोपरतौ देशाव नोपलभ्यते कुतस्तज्जित्वमुच्यत इत्याशंक्य स्वाभिप्रायमाविष्करोति देश इति देशा
दिकल्पनाधिष्ठानस्य स्वातिरिक्तदेशापेक्षा नास्तीति भावः ननु देशाद्यभावे शास्त्रे सर्वगतत्वसर्वसाक्षित्वाद्युक्तं विरुध्येतेत्य

निजस्थानस्थितः साक्षी बहिरंतर्गमागमौ अकुर्वन्बुद्धिचांचल्यात्करोतीव तथा तथा १९ न बाह्यो
नांतरः साक्षी बुद्धेर्देशौ हि तावुभौ बुद्ध्याद्यशेषसंशांतौ यत्र भात्यस्ति तत्र सः २० देशः कोपि न भासेत य
दि तर्ह्यस्य देशभाक् सर्वदेशप्रक्लृप्त्यैव सर्वगत्वं न तु स्वतः २१ अंतर्बहिर्वा सर्वं वा यं देशं परिकल्प
येत् बुद्धिस्तद्देशगः साक्षी तथा वस्तुषु योजयेत् २२ यद्यद्रूपादि कल्प्येत बुद्ध्या तत्तत्प्रकाशयेत् तस्य त
७ स्य भवेत्साक्षी स्वतो वाग्बुद्ध्यगोचरः २३ कथं तादृङ्मया ग्राह्य इति चेन्मैव गृह्यतां सर्वग्रहोपसंशांतौ स्व

तत्राह सर्वदेशेति स्वाभाविकत्वमेव किं तस्यादित्यत आह न त्विति अद्वितीयत्वादसंगत्वाच्चेति भावः २१ सर्वगतत्ववत्सर्वसाक्षि
त्वमपि न वास्तवमित्याह अंतर्बहिरिति २२ तथा वस्तुषु योजयेदित्येतत्प्रपंचयति यद्यदिति तर्हि किं तस्य निजरूपमित्यत आ
ह स्वत इति २३ अवाङ्मनसगोचरत्वे मुमुक्षुणा न गृह्यतेति शंकते कथमिति अग्राह्यत्वमिष्टमेवेत्याह मैव गृह्यतामिति न चा
त्मनो ग्राह्यत्वाभावे विचारेण विनष्टायां मायायां शिष्यते स्वयमित्युक्तपरमात्मविशेषणं न सिध्येदित्यत आह सर्वग्रहेति स्वात्मा
तिरिक्तस्य द्वैतस्य मिथ्यात्वनिश्चयेन तत्प्रतीत्युपशांतौ स्वात्मैव

न्या॰

यद्यप्युक्तं येन साक्षात्परिशिष्यते तथापि तद्दोषरोधाय किं चेत्प्रमाणमपेक्षितमित्यत आह नेति तत्र हेतुमाह स्वप्रकाशेति तत्त्वा
त्मा स्वप्रकाशतया स्वतःस्फूर्तौ मानानपेक्षा तर्हि तद्व्युत्पत्तिसिद्ध्यै मानमपेक्षितमित्याशंक्य श्रुतिरेवात्र प्रमाणमित्याह तादृगि
ति २५ एवमुत्तमाधिकारिण आत्मानुभवोपायमभिधाय मंदाधिकारिणस्तं दर्शयति यदीति बुद्धिशरणत्वे किं फलमित्यत
आह तदधीन इति बुद्ध्याध्यस्तत्वात्परिकल्प्यते बाह्यमांतरं वा तस्य साक्षित्वेन तदधीनः परमात्मा तथैवानुभूयतामित्यर्थः
२६ इति श्रीनाटकदीपव्याख्यानं समाप्तं नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ब्रह्मानंदाभिधं ग्रंथं कुर्वे बोधाय सिद्धये १

न तत्र मानापेक्षास्ति स्वप्रकाशस्वरूपतः ॥ तादृग्व्युत्पत्त्यपेक्षा चेच्छ्रुतिं पठ गुरोर्मुखात् ॥ २५ ॥ यदि
सर्वग्रहत्यागोऽशक्यस्तर्हि धियं व्रज ॥ शरणं तदधीनोऽन्तर्बहिर्वैषोऽनुभूयताम् ॥ २६ ॥ इति वि
द्यारण्यविरचितो नाटकदीपः समाप्तः ॥ ब्रह्मानंदं प्रवक्ष्यामि ज्ञाते तस्मिन्नशेषतः ॥ ऐहि
कामुष्मिकानर्थव्रातं हित्वा सुखायते १ ॥ ॥

चिकीर्षितस्य ग्रंथस्य निःप्रत्यूहपरिहरणाय प्रारिप्सितकल्मषनिवृत्तये इष्टदेवतानुसंधानलक्षणं मंगलमाचरन्
श्रोतृप्रवृत्तिसिद्ध्यै सप्रयोजनमभिधेयमाविष्कुर्वन् ग्रंथारंभं प्रतिजानीते ब्रह्मानंदमित्यादिना सविशेषब्रह्मस्वरूपा
णां देवतानां ततस्य निर्विशेषब्रह्मरूपताभिधानाद् ब्रह्मणश्चानंदो ब्रह्मेत्यादिश्रुतिभिरानंदरूपताभिधानाद् ब्रह्मानं
दमित्यानंदरूपस्य ब्रह्मणो वाचकशब्दप्रयोगेण यद्धि मनसा ध्यायति तद्वाचा वदतीति श्रुत्युक्तन्यायेन ब्रह्मानुसं
धानलक्षणं मंगलाचरणं सिद्धं ब्रह्मणः सर्ववेदांतप्रतिपाद्यत्वात्तत्प्रकरणेऽनुरूपस्यापि देवविषयत्वाद् ब्रह्मशब्दप्रयो

दैहिकामुष्मिकानर्थव्रातं हित्वा सुखायते इत्युक्ते नानिवृत्तीष्टप्राप्तिरूपं प्रयोजनद्वयमुक्तं तत्र वोक्तं ब्रह्मानंदं ब्रह्मयासा
नानंदश्चेति ब्रह्मानंदः वाच्यवाचकयोरभेदोपचारात्प्रतिपादको ग्रंथो ब्रह्मानंदस्तं प्रवक्ष्यामि तस्मिन्प्रतिपाद्यप्रतिपादकरूपे
ब्रह्मानंदे ज्ञाते ऽवगते सति ऐहिकामुष्मिकानर्थव्रातमैहिकानामिहलोकसंबंधिनां देहपुत्रादिष्वहंममाभिमानप्रयुक्तानामाध्यात्मि
कादितापानामामुष्मिकानाममुष्मिन्परलोके भवानां च तेषामनर्थानां व्रातः समूहस्तमशेषतो निरवशेषं यथा भवति तथा हि
त्वा परित्यज्य सुखायते सुखरूपं ब्रह्मैव भवति २ ब्रह्मज्ञानस्यानिष्टनिवृत्तीष्टप्राप्तिहेतुत्वे च मूलं श्रुतिस्मृतिवाक्यानि प्रमाणानि
८२ संतीति प्रदर्शयितुकामस्तावद्ब्रह्मविदाप्नोति परं श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि
तं मा भगवाञ्छोकस्य पारं तारयत्विति च वाक्यद्वयमर्थतः पठति ब्रह्मविदिति ब्रह्म वेत्तीति ब्रह्मवित्परमुत्कृष्टमानं

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मंदास्तेऽनुकंप्यंते सविशेषनिरूपणैः ॥२॥
ब्रह्मवित्परमाप्नोति शोकं तरति चात्मवित्। रसो ब्रह्म रसं लब्ध्वानंदी भवति नान्यथा ॥३॥

नंदरूपं ब्रह्म प्राप्नोति आत्मवित् आत्मशब्दवाच्यं देशकालवस्तुपरिच्छेदशून्यमात्मानं वेत्तीत्यात्मवित् शोकं स्वस्वरूप
तत्त्वं शोचयतीति शोकस्तमोमूलः संसारस्तं तरत्यतिक्रामति तदुदाहृतं तैत्तिरीयकश्रुतिवाक्यं ब्रह्मज्ञानस्य परप्रा
प्तिहेतुत्वेनाभिमते नानंदप्राप्तिहेतुती तथा शक्यानंदप्राप्तिहेतुत्वप्रतिपादनपरं रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति
तदीयमेव वाक्यमर्थतः पठति रसेति सत्यं ज्ञानमनंतं ब्रह्म तस्माद्वा एतस्मादात्मन आकाशः संभूत इति प्रकरणादौ ब्रह्मात्म
शब्दाभ्यामभिहितो य आत्मा स रसः सार आनंदरूप इत्यर्थः रसमानंदरूपं लब्ध्वा ब्रह्माहमस्मीति ज्ञानेन प्राप्यानंदी भ

एवमन्वयमुखेनैतस्यानिवृत्तिनिवृत्तिप्रतिपादनपराणि वाक्यानि प्रदर्श्यान्वयव्यतिरेकाभ्यामनर्थनिवृत्तिप्रदर्शनपरं यदा ह्ये
वैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति॥ यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवा
तीति वाक्यद्वयमर्थतोऽनुक्रामति प्रतिष्ठामिति अस्य चायमर्थः यदा यस्मिन्काले हीति विद्वत्प्रसिद्धिप्रदर्शनपरो निपातः एष इत्ययमेवा
न्वयनिवृत्त्युपायो नान्य इति नियमार्थः एष मुमुक्षुरेतस्मिन्नविद्वदवगम्ये दृश्ये इन्द्रियागोचरे अनात्म्ये अनात्मीये स्वरूपतया स्व
कीयत्वरहिते निरुक्ते निरुक्तं निर्वचनं शब्देनाभिधानं यज्ञास्ति तदेतन्निरुक्तं तस्मिन्ननिरुक्ते अनिलयने निलयनं निलीयतेऽस्मिन्निति निलयन

प्रतिष्ठां विन्दते स्वास्मिन्यदास्यादेष सोऽभयः॥
कुरुतेऽस्मिन्नन्तरं चेदथ तस्य भयं भवेत्॥४॥ उदरमन्तरं कुर्वतः अदृष्टमिति पाठ॥ ४

मेदाधारः स न विद्यते यस्मिन् तस्मिन्नुच्यमहिम्नि स्थित इत्यर्थः अभयं द्वितीयाद्वै भयं भवतीति श्रुतेः भयशब्देनाभयहेतुर्भेदो लक्ष्यते न
विद्यते भयं भेदो यया भवति तथा प्रतिष्ठां प्रकर्षेण संशयविपर्ययराहित्येनास्थितिः ब्रह्माहमस्मीत्यवस्थानं प्रतिष्ठां विन्दते लभते
सत्यादिनाश्रवणादिकं कृत्वा लभते अथ तदानीमेव स एवं विद्वानेभयं भयरहितं मोक्षरूपमद्वितीयं ब्रह्म गतः प्राप्तो भवति ब्र
अरमुत ह्मवेद ब्रह्मैव भवतीति श्रुतेः यदा यस्मिन्नेव काले एष एवोक्ते तस्मिन्नदृश्यत्वादिगुणके प्रत्यगभिन्ने ब्रह्मणि उ इति निपा
तोऽपिशब्दार्थः अल्पमपि अन्तरमुपास्योपासकादिभेदलक्षणं कुरुते पश्यति ध्यानं तामनेकार्थत्वात् अथ तदानीमेव तस्य भेद

त्मेददर्शिनां भयं भवतीत्येतद्दृढीकर्तुं ब्रह्मात्मैकत्वज्ञानरहितानां वाय्वादीनां भयप्रदर्शनपरं भीषास्माद्वातः पवत इत्या
दिमंत्रमर्थतः पठति ॥ वायुरिति ॥ वाय्वादयो जगन्नियामकत्वेन प्रसिद्धाः पंचापि देवता अतीते जन्मनि धर्ममिश्रोपकर्षरूढाणां जातं
तोपि ज्ञानपूर्वकमनुष्ठितवंतोपि अंतरं प्रत्यगभिन्नब्रह्मणो भेदं कृत्वास्माद्ब्रह्मणो भीत्यास्मिन्वाय्वादिजन्मनि चरंति स्वस्वव्यापारे प्रस
दा प्रवर्तंते हि शब्देन भयादस्याग्निस्तपति भयात्तपति सूर्यो भयादिंद्रश्च मृत्युर्धावति पंचम इति करश्रौतोपमेनोक्तां प्रसिद्धिं दर्शयति ॥
५ न तु तरति शोकमात्मवित् इत्यादिषु वेदांतवाक्येषु ब्रह्मानंदज्ञानस्यानर्थनिवृत्तिहेतुत्वस्य स्फुटं नावभासत इत्याशंक्य तथा प्र

वायुः सूर्यो वह्निरिंद्रो मृत्युर्जन्मांतरेंऽतरम् ॥ कृत्वा धर्मं विजानंतोऽप्यस्माद्भीत्या चरंति
हि ॥ ५ ॥ आनंदे ब्रह्मणो विद्वान्न बिभेति कुतश्चन ॥ एवमेव तपेन्नैषा चिंता कर्माग्निसंभृता ॥ ६ ॥

तिपादनपरं वाक्यमुदाहरति ॥ आनंदमिति राहोः शिर इतिवद्भेदव्यपदेश औपचारिकः ब्रह्मणः स्वरूपभूतमानंदं विद्वानपरोक्ष प२
तया जानन् पुरुषः कुतश्चन कस्मादपि ऐहिकाद्भयहेतोर्व्याघ्रादेः पारलौकिकभयहेतोः पापादेर्वा न बिभेति भयं न प्राप्नोति
तत्त्वतत्त्वविदः पापाद्भयं नास्तीत्येतत्कुतोऽवगम्यत इत्याशंक्य तत्प्रतिपादकं एतं ह वाव न तपति किमहं साधु नाकरवं किमह
पापमकरवमिति वाक्यमर्थतः पठति ॥ एवमेवेति ॥ कर्माग्निसंभृता पुण्यपापरूपकर्माग्निः करणाकरणाभ्यामग्निवत्संता
पहेतुत्वात्तेन संभृता संपादिता एषा पुण्यं नाकरवं कस्मात्पापं कृतवान् कुत इत्येवंरूपा चिंता एतमेव न तपेत् न संता
पयेत् नान्यं ब्रह्मविद्वांसं सत्वनाचित्तया सदा संतप्यत इत्यर्थः ॥ ६ ॥

पुण्यपापयोरतापकत्वे हेतुप्रदर्शपरं सयएवंविद्वानेतेआत्मानं स्पृणुते उभे ह्येवैष एते आत्मानं स्पृणुत इति वाक्यद्वयमर्थ-
तः पठति ॥ एवमिति ॥ स य एवं कश्चित्पुमानेव मुक्ते तस्य आचार्यपुरुषोपश्रो सावादित्येस एकरत्वेनेन प्रकारेण विद्वान्जानन्वर्त-
ते सएते पुण्यपापे हित्वेत्यध्याहारः आत्मानं ब्रह्माभिन्नं प्रत्यंचं स्पृणुते प्रीणयति स्वदास्मरेत् इत्यर्थः ॥ यतः पुण्यपापयोर्मिथ्या-
त्वानुसंधानेन हानं कृतं अतस्तद्विषयाचिंतेव नास्ति कुतस्तन्निमित्तकतापकत्वमित्यभिप्रायः ॥ किंच एषविद्वानेते एवंवेत्ते उभे पुण्यपा-
परूपे कर्मणी दे हे द्वियादि इत्यत्याजनितेस्वात्मरूपेणैवेदं सर्वपदयमात्मेत्यादिवाक्योक्तप्रकारेण पश्यति जानातीत्यर्थः ॥
अतः स्वात्माभिन्नत्वादप्यतापकत्वमिति भावः ॥ ननु नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि इत्यादिशास्त्रस्मृद्धावाद नादौ संसारे

एवं विद्वान्कर्मणी द्वे हित्वात्मानं स्मरेत्सदा कृते च कर्मणी स्वात्मरूपेणैव स पश्यति ॥ ७ ॥ भिद्यते हृदयग्रं-
थिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ८ ॥

बहुजन्मोपार्जितेषु पुण्यापुण्यफलहेतुषु कर्मस्वसंख्यातेषु प्रसिद्धत्वेनात्मतयानुसंधानयोग्येषु सत्सु कथं तद्विषयाचिंतानभवे-
त् इत्याशंक्य संचितानां तेषां तत्त्वज्ञानेन विनाशितत्वात्ताचिंताजनकत्वमित्यभिप्रायेण हृदयग्रंथ्यादि निखिलं परं मुंडकादिश्रुति-
षु स्थितं वाक्यं पठति ॥ भिद्यत इति ॥ परावरे परमपि हिरण्यगर्भादिकपदमवरं निकृष्टं यस्मात्तस्मिन्परात्मनि दृष्टे साक्षात्कृते अस्य
साक्षात्कारवतो हृदयस्य बुद्धेश्चिदात्मनश्च ग्रंथिवद्दृढसंश्लेषरूपत्वाद्ग्रंथिरन्योन्याध्यासो भिद्यते विदीर्यते विनश्यतीत्यर्थः ॥ सर्व-
संशयाः आत्मा देहादिव्यतिरिक्तो न वा व्यतिरिक्तोपि कर्तृत्वादिधर्मयोगी न वा अकर्तृत्वेपि तस्य ब्रह्मणो भेदोस्ति न वा भेदेपि तज्ज्ञानं क-
र्मादिसहितं मुक्तिसाधनं केवलं वेत्यादयश्छिद्यंते द्वैधीक्रियंते तत्त्वतः साक्षात्कृतस्य वस्तुनः संशयविपर्ययविषयत्वादर्शनादिति अ

तन्नु कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ॥ एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इत्यादिश्रुतेः ॥ कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥ यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतं एवं तपश्च विद्या च संयुक्तं तद्भेषजं महदित्यादिस्मृतेश्च केवलस्य वा ज्ञानसमुच्चितस्य वा कर्मणो मुक्तिहेतुत्वं स्यादित्याशंक्योदाहृतवाक्यस्य लेपशब्दस्य पापनिवृत्तिपरत्वात् संसिद्धिशब्देन च ज्ञानसाधनचित्तशुद्ध्यभिधानाद् विद्याशब्देन चोपासनाया विवक्षितत्वान्न कर्मणो मुक्तिसाधनत्वमित्यभिप्रायेण साधनांतरनिषेधपरं ॥ तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्वेताश्व

तमेव विद्वानत्येति मृत्युं पंथा न चेतरः ॥ ज्ञात्वा देवं पाशहानिः क्षीणैः क्लेशैर्न जन्मप्राप्तिः ९ ॥

तरवाक्यमर्थतः पठति ॥ तमेवेति ॥ तं पूर्वोक्तं परमात्मानं विद्वानेव मृत्युं संसारमत्येति ॥ अतिक्रामति ॥ इतरः समुच्चयरूपः केवलकर्मरूपो वा पंथा मार्गो मोक्षोपायो न च नैव विद्यते ॥ ननूदाहृतासु श्रुतिष्वन्वयव्यतिरेकाभ्यां मेदिकानिरूपणेरेव प्राधान्येनावभासते न तु मुक्तिकीत्याशंक्य मुक्तिकस्यापि तस्य जन्मादिजन्मपूर्वकत्वात्तस्य तन्निदानस्याभावप्रतिपादकं ॥ ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिरिति श्वेताश्वतरवाक्यमर्थतः पठति ॥ ज्ञात्वेति ॥ देवं स्वप्रकाशप्रत्यगभिन्नं ब्रह्म ज्ञात्वा परोदाततयानुभूयास्थितस्य कामक्रोधादीनां सर्वेषां पाशानां हानिर्भवति ॥ तैः पापशब्दाभिधेयै रागादिभिः क्लेशैः क्षीणैर्नष्टैर्विजन्महेतुकर्मारंभायोगात्तन्न प्राप्नोतीत्यर्थः ॥ २ ॥ ॥ ॥ ॥

ननु शोकतरणादिफलं श्रुतयएवतानुरूपयते ज्ञानिनामपि इष्टानिष्टप्राप्तेः परिहारार्थं प्रवृत्तिदर्शनादित्याशंक्य दृष्टापरोक्षा
ज्ञानिनां तदभावप्रतिपादनपरमध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति कठश्रुतिवाक्यमर्थत पठति देवमि
ति धैर्यवान् ब्रह्मचर्यादिसाधनसंपन्नो देवं चिदानंदानंदादिलक्षणं मत्वावगम्यात्रैवास्मिन्नेव जन्मनि हर्षशोकौ जहाति ए
तमेवतपेन्नेत्याविज्ञाकर्माज्ञिस्मरते त्युक्तार्थविशेषप्रदर्शपरं नैनं कृताकृते तपत इति याज्ञवल्क्यब्राह्मणवाक्यमर्थतः पठ
ति नैनमिति सर्वञ्च कृतं पुण्यं कृतं च पापं तत्वविदस्तापहेतुर्न भवतीत्युक्तं इह कृतमकृतं च पुण्यपापं तथाविधं तापकं नेत्य

देवं मत्वा हर्षशोकौ जहात्यत्रैव धैर्यवान् ॥ नैनं कृताकृते पुण्यपापे तापयतः क्वचित् ॥१॥
इत्यादिश्रुतयो बह्व्यः पुराणैः स्मृतिभिः सह ॥ ब्रह्मज्ञानेनर्थहानिमानंदं चाप्यघोषयन् ॥११॥

वतीत्युच्यते इति विशेषः तथाहि तापो नामाचित्तविकारविशेषः पुण्यं कृतं सत्स्वर्षलक्षणं विकारमुत्पादयति पापं कृतं वि
षादं तत्वविदस्तु ते ऽप्युभयविधौ विकारहेतू न कदाचिद्भवतः अविक्रियब्रह्मरूपत्वज्ञानादित्यभिप्रायः ॥१॥ ननु वियंत्येव वाक्या
नि प्रमाणानि नेत्याह इत्यादिश्रुतय इति आदिशब्देन इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः यदेतद्विदुर
मृतास्ते भवंत्यथेतरे दुःखमेवापियंति तु यो यो देवानां प्रत्यबुध्यत स एव तदभवत् निचाय्य तं मृत्युमुखात्प्रमुच्यते इत्याद्यो
गृह्यंते सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति दोजनस्यात्मविज्ञानाद्विमुक्तः
परमामता इत्यादिपुराणस्मृतिवचनैः सह प्रमाणानीत्यर्थः उदाहृतानां श्रुतिस्मृतिवाक्यानां सर्वेषां तात्पर्यमाह ब्रह्मज्ञानेति

ननु ब्रह्मानंद इत्यानंदस्य ब्रह्मपदेन विशेषणादानंदांतरमस्तीत्यवगम्यते सः कतिविधः कीदृशश्चानंद इत्याकांक्षायां तद्भेद
प्रदर्शनपूर्वकं ब्रह्मानंदविवेचनं प्रतिजानीते आनंद इति ब्रह्मानंदो विद्यानंदो विषयानंद इत्यनेन प्रकारेणानंदस्य त्रैविध्य
मवगंतव्यं तत्रेतरयोरानंदयोर्ब्रह्मानंदमूलत्वादादावध्यायत्रयेण ब्रह्मानंदो विविच्य प्रदर्श्यत इत्यर्थः ।।१२।। तत्रादौ तावत्तैत्तिरीय
श्रुतिपर्यालोचनायामानंदरूपं ब्रह्मावगम्यत इत्यभिप्रायेण भृगुवल्ल्यर्थसंक्षेपेण दर्शयति भृगुरिति भृगुर्नामकः पुत्रः पि
तुर्वरुणाख्याद्ब्रह्मलक्षणं यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति तद्विजिज्ञासस्व तद्ब्रह्मेत्येवंरू

आनंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा। विषयानंद इत्यादौ ब्रह्मानंदो विविच्यते ।।१२।। भृगुः पुत्रः पितुः
श्रुत्वा वरुणं ब्रह्मलक्षणं। अन्नप्राणमनोबुद्धीस्त्यक्त्वानंदं विजज्ञिवान् ।।१२।। आनंदादेव भूतानि जायं
ते तेन जीवनं। तेषां लयश्च तत्रातो ब्रह्मानंदो न संशयः ।।१४।।

पं श्रुत्वा अन्नमयादिकोशेषु तल्लक्षणासंभवेन तेषामब्रह्मत्वं निश्चित्यानंदमानंदमये कोशे पंचमावयवत्वेन ब्रह्मपुच्छं प्रतिष्ठेति श्रुतं वि
वक्षितमानंदं ब्रह्मलक्षणयोजनया ब्रह्मत्वेन ज्ञातवानित्यर्थः ।।१२।। कथमानंदे तल्लक्षणं योजितवानित्याशंक्य तद्योजनप्र
कारप्रदर्शनपरं आनंदाद्ध्येव खल्विमानि भूतानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंतीति वाक्यमर्थतः प
ठति आनंदादिति ग्राम्यधर्मनिमित्तकादानंदादेव भूतानि जायंते आनंदेनोत्पद्यंते तेन विषयभोगादिनिमित्तकेनानंदेन जीवनं
प्राप्नुवंति तेषां प्राणिनां लयश्च तत्र तस्मिन्सुषुप्तिकालीने स्वस्वरूपभूते आनंद एव भवति सुषुप्त्याद्यानंदातिरेकेणैकस्याप्य
नुपलब्धत्वादतः आनंदो ब्रह्मैव सर्वानुभवसिद्धत्वादत्र नास्ति संशयः कर्तव्य इति भावः ।।१४।।

भावा

एवं तैत्तिरीयश्रुति पर्यालोचनया ब्रह्मण आनंदरूपतां प्रदर्श्य छांदोग्यश्रुति पर्यालोचनयापि तां दर्शयिष्युः सनत्कुमार नारदसंवादरूपे सप्तमाध्यायेऽस्थित तस्य भूमरूपब्रह्मप्रतिपादकस्य यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेत्यादिवाक्यस्यार्थं संक्षेपेणाह भूतोत्पत्तेरिति भूतानामाकाशादीनां तत्कार्याणां जरायुजांडजादीनां चोत्पत्तेः पूर्वं त्रिपुटीद्वैतवर्जना

भूतोत्पत्तेः पुरा भूमा त्रिपुटीद्वैतवर्जनात् ॥
ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि नो २५ ॥ ॥

नात् त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां त्रिपुटीनामाकाराणां समाहारस्त्रिपुटी सैव द्वैतं तस्य वर्जनमभावस्तस्माद्भूमा देशतः कालतो वस्तुतो वा परिच्छेदशून्यः परमात्मा भावानयने द्रव्यानयनमिति न्यायाद्भूमैवासीदित्यध्याहारः ॥ तदेव द्वैतवर्जनमुपपादयति ज्ञात्रिति वक्ष्यमाणज्ञात्रादिरूपा त्रिपुटी प्रलयकाले नासीदिति तत्सर्ववेदांतसंमतमिति हि शब्दं प्रयुंजानस्यायमभिप्रायः २५ ॥ ॥ ॥ ॥

इदानीं ज्ञात्रादिस्वरूपं दर्शयति विज्ञानमय इति परमात्मन उत्पन्नो बुद्ध्युपाधिको जीवो विज्ञानमयो ज्ञाता मनसि प्रतिबिंबितं मनोमयशब्दवाच्यं चैतन्यं ज्ञानं शब्दस्पर्शादयो ज्ञेयाः प्रसिद्धाः एतं त्रयं कार्यत्वादुत्पत्तितः पुरा कारणव्यतिरेकेण नास्तीत्यर्थः १६ फलितमाह त्रयेति ज्ञात्रादित्रयाभावे द्वैतरहितः पूर्ण एवात्मानुभूयते कुत्रानुभूयते इत्यत आह समाधीति विद्वदनुभवप्रदर्शनाय समाधिग्रहणं सर्वानुभवद्योतनाय सुषुप्तिमूर्छयोरुदाहरणं सुषुप्त्यादाववस्थितस्य द्वैतादर्शनस्मरणान्यथानुपपत्त्या निर्द्वैतस्य तदनुभवितुः सिद्धिरिति भावः ननु सुषुप्त्यादाव द्वैतसिद्धिः प्रवृत्ते किमायातमित्यत आह पूर्ण इति यथा सुषुप्त्यादौ परि

विज्ञानमय उत्पन्नो ज्ञाता ज्ञानं मनोमयः। ज्ञेयाः शब्दादयो ह्येतत्त्रयमुत्पत्तितः पुरा॥१६॥ त्रयाभावे
तु निर्द्वैतः पूर्ण एवानुभूयते। समाधिसुप्तिमूर्छासु पूर्णः सृष्टेः पुरा तथा॥१७॥ यो भूमा स सु
खं नाल्पे सुखं त्रेधा विभेदिनि। सनत्कुमारः प्राहैवं नारदायातिशोकिने॥१८॥ ॥ ॥ ॥

छेदकाभावात् तत्पूर्णत्वं चास्ति सृष्टेः पुरापि तदभावात् पूर्ण इत्यर्थः १७ अस्तु ब्रह्मणः पूर्णत्वमानंदरूपत्वे किमायातमित्याशंक्यान्वयव्यतिरेकाभ्यां भूम्नः सुखरूपत्वप्रदर्शनपरं यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति वाक्यमर्थतोऽनुक्रामति य इति यः पूर्वोक्तो भूमा स सुखरूप एव द्वितीये दुःखहेतोरभावात् अल्पे परिच्छिन्ने तस्यैव विवरणं त्रेधाविभेदिनीति हेतुगर्भविशेषणं सुखं तत्र न विद्यत इत्यर्थः एवं कस्मै केनाभिहितमित्यत आह सनत्कुमार इति नारदस्य शिष्यत्वे कारणमाह अतिशोकिने इति अतिशयतोऽधिकः शोको यस्येति अतिशोकी तस्मै १८ ॥ ॥ ॥

तस्यातिशोकित्वेकारणमाह सपुराणानिति नारदः पुराणैः सह वर्त्तते इति सपुराणः पंच वेदास्तान् विविधानि शा×
स्त्राणि च विदित्वाप्यात्मज्ञानरहितत्वेनातिशयेन शोकं प्राप्तः १९ ननु वेदशास्त्रविषयज्ञानस्य शोकानिवर्त्तकत्वेन प्रसिद्धस्य क

सपुराणांश्च वेदान् शास्त्राणि विविधानि च ॥ ज्ञात्वाप्यनात्मवित्त्वेन ना
रदोतिसुशोच ह ॥१९॥ वेदाभ्यासात्पुरा तापत्रयमात्रेण शोकिता ॥ पश्चात्त्व
भ्यासविस्मारभंगगर्वैश्च शोकिता ॥२०॥

कथमतिशोकहेतुत्वमित्यत आह वेदाभ्यासादिति तापत्रयेणाध्यात्मिकादिलक्षणेन नैव शोकितासीदित्यध्याहारः प
श्चात्त्विति तु शब्दो विशेषद्योतनार्थः अभ्यासः पाठाद्यावर्त्तनं विस्मारः पठितस्य विस्मरणं भंगः स्वतोधिकेन ×
तिरस्कारः गर्वोन्यस्य न दर्शनेन स्वाधिक्यबुद्धिः एतैः करणैः शोकितत्वं २०

नन्वेवं सर्वज्ञस्यातिशोकः किं त्वं जातमिति कुतो वगम्यत इत्याशंक्य सोहं भगवः शोचामीति तदीयादेव वाक्यादवगतमि
त्यभिप्रेत्य तं मा भगवान् शोकस्य पारं तारयत्विति तेनोक्तत्वादुपाये तेन पृष्टे सति सनत्कुमारः भूमशब्दवाच्यं सुख
रूपं ब्रह्मैव ज्ञायमानं शोकनिवृत्त्युपाय इति सुखं त्वेव विजिज्ञासितव्यमित्याद्युत्तरग्रंथसंदर्भेणोक्तवानित्याह सोहम्

सोहं विद्वन्प्रशोचामि शोकपारं नयाद्य मां ॥ इत्युक्तः सुखमेवास्य परमित्यभ्यधादृषिः ॥
२१ सुखं वैषयिकं शोकसहस्रेणावृतत्वतः ॥ दुःखमेवेति मत्वोक्तं नाल्पेस्ति सुखमित्यसौ ॥
२२ ननु द्वैते सुखं मा भूदद्वैतेप्यस्ति नो सुखं ॥ अस्ति चेदुपलभ्येत तथा च त्रिपुटी भवेत् ॥ २३ ॥

मितिः २१ ननु स्रगादिजन्येषु सुखेषु सत्सु नाल्पे सुखमस्तीत्युक्तिरनुपपन्नेति चेत् न तेषां स्रक्चंदनादीनां दुःखानुषंगेण
विषसंपृक्तान्नवत् दुःखरूपत्वस्य मुनिनाभिप्रेतत्वादित्याह सुखमिति २२ द्वैते सुखाभावमंगीकृत्याद्वैतेपि तमाशंक
ते नन्विति तत्रानुपलब्धिं प्रमाणयति अस्तीति अद्वैते सुखं यदि विद्येत तर्हि विषयसुखवदुपलभ्येत यतो नोप
लभ्यते ततो नास्तीत्यर्थः न तूपलभ्यत एवेत्याशंकमानं प्रत्याह तथेति अत्र त्रिवस्यानुभवितृत्वानुभाव्यसापेक्षत्वाद् द्वैत
पत्तिरिति भावः २३ ॥ ॥ ॥ ॥

अद्वैतस्य सुखाधिकरणत्वनिषेधमङ्गीकरोति सिद्धान्ती मास्त्विति तत्र हेतुमाह किंत्विति हि यस्मात्कारणादद्वैतमेव सुख
मतः सुखाधिकरणं भवतीत्यर्थः अद्वैतसुखमित्यत्र किं प्रमाणमित्याशंक्यानुवादपूर्वकं तस्य स्वप्रकाशत्वात्प्रमाणप्रश्न
एवानुपपन्न इत्याह किं मानमिति २४ ननु स्वप्रकाशत्वेऽपि किं प्रमाणमित्याशंक्य त्वदीयमेव वचनं प्रमाणमित्याह स्वप्रभत्वे

मास्त्वद्वैते सुखं किं तु सुखमद्वैतमेव हि किं मानमिति चेन्नास्ति मानाकांक्षा स्वयंप्रभे
२४ स्वप्रभत्वे त्वमेव ह्वाक्यं मानं यस्माद्भवानिदं अद्वैतमभ्युपेत्यास्मिन्न सुखं नास्तीति
भाषते २५ नाभ्युपैम्यहमद्वैतं त्वद्वचोऽनूद्य दूषणं वच्मीति चेत्तदा ब्रूहि किमासीद्द्वै

इति तदुपपादयति यस्मादिति यतः कारणाद्भवता प्रमाणनैरपेक्ष्येणाद्वैतमभ्युपेत्य सुखमेवाक्षिप्यते अतः स्वप्र
त्वमित्यर्थः २५ न मयाद्वैतमभ्युपगम्यते किं तु त्वदुक्तमद्वैतमनूद्य दूष्यते ततो नोक्तसिद्धिरिति शंकते नाभ्युपैमीति
विकल्पासहत्वादद्वैतानभ्युपगमोऽनुपपन्न इति मन्वानः पृच्छति तदेति २६

किंशब्दस्याचितं विकल्पं दर्शयति किमद्वैतमिति तृतीयं पक्षं निराकरोति नान्य इति द्वैताद्वैतविलक्षणस्य पक्षस्य लोकेऽद
र्शनादिति भावः। द्वितीयपक्षं निराकरोति न द्वितीय इति तत्र हेतुमाह अनुत्पत्तेरिति द्वैतस्य तदानीमनुत्पन्नत्वादिति भावः
अतः प्रथमः परिशिष्यत इत्याह शिष्यत इति २७ ननु केन प्रकारेणाद्वैतं युक्त्यैव सिध्यति नानुभवेनेति चोदयति अद्वैतेति अद्वै

किमद्वैतमुत द्वैतमन्यो वा कोटिर्नेति मे॥ अप्रसिद्धो न द्वितीयोऽनुत्पत्तेः शिष्य
तेऽग्रिमः॥ २७॥ अद्वैतसिद्धिर्युक्त्यैव नानुभूत्येति चेत्तु वद॥ निर्दिष्टो वा सदृष्टान्तो
वा को दृष्टान्तरमत्र नो॥ २८॥ नानुभूतिर्न दृष्टान्त इति युक्तिस्तु शोभते॥ सदृष्टा
न्तत्वपक्षे तु दृष्टान्तं वद मे मतं॥ २९॥

तसिद्धिर्युक्त्यैवेत्युक्तं विकल्पासहत्वादनुपपन्नमिति मत्वा तां युक्तिं विकल्पयति निर्दिष्टेति वदेति विकल्पस्य लक्षणं तां निरा
करोति को दृष्टान्तर इति प्रथमपक्षं सोपहासं निराकरोति नानुभूतिरिति अद्वैतसिद्धिर्युक्त्यैवेति वदता नानुभूतिस्तावत्त्वयानुपे
येति युक्तिस्तु दृष्टान्तप्रदर्शनमन्तरेण न किंचित्साधयत्यतो न दृष्टान्त इत्युक्तिरयुक्तेति भावः २८ द्वितीये विकल्पे तूभयवा
दिसंप्रतिपन्नो दृष्टान्तो वक्तव्य इत्याह सदृष्टान्तत्वेति तर्हि दृष्टान्तेनैवाद्वैतं साधयामीति शंकते पूर्ववादी अद्वैतेति २९

रति चेदिति प्रलयो द्वैतरहितो भवितुमर्हति द्वैतानुपलब्धिमत्वात् योयो द्वैतानुपलब्धिमान् स स द्वैतरहितो यथा स्वापरति न
त्वेवं साधयतस्तव स्वसुषुप्तिर्दृष्टांतः परसुषुप्तिर्वा आद्ये तस्यापरं प्रत्यप्रसिद्धत्वेन तस्मिन्नर्थे दृष्टांतांतरं वक्तव्यमित्याह सुप्तिरिति
ननु तस्याः परसुप्तिरेव दृष्टांत इति द्वितीयविकल्पमाशंकते दृष्टांत इति परस्वप्ने सत्वाप्रसिद्धत्वेन न तया दृष्टांतीकरणमनुपपन्न
मिति सोपहासमाह स्वसिद्धांती अहो इति ८२ यदीति यो न वा न स्वप्ने रनुभवगम्यत्वानंगीकारेण स्वसुषुप्तिमपि न वेत्ति अस्य तव प

स्थर

अद्वैतं प्रलयो द्वैतानुपलंभेन सुप्तिवत् ॥ इति चेत्सुप्तिरद्वैतेत्यत्र दृष्टांतमीरय ॥ ८१ ॥
दृष्टांतः परसुप्तिश्चेदहो ते कौशलं महत् ॥ यः सुप्तिं न वेत्यस्य परसुप्तौ तु का कथा ॥
८२ ॥ निश्चेष्टत्वात्परः सुप्तो यथाहमिति चेत्तदा ॥ उदाहर्तुः सुषुप्तेः स्वप्रमात्वबलान्मभवेत् ॥ ८३ ॥

रसुषुप्तौ का कथा परसुषुप्तिज्ञानं न भवतीति किमु वक्तव्यमिति भावः ॥ नन्वनुमानात्परसुषुप्तिसिद्धिरिति शंकते निश्चेष्टत्वादि
ति विमतः परः सुप्तो भवितुमर्हति प्राणमत्वे सति निश्चेष्टत्वात् मद्वदिति अनुमानादित्यर्थः ॥ एवं तर्हि तव सुप्तेः स्वप्रकाशत्वे प
रिशिष्यते इत्याह तदेति ॥ तर्हि मां प्रति स्वसुषुप्तिमुदाहर्तुर्दृष्टांतीकर्तुस्ते सुषुप्तेः स्वप्रकाशत्वबलात्सुषुप्तिउदाहरणसाम
र्थ्यादेव भवेत् ॥ ८३ ॥

कथं वा तद्भवतीत्याशंक्याह नेन्द्रियाणीति सुषुप्तिग्राहकाणि इंद्रियाणि न संति तेषां स्वकारणे विलीनत्वात् दृष्टान्तश्च संप्रतिपन्नो नास्ति परसुषुप्तेरप्रसिद्धत्वस्योक्तत्वात् तथापि तां सुषुप्तिमंगीकरोषि चेत् एवं च स्यति साधनैर्विना ज्ञानसाधनमंतरेणापि ज्ञातं प्रकाशनमिति यत्प्रकाशत्वं सुषुप्तेरित्यर्थः अत्रायं प्रयोगः विमता सुषुप्तिः स्वप्रकाशा असत्स्वपि ज्ञानसाधनेषु प्रकाशमानत्वात्

नेन्द्रियाणि न दृष्टान्तस्तथाप्यंगीकरोषि तां ॥ इदमेव स्वप्रकाशत्वं यज्ज्ञानं
साधनैर्विना ॥२३॥ स्तां नाम द्वैतस्वप्रकाशत्वं यदस्फोऽसुखं कथं ॥ यतो दुःखं तदा
नास्ति ततस्तोऽशिष्यते सुखं ॥२४॥

सांख्याभिमतात्मवत् प्राभाकराभिमतसंवेदनवत् शाक्याभिमतस्वात्मवदित्यर्थः ॥२३॥ इत्थं प्रबलं(ध)स्य दृष्टान्तत्वेनोदाहृतायाः सुषुप्तेरद्वैतत्वस्वप्रकाशत्वं च प्रसाध्य तत्र सुखप्राधान्याय पूर्ववादिनोऽशंकां क्वामभ्युत्थापयति स्तामिति सुखप्रतियोगिनो दुःखस्य तदानीमसत्त्वात्सुखमेव परिशिष्यते अपि चेति सुखदुःखयोः प्रकाशतमसोरिव परस्परविरोधित्वात् दुःखाभावे सुखमेवाभ्युपेयमिति भावः ॥२४॥

।

सुषुप्तौ दुःखाभावे । किं मानमित्याकांक्षायां श्रुत्यनुभवादित्याह ॥ अंधस्तरति ॥ तस्माद्वा एतं सेतुं तीर्त्वांधः सन्ननंधो भव
ति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तद्यथा पीदं भगवः शीरमंधं भवति अनंधः सन्न भवतीत्या
ति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तद्यद्यपीदं भगवः शरीरमंधं भवत्यनंधः सन्न भवतीत्या
दिश्रुतिर्देहाभिमानप्रयुक्तांधत्वादीन्दोषान्सुषुप्तौ तिवारयति व्याध्यादिनापीडामानस्यापि सुषुप्तौ न दुःखानुभा

अंधः सन्नप्यनंधः स्याद्विद्धोऽविद्धो यथोपतापी ॥ अरोगीति श्रुतिः प्राह तच्च
सर्वे जना विदुः ॥ २४ ॥ न दुःखाभावमात्रेण सुखं लोष्टशिलादिषु ॥ द्वयाभा
वस्य दृष्टत्वादिति चेत्तद्विषमं वचः ॥ २५ ॥

वो नास्तीत्येतत्सर्वजनप्रसिद्धं चेत्यर्थः ॥ २४ ॥ ननु यत्र दुःखाभावस्तत्र सुखमित्यस्या व्याप्तेर्लोष्टादौ व्यभिचार
इति शंकते ॥ न दुःखाभावमात्रेणेति ॥ दुःखाभावमात्रेण सुखं कल्पयितुं न शक्यते लोष्टशिलादिषु द्वयाभावस्य सु
खदुःखयोरभावस्य दर्शनादित्यर्थः ॥ दृष्टांतदार्ष्टांतिकयोर्वैषम्यान्नैवमिति परिहरति ॥ विषयं समिति ॥ व
चो दृष्टांतवचनं विषमं दार्ष्टांतिकाननुसारीत्यर्थः ॥ २५ ॥

दृष्टं तस्मान्न तु कल्पत्वमेवोपपादयति॥ सुखेति। अन्यनिष्ठयोर्दुःखसुखयोरूहनं यथाक्रमं सुखदैन्यविकासाभ्यां
लिंगाभ्यां कर्त्तव्यं अयं दुःखी विषण्णवदनत्वात् संप्रतिपन्नवत् अयं सुखी प्रसन्नवदनत्वात् संप्रतिपन्नवदित्यर्थः॥
प्रवर्त्तेवं लोके प्रवर्त्ते किमायातामित्यत आह दैन्याद्यभावत इति लोष्टादौ सुखदैन्यादिलिंगाभावात् दुःखसुख

सुखदैन्यविकासाभ्यां परदुःखसुखोहनं दैन्याद्यभावतोऽदृष्टे दुःखाद्यूहो न संभवेत्॥३६॥
स्वकीये सुखदुःखे तु नोहनीये ततस्तयोः भावो वेद्योऽनुभूत्यैव तदभावोऽपि नान्यतः॥३७॥

योरूहनमेव न संभवति अतस्तत्र दुःखाभावोऽपि न निश्चेतुं शक्यत इत्यर्थः ॥३६॥ इदानीं परकीयसुखदुःखाभ्यां
स्वकीयसुखदुःखयोर्वैषम्यं दर्शयति स्वकीय इति स्वनिष्ठयोस्तु सुखदुःखयोरनुभवसिद्धत्वान्नानुमे
यत्वं यतस्तयोः सुखदुःखयोर्भावः सद्भावो यथानुभूत्यैव वेद्यः प्रत्यक्षेणावगम्यते तथा तदभावोऽपि अ
न्यतोऽनुमानादेर्नावगम्यते किंतु प्रत्यक्षेणैवेत्यर्थः॥३७॥

प्रश्नितमाह तथासति स्वस्य पापो च दुःखेति तथासति स्वकीयस्य दुःखादेरनुभवगम्यते सति स्वकीयस्य पापविद्यमानो दुःखे
खाभावोऽनुभवे नैवास्ति द्वं: ततोऽपि किं तत्राह । विरोधीति सुपो सुखविरोधिनो दुःखस्याभावान्निर्विघ्नं वाधराहितं सुखमिष्यताम
स्पृधे यतां २८ शय्यादिसुखसाधनसंपादनान्यथानुपपत्त्यापि सुपोऽस्य स्वप्रसीत्यवगम्यते रत्याह महत्तरेति तत्र तस्यासुपो

तथा सति स्वस्य पापो च दुःखाभावोऽनुभूयते ततः ॥ विरोधि दुःखराहित्यात्सुखं निर्विघ्नमिष्यताम् ॥ २८ ॥
महत्तरप्रयासेन स्वदुःशय्यादिसाधनं कुतः ॥ संपाद्यते सुपो सुखं चेत्तत्र नो भवेत् ॥ २९ ॥
दुःखनाशार्थमेवैतदिति चेत् रोगिणां यथा ॥ भवत्वरोगिणस्त्वेतत्सुखायैवेति निश्चितम् ॥ ३० ॥

सुखं न भवेच्चेन्महत्तरप्रयासेन बहुवित्तव्ययशरीरपीडादिनामत्तं शय्यादिकशिपुमंचादिसुखसाधनं कुतः कस्मात्कारणा
त्संपाद्यते न कुतोऽपीत्यर्थः ॥ २९ ॥ अर्थापत्तेरन्यथोपपत्तिं शंकते ॥ दुःखेति ॥ तत्तच्छय्यादिसाधनं संपादनं दुःखनिवृत्तिफल
कं न नियतमिति परिहरति ॥ रोगिणामिति ॥ रोगादिदुःखे सति तन्निवृत्तये तद्भवतु तदभावे तु निवर्त्य दुःखाभावात्संपाद
नं सुखायैवेत्यवगम्यते ॥ ३० ॥

ननु सौषुप्तसुखस्य शय्यादिसाधनजन्यत्वे आत्मस्वरूपत्वं व्याहन्येतेति शंकते तर्हीति किं निद्रागमात्पूर्वकालीनस्य
विषयजन्यत्वं तस्य न संभवकालीनस्येति विकल्प्याद्यमंगीकरोति भवत्विति ४१ द्वितीयं निराकरोति निद्रायामिति सुषु
प्तौ शय्याद्यनुसंधानाभावान्न जन्यत्वं तस्य न संभवतीति भावः ननु निद्रायामजन्यं यद्यस्ति तर्हि तद्विषयसुखवत्कुतो नानु
भूयत इत्याशंक्याह नु भवितुः सदा तस्मिन्नभिमुखत्वाच्च विषयसुखं च तदनुभवरत्यभिप्रायेणाह सुखेति आदौ निद्रायाः पूर्वं

तर्हि साधनजन्यत्वात्सुखं वैषयिकं भवेत् ॥ भवत्वेवाजनिद्रायाः पूर्वं शय्यासनादिजं ॥४१॥
निद्रायां तु सुखं यत्तज्जन्यते केन हेतुना ॥ सुखाभिमुखधीरादौ पश्चान्मग्नः परे सुखे ॥४२॥
जाग्रद्व्यापृतिभिः श्रान्तो विश्रम्याथ विरोधिनि ॥ अपनीते स्वस्थचित्तोऽनुभवेद्विषये सुखं ॥४३॥

अस्मिन्काले जीवः सुखाभिमुखधीः शय्यादिजन्यसुखाभिमुखा बुद्धिर्यस्य स तथोक्तस्तथाविधो भवति पश्चान्निद्राकालेऽपरे उत्कृ
ष्टे सुखे स्वरूपसुखे मग्नो विलीनो भवेत् ४२ संक्षेपेणोक्तमर्थं श्लोकत्रयेण प्रपंचयति जाग्रादिति जीवो जाग्रद्व्यापृतिभिर्जा
गरणावस्थायां क्रियमाणैर्व्यापारविशेषैः श्रान्तो विश्रम्य मृदुशय्यादौ शयनेन लब्ध्वा प्रश्यानंतरं विरोधिनि व्यापारजनिते दुः
खे अपनीते निवारिते स्वस्थचित्तः स्वस्थः अव्याकुलमना भूत्वा शय्यादौ विषये जायमानं सुखमनुभवेत्सो [illegible] ज्ञातुर्यात् ॥४३॥

विषयसुखं कीदृशमित्याकांक्षायां तत्स्वरूपं प्रदर्शयन् परे सुखे निमज्जनमिति भिन्नत्वेन तदनुभवेपि स्वमं दर्शयति आत्माभिमुखेति
अनागतविषयसंपादनादिना दुःखमनुभूय तन्निवृत्तये प्रदुःशयनादौ शयानस्य बुद्धिरंतर्मुखा भवति तस्यां च बुद्धिवृत्तौ स्वरू
पानंदः स्वात्मसुखे दर्पणे मुखमिव प्रतिबिंबति बहिर्विषयानंदः अत्रापि अस्यामपि वेलायामेतं विषयानंदमनुभूय

आत्माभिमुखधीवृत्तौ स्वानंदः प्रतिबिंबति ॥ अनुभूयेनमजापि त्रिपुट्याः शांतिमाप्नुयात् ॥४४॥
तद्धर्मस्यापरस्त्यक्त्वा जीवेत्यरात्मनि ॥ तेनैक्यं प्राप्य तत्रत्यो ब्रह्मानंदः स्वयं भवेत् ॥४५॥

नन्वविद्यानुभवानुभाव्यत्वलक्षणायास्त्रिपुट्याः शमं प्राप्नुयात् ॥४४॥ ततः किं तत्राह तदिति तस्य त्रिपुटीदर्शनरहितस्य अस्य
यतो दायस्यैव जीवः परमात्मन्यानंदरूपे ब्रह्मणि धावेधी घ्नं गच्छेत् उत्वा च तेन ब्रह्मणैक्यं तादात्म्यं गत्वा सता सोम्य तदा सं
पन्नो भवतीति श्रुतेः स्वयमपि तत्रत्यस्तस्यां सुषुप्तौ स्थितो ब्रह्मानंदो भवेत् ॥४४॥ ॥ ॥ ॥ ॥

अस्मिन्नुपपादिते सौषुप्ते आनंदे शान्त्यादयो बहवो दृष्टांताः श्रुत्युक्ता विद्यंते तत्राह॥ दृष्टांतांतरमिति॥४६॥ शकुन्यादिश्रुः पंचमे दृष्टां
तेः सुषुप्त्यादावानंदोपपादने तत्र सुखं नास्तीति मतं निराकर्तुं तत्र तावत्सयथा शकुनिः सूत्रेण बद्धो दिशं दिशं दिशं पतित्वान्यत्रा
यतनमलब्ध्वा बंधनमेवोपश्रयते एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपाश्रयते प्राणबंध

दृष्टांताः शकुनिः श्येनः कुमारश्च महान्नृपः॥ महाब्राह्मण इत्येते सुप्त्यानंदे श्रुतीरिताः॥४६॥
शकुनिः सूत्रबद्धः सन्दिक्षु व्यापृत्य विश्रमं॥ अलब्ध्वा बंधनस्थानं हस्तस्तंभाद्युपाश्रयेत्॥४७॥

नं हि सोम्य मन इत्यस्य दृष्टांतिकप्रतिपादनपरस्य छांदोग्यश्रुतिवाक्यस्यार्थसंक्षेपेण दर्शयति श्लोकद्वयेन॥ शकुनिरिति हस्त
स्तादौ क्वचिदाधारे सूत्रेण बद्धः शकुनिः पक्षी आहारादिग्रहणाय दिक्षु प्राच्यादिषु व्यापारं कृत्वा तत्र विश्रमं विश्रम्यतेऽस्मिन्निति वि
श्रमम् आधारस्थानमलब्ध्वा बंधनस्थानं हस्तादिकमेव यथाश्रयेत्तथा जीवोपाधिभूतं मनोऽपि पुण्यापुण्यफलयोः सुखदुःख
योरनुभवाय स्वप्नजाग्रदवस्थयोः सूत्रतंत्रात्मा भोगप्रदे कर्मणि क्षीणे सति स्वोपादाने विलीयते तल्लये च तदुपहितो जी
वः परमात्मैव भवतीत्यर्थः॥४७॥४८॥ ॥ ॥ ॥

इदानीं श्येनदृष्टान्तप्रपंचनपरस्य तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा आनंदाय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यतीत्यस्य बृहदारण्यकवाक्यस्यार्थं

न॰१ जीवोपाधिर्मनस्तद्वद्धर्माधर्मफलाप्तये॥ स्वप्नजागरिते धांत्वा क्षीणे कर्मणि लीयते॥४८॥
श्येनो वेगेन नीडैकलंपटः शयितुं व्रजेत्॥ जीवः सुषुप्तये धावेद्ब्रह्मानंदैकलंपटः॥४९॥

संक्षिप्याह॥ श्येन इति॥ यथा आकाशे सर्वतः प्रचरन् श्येनः श्रान्तः सन् पक्षी गगने संचारान्निमित्तश्रमपरिहाराय शयितुं शयनं कर्तुं नीडैकलंपटः कुलायैकाभिलाषवान् व्रजेत् शीघ्रं गच्छेत् तद्वदेव जीवो मन उपाधिकः निद्रावस्थायां ब्रह्मानंदैकाभिलाषवान् स्वापाय शीघ्रं गच्छेत् तद्वदकाशमिति शेषः॥४९॥

स यथा कुमारो वा महाराजो वा महाब्राह्मणो वातिसीमघ्नीमानंदस्य गत्वा शयीतैवमेवैष एतच्छेते कुमारादिदृष्टांतत्रयप्रद
र्शनपरं वाक्यं किं वा ब्राह्मणागतं वाक्यं श्लोकत्रयेण व्याचष्टे ॥ अतिबाल इति यथा स्तनंधयः शिशुरागतं स्तनं पीत्वा मृद्वादिगुणयोगि
नि तल्पे शायितः स्वकीयादिज्ञानशून्यत्वेन रागादिरहितः सन् सुखमूर्तिर्भवतीत्यर्थः ॥ यथा वा सार्वभौमो राजा विदशदबुद्धि

अतिबालः स्तनं पीत्वा मृदुशय्यागतो हसन् ॥ रागद्वेषाद्यनुत्पत्तेरानंदैकस्वभावभाक् ॥ ५० ॥
महाराजः सर्वभौमः संतृप्तः सर्वभोगतः ॥ मानुषानंदसीमानं प्राप्यानंदैकमूर्तिभाक् ॥ ५१ ॥
महाविप्रो ब्रह्मवेदी कृतकृत्यत्वलक्षणं ॥ विद्यानंदस्य परमां काष्ठां प्राप्याभवति स्थिते ५२ ॥

त्वेपि सर्वैर्मानुषानंदैर्युक्तत्वात्प्रार्थनीयाभावेन रागादिरहितः सन् सुखमूर्तिरानंदमूर्तिरेवाभवतीत्यर्थः ॥ यथा वा महा
ब्राह्मणो कृत्यजनित्वे ब्रह्मसाक्षात्कारन्याहृतं कृतकृत्यत्वमित्येवं रूपं पा विद्यानंदस्य परमां काष्ठां जीवन्मुक्ततां प्राप्तः परमा
नंदस्वरूपो भवतीत्यर्थः तथा सुषुप्त्यानंदरूपः स्थितो इतीति शेषः ॥ ५० ॥ ५१ ॥ ५२ ॥

सी मो २

न्त्वेते कुमारादयस्तत्र एव किमिति दृष्टांतीकृता नान्ये इत्याशंक्य दृष्टांतत्रयोदाहरणतात्पर्यमाह ॥ मुग्धेति ॥ विवेकशून्या
नां मुग्धोऽस्मीति बालः सुखी विवेकिषु सार्वभौमोऽस्मीति विवेकिषु आनंदात्मसाक्षात्कारे वा लेवरतरे तु सर्वदा रागादिमलादसुखि
नेऽरतिन दृष्टांतीकृता इत्यर्थः ॥ ५३ ॥ नन्वेते सुखिनः प्रसक्ताः किमायातमित्याशंक्य दार्ष्टांतिकश्रुतिवाक्यस्य तात्पर्यमाह ॥ कु

ग१

मुग्धबुद्धातिबुद्धानां लोके सिद्धा सुखात्मता ॥ उदासीनानामन्ये तु दुःखिनो न सुखात्मकाः ॥
५३ ॥ कुमारादिवदेवायं ब्रह्मानंदैकतत्परः ॥ स्त्रीपरिष्वक्तवद्वेद न बाह्यं नापि चांतरं ॥ ५४ ॥

मपि१

मारादीति कुमारादयो यथानंदमाजरास्व मयं सुषुप्तः ब्रह्मानंदैकतत्पराग इत्यर्थः ॥ ब्रह्मानंदैकपरत्वे युक्तिप्रदर्शपरं तद्वाक्यं प्रियया
स्त्रि पासंपरिष्वक्तो न बाह्यं किंचन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति ज्योतिर्ब्रा
ग२ ह्मणोक्तं वाक्यमर्थतोऽनुक्रामति स्त्रीति यथा लोके प्रियया स्त्रियाऽऽलिंगितः कामी बाह्याभ्यंतरविषयज्ञानशून्यत्वात्सु
खरूपी भवति तथाऽसौ प्राज्ञेन परमात्मनैकीभावं गतो जीवो बाह्यादिविषयज्ञानाभावादानंद एव भवति ॥ ५४ ॥

अत्र दृष्टांतदार्ष्टांतिकवाक्यस्थयोर्बाह्याभ्यंतरशब्दयोर्विवक्षितमर्थं क्रमेण दर्शयति बाह्यमिति दृष्टांततोऽतः नाडीस्थः
जाग्रद्ध्यस्वन्नयानाडीमध्ये प्रतीयमानः प्रपंचः स्वप्न इत्युच्यते ॥५५॥ जीवः सुप्तो ब्रह्मानंदस्वरूपे तौ वाव तिष्ठते दत्यत्र यु-
क्तिप्रदर्शनपरायाः अत्र पिता पिता भवतीत्यादिकायाः श्रुतेस्तात्पर्यमाह पितेति अत्र सुप्तावध्यासिकानां पितृत्वादि-

बाह्यं रथ्यादिकं वृत्तं गृहवत्वत्यथांतरं ॥ तथा जागरणं बाह्यं नाडीस्थः स्वप्न आं-
तरः ॥५५॥ पितापि सुप्तावपितेत्यादौ जीवत्ववारणात् ॥ सुप्तो ब्रह्मैव नो जीवः सं-
सारित्वसमाप्तितः ॥५६॥ पितृत्वाद्यभिमानो यः सुखदुःखाकरः स हि ॥ तस्मिन्नप-
गते तीर्णः सर्वान्शोकान्भवत्ययं ॥५७॥

जीवधर्माणाम् अत्रत्यैव निवारितत्वादप्रतीतितो ब्रह्मैतेवावशिष्यत इत्यर्थः ॥५६॥ ननु पितृत्वाद्यभिमानाभावेपि सुखि- ६१
त्वादिसंसारः किं न स्यादित्याशंक्य संसारस्य देहाभिमानमूलत्वात्तदभावे नाव इति मत्वा नमत्प्रति पादकं तीर्णो-
हि तदा सर्वान्शोकान्हृदयस्य भवतीति समनंतरवाक्यं तात्पर्यतो व्याचष्टे पितृत्वेति
॥५७॥

ननु दान्तता स्ति: श्रुतिश्चिन्नसुखं सुषुप्तावपि मुखतोधिगीयमानोपलभ्यते इत्याशंक्य तथाभिधानपरं कैवल्यश्रुतिवाक्यमर्थ-
तः पठति सुषुप्तीति सकले जाग्रदादिलक्षणे प्रपंचे विलीने स्वोपादानभूतायां तमःप्रधानायां प्रकृतौ विलयंगते सति तम-
सा तया प्रकृत्या आवृतः आच्छादितो जीवः सुखरूपं ब्रह्मोपैतीति तस्याः श्रुतेरर्थः ॥५८॥ न केवलमर्थः श्रुतिप्रसिद्धोर्थः किंतु स-
र्वानुभवसिद्धोपीत्याह सुखमिति सुषुप्तादुत्थितः पुरुषः तावन्तं कालं सुखमस्वाप्सं न किंचिदवेदिषमित्येवं निद्राकाली-

सुषुप्तिकाले सकले विलीने तमसावृतः ॥ सुखरूपमुपैतीति ब्रूते ह्याथर्वणी श्रुतिः ॥५८॥
सुखमस्वाप्समत्राहं नैव किंचिदवेदिषं ॥ इति द्वे तु सुखाज्ञाने परामृशति चोत्थितः ॥५९॥ पराम-
र्शोनुभूतेस्तीत्यासीदनुभवस्तदा ॥ चिद्रूपत्वात्स्वतो भाति सुखमज्ञानधीस्ततः ॥६०॥

ने सुखाज्ञाने च परामृशति स्मरति अतोपि सुषुप्तौ सुखमस्तीत्यवगम्यते ॥५९॥ ननु परामर्शस्याप्रमाणत्वात्कथं तद्बलात्सुखसिद्धि-
रित्याशंक्य तस्याप्रामाण्येपि तन्मूलतानुभवबलात्तत्सिद्धिरित्यभिप्रायेणाह परामर्श इति परामर्शः स्मरणं ज्ञानमनुभू-
तत्तद्विषये प्रवृत्तिर्नाननुभूतविषये इत्यस्माद्धेतोः तदा सुषुप्तावनुभव आसीदित्यवगम्यते ननु सुषुप्तौ मनःसहितानां
ज्ञानकरणानां विलीनत्वात्कथमनुभवसिद्धिरित्याशंक्य किं सुखानुभवसाधनं नास्तीत्युच्यते प्रज्ञानानुभवसाधनं वा
नाद्यः स्वप्रकाशचिद्रूपत्वेन सुखस्य करणानपेक्षत्वात् न द्वितीयः स्वप्रकाशसुखवन्नादेव तदाकारज्ञानप्रतीतिसिद्धेरि-

ननु सौषुप्तसुखस्य स्वप्रकाशसुखत्वेपि ब्रह्मानंदः स्वयं न वेदितुं शक्यो ब्रह्मरूपत्वेनावगतिमानाभावादित्याशंक्य विज्ञानमानंदमित्यादिबृहदारण्यकवाक्यसद्भावमित्याह ॥ ब्रह्मेति ॥ ६१ ॥ नन्वनुभवस्मरणयोरेकाधिकरणत्वनियमात्सुखमहमस्वाप्सं न किंचिदवेदिषमिति च सौषुप्तसुखाज्ञानयोर्विज्ञानमयशब्दवाच्येन जीवेन स्मर्यमाणत्वात्तस्यैव सुखाद्यनुभवितृत्वं वक्तव्यमित्याशंक्य तदुपाधेर्विज्ञानस्याज्ञानकार्यस्याज्ञाने विलीनत्वान्नैवमित्यभिप्रायेणाह ॥ यदिति ॥ न किंचिदवेदिषमिति ।

ब्रह्मविज्ञानमानंदमिति वाजसनेयिनः ॥ पठंत्यतः स्वप्रकाशं सुखं ब्रह्मैव नेतरत् ॥ ६१ ॥
यदज्ञानं तत्र लीनौ तौ विज्ञानमनोमयौ ॥ तयोर्हि विलयावस्था निद्राज्ञानं च सैव हि ॥ ६२ ॥

स्मरणान्यथानुपपत्त्यागम्यमानं यदज्ञानमस्ति तत्र तस्मिन्नज्ञाने तौ प्रमातृप्रमाणत्वेन प्रसिद्धौ विज्ञानमनोमयौ लीनौ विज्ञानत्वाद्याकारं परित्यज्य कारणरूपेणावस्थितौ अतस्तदुपाधिकस्य नानुभवितृत्वमिति भावः ॥ तत्रोपपत्तिमाह ॥ तयोरिति । हि यस्मात्कारणात्तयोर्विज्ञानमनोमययोर्विलयावस्था निद्रेत्युच्यते विज्ञानाविरतेः सुप्रसिद्धत्वाभिधानात् तर्हि निद्रायामेवाविलीनाविति वक्तव्यमित्याशंक्याह ॥ अज्ञानमिति सैव निबिडमज्ञानमिति व्यवह्रियत इत्यर्थः ॥ ६२ ॥

ननु तर्हि सौषुप्तस्य त्वाद्यन्तक्षणव्यकाले सतो विज्ञानमयस्य प्रबोधे कथं तत्कर्तृत्वमित्याशंक्य विलयाभावेपि तत्स्वरूपनाशाभा
वाद्विलयावस्थोपाधिमदानंदमयरूपेणानुभवितृत्वं विज्ञानशब्दवाच्यघनीभावोपाधिमत्वेन तस्य कर्तृत्वं चेक स्य घटत इत्य

विलीनघृतवत्पश्चात्स्याद्विज्ञानमयो घनः ॥ विलीनावस्थ आनंदमयशब्देन कथ्यते ६२॥

भिप्रायेणाह विलीनेति यथाग्निसंयोगादिना विलीनं घृतं पश्चाद्धिमाद्युपाधिवशाद्घनी भवति एवं जाग्रदादिभोगप्रदस्य
कर्मणः क्षयवशात् निद्रारूपेण विलीनं मनः करणं पुनर्भोगप्रदकर्मवशात्प्रबोधे विज्ञानाकारेण घनीभवत्यतस्तदुपाधिका
ऽपि विज्ञानमयो घनः स्यात्तस्यैव पूर्वं विलीनावस्थोपाधिकः सन्नानंदमयशब्देनोच्यते
६२॥

विलीनावस्थ आनंदमयस्तदुक्तमेवार्थं स्फुटीकरोति ॥ सुप्तीति ॥ सुप्तेः पूर्वस्मिन्नव्यवहिते क्षणे यांतर्मुख्या बुद्धिवृत्तिः सुखस्वरूपम
तत्सुखप्रतिप्रदर्शयंत्यैव विंबयुक्ता भवति ॥ ततस्तदनंतरं तत्प्रतिविंबसहिता सैव वृत्तिर्निद्रारूपेण विलीनानंदमयशब्देनाभिधीयते
६४ ॥ एवमानंदमयस्वरूपं प्रदर्श्य तस्यैव प्रबोधकाले विज्ञानमयरूपेण स्फुरत्त्वसिद्ध्यै तदानीं सुखानुभवमुपपादयति ॥ अंतर्मुखो य

सुप्तिपूर्वक्षणे बुद्धिवृत्तिर्या सुखविंबिता । सैव तद्विंबसहिता लीनानंदमयस्ततः ॥ ६४ ॥ अंतर्मुखो य आनंद
मयो ब्रह्मसुखं तदा । भुंक्ते चिद्विंबयुक्ताभिरज्ञानोत्पन्नवृत्तिभिः ॥ ६५ ॥ अज्ञानवृत्तयः सूक्ष्मा विस्पष्टा बु
द्धिवृत्तयः । इति वेदांतसिद्धांतपारगाः प्रवदंति हि ॥ ६६ ॥ मांडूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटं

इति ॥ सुखप्रतिविंबसहितांतर्मुखधीवृत्तिजनितसंस्कारसहितोऽज्ञानोपाधिको य आनंदमयस्तदा सुषुप्तौ ब्रह्मसुखं स्वरूपभूतं सु
खं चिदाभाससहिताभिरज्ञानदुत्पन्नाभिः सुखादिगोचराभिर्वृत्तिभिः सत्वपरिणामविशेषैर्भुंक्ते अनुभवति ॥ ६५ ॥ ननु तर्हि जागरणे
इव तदानीं सुखमनुभवामीत्यभिमानः कुतो न स्यादित्याशंक्याविद्यावृत्तीनां बुद्धिवृत्तिवत्स्पष्टत्वाभावादित्यभिप्रायेणाह ॥ अ
ज्ञानेति ॥ इदं कुतोऽवगतमित्यत आह ॥ इतीति ॥ ६६ ॥ ननु आनंदमयो ब्रह्मानंदं सूक्ष्माभिरविद्यावृत्तिभिर्भुंक्त इत्यत्र किं मानमित्यत
आह ॥ मांडूक्येति ॥ ६७ ॥ ॥ ॥ ॥

विलीनावस्थ आनंदमय इत्युक्तमेवार्थं स्फुटीकरोति सुप्तीति सुप्तेः पूर्वस्मिन्नव्यवहिते यान्तर्मुखा बुद्धिवृत्तिः स्वरूपसुखप्रतिबिंबयुक्ता भवति ततोऽनंतरं तत्प्रतिबिंबसहिता सैव वृत्तिर्निद्रारूपेण विलीनानंदमय इत्यभिधीयते ६४ एवमानंदमयस्वरूपं प्रदर्श्य तस्यैव) इदानीं सुषुप्तिस्थान एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुक्चेतोमुख इति माण्डूक्यादिश्रुतिगतवाक्यमर्थतः एकीभूत इति सुषुप्तं सुषुप्तिस्थानमतितिष्ठतीति सुषुप्तस्थः सुषुप्त्यभिमानीत्यर्थः आनंदमय आनंदप्रचुर आनंदभुक् सुखस्वरूपमानंदं भुंक्ते इत्यानंदभुक् चेतोमयवृत्तिभिश्चेतश्चेतन्यं तन्मयास्तत्प्रचुराश्चित्प्रतिबिंबसहिता इत्यर्थः ताश्च ता वृत्तयश्च चेतो

वृत्तयश्च

एकीभूतः सुषुप्तस्थः प्रज्ञानघनतां गतः आनंदमय आनंदभुक् चेतोमयवृत्तिभिः ६८
विज्ञानमयमुख्यैर्यै रूपैर्युक्तः पुरा घनः स लये नैकतां प्राप्तो बहुतंडुलपिष्टवत् ६९

६८

मयवृत्तयस्ताभिरानंदभुगिति योजना ६८ तद्वाक्यगतस्यैकीभूत इति पदस्यार्थमाह विज्ञानेति यस्मात्पुरा जाग्रदवस्थायां विज्ञानमयमुख्यैः स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमय इत्यादिश्रुत्युक्तैः रूपैराकारविशेषैर्युक्तोऽभूत् स एव घनो लये न विज्ञानमनआद्युपाधिविलये नैकतामेकाकारतां प्राप्तो गतो भवति तत्र दृष्टांतमाह बहुतंडुलेति ६९

अथ प्रज्ञानघनशब्दार्थमाह ॥ प्रज्ञानानीति ॥ पूर्वं प्रजागरादौ प्रज्ञानशब्दवाच्या घटादिगोचरा या बुद्धिवृत्तयोऽवगतास्ता एव सुषु
प्तिकाले घटादिविषयाभावे सति घनीभवन्ति द्रूपेणैकरूपीभूताः ॥ तत्र दृष्टान्तमाह ॥ घनत्वमिति ॥१॥ इदानीं प्रज्ञानघनशब्दा
र्थनिरूपणप्रसंगागतं किंचिदाह ॥ तदिति ॥ यदिदं वेदान्तेषु साक्षित्वेनाभिधीयमानप्रज्ञानघनत्वमाश्रितं देवलौकिकाः शास्त्रसं
स्काररहितास्ते किं कावेशेषिकादयः शास्त्रीयास्ते दुःखाभावं प्रचक्षते दुःखाभावरत्वान्मुः क्तेरित्यतआह ॥ यावदिति ॥ यावत्त्वे

प्रज्ञानानि पुरा बुद्धिवृत्तयोऽप्यघनीभवन् ॥ घनत्वं हिमवद्बिन्दूनामुदग्देशे यथा
तथा ॥१॥ तद्घनत्वं साक्षिभावं दुःखाभावं प्रचक्षते ॥ लौकिकास्तार्किकाः यावद् दुः
खवृत्तिविलोपनात् ॥२॥ अज्ञानबिंबिताचित्स्यान्सुखमानंदभोजने ॥ भुक्तं ब्र
ह्मसुखं त्यक्त्वा बहिर्यात्यथ कर्मणा ॥३॥ ना१

दुःखवृत्तयस्तासां सर्वासां विलयादित्यर्थः ॥२॥ पूर्वोदाहृतश्रुतिवाक्यगतचेतोमुखशब्दार्थमाह ॥ अज्ञानेति ॥ आनंदभोजने सौ
षुप्तब्रह्मानंदास्वादने सुखसाधनमज्ञानबिंबिताचित्स्यात् ॥ अज्ञानवृत्तौ प्रतिबिंबितं चैतन्यमेवाभवेत् ॥ ननु सुषुप्तावानंद
मयरूपेणाजीवेन ब्रह्मसुखं चेद्भुज्यते तर्हि तत्परित्यज्य कुतो जागरणं दुःखात्मकं गच्छेदित्यत आह ॥ भुक्तमिति ॥ पुण्य
पुण्यकर्मपाशबद्धत्वात्तेन प्रेरितो जीवः साक्षात्कृतमपि ब्रह्मानंदं परित्यज्याथ बहिर्यातिजागरणादिकं गच्छतीत्यर्थः ॥३॥

एतत्कुतोऽवगम्यत इत्याशंक्य पुनश्च जन्मांतरकर्मयोगात्स एव जीवः स्वपिति प्रबुद्ध इति कैवल्यश्रुतिवाक्यादिति मत्वा त
स्तद्वाक्यमर्थतः पठंस्तदभिप्रायमाह कर्मेति ॥७२॥ सुप्तो ब्रह्मानंदोऽनुभूत इत्यत्र लिंगं वाह कंचिदिति प्रबुद्धस्य जागरणं प्राप्तस्या
पि कंचित्कालं स्वल्पकालपर्यंतं सुषुप्तावनुभूतस्य ब्रह्मानंदस्य वासना संस्कारोऽनुगच्छेत् तच्चानुगच्छतीति कुत एतदवगम्यत इ

कर्म जन्मांतरेऽभूद्यत्तद्योगाद्बुध्यते पुनः ॥ इति कैवल्यशाखायां कर्मजो बो
ध ईरितः ॥७३॥ कंचित्कालं प्रबुद्धस्य ब्रह्मानंदस्य वासना ॥ अनुगच्छेद्यतस्तू
ष्णीमास्ते निर्विषयः सुखी ॥७४॥ कर्मभिः प्रेरितः पश्चान्नानादुःखानि भावयन्
शनैर्विस्मरति ब्रह्मानंदमेषोऽखिलो जनः ॥७४॥

इत्यत आह यत इति यतः यस्मात्कारणाद्बोधादौ निर्विषयो विषयानुभवरहितो वगम्यत इत्यर्थः ॥७४॥ तर्हि तथैव तूष्णीं
कुतो नावतिष्ठत इत्यत आह कर्मभिरिति कर्मभिः पूर्वोक्तैः प्रेरितः सर्वोऽपि प्राणी पश्चान्नानाविधानि दुःखान्यनुसंद
धानः शनैर्ब्रह्मानंदं विस्मरति ॥७५॥ ॥ ॥ ॥ ॥ ॥ ॥

इतोऽपि ब्रह्मानंदे न विप्रतिपत्तिः कार्येत्याह प्रागीति प्रत्यहं मनुष्याणां निद्रायाः प्रागूर्ध्वमपि निद्रारंभे निद्रावसाने च ब्रह्मानंदे स्नेहोऽस्ति यतो निद्रादौ मृदुशय्यादि संपादयंति तदवसाने च तं परित्यक्तुमशक्ताः तूष्णीमासते तेन कारणेनास्मिन् ब्रह्मानंदे कोऽपि बुद्धिमान् विविदिषुर्जनको भवतीत्यर्थः ॥७६॥ चोदयति नन्विति गुरुशुश्रूषादिरहितस्य ब्रह्मानंदानुभवस्य तूष्णींस्थि×

प्रागूर्ध्वमपि निद्रायाः पक्षपातो दिने दिने ॥ ब्रह्मानंदे नृणां तेन प्राज्ञोऽस्मिन् विवदेत कः ॥७६॥
ननु तूष्णींस्थितो ब्रह्मानंदश्चेद्भाति लौकिकाः ॥ अलसाश्चरितार्थाः स्युः शास्त्रेण गुरुणा च किं ॥७७॥
बाढं ब्रह्मेति विद्यश्चेत्कृतार्थस्तावते ॥ गुरुशास्त्रे विनात्यंतं गंभीरं ब्रह्म वेत्ति कः ॥७८॥ जा
नाम्यहं त्वदुक्त्याद्य कुतो मेन कृतार्थता ॥ अत्र एव जनतादृशो वृत्तं प्राज्ञंमन्यस्य कस्यचित् ॥७९॥

तिमात्रलभ्यत्वे गुरुशुश्रूषादिपूर्वकं श्रवणादिकं व्यर्थं स्यादित्यर्थः ॥७७॥ अयं ब्रह्मानंद इति ज्ञाते सति भवत्येव कृतार्थता तदेव गुरुशुश्रूषादिकं अंतरेण न संभवतीत्याह बाढमिति अत्यंतगंभीरं दुरवगाहमवाङ्मनसगम्यं सर्वज्ञं सर्वांतरं सर्वात्मरूपं ब्रह्म गुरुशास्त्रे विहायान्येन केनाप्युपायेन कोऽपि जानीयान्न कोऽपीत्यर्थः ॥७८॥ ननु त्वद्वाक्यादेव ब्रह्मानंदं जानतो मम न कृतार्थतोपलभ्यते इत्याशंक्यानुवादपूर्वकं सोपहासमुत्तरमाह जानामीति ॥७९॥

तदेवस्पष्टं दर्शयति चतुरिति कश्चिच्चतुर्वेदविदे कस्मैचिदिदं वस्तुधनं दातव्यमित्येवंविधमाकर्ण्य त्वा वेदाश्चत्वार इत्येतस्मा
देववाक्यादहं बोद्धिमतो मेदीयतामिति वक्ति तद्वत्त्वमवानित्यर्थः ८१ ननु वेदाश्चत्वार इति यो वेद स वेदगतां संख्यामेव वेत्ति
ननु वेदानां स्वरूपमिति चोदयति संख्यामिति सांख्येन सम्पाद्यते तर्हीति एवं चतुर्वेदाभिज्ञः अन्यैरवत्वमपि अशेषं संपूर्णं
यथा भवति तथा ब्रह्म न वेत्सि नैव जानासि ८२ ननु संख्यातिरिक्तवेदस्वरूपभेदद्रव्यगतभेदमनन्यत्वमानंदरूपे ब्रह्म

चतुर्वेदाविदे देयमिति स्म त्वमुवाचत वेदाश्चत्वार इत्येवं बुद्धिमेदीयतां धनं ८१ संख्या
मेवैष जानाति ननु वेदानशेषतः यदि तर्हि त्वमप्येवं नो शेषं ब्रह्म वेत्सि हि ८२ अखंडै
करसानंदे मायातत्कार्यवर्जिते अशेषत्वसशेषत्ववार्तावसर एव कः ८३ शब्दाने
वपठस्यार्हो तेषामर्थं च पश्यसि शब्दपाठेऽर्थबोधस्ते संपाद्यत्वेन शिष्यते ८४

एतज्ज्ञायमानस्याशस्याभावाद् संपूर्णज्ञानित्वोपालंभो न घटत इति चोदयति अखंडेति ८३ ब्रह्मज्ञानेप्यशेषत्वादिकं दर्शयितुं अ
हं जानामीति वदंतं विकल्प्य पृच्छति शब्दानिति किमखंडैकरसमद्वितीयसच्चिदानंदरूपमित्यादिशब्दानेव पठसि अहो अ
थवा तेषां शब्दानामर्थं स्वगतादिभेदशून्यत्वादिकं च पश्यसि जानासीति विकल्पार्थः आद्ये पक्षे सावशेषत्वं दर्शयति
शब्दपाठ इति ८४

द्वितीयेपि तद्दर्शयति व्याकरणादित्यकपक्षद्वयं तिगमादेः ॥ व्याकरणादिना परोक्षज्ञाने संपादितेपि संशयादि निरासेना
परोक्षीकरणमवशिष्यते तर्हि कदा संपूर्णत्वं ज्ञानस्येत्याशंक्य तदवधिं दर्शयति ॥ स्यादिति पदार्थज्ञातार्थत्वबुद्धिरुत्पद्यते

अर्थे व्याकरणाद्बुद्धे साक्षात्कारो वशिष्यते ॥ स्यात्कृतार्थत्वधीर्यावत्
तावद्गुरुमुपास्वतो ॥ ८४ ॥ आस्तामेतद्यत्र यत्र सुखं स्याद्विषयैर्विना ॥ तत्र स
र्वत्र विज्ञेया ब्रह्मानंदस्य वासना ॥ ८५ ॥

तदा ज्ञानस्य संपूर्णतावगंतव्येत्यर्थः ॥ ८४ ॥ एवं प्रासंगिकं समाप्य प्रकृतमेवानुसरति आस्तामिति यत्र यस्मिन्यस्मिन्काले
तूष्णींभावादौ विषयानुभवमंतरेण सुखं भवति तत्र तत्र सुखस्य विषयजन्यत्वाभावात्सामान्याहंकारावच्छिन्नत्वाच्च
वासनानंदत्वमवगंतव्यमित्यर्थः ॥ ८५ ॥

एवंब्रह्मानंदवासनानंदौदर्शयित्वेदानीमानंदत्रैविध्यनिरूपणायात्मादिसुखधीवृत्तावित्यत्रोक्तमेवविषयानंदंपुनर
नुवदति विषयेष्वपीतिपदा यदास्रगादिविषयलाभात्तदिच्छोपरमोभवति तदामनस्यंतर्मुखेसति तस्मिन्न्यः स्वात्मानंदःप्र
तिबिंबितोभवत्ययंविषयानंद इत्यर्थः फलितमाह ब्रह्मानंद इति उक्तप्रकारेण स्वप्रकाशतयासुषुप्तौप्रतिभासमानोयोब्रह्मा

विषयेष्वपिलब्धेषुतदिच्छोपरमेसति अंतर्मुखमनोवृत्तावानंदःप्रतिबिंबति ८८

ब्रह्मानंदोवासनाचप्रतिबिंबइतित्रयं अंतरेणजगत्यस्मिन्नानंदोनास्तिकश्चन ८९

नंदोयस्तुसुषुप्तौस्थितोविषयानुभवमंतरेणप्रतीयमानोवासनानंदोयोप्यनीरविषयलाभादंतर्मुखेमनसिप्रतिबिंबितोविष
यानंदः एतत्त्रितयातिरेकेणास्मिन्जगतिनकश्चिदानंदोस्ति नन्वानंदस्त्रिविधो ब्रह्मानंदोविद्यासुखंतथा विषयानंद इत्यने
नप्रकारेणानंदत्रैविध्यमुक्तमिदानींतुब्रह्मानंदोवासनाचप्रतिबिंबइतित्रयंयेतद्विलक्षणमानंदस्यत्रैविध्यमुच्यते
त्यतःपूर्वोत्तरविरोधः किंच यावद्यावदहंकारोविस्मृतोभ्याससयोगतः तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोनुमीयतइ

ति तादृक्सुप्रमानुदासीनकालेप्यानंदवासनां॥ उपेक्ष्य मुख्यमानंदं भावयत्येव तत्परः॥ इति चोक्तप्रकारद्वयातिरिक्तो
निजानंदो ऽभिधीयते॥ तथा द्वितीयाध्याये मंदप्रज्ञं तु जिज्ञासुमात्मानंदेन बोधयेदिति आत्मानंदस्ततोऽन्योऽभिधीयते
योगानंदः पुरोक्तो यः स्वत्र योगानंदोपि काश्चिदवभासते॥ ब्रह्मानंदाभिधे ग्रंथे तृतीयाध्याय ईरितः॥ अद्वै
तानंद एव स्यादित्यत्राद्वैतानंदं चान्यमेव गच्छामः॥ अतोत्तरेण जगत्यस्मिन्ज्ञानंदो नास्ति कश्चनेत्युक्तेर्विस
ध्येतेति चेन्नैवं॥ विद्यानंदस्य विषयानंदवदंतःकरणवृत्तिविशेषत्वेन विषयानंदेऽन्तर्भावस्य विषया×
घा८ नंदवद्विद्यानंदो धीवृत्तिरूपकस्तूत्तरग्रंथे धीवृत्तिरूपत्वाभिधानेनाविवादितत्वात् निजानंदात्मानंदमु
ख्यानंदयोगानंदाद्वैतानंदानां तु ब्रह्मानंदानतिरिक्तत्वाच्च॥ तथाहि यावद्यावदहंकारस्त्वदाहृते श्लोके
योगत्वहानोपायगम्यतया योगानंदत्वेन विवादितस्यापि निजानंदस्यैव न द्वैतं भासते नापि निद्रा तत्रास्ति
यत्सुखं स ब्रह्मानंदः स्यादित्याह भगवानर्जुनं प्रतीत्यस्मिन्नुक्तोत्तरश्लोकएव ब्रह्मानंदत्वाभिधानान्नि×
जानंदो ब्रह्मानंदान्न विद्यते॥ तथा मुख्यानंदोपि ब्रह्मानंद एव॥ तथा च विषयानंदो वासनानंद इत्यमुख्या
नंदौ जनयन्नास्ते ब्रह्मानंदः स्वयं प्रभुरित्यत्र जन्यत्वेनामुख्यत्वेन तयोर्विषयानंदवासनानंदयोर्जनकत्वे
नाभिहितस्य ब्रह्मानंदस्यैव तादृक्सुप्रमानुदासीनकालेपीत्युदाहृत एव श्लोके आनंदवासनामुपे

न काले पीत्युदाहृत एव श्लोके आनंदवासनामुपेक्ष्य मुख्यमानंदमावयत्येव तत्पर इति मुख्यानंदत्वा
भिधानादात्मानंदाद्वैतानंदयोरुक्तब्रह्मानंदत्वे योगानंदः पुरोक्तो यः स आत्मानंद इष्यतामिति तृतीया
दौ प्रथमाध्याये योगानंदतया विवक्षितस्य ब्रह्मानंदस्यैव योगानंदशब्देनानुवादपूर्वकमात्मानंद
तामभिधाय कथं ब्रह्मत्वमेतस्य संभवस्येति चेदिति प्रश्नपूर्वकमाकाशादिशरीरांतामित्यादिना
द्वितीयस्य ब्रह्मत्वप्रतिपादनादनावगंतव्यं तस्माद्ब्रह्मानंदो वासना च प्रतिबिंब इत्युक्तं त्रैविध्यं
मुख्यं ननु तर्हि नत्वेवं वासनानंदादपीतरौ वेत्तु योगी निजानंदमित्यत्र निजानंदस्य ब्रह्मानंदवास
नानंदाभ्यां भेदेनाभिर्देशो न युज्यत इति न शंकनीयं एकस्यैव ब्रह्मानंदस्य जगत्कारणत्वोपाधिसाहित्य
राहित्यभेदेन भेदव्यपदेशोपपत्तेः तथाहि ब्रह्मानंदनिरूपणावसरे आनंदादेव जातानि जायंत इ
त्यादिना जगत्कारणत्वाभिधानेन ब्रह्मानंदस्य समायत्वमवगम्यते निर्मायस्य जगत्कारणत्वानुपप
त्तेः निजानंदनिरूपणकाले यावद्यावदहंकार इत्यादिना सकारणस्याहंकारस्य विलयप्रतिपाद
नान्निजानंदस्य निर्मायत्वमिति सर्वमनवद्यं ॥ ८७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नन्वस्मिन्नध्याये ब्रह्मानंदविवेचनस्यैव प्रस्तुतत्वादितरानंदद्वयप्रतिपादनं प्रकृतासंगतमित्याशंक्य तयोर्ब्रह्मानंदजन्यत्वेन तद्बोधोपयोगित्वान्न प्रकृतासंगतामित्यभिप्रायेणाह ॥ तथेति तथा च यावमानंदत्रैविध्ये सति यः स्वयंप्रकाशब्रह्मानंदः विषयानंदवासनानंदौ जनयति स ब्रह्मानंदो वेदितव्य इत्यर्थः ॥ ८८ ॥ उक्तानुसंकीर्तनपूर्वकमुत्तरग्रंथमवतारयति

तथा च विषयानंदो वासनानंद इत्यमू ॥ आनंदौ जनयन्नास्ते ब्रह्मानंदः स्वयंप्रभः ॥ ८८ ॥
श्रुतियुक्त्यनुभूतिभ्यः स्वप्रकाशचिदात्मके ॥ ब्रह्मानंदे सुप्तिकाले सिद्धे सत्यन्यदाशृणु ॥ ८९ ॥

श्रुतीति श्रुतिभिः सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेतीत्यादिभिरुदाहृताभिर्युक्तिभिः सुखमहमस्वाप्समित्यादिपरामर्शान्यथानुपपत्यादिभिः अनुभूत्या चार्यपरिकल्पितेन सौषुप्तानुभवेन च सुषुप्तिकाले स्व स्वप्रकाशो ब्रह्मानंदः साधितः इतः परमन्यदा जागरणावस्थायामपि यो ब्रह्मानंदोवगम्यते तं शृणु इत्यर्थः ॥ ८९

प्रतिज्ञातमेव ब्रह्मानंदागमोपायं दर्शयितुं तदुपोद्घातत्वेन सप्तभिः जीवस्यावस्थाद्वयप्राप्तिं दर्शयति ॥ यदिति सुप्तो
सुषुप्तिकाले विलीनावस्थ आनंदमयशब्देन कथ्यते स उक्तो य आनंदमयः स विज्ञानशब्दाभिधेयबुद्ध्युपाधिमत्वेन वि
ज्ञानमयतां प्राप्य स्थानभेदतो वक्ष्यमाणस्थानविशेषयोगेन स्वप्नं जागरणं वा कर्मानुसारेण गच्छति ॥ ९० ॥ इदानीं जाग्रदाद्य

य आनंदमयः सुप्तौ स विज्ञानमयात्मतां ॥ गत्वा स्वप्नं प्रबोधं वा प्राप्नोति स्थानभेदतः ॥ ९० ॥
नेत्रे जागरणं कंठे स्वप्नः सुप्तिर्हृदंबुजे ॥ आपादमस्तकं देहं व्याप्य जागर्ति चेतनः ॥ ९१ ॥ दे
हतादात्म्यमापन्नस्तप्तायःपिंडवत्ततः ॥ अहं मनुष्य इत्येवं निश्चित्यैवावतिष्ठते ॥ ९२ ॥

वस्थोपयोगीनि स्थानानि दर्शयति नेत्रेति नेत्रशब्दस्य चक्षुरादेर्देहोपलक्षणपरतामभिप्रेत्य नेत्रे जागरणमित्यस्यार्थमा
हाआपादेति ॥ ९१ ॥ चेतनो जीवो देहं व्याप्येत्यनेन विवक्षितमर्थं दृष्टांतप्रदर्शनेन स्पष्टयति ॥ देहेति ॥ तत्प्रमाणमाह
ततइति यतो मनुष्यत्वादिजातिमता देहेन तादात्म्यं प्राप्तस्ततोऽहं मनुष्य इत्येवं निश्चित्य संशयादिरहितज्ञानेन गृही-
त्वैवावतिष्ठते ॥ ९२ ॥ ॥ ॥

देहतादात्म्याभिमानहेतुकान्यवस्थान्तराणि दर्शयति उदासीन इति तत्र सुखित्वदुःखित्वयोः कर्मजन्यत्वज्ञानाय विशेषणान्न तयोः सुखदुःखयोः कर्मैकहेतुत्वं दर्शयति सुखदुःखे इति २३ तयोश्च सुखदुःखयोर्निमित्तभेदाद्द्वैविध्यमाह बाह्येति तर्ह्यौदासीन्यं कदा स्यादित्यत आह सुखदुःखान्तरालेष्विति व्याख्यातभेदविवक्षयाप्यनुवचनं २४ यदर्थं जागरादावप्यन्य

उदासीनः सुखी दुःखी त्यवस्थात्रयमत्यसौ ॥ सुखदुःखे कर्मकार्ये त्वौदासीन्यं स्वभावतः ॥ २४ ॥
बाह्यभोगान्मनोराज्यात्सुखदुःखे द्विधा मते ॥ सुखदुःखान्तरालेषु भवेत्तूष्णीमवस्थितिः ॥ २४ ॥
न कापि चिंता मेऽस्त्यद्य सुखमास इति ब्रुवन् ॥ औदासीन्ये निजानंदभानं वक्त्यखिलो जनः ॥ २५ ॥

स्तं तदिदानीं दर्शयति नेति सर्वोऽपि जन इदानीं मम कापि चिंता गृहादिविषया नास्त्यतः सुखं यथा भवति तथा तिष्ठामीति वदन्नौदासीन्यकाले स्वरूपानंदस्फूर्तिं ब्रूते तेन जागरणावस्थायामपि निजानंदभानमस्तीत्यवगंतव्यमित्यभिप्रायः ॥ २५ ॥

नन्वौदासीन्येवभासमानस्य निजानंदत्वे तस्य ब्रह्मानंदत्वात्पूर्वोक्तो वासनानंदता नस्यादित्याशंक्याहंकारसामान्यावृत
त्वान्न ब्रह्मानंदतेति परिहरति अहमिति देवदत्तोहमित्यादिविशेषशून्येनास्मीत्येवंरूपेणाहंकारसामान्येना
वृतत्वान्नायं मुख्य इत्यर्थः तर्हि तस्य किंरूपतेत्यत आह किंत्विति २६ मुख्यानंदातिरिक्तो वासनानंदसञ्ज्ञो वेद्यो

अहमस्मीत्यहंकारसामान्याच्छादितत्वतः । निजानंदो न मुख्योयं किंतु सौ तस्य
वासना ॥ २६ ॥ नीरपूरितभांडस्य बाह्ये शैत्येन तज्जलं । किंतु नीरगुणस्तेन नीर

तमाह नीरपूरिते जलपूराकुंभस्य बाह्यभागस्पर्शनेनोपलभ्यमानं यच्छैत्यमस्ति तत्तावज्जलं न भवति इवत्वान्नोपलंभात्
किं तर्हीत्यत आह किंतु नीरगुण इति कथं नीरगुणत्वमवगम्यत आह तेनेति विमतं घटेनोपलभ्यमानं शैत्यं जल
जन्यं जलविनमहीति शैत्यत्वात् जले उपलभ्यमानशैत्यवत् २७

प्रवृत्तेर्वृत्तीरानुमापकत्वे शैत्यस्य प्रवृत्ते किमायातमित्याशंक्य तद्वद्वासनानंदस्यापि स्फुरत्वानंदानुमापकत्वमायातमि-
त्याह ॥ यावदिति ॥ अभ्यासयोगतः ज्ञानमात्मानि महति निर्विच्छिन्नप्रवच्छेदं तदात्मनीति स्फुरत्यविहितनिरोधसमाध्यभ्यास

यावद्यावदहंकारो विस्मृतोऽभ्यासयोगतः ॥
तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोऽनुमीयते ॥९२॥

योगेन यावद्यावदहमादिवृत्तिविकल्पवशाच्चित्तस्य सूक्ष्मता जायते ॥ तावत्तावन्निजानंदाभिव्यक्तिर्भवतीत्यनुमीयते ॥ अत्रा य
यं प्रयोगः अहंकारसंकोचविशेषविशिष्टक्षणो बुद्धितीयादिक्षणः पक्षः पूर्वस्मात्क्षणात् अधिकनिजानंदाविर्भाववा-
नहंकारसंकोचविशेषयुक्तकालत्वादहंकारसंकोचयुक्ताद्यक्षणवदिति ॥९२॥ ॥ ॥ ॥ ॥ ॥

कुड्ये सौक्ष्म्यस्य कोऽवधिरित्याकांक्षायां साक्षात्कारोऽवधिरित्याह ॥ सर्वात्मनेति ॥ तर्हि सा निद्रैव स्यादित्यत आह ॥ आलीनता
दिति सर्ववृत्तिविलयेऽप्यन्तःकरणस्वरूपाविलयान्नात्वेयं निद्रा ॥ बुद्धेः कारणात्मनाऽवस्थानं सुषुप्तिरित्याचार्यैरुक्तत्वा

सर्वात्मना विस्मृतः सन् सूक्ष्मतां परमां व्रजेत् ॥ आलीनत्वान्न निद्रै
षा ततो देहोऽपि नो पतेत् ॥ ९९ ॥ न द्वैतं भासते नापि निद्रा तत्रास्ति यत्सु
खं ॥ स ब्रह्मानंद इत्याह भगवानर्जुनं प्रति ॥ १०० ॥ ॥ ॥

दित्यर्थः ॥ अंतःकरणस्वरूपाविलयान्नावेति लिंगमाह ॥ तत इति ॥ यतः सुषुप्त्यादौ अहंकारविलयस्तत्र देहपातो दृष्टः इह तु तदभा
वाद् अविलीन इति गम्यते ॥ ९९ ॥ फलितमाह ॥ नेति ॥ यस्मिन्काले द्वैतभानं नास्ति निद्रापि नागच्छति ॥ तस्मिन्काले उपलभ्य
मानं यत्सुखं अस्ति स ब्रह्मानंद इत्यर्थः ॥ अयं ब्रह्मानंद इति कुतोऽवगम्यत इत्याशंक्य स्मृतिवाक्यादित्याह ॥ इतीति ॥ गीतायां
षष्ठाध्याय इति शेषः ॥ १०० ॥ ॥ ॥

भ्गी० १

तत्रैके: श्लोकैरुक्तावानित्याशंक्यतां [illegible] कान्यष्टत्वयैक्रमान्नुसारेण। शनैरिति। अयमर्थः धृतिगृहीतया धिया बु-
द्ध्या विवेकयुक्तया गुध्रा साधनभूतया शनैः शनैः न सहसा उपरमेन्मन उपरतिं कुर्यात् किं पर्यवर्तमित्यत आह आत्मसंस्थमि-
ति मन आत्मसंस्थमात्मनि संस्था सम्यक् स्थितिर्यस्य तत् आत्मैवेदं सर्वं न ततोन्यत्किंचिदस्तीत्येवंरूपायस्य तदात्मसं-

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किंचि
दपि चिंतयेत् १ यतो यतो निश्चरति मनश्चंचलमस्थिरं। ततस्ततो नियम्यैत
दात्मन्येव वशं नयेत् २॥

स्थं तथाविधं कृत्वा न किंचिदपि दपि चिंतयेत्। एष योगस्य परमोवधिः १। तत्संपादने प्रवृत्तो योगी प्रथमं किं कुर्यादित्यत
आह ~~एतत्संपादने प्रवृत्तो योगी प्रथमं~~ यत इति चंचलं स्वभावदोषादत एवास्थिरं। एकत्र विषये नियतमेवंविधं म
नो यदा यतो यतो यस्माद्यस्माच्छब्दादेर्निमित्तान्निश्चरति निर्गच्छति ततस्ततस्तस्माच्छब्दादेः सकाशान्नियम्य। तेषां श
ब्दादीनां मिथ्यात्वादिदोषदर्शनेन आश्रासीकृत्य वैराग्यभावनापूर्वकं निरुध्य। एतन्मनः आत्मन्येव वशं नयेत् आ-

त्मवश्यतां नापादयेत् एवं योगमभ्यसतो योगिन आत्मन्येव मनः
प्रशाम्यति ॥२॥

मनः प्रशांतो किं भवतीत्यत आह॥ प्रशांतमनसमिति प्रशांतरजसं प्रक्षीणमोहादिक्लेशरजसम् अत एव प्रशांतमनसं प्रकर्षेण

प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं॥
उपैति शांतरजसं ब्रह्मभूतमकल्मषम्॥२॥

त्यर्थं शांतं विक्षेपशून्यं मनो यस्य तं ब्रह्मभूतं ब्रह्मैवेदं सर्वमिति॥ निश्चयवत्तया जीवन्मुक्तं अकल्मषं अधर्मादिवर्जितमे
नं योगिनमुत्तमं क्षयित्वसातिशयित्वादिदोषराहित्यं सुखमुपैति॥ उपगच्छति॥२॥

संगृहीतार्थप्रपंचनपरान् तदीयानेव श्लोकानवतारयति यत्रेति चित्तं यत्र यस्मिन् काले योगसेवया योगानुष्ठानेन सर्वस्माद्विषयान्निवारि
तदुपरमतमुपरतिं गच्छति किंच यत्र यस्मिन्काले आत्मना समाधिपरिशुद्धेनांतःकरणेनात्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन्नु
पलभमानः स्वास्मिन्नेव तुष्यति तुष्टिं भजते न विषयेष्वित्यर्थः किंच यत्र यस्मिन्काले आत्मनि स्थितो योगी आत्यंतिकमत्यंतमेव

यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥ यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥४॥
सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं ॥ वेत्ति यत्र न चैवायं स्थितश्चलति तत्वतः ॥५॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ॥ यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्य
ते ॥६॥

तीत्यात्यंतिकमनंतं बुद्धिग्राह्यमिंद्रियनिरपेक्षया बुद्ध्या ग्राह्यमात्रमतींद्रियमिंद्रियगोचरातीतमविषयजनितं यत्तदी
दृशं सुखं वेत्त्यनुभवति किंच आत्मनि स्थितोयं तत्वतस्तस्मादात्मस्वरूपान्न चलति न प्रच्यवते किंच यमात्मलाभं ल
ब्ध्वा प्राप्य अपरं लाभांतरं न मन्यते आत्मलाभान्न परं विद्यते इति स्मृते किंच यस्मिन्नात्मतत्वे स्थितो गुरुणा म
हतापि दुःखेन शस्त्राभिघातादिलक्षणेन प्रह्लादवन्न विचाल्यते ४ ५ ६ ॥ ॥ ॥ ॥ ॥ ॥

इदानीमुपपादितं योगं निगमयति ॥ तं विद्यादिति शनैः शनैरित्यादिना यावद्भिर्विशेषणैर्विशिष्ट आत्मावस्थाविशेषो यो
ग उक्तस्तं दुःखसंयोगवियोगं दुःखैः संयोगः दुःखसंयोगस्तेन वियोगस्तं विपरीतलक्षणया योगसंज्ञितं योग इत्येव संज्ञि

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं ॥
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥२३॥

तं विद्याज्जानीयात् ॥ एवं विधयोगानुष्ठाने कंचित्कर्तव्यताविशेषमाह सेति ॥ स पूर्वोक्तो योगो निश्चयेनाध्यव
सायेनानिर्विण्णचेतसा निर्वेदरहितेन योक्तव्योऽनुष्ठेयः ॥२३॥ ॥ ॥ ॥

रदानीमुक्तमर्थमुपसंहरति युंजन्निति विगतकल्मषो विगतपापो योगांतरायवर्जितो योगी सदात्मानमेवं यथोक्ते
न प्रकारेण युंजन्ननुसंदधानः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणा संस्पर्शो यस्य सुखस्य तद्ब्रह्मसंस्पर्शं ब्रह्म
स्वरूपमनंतमिति यावत् अत्यंतमविनश्वरं निरतिशयं सुखमश्नुते प्राप्नोतीत्यर्थः ॥ २८ ॥ अनिर्वेदेन क्रियमाणो यो

युंजन्नेवं सदात्मानं योगी विगतकल्मषः सुखेन ब्रह्मसंस्पर्शमत्यं
तं सुखमश्नुते ॥ २८ ॥ उत्सेक उदधेर्यद्वत् कुशाग्रेणैकविंदुना ॥ म
नसो निग्रहस्तद्वद्भवेदपरिखेदतः ॥ ९ ॥

गाभ्यासः फलपर्यंतो भवतीत्येतत्सदृष्टांतमाह उत्सेक इति कुशाग्रेणोद्धृतेनैकेन बिंदुना क्रियमाण उदधे
रुत्सेक उत्क्षेपो बहिः सेचनं परिखेदाभावे सति यद्वत्कालांतरे भवेदेव तद्वन्मनसो निग्रहोऽपि श्रमसाहित्येन क्रियमा
णः कालांतरे सिध्यतेदं चाटिट्टिभोपाख्यानं मनसि निधायोक्तं ॥ ९ ॥

न केवलमयमर्थो जीतायामभिहितः किंतु मैत्रायणीयशाखायामपीत्याह बृहद्रथस्येति मैत्रायणीनामके यजुःशाखाभेदे शाकायन्यनामकः कश्चिद् ऋषिः स्वशिष्यत्वेनोपपन्नस्य बृहद्रथाख्यस्य राजर्षेर्ब्रह्मसुखं समाध्याभिधानस्य निर्विकल्पयोगसमवाप्तिं तत्र योक्तवान् १ केन प्रकारेणोक्तवानित्याशंक्य तत्प्रतिपादकान्तदीयान्मंत्रानुदाहरति यथेति

बृहद्रथस्य राजर्षेः शाकायन्यो मुनिः सुखं ॥ प्राह मैत्राख्यशाखायां समाधिं कृतिपुरःसरं ॥ १० ॥
यथा निरिंधनो वह्निः स्वयोनावुपशाम्यति ॥ तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति ॥ ११ ॥

निरिंधनो दग्धकाष्ठो वह्निः स्वयोनौ स्वकारणे तेजोमात्रे उपशाम्यति ज्वालादिसंबंधवर्जितं रूपं विशेषाकारं परित्यज्य तेजोमात्ररूपेण यथावतिष्ठते तथा तेनैव प्रकारेण चित्तमंतःकरणं सवितर्कवृत्तिक्षयान्निरोधसमाध्यभ्यासेन राजसादिसकलवृत्तिनाशात्स्वकारणे सत्त्वमात्रे उपशाम्यति सत्त्वमात्रावशिष्टं भवतीत्यर्थः ॥ ११ ॥ ॥

ततः किमित्यत आह स्वयोनाविति सत्ये आत्मनि विषये कामो यस्यास्तीति सत्यकामी तस्यात एव स्वयोनावुपशांतस्योप
शांतत्वादेवेंद्रियार्थेषु विषयेषु विमूढस्येंद्रियार्थेषु शब्दादिषु विमूढस्य विमुखस्य ज्ञानमग्नस्य मनसः कर्मवश
मनुगच्छंतीति कर्मवशानुगा ससाधना सुखदुःखादयो न्ततामेधिकत्वज्ञानेन मिथ्यात्वतः स्युरित्यर्थः २२ ननाचि
त्तोपशांतो न गान्मिथ्यात्मवतीत्यनुपपन्नं तदुपादानकत्वाभावात्तस्येत्याशंक्याह चित्तमिति यद्यपि स्वरूपेणाचित्तोपा

स्वयोनावुपशांतस्य मनसः सत्यकामिनः इंद्रियार्थविमूढस्यान्वृताः कर्मवशा
नुगाः २२ चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत् यच्चित्तस्तन्मयो मर्त्यो गुह्यमेतत्

पादानकं जगन्न भवति तथापि तस्याध्यस्तत्वं चित्तकारणकमेव हि शब्देनात्र सर्वानुभवं प्रमाणयति सुषुप्त्यादौ चि
त्तविलये भोगादर्शनादिति भावः यतः चित्तात्मकः संसारो तस्मिंश्चित्तमेव प्रयत्नेनाभ्यासयोगादिलक्षणेन शोधयेत् रज
स्तमोराहित्ये नैकाग्रं कुर्यात् नत्वात्मनो विमुक्तये आत्मैव शोधनीयो नाचित्तमित्याशंक्याह यदिति मर्त्य इत्युपलक्षणं
देहिमात्रस्य यो देही यच्चित्तो यस्मिन्पुत्रादौ विषये चित्तवान्भवति स तन्मयस्तदात्मक एव तत्संकल्पविकल्पयोरात्मन्ये
वसमारोपणादेतत्सनातनमिदमनादिसिद्धं गुह्यं रहस्यमेतदुक्तं भवति स्वभावो प्रबुद्धस्यात्मनो यतस्मिंश्चित्तसंपर्कादेव संसा

तः।

न त्वनादिभवपरंपरोपार्जितसुखदुःखप्रदपुण्यापुण्यकर्मणोः सतोश्चित्तशोधनेनापि कथमात्मनः संसारनिवृत्तिर्भविष्य
तीत्याशंक्य चित्तप्रसादोपलक्षितब्रह्मानुसंधानेन सकलकर्मक्षयोपपत्तेर्मैवमित्याह ॥ चित्तस्येति ॥ हिशब्दो न तद्यथेषीकातूल
मग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंते ॥ उपपातकेषु सर्वेषु पातकेषु महत्सु च प्रविश्य रजनीपादं ब्रह्मध्यानं

चित्तस्य हि प्रसादेन हंति कर्म शुभाशुभं ॥
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमक्षयमश्नु
ते ॥ १४ ॥

समाचरेत् ॥ इत्यादिश्रुतिस्मृतिप्रसिद्धं द्योतयति ततः किमित्यत आह ॥ प्रसन्नात्मेति ॥ प्रसन्नः प्रसन्न आत्मा चेतो यस्य स
योऽसौ प्रसन्नात्मा आत्मनि स्वस्वरूपभूतेऽद्वितीयानंदलक्षणे ब्रह्मणि स्थित्वा ॥ तदेवाहामिति निरूपेण दृश्यजातं परिह
हृत्य विजातीयरूपेणावस्थापाद्वयमविनाशि परमसुखस्वरूपमनंतं तदश्नुते ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रसन्नात्मात्मनि स्थित्वेत्युक्तमेवार्थं दृष्टांतेनोत्तरः स्पष्टं द्रढयति समासक्तमिति प्राणिनश्चित्तं विषयगोचरः विष-
यगोचरः इंद्रियप्रचरस्तस्मिन् तस्मिन् यथा स्वभावतः समासक्तं भवति तद्वच्चित्तं ब्रह्मणि प्रत्यगभिन्ने परमात्मनि

समासक्तं यथा चित्तं जंतोर्विषयगोचरे ॥ यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बंध-
नात् ॥१५॥ मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ॥ अशुद्धं कामसंपर्काच्छुद्धं कामवि-
वर्जितं ॥१६॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः ॥ बंधाय विषयासक्तं मुक्तै नि-

यद्येवमासक्तं स्यात्तर्हि कः संसारान्न मुच्येत सर्वोपि मुच्येतैवेत्यर्थः ॥१५॥ उक्तार्थदार्ढ्याय मनसोऽवांतर-
भेदमाह मन इति तत्र कारणमाह अशुद्धमिति कामः रत्युपलक्षणं क्रोधादेरपि ॥१६॥ द्विविधस्यैव
तस्य क्रमेण संसारमोक्षयोर्हेतुतां दर्शयति मन एवेति ॥१७॥

प्रपंसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुत इत्युक्तमेवार्थं श्रुतिः स्वयमेव प्रपंचयति समाधीति ॥ आत्मनि प्रत्यग्रूपे निवेशि
तस्य समाधिनिर्धूतमलस्य समाप्तिप्रत्यग्ब्रह्मतोरैक्यगोचरप्रत्ययावृत्त्या निर्धूतमलस्याशेषेण च निवारितर
जस्तमोमलस्य चेतसस्तस्मिन्समाधौ यत्सुखमुत्पद्यते तदा समाध्यनुत्थं तत्सुखं गिरा वाचा वर्णयितुं न शक्यते ऐ लौकिक

समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् ॥ न शक्यते वर्णयितुं तदा गिरा स्वयं
तदंतःकरणेन गृह्यते ॥ १८ यद्यप्यसौ चिरं कालं समाधिर्दुर्लभो नृणां ॥ तथापि झटिति ब्रह्मानं
दनिश्चययत्यसौ ॥ १९ ॥ ॥

सुखत्वादित्यर्थः ॥ किंतु स्वयं तत्स्वरूपमनंतं सुखमंतःकरणेनैव गृह्यते ॥ १८ ॥ ननु चास्यैव समाधेर्दुर्लभत्वात्कथमने
नैन ब्रह्मानंदनिश्चयसंभव इत्याशंक्याह ॥ यद्यप्यसाविति ॥ अस्य समाधेः संततस्याऽसंभवेऽपि क्षणिकस्यास्य
संभवात्तेनैवायमानंदो निश्चेतुं शक्यत इत्यर्थः ॥ १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तत्त्वात्मदर्शनश्रवणादौ प्रवृत्ता अपि केचिदानंदानिश्चयपरत्याविर्भूतत्वावध्वर्तनेरत्या शंक्य अभ्रान्तादि रहिता तेषां तत्प्र-
याते पि अभ्रान्तादिवत्तां तन्निश्रयो भवत्येवेत्याह । अभ्रान्तेरिति व्यसनं तस्य सर्वं संपादयिष्यामीत्याग्रहस्तद्वान् व्यसनी योऽत्र
समाधौ सर्वथाऽप्यवश्यं ततः किमित्यत आह निमग्ने तस्मिन्निति तस्मिन्नन्यस्मान्नंदे सत्यवदेकदाचित्क समाधौ निमग्ने सति

अभ्रान्तेर्व्यसनी योऽत्र निमग्नोऽत्यवसर्वथा । निमग्ने तु सवृत्तस्मिन् विश्वसित्यन्यदाप्ययं ॥२०॥
तादृक्पुमानुदासीनकालेऽप्यानंदवासनां । उपेक्ष्य मुख्यमानंदं भावयत्येव तत्परः ॥२१॥
परव्यसनिनी नारी व्यग्रापि गृहकर्मणि । तदेवास्वादयत्यंतः परसंगरसायनं ॥२२॥

अयं सत्पुरुषो विश्रायवान् व्यदापीतरस्मिन् कालेपि विश्वसिति आनंदोऽस्तीति विश्वासं करोति २० ततोपि किं तत्राह तादृ-
गिति तादृक्पुमान् अभ्रान्तादिपुरःसरं सत्पुरुषोऽभ्यायवान् पुरुषः अदोदासीन्यदशायामपि उपलभ्यमानां स्वर्वोक्त-
मानंदवासनामुपेक्ष्य तत्परो मुख्यानंदे तात्पर्यवान् सन् तमेव भावयति २१ एवं व्यवहारकालेपि निजानंदं भावयती-
त्यत्र दृष्टांतमाह परव्यसनीनीति २२

दार्ढ्यमिति केयोजयति एवमिति २३ धीरशब्दार्थमाह धीरत्वमिति इंद्रियाणां विषयात्रिसृत्ये न प्रकृताकर्षणात्साम
र्थेपि स्वस्वरूपस्मरणानुसंधानेछया सर्वाणींद्रियाणीति रस्सृत्यानंदानुसंधान एव प्रवर्त्तमानत्वं धीरत्वमित्यर्थः २४ वि
श्रांति शब्दस्य विवक्षितमर्थं सदृष्टांतमाह भारवाहीति यथा लोके भारं वहन्पुरुषः श्रमहेतुं शिरसि स्थितं भारं परित्यज्य

एवं तत्वे परे शुद्धे धीरो विश्रांतिमागतः ॥ तदेवास्वादयन्नित्यं ततः बाह्यं व्यवहरन्नपि ॥ २३ ॥
धीरत्वमदाप्रवृत्त्येव्यानंदास्वादवांछया ॥ तिरस्कृत्याखिलानां तानिंद्रियाणां प्रव
र्त्तनं ॥ २४ ॥ भारवाहीशिरोभारं मुक्त्वासे विश्रमं गतः ॥ संसारव्यापृतित्यागे तादृग्बुद्धिस्तु विश्रमः ॥
२५ ॥ विश्रांतिं परमां प्राप्तस्त्वौदासीन्ये यथा तथा ॥ सुखदुःखदशायां च तदानंदैकतत्परः ॥ २६ ॥

२७२ श्रमरहितो वर्त्तते तथा संसारव्यापारपरित्यागे सति श्रमरहितस्यास्मीति जायमाना या बुद्धिः सा विश्रमशब्देनोच्यते इत्य
र्थः २५ तदानीं फलितमर्थमाह विश्रांतिमिति परमां निरतिशयां विश्रांतिं मुक्तिलक्षणां प्राप्तः पुरुषः स्वस्यौदासीन्यदशा
यां यथा परमानंदास्वादने तथा त्वर्थवान्भवति एवं सुखदुःखहेतुप्राप्तिकालेपि तदनुसंधानं परित्यज्य निजानंदास्वादन

ननु दुःखस्य प्रतिकूलत्वेन तदनुसंधानेच्छाभावेपि वैषयिकसुखस्यानुकूलत्वेन पुरुषैरेष्यमाणत्वात्तदनुसंधानेच्छा कु-
तो नत्र वेदित्याशंक्य तस्य विषयसंपादनादिद्वारातीव बहिर्मुखत्वापादनेन निजानंदानुसंधानविरोधित्वात्तदिच्छापि विवेकि-
नो न जायत इति दृष्टांतप्रदर्शनपूर्वकमाह ॥ अग्नीति ॥ शीघ्रं देहविमोचनेच्छायां दृढतरायां सत्यां तद्विलंबकारणेऽलंकारादौ यथा ॥

अग्निप्रवेशहेतौ धीः शृंगारे यादृशी तथा ॥ धीरस्योदेति विषयेनुसंधानविरोधिनी ॥२७॥
अविरोधिसुखे बुद्धिः स्वानंदे च गमागमौ ॥ कुर्वत्यास्ते क्रमादेषा काकाक्षिवदितस्ततः ॥२८॥
एकैव दृष्टिः काकस्य वामदक्षिणनेत्रयोः ॥ यात्यायात्येवमानंदद्वये तत्त्वविदो मतिः ॥२९॥

ग्निप्रवेच्छुर्वैरस्य बुद्धिरुत्पद्यते एवं वैराग्यादिसाधनसंपन्नस्य विवेकिनो ब्रह्मानुसंधानविरोधिनि विषयसुखेपीत्य-
र्थः ॥२७॥ मास्तु विरोधिविषयसुखेच्छा प्रयत्नेनालभ्येनाबहिर्मुखत्वहेतौ विषये किं भवतीत्यत आह ॥ अविरोधीति ॥२८॥
दृष्टांतं विवृणोति ॥ एकैवेति ॥ यथा काकस्य दृष्टिः दृश्यते नयेति दर्शनसाधनं चक्षुरिंद्रियमेकमेव वामदक्षिणनेत्र-
योर्गोलकयोः पर्यायेण गमनागमने करोति ॥ एवं विवेकिनो बुद्धिरप्यानंदद्वये इत्यर्थः ॥२९॥ ॥ ॥ ॥ ॥

दार्ष्टान्तिके प्रपंचयति अजानन्निति तत्त्ववित् विषयान् अजानन् अज्ञात्वं विषयानंदम् अपि तद्वाक्यादवगतं ब्रह्मानंदं च लौकिकवैदिकावुभौ विषयानंदब्रह्मानंदौ द्विभाषावेदिवज्जानीयादित्यर्थः ॥२०॥ ननु दुःखानुभवदशायामुद्वेगः स्यादिति कथं निजानंदानुभवः स्यादित्याशंक्याह दुःखप्राप्ताविति यस्मात्कारणाद्विवेकी द्विदृक् लौकिकवैदिकव्यवहारयोरपि वेत्ता अतो दुःखप्राप्तौ

ब्रह्मानंदे १

अजानन्विषयानंदं च तत्त्ववित् ॥ द्विभाषाभिज्ञवद्विद्यादुभौ लौकिकवैदिकौ ॥ २० ॥
दुःखप्राप्तौ च नोद्वेगो यथापूर्वं यतो द्विदृक् ॥ गंगामग्नार्द्धकायस्य पुंसः शीतोष्ण
धीर्यथा ॥२१॥ इत्थं जागरणे तत्त्वविदो ब्रह्मसुखं सदा ॥ भाति तद्वासनाजन्ये स्वप्ने त
द्भासते तथा ॥ २२ ॥

अपि पूर्ववदज्ञानदशायामिव न तस्योद्वेगः विवेकेन तदा तदा बाध्यमानत्वात् ततो दुःखानुभवकालेपि निजानंदानुसंधानं न विरुध्यत इत्यर्थः युगपदुभयानुसंधाने दृष्टांतमाह गंगेति ॥२१॥ फलितमाह इत्थमिति सदा सुखदुःखानुभवदशायां तत्त्वनिष्ठितो चेत्यर्थः न केवलं जागरणे एव तज्ज्ञानं किंतु स्वप्नावस्थायामपीत्याह तद्वासनेति हेतुगर्भविशेषणं जाग्रद्वासनाजन्यत्वात्स्वप्नस्य तत्रापि तद्ब्रह्मसुखं जाग्रदवस्थायामिव भासत इत्यर्थः ॥२२॥

ननु स्वप्नस्यानंदानुभववासनाजन्यत्वे सत्यानंदत्वप्रसक्ते इत्याशंक्याह अविद्येति न केवलमानंदवासनाबलादेव स्वप्नो जायते किं त्वविद्यावासनाबलादपि अतस्तद्वासनाजन्यत्वात्तत्राऽस्यैव सुखाद्यनुभवो भवतीत्यर्थः २२ एतावता ग्रंथसंदर्भेणोक्तमर्थं निगमयति ब्रह्मानंदेति ब्रह्मानंदनामके ध्याये पंचकात्मके ग्रंथेऽस्मिन्प्रथमेध्यायेसुषु

अविद्यावासनाप्यस्तीत्यतस्तद्वासनोत्थिते ॥
स्वप्ने मर्त्यवदेवैष सुखं दुःखं च वीक्षते ॥२२॥
ब्रह्मानंदाभिधे ग्रंथे ब्रह्मानंदप्रकाशकं ॥२३॥
योगप्रत्यक्षमध्याये प्रथमेऽस्मिन्नुदीरितं ॥२४॥
इति योगानंदो नामाध्यायः

प्तवस्थायामौदासीन्यकाले समाध्यवस्थायां सुखदुःखदशायां च स्वप्रकाशचिद्रूपब्रह्मानंदस्य प्रकाशकं योग्यनुभवरूपं प्रत्यक्षमुक्तमित्यर्थः इदं चोपलक्षणमागमादीनां तेषामप्यत्र दर्शितत्वात् २४ इति श्रीमत्परमहंसपरिव्राजकाचार्यभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विरचितो योगानंदो नामाध्यायः

तदेवं प्रथमाध्याये विवेकिनो योगेन निजानंदानुभवप्रकारं प्रदर्श्य मूढस्य जिज्ञासोरात्मानंदशब्दवाच्यत्वंपदार्थ
विवेचनमुखेन ब्रह्मानंदानुभवप्रकारदर्शनाय शिष्यप्रश्नमवधारयति नन्वेवमिति १ शिष्येणैवं पृष्टो गुरुराति
मूढस्य विद्याधिकार एव नास्तीत्याह धर्मेति एवोति मूढो नादौ संसारेती तेषु जन्मस्वनुष्ठितसुकृतदुःकृतवशान्ना

नन्वेवं वासनानंदाद्ब्रह्मानंदादपीतरं । वेत्तु योगी निजानंदं मूढस्यात्रास्ति
का गतिः १ धर्माधर्मवशादेष जायतां म्रियतामपि पुनःपुनर्देहलक्षैः किं नो
दाक्षिण्यतो वद २ अस्ति वोनुजिघृक्षुत्वादाक्षिण्येन प्रयोजनं तर्हि ब्रूहि
समूढः किं जिज्ञासुर्वा पराङ्मुखः ३

नाविधदेहस्वीकारेण पुनःपुनर्जायतां म्रियतामित्यर्थः २ सर्वानुग्राहकत्वादाचार्येण तस्यापि काचन गतिर्वक्तव्येति शि
ष्य आह अस्तीति वो युष्माकमनुजिघृक्षुत्वादनुग्रहीतुमिच्छा वोनुजिघृक्षुता वस्तेषां आवस्तत्वे तस्माद्दाक्षिण्याकरणे दा
पुक्तत्वाद्दाक्षिण्ये तस्य दुष्करणलक्षणं प्रयोजनमस्तीत्यर्थः एवं शिष्यवचनमाकर्ण्य गुरुः संविकल्प्य पृच्छति त
हीति ३

यदि मूढस्यापि काचन गतिर्वक्तव्या तर्हि स मूढः किं रागी विरक्तो वा चेदिति ॥ रागी चेत्तद्रागानुसारेण कर्मप्रबोधासनं वा वक्तव्य
मिति प्रश्नमेव परिहारमाह ॥ उपास्तिमिति विमुखाय तत्त्वज्ञानविमुखाय वहिर्मुखायेत्यर्थः ॥ यथोचितं यथायोग्यं ब्रह्मलोकादिकाम
श्चेदुपास्तिं स्वर्गादिकामश्चेत्कर्म ब्रूयादित्यर्थः ॥ जिज्ञासुत्वेपि सोतिविवेकी मंदप्रज्ञो वेति विवेकिनः पूर्वाध्यायोक्तप्रकारेण योगेन ब्र

उपास्तिं कर्म वा ब्रूयाद्विमुखाय यथोचितं ॥ मंदप्रज्ञं तु जिज्ञासुमात्मानंदेन बोधयेत् ॥४॥
बोधयामास मैत्रेयीं याज्ञवल्क्यो निजां प्रियां ॥ नवाऽरे पत्युरर्थे पतिः प्रिय इतीरयन् ॥५॥

ह्मसाक्षात्कारमभिप्रेत्य मंदप्रज्ञस्य तद्दर्शनोपायमाह ॥ मंदप्रज्ञमिति यो मंदप्रज्ञः मंदा जडा प्रज्ञा बुद्धिर्यस्य स मंदप्रज्ञस्तं ज्ञातुमि
च्छुर्जिज्ञासुस्तं आत्मानंदेनात्मानंदविवेचनमुखेन बोधयेत् ॥४॥ एवं केन कोधितरत्याकांक्षायामाह ॥ बोधयामासेति याज्ञवल्को
ल्क्य एतन्नामको यजुःशाखाविशेषप्रवर्त्तकः कश्चिदृषिर्मैत्रेयीमेतन्नामकां निजां प्रियां स्वभार्यां न वा पत्युरर्थे पतिः प्रिय इ
ति नवाऽरे पत्युः कामाय पतिः प्रियो भवतीत्यादिप्रकारेणेरयत् ब्रुवन् बोधयामास बोधितवानित्यर्थः ॥५॥ ॥ ॥ ॥

उक्तस्य च परप्रेमास्पदत्वेन परमानंदरूपतामितिवाक्येन परप्रेमास्पदत्वेन हेतुनात्मनः परनंदरूपतां सिसाधयिषुरादौ पर
प्रेमास्पदत्वहेतुसमर्थनाय तावदाह तद्वाक्यस्योपलक्षणपरतामभिप्रेत्य तत्प्रकरणस्थसकलपर्यायवाक्यतात्पर्यमाह ॥ पतिरि
ति ॥ पतिर्जायादिकं भोग्यजातं भोक्तृशेषत्वात् भोक्तृसंबंधेनैव प्रियं न स्वरूपेणेत्यभिप्रायः ॥ ६ ॥ इदानीं पूर्वोदाहृतस्य न वा अरे

पतिर्जायापुत्रवित्तपशुब्राह्मणबाहुजाः ॥ लोका देवा वेदभूते सर्वं चात्मार्थतः प्रियं ॥ ६ ॥ पत्यावि
च्छा यदा पत्न्यास्तदा प्रीतिमकरोति सा ॥ क्षुदनुष्ठानरोगाद्यैस्तदा नेच्छति तत्पतिः ॥ ७ ॥

पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवतीत्यस्य वाक्यस्य तात्पर्यार्थं विभज्य दर्शयति पत्याविति यदा यस्मि
न्काले पत्या जायायाः पत्यौ भर्तरि विषये इच्छा कामो भवति तदा सा पत्नी पत्यौ प्रीतिं स्नेहं करोति यदा तत्पतिः क्षुदादिनारब्ध
का याश्रमावहेतुनानुपयुक्तो भवति तदा तां नेच्छति न कामयते ॥ ७ ॥

श्री

एवं च सति किं फलितमित्यत आह ॥ न पत्युरिति ॥ जायया क्रियमाणा या प्रीतिः सा पत्युरर्थे पत्युः प्रयोजनाय न किंतु जाया पत्यौ प्रीतिं स्वार्थ एव स्वप्रयोजनायैव करोति ॥ न वा अरे जायायै कामाय जायाप्रिया भवतीत्यादि न वा अरे सर्वस्य कामाय सर्वं प्रियं भवतीत्यंतानां वाक्यानां तात्पर्यं क्रमेण विवृण्वन् दर्शयति ॥ पतिश्च भर्त्तापि स्वप्रयोजनायैव जायायां प्रीतिं करोति न जायाप्रीत

न पत्युरर्थे सा प्रीतिः स्वार्थ एव करोति तां ॥ पतिश्चात्मन एवार्थे न जायार्थे कदाचन ॥ ८ ॥ अन्योन्यप्रेरितोप्येवं स्वेच्छयैव प्रवर्त्तते ॥ श्मश्रुकंटकवेधेन बालो रुदिति तत्पिता ॥ चुंबत्येव न सा प्रीतिर्बालार्थे स्वार्थ एव सा ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥

थे इत्यर्थः ॥ ८ ॥ ननु चैककामनया प्रवृत्तौ प्रीतिः स्वार्था भवतु युगपदुभयेच्छया प्रवृत्तौ तु प्रीतेरुभयार्थता स्यादित्याशंक्याह ॥ अन्योन्येति एवमुक्तेन प्रकारेण स्वेच्छयैव स्वकामनापूरणेच्छयैव प्रवर्त्तनमुभयोरपीति शेषः स्वेच्छया वर्त्तनं तत्त्वमेव दर्शयति श्मश्रुकंटकेति । पित्रा क्रियमाणं पुत्रमुखचुंबनं न पुत्रप्रीत्यर्थं तस्य श्मश्रुकंटकवेधेन रोदनकर्त्तृत्वात् तत्पितुः स्वतुष्ट्यर्थमेवेत्यवगंतव्यमित्यर्थः ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

चेतनेषु पतिजायापुत्रेषु क्रियमाणया प्रीतेः स्वार्थत्वपरार्थत्वसंदेहसंभवादचेतनत्वेनेच्छामात्ररहितस्य चित्तविषयस्य न वा अरे
वित्तस्य कामायेत्यादिवाक्यस्य तात्पर्यमाह ॥ निरिच्छेति ॥ चेतनत्वेपि वहनादीच्छारहितपशुविषयस्य न वा अरे पशूनामित्यस्य
वाक्यतात्पर्यमाह अनिच्छतीति वलीवर्दं तु उद्दिश्य अनिच्छति जारं वोढुमिच्छामकुर्वति वलीवर्दे वाहयितिबाहयितुकामय

निरिच्छमपि रत्नादि वित्तं यत्नेन पालयन् ॥ प्रीतिं करोति स स्वार्थे वित्तार्थत्वं न शंकितं ॥१०॥
अनिच्छति वलीवर्दे विवाहयिषते बलात् ॥ प्रीतिः सा वाणिगर्थैव वलीवर्दार्थता कु-
तः ॥११॥ ब्राह्मण्यं मेस्ति पूज्योहमिति तुष्यति पूजया ॥ अचेतनाया जातेर्नो संतुष्टिः पुंस एव सा ॥
१२॥

ततश्च वहनादिविषयाः प्रीतेर्वाणिगर्थत्वेन न वलीवर्दार्थतेत्यर्थः ॥११॥ न वा अरे ब्रह्मणः कामायेत्यवाक्यस्य तात्पर्यमाह
ब्राह्मण्यमिति ब्राह्मण्यनिमित्तया पूजया ब्राह्मणोहमस्मीत्यभिमानवानेव तुष्यति न जडा जातिरित्यर्थः ॥१२॥ ॥ ॥

नवास्त्रे क्षत्रस्येत्यादिवाक्यस्य तात्पर्यमाह ॥ क्षत्रियइति ॥ राज्योपभोगनिमित्तं सुखं क्षत्रियत्वजातिमत एव नत्वक्षत्रियत्वजातेरि त्यर्थः ॥ इदं क्षत्रियोदाहरणं वैश्याद्युपलक्षणार्थमित्याह ॥ वैश्येति ॥१३॥ नवास्त्रे लोकानां कामायेति वाक्यतात्पर्यमाह ॥ स्वर्गेति ॥

क्षत्रियो हन्ते न राज्यं करोमीत्यत्र राजता ॥ न जाते वैश्यजात्यादौ योजनायेदमीरितं ॥१३॥ स्व र्गलोकवदिहलोकोऽस्तीमं मेत्यत्रि वाध्यतं ॥ लोकयोर्नैपिकारायस्य भोगायैव केवलं ॥१४॥ ई श [illegible] वीक्ष्यादयो देवाः पच्यन्ते पापनष्टये न त [illegible]त्रिष्यापदेवार्थं स्वार्थं तन्न पयुज्यते ॥१५॥ ऋगादयो ह्यधीयन्ते दुर्ब्राह्मण्येन वा स्वये ॥ न तत्र स नं वेदेषु मनुष्येषु प्रसज्यते ॥१६॥ ॥ ॥ ॥

लोकद्वयोपादानं कर्मोपासनात्मक्षणसाधनद्वयं संपाद्य सकललोकोपलक्षणार्थं ॥१४॥ किंच ॥ ईशेति ॥ पापनष्टये पापनिवृत्तये त त्र जनं न निष्यापदेवार्थं स्वितः पापराहितानां न देवानां प्रयोजनाय किंतु स्वार्थं प्रजाकर्तुः प्रयोजनाय ॥१५॥ किंच ॥ ऋगादय इ ति दुर्ब्राह्मणत्वं व्रात्यत्वं तच्च मनुष्यत्वावांतरजातिरूपं तच्छहितेषु वेदेषु न प्रसज्यते ॥१६॥ ॥ ॥

किंच क्ष्म्यादीदं पंचेति सर्वप्राणिनोवस्थानप्रदानतत्निवारणकारणाईशोषणावकाशदानाद्यैर्हेतुभिःपृथिव्यादीश्
नित्यतानि वांछत्यपेक्षते एषां पृथिव्यादीनां तु द्वैतवेवस्थानवाधनादीनि तानि भिन्नानि न संति अतो न स्वयमाकांक्षते १७
रदानीन वा अरे सर्वस्य कामायेत्यस्य वाक्यस्य तात्पर्यमाह स्वामीति इत्यादि सर्वो जनः स्वाम्यादिकं सर्वं स्वोपकारायस्व प्र

क्ष्म्यादिपंचभूतानि स्थानतृड्पाकशोषणैः ॥ हेतुभिश्चावकाशेन वांछंत्यपेक्षहेतवे ॥१७॥
स्वामिभृत्यादिकं सर्वं स्वोपकाराय वांछति ॥ तत्कृतेनोपकारस्तु तस्य तस्य न विद्यते ॥१८॥ स
र्वव्यवहृतिष्वेवमनुसंधातुमीदृशं ॥ उदाहरणबाहुल्यं तेन स्वं वासयेन्मतिं ॥१९॥

योजनाय वांछति एवं स्वाम्यादिरपि १८ ननु श्रुतावेवं बहूदाहरणप्रदर्शनं किमर्थं कृतमित्यत आह ॥ सर्वेति रथ्या सर्व
केषु [illegible] सर्वेष्वपि भोजनादिव्यवहारेष्वेवमात्मनस्तु
कामाय सर्वं प्रियं भवतीत्युक्तेन प्रकारेणानुसंधानाय ईदृशं पतिजायादिषु प्रीतिप्रदर्शनरूपमुदाहरणं बहुल्यमुक्तं प्रति
शेषः ॥ तेन कारणेन स्वं संबंधिनीं मतिं बुद्धिं वासयेत् ॥ सर्वस्यापि स्वशेषत्वावगमे न स्वात्मनः प्रियतमत्वानुसंधानवतीम
तिं कुर्यादित्यर्थः ॥१९॥ ॥ ॥

नन्वात्मशेषत्वेन सर्वस्यापि प्रियत्वोक्तेरात्मनः प्रियतमत्वमुक्तं मन्तव्यं न त्वविकल्प्येऽक्रियमाणे प्रीतेरेव दुर्निरूपत्वादित्यभिप्रा
येण प्रीतिस्वरूपं पृच्छति ॥ अथेति ॥ अथशब्दः प्रश्नार्थः यान्ति जातमिति प्रीतिः श्रूयते इयं का किं रागरूपा किं वा श्रद्धारूपा उत भक्ति
रूपा यद्वेच्छारूपेति किंशब्दार्थः ॥ चतुर्ष्वपि पक्षेषु प्रीतेः सर्वविषयत्वं न भवतीत्याह ॥ राग इति ॥ रागश्चेद् द्रव्यादिष्वेव स्यात् तथा
योगादिषु श्रद्धा चेद् यागादिष्वेव स्यान्न त्वव्यादिषु भक्तिश्चेद् गुर्वादिष्वेव स्यान्नेतरेषु इच्छा चेदप्राप्तवस्तुविषयैव स्यान्नेतरविषयातो

अथ केयं भवेत्प्रीतिः श्रूयते यान्ति जातमिति ॥ रागो वा द्रव्यादिविषये श्रद्धा यागादिकर्मणि ॥ भक्तिः स्या
द्गुरुदेवादाविच्छा त्वप्राप्तवस्तुनि ॥ २ ॥ तर्हि तु सात्त्विकी वृत्तिः सुखमात्रानुवर्त्तिनी ॥ प्राप्ते नष्टेऽपि सद्भा
वादिच्छातो व्यतिरिच्यते ॥ २१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

न सर्वविषयत्वं प्रीतेरित्यर्थः ॥ २ ॥ उक्तप्रकारचतुष्टयातिरिक्तं पक्षमादायोत्तरमाह ॥ तर्हीति ॥ तर्हि प्रीते रागादिरूपत्वासंभवे सति सुख
मात्रानुवर्त्तिनी सुखमेव सुखमात्रमनुसृत्य वर्त्तत इति सुखमात्रमनुवर्त्तिनी सुखैकगोचरेत्यर्थः ॥ सात्त्विकी सत्त्वगुणप
रिणामरूपा वृत्तिरन्तःकरणवृत्तिः प्रीतिरस्तु ॥ ननु तर्हि सा प्रीतिरिच्छैवेत्याशंक्य परिहरति प्राप्त इति ॥ इच्छा तावद
प्राप्तसुखादिमात्रविषया ॥ इयं तु सर्वविषया प्राप्ते लब्धे सुखादौ नष्टेऽपि तस्मिन् [illegible] न विषये विद्यमानत्वादत इच्छाया
व्यतिरिच्यते भिद्यते ॥ २१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रदानीं सुखसाधनमतेष्वन्नादिष्विवात्मन्यपि प्रीतिदर्शनादात्मनोऽप्यन्नादिवत्सुखसाधनत्वं स्यादिति शंकते॥ सुखेति॥ अन्नपा
नादयस्तु सुखसाधनत्वोपाधिना यथा प्रियाः दृष्टाः आत्माप्यानुकूल्यात्प्रियत्वादन्नादिसमोऽन्नपानादिवत्सुखसाधनं स्यादित्यर्थः॥ न१
अनेनेदमनुमानं सूचितं विमत आत्मा सुखसाधनं भवितुमर्हति प्रियत्वादन्नादिवदिति॥ अन्नादिषु भोग्यत्वमुपाधिरित्यभिप्रायेण परि

सुखसाधनतोपाधेरन्नपानादयः प्रियाः॥
आत्मानुकूल्यादन्नादिसमश्चेदनुनात्रकः॥
२२॥ अनुकूलयितव्यः स्यान्नैकस्मिन्कर्मकर्तृता॥

परिहरति॥ अमुनेति॥ अत्र लोके मुना सुखसाधनतयानुकूलेनानुकूलयितव्यः स्यान्न कोऽपि स्यादात्मातिरिक्तस्य भोक्तुरभावा
दित्यर्थः॥ ननु स्वयमेवानुकूलयितव्यः स्यादित्यत आह॥ नेति॥ एकस्यैवात्मनो युगपदुपकार्यत्वमुपकारकत्वं चेति धर्मद्वयं
विरुध्यत इत्यर्थः॥

तन्वन्त्रादिवत्सुखसाधनत्वाज्ञावेपि सुखवद्बोद्धृशेषता स्यादित्याशंक्यात्मनो निरतिशयप्रेमास्पदत्वान्नैवमिति परिहरति ॥ सुख
रति वैषयिके विषयजन्ये सुखे प्रीतिमात्रं प्रीतिरेव न तु निरतिशया आत्मा त्वतिप्रियो निरतिशयप्रेमविषयो ऽतो न विषयजन्यसुख
तुल्य इत्यर्थः ॥ तत्रोभयत्रोपपत्तिमाह ॥ सुखे व्यभिचरतीति ॥ वैषयिके सुखे जायमाना एषा प्रीतिर्व्यभिचरति कदाचित्सु
खांतरे वर्त्तते तस्मिन्नेव नियता वर्त्तते ॥ आत्मनि तु विद्यमाना प्रीतिर्न व्यभिचारिणी विषयांतरगामिनी न भवति अतो निरति
शयास इत्यर्थः ॥ २३ ॥ सुखगोचरायां प्रीतेर्व्यभिचारं दर्शयति ॥ एकं त्यक्त्वान्यदादत्ते सुखमिति ॥ आत्मनि तदभावं दर्शयति ॥ ना

सुखे वैषयिके प्रीतिमात्रमात्मा त्वतिप्रियः ॥ सुखे व्यभिचरत्येषा नात्मनि व्यभिचारिणी ॥ २३ ॥
एकं त्यक्त्वान्यदादत्ते सुखं वैषयिकं सदा ॥ नात्मा त्याज्यो न चादेयः तस्मिन्व्यभिचरेत्कथं ॥ २४ ॥
हानादानविहीनेस्मिन्नुपेक्षा चेत्तृणादिवत् ॥ उपेक्षितुः स्वरूपत्वान्नोपेक्षात्वं निजात्मनः ॥ २५ ॥

त्मेति अयोग्यत्वादित्यर्थः ॥ फलितमाह ॥ तस्मिन्निति ॥ २४ ॥ हानादिविषयत्वाभावेप्यात्मनस्तृणादिवदुपेक्षाविषयत्वं स्यादित्याशंक्य ॥
हानेति ॥ हानं परित्यागः आदानं स्वीकार उपेक्षा औदासीन्यं ॥ आत्मनो हानाद्यविषयत्ववदुपेक्षाविषयत्वमपि न संभ
वत्ययोग्यत्वादित्यभिप्रायेण परिहरति ॥ उपेक्षितुरिति ॥ उपेक्षाकर्तुर्योगिनः आत्मा विना स्वरूपमस्ति तस्य स्वरूपत्वादेव स्वव्य
तिरिक्ततृणादिवन्नोपेक्षत्वमुपेक्षाविषयत्वं न विद्यत इति शेषः ॥ २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु हानविषयत्वमात्मनो नास्तीत्युक्तमनुपपन्नं द्वेषात्त्याज्यत्वदर्शनादिति शंकते ॥ रोगेति ॥ यतो मुमूर्षा दृश्यते ततश्चात्म
नि द्वेषसंभवाद्वृश्चिकादिवदात्मापि त्याज्य इति यदुच्यतेति शेषः ॥२५॥ ततस्त्यागस्यात्मव्यतिरिक्तदेहविषयत्वान्नैवमिति परिहर

रोगक्रोधाभिभूतानां मुमूर्षा वीक्ष्यते क्वचित् ॥ ततो द्वेषाद्भवेत्त्याज्य आत्मेति यदि तन्न हि ॥२६॥
त्यक्तुं योग्यस्य देहस्य नात्मता त्यक्तुरेव सा ॥ न त्यक्तर्यस्ति स द्वेषः त्याज्ये द्वेषे तु का क्षतिः ॥२७॥

ति ॥ तन्नेति ॥ त्यक्तुं मुमुक्षुं योग्यस्योचितस्यात्मता नास्ति ॥ कस्य तर्हि सेत्यत आह ॥ त्यक्तुरिति ॥ त्यक्तुर्देहत्यागकारिणो देहाति
रिक्तस्य जीवस्य सात्मतेत्यर्थः ॥ एवं तु त्यक्तुरात्मत्वे प्रकृते किमायातमित्यत आह ॥ न त्यक्तरीति ॥ अतो नात्मनस्त्यागो नौ
त्वमित्यभिप्रायः ॥ ननु दात्मनि द्वेषो देहे हेतूपलभ्यते तद्वत्पाशं वदाह ॥ त्याज्येति ॥ त्याज्ये देहगोचरे द्वेषे सत्यपि का क्षति
रात्मनस्त्यागाभाववादिनो ममेति शेषः ॥२७॥

तदेवं न वा अरे पत्युः कामायेत्यारभ्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यंतायाः श्रुतेस्तात्पर्यपर्यालोचनयात्मनः प्रियतमत्वप्रद
र्शयुक्तितोपि तद्दर्शयति॥ आत्मार्थत्वेनेति॥ सर्वस्य सुखसहितस्य तत्साधनजातस्य पतिजायादेरात्मार्थत्वेन स्वोपकारकत्वेन
प्रीतेः आप्रियत्वादप्यात्मानुपकार्यः स्वयमतिशयेन प्रियः सिद्धो हि॥ तदेव दृष्टांतप्रदर्शनेन स्पष्टयति॥ यथेति॥ लोके यथा

आत्मार्थत्वेन सर्वस्य प्रीतेश्चात्मा ह्यतिप्रियः॥
सिद्धो यथा पुत्रमित्रात्पुत्रः प्रियतरस्तथा॥२८॥

व्या पुत्रमित्रात्पुत्रस्य मित्रमुतात्पुत्रद्वाराप्रीतिविषया यज्ञदत्तादेः सकाशात्पुत्रो देवदत्ताख्यं व्यवधानेन प्रीतिविषयत्वात्तस्माद
तिशयेन प्रियो भवति पितुर्विस्मु मित्रादेस्तथा तद्वत्स्वसंबंधित्वेन प्रीतिविषयात्सर्वस्मात्स्वयमतिशयेन प्रियतरत्वार्थः॥२८॥

एवमात्मनः श्रुतियुक्तिभ्यामुपपादितां निरतिशयां प्रीतिमनुभवप्रदर्शनेन द्रढयति ॥ मा न भूवमिति अहं मा भूवमिति न नक्वा
पि मम मा सत्त्वमस्तु किंतु सर्वदा भूयासं सदा मम सत्तास्त्वित्येवंरूपा आशीः प्रार्थना सर्वस्य प्राणिजातस्य संबंधिनी दृष्टा सर्वोप्ये
वमेव प्रार्थयते कस्मितमाह ॥ प्रत्यक्षेति ॥ यत एवं सर्वैः प्रार्थ्यते तत आत्मनि निरतिशया प्रीतिः प्रत्यक्षासिद्धेत्यर्थः ॥ २९ वृत्तानुकी

मा न भूवमहं किंतु भूयासं सर्वदेत्यसौ ॥ आशीः सर्वस्य दृष्टेति प्रत्यक्षा प्रीतिरात्मनि ॥ २९ ॥
इत्यादिभिस्त्रिभिः प्रीतौ सिद्धायामेवमात्मनि ॥ पुत्रभार्यादिशेषत्वमात्मनः केचिदीरितं ॥ ३० ॥

र्नतपुरःसरं मतांतरं दूषयितुमनुभाषते ॥ इत्यादिभिरिति ॥ इतिशब्देनानुभवः परामृश्यते आदिशब्देन युक्तिश्रुती ॥ इत्या
दिभिरनुभवयुक्तिश्रुतिरूपैस्त्रिभिः प्रमाणैरेवमुक्तेन प्रकारेणात्मनि प्रीतौ सिद्धायामपि केचित्त्वात्मादितात्पर्यानभि ॥ ॥ ॥ ॥ ॥ ॥ ॥
ज्ञैरात्मनः पुत्रभार्यादिशेषत्वं पुत्रादीन् प्रति स्वस्योपसर्जनत्वमीरितमभिहितम् ॥ ३० ॥

इदं कुतोऽवगतमित्यत आह ॥ एतदिति ॥ एतद्विद्वदाया एवं कैश्चिदीर्यते इत्येतदाभिव्यक्तिकरणाभिप्रायेणात्मा वै पुत्रनामासीदित्यादिक
कयाश्रुत्या पुत्रस्य मुख्यात्मत्वमीरितमित्यर्थः ॥ किंच ॥ तत्पुत्रस्य मुख्यात्मत्वमुपनिषदि ऐतरेयोपनिषदादौ स्फुटं व्यक्तमभिहितमिति
शेषः ॥२१॥ केन वा केनेत्याकांक्षायां तद्वाक्यमर्थतः पठति ॥ अस्येति तुः स पुरुषोद्भवा अयमादितो गर्भो भवतीति प्रकरणादौ पुरुषे

एतद्विद्वदयापुत्रे मुख्यात्मत्वं प्रतीरितं ॥ आत्मा वै
पुत्रनामेति तच्चोपनिषदि स्फुटं ॥२१॥ सोऽस्यायमात्मा
पुण्येभ्यः कर्मभ्यः प्रतिधीयते ॥ अथास्येतर आत्मायं
कृतकृत्यः प्रमीयते ॥२२॥

देहे गर्भत्वेनोक्तः अयं सोऽग्र एव कुमारं जन्मनोऽग्रे विभावयतीत्यत्रातिशयेन पातनीयतयोक्तः पुत्ररूप आत्मा पुण्येभ्यः कर्म-
भ्यः पुण्यकर्मानुष्ठानाय प्रतिधीयते प्रतिनिधित्वेनावस्थाप्यते पित्रेति शेषः ॥ अथानन्तरमस्य पितुरयं प्रत्यक्षेणोपरिदृश्यमा-
नरत - पुत्रादन्योऽतरस्माग्रस्तः पितृरूप आत्मा स्वयं कृतकृत्योऽनुष्ठितकृत्यजातः सन् प्रमीयते म्रियत इत्यर्थः ॥२२॥ ॥ ॥

त्रकार्थस्य दृढीकरणाय पुत्ररहितस्य परलोकाभावप्रदर्शनपरस्य नापुत्रस्य लोकोऽस्तीति वाक्यस्यार्थमाह सत्यपीति यतः पुत्रस्य मुख्यमात्मत्वमस्त्यत एवात्मस्वरूपे सत्यपि स्थिते पुत्रस्य पुत्रादितस्य पितुः परलोको नास्तीति हीदं पुराणादिषु प्रसिद्धमित्यर्थः व्यतिरेकमुखेनोक्तस्यार्थस्यान्वयमुखेन प्रतिपादकस्यानुशिष्टं पुत्रं लोक्यमाहुरिति वाक्यस्यार्थमाह अनुशिष्टमिति मनीषिणः शास्त्राभिज्ञा अनुशिष्टं वक्ष्यमाणो त्वं ब्रह्मेत्यादित्रिमंत्रैः शिक्षितमेव पुत्रं लोक्यं लोकाय हितं परलोकसाधनमित्यर्थः २३

सत्यप्यात्मनि लोकोऽस्ति नापुत्रस्यात एव हि ॥ अनुशिष्टं पुत्रमेव लोक्यमाहुर्मनीषिणः ॥२३॥ मनुष्यलोको जय्यः स्यात्पुत्रेणैवेतरेण नो ॥ मुमूर्षुर्मंत्रयेत्पुत्रं त्वं ब्रह्मेत्यादि मंत्रकैः ॥२४॥

इदानीमैहिकसुखस्यापि पुत्रहेतुकत्वप्रतिपादनपरं सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणेति श्रुतिवाक्यमर्थतः पठति मनुष्येति मनुष्यलोकसुखं पुत्रेणैव जय्यं स्यात्संपाद्यं स्यादितरेण कर्मादिना साधनान्तरेण नो नैव भवति पुत्रस्यान्यस्य सुखसाधनमपि धनादिकं निर्वेदजनकं भवतीति भावः अनुशिष्टं पुत्रं लोक्यमित्यत्र पुत्रानुशासनमुक्तं इदानीं तस्यावसरं तन्मंत्रांश्च प्रदर्शयति मुमूर्षुरिति आदिशब्देन त्वं यज्ञस्त्वं लोक इति मंत्रो गृह्यते ताभिस्त्वं ब्रह्मेत्यादित्रिभिर्मंत्रैर्मुमूर्षुः पिता मरणावसरे पुत्रं मंत्रयेत्पुत्रस्यानुशासनं कुर्यात् २२ ॥ ॥ ॥ ॥ ॥

उक्तमर्थं निगमयति इत्यादीति न केवलमयं श्रुतिसिद्धोऽर्थः किंतु लोकप्रसिद्धोऽपीत्याह लौकिका इति २५ तदेवोपपादयति स्वस्मिन्नि
ति स्वस्मिन्निति पुत्रादावेकेनादिशब्देन भार्यादयो गृह्यन्ते द्वितीयेन देहादयः फलितमाह मुख्या इति यस्मात्स्वप्रयासेनापि पुत्रादिजी
जीवनोपायं संपादयति ततस्तस्मात्पुत्रादयो मुख्याः प्रधानभूता इत्यर्थः २६ एवं वेदलोकप्रसिद्धिभ्यां दर्शितं पुत्रादिप्राधान्यमंगी

इत्यादिश्रुतयः प्राहुः पुत्रभार्यादिशेषतां ॥ लौकिका अपि पुत्रस्य प्राधान्यं मन्यते जना ॥ २५ ॥ स्व
स्मिन्नृतेऽपि पुत्रादिर्जीवेद्वित्तादिना यथा ॥ तथैव यत्नं कुरुते मुख्याः पुत्रादयस्ततः ॥ २६ ॥ वा
टमेतावता नात्मा शेषो भवति कस्यचित् ॥ गौणमिथ्यामुख्यभेदैरात्मायं भवति त्रिधा ॥ २७ ॥ ॥

करोति वाटमिति तर्ह्यात्मनः शेषित्वोपपादनं व्याकुप्येदित्याशंक्याह एतावतेति एतावता पुत्रादेः क्वचित्प्राधान्यमस्तीत्येता
वता न हि प्रातिस्वामात्रेणार्थसिद्धिरित्याशंक्य यत्र यत्र व्यवहारे हारे यस्य यस्यात्मत्वं विवक्ष्यते तस्य तस्यात्मनस्तत्र तत्र
प्राधान्यप्रदर्शनाय योग्यो द्योतते नात्मत्रैविध्यमाह गौणेति गौणात्मा मिथ्यात्मा मुख्यात्मा चेत्ययमात्मा त्रिधा
भवति २७

तत्र पुत्रादेर्गौणात्मत्वप्रदर्शनाय लोके गौणप्रयोगमुदाहरति देवदत्त इति । अयं देवदत्तः सिंह इति यद्वद्देवदत्तसिंहयोरैक्यं तद्गौणमौप
चारिकं तत्र हेतुमाह तयोरिति दार्ष्टान्तिके योजयति पुत्रादेरिति ॥ ३८ ॥ अनन्तरं मिथ्यात्मानं दर्शयति भेद इति पंचकोशेष्वानंद
मयाद्यन्नमयान्तेषु कोशेषु साक्षिणः सकाशाद्भिद्यमानोऽपि भेदो नावभासते । तस्मात्तेषां मिथ्यात्वं मिथ्यात्वे दृष्टान्तमाह स्थाणोरिति वस्तु
तश्चोराद्भिन्नस्य स्थाणोश्चोररूपत्वं यथा मिथ्या तद्वदित्यर्थः ॥ ३९ ॥ एवं गौणमिथ्यात्मानावुपपाद्येदानीं साक्षिणो मुख्यात्मत्वमुपपाद
यति न भातीति साक्षिणः स्वाद्भिन्नरूपस्याभानेऽगौणात्मनः पुत्रादेरिव कस्मादपि भेदो न भाति मिथ्यात्मनो देहादेरिव भेदो नास्त्यपि तओ

देवदत्तस्तु सिंहोऽयमित्यैक्यं गौणमेतयोः । भेदस्य भासमानत्वात् पुत्रादेरात्मता तथा ॥ ३८ ॥ भेदोऽस्ति पंचकोशेषु सा
क्षिणो न तु भात्यसौ । मिथ्यात्मता ततः कोशानां स्थाणोश्चोरात्मता यथा ॥ ३९ ॥ न भाति भेदो नाप्यस्ति साक्षिणोऽ
प्रतियोगिनः । सर्वांतरत्वात्तस्यैव मुख्यमात्मत्वमिष्यते ॥ ४० ॥

तत्र हेतुरप्रतियोगिन इति हेतुगर्भितं विशेषणम् । अप्रतियोगित्वाद्यथा पुत्रादेर्देहादेरपि स्वयं प्रतियोगी विद्यते नैवं स्वस्य वस्त्वन्तरं क
श्चित्प्रतियोग्यस्ति देहादेः सर्वस्यारोपितत्वादिति भावः । ननु भेदाभावेन साक्षिणो गौणमिथ्यात्मत्वे मा भूतां मुख्यात्मत्वं कुतस्त्यं त
त्राह सर्वान्तरत्वादिति सर्वस्माद्देहपुत्रादेरान्तरत्वात् सर्वस्य साक्षिणः प्रतीचः सर्वान्तरत्वेन प्रतीयमानत्वात्तस्यैव साक्षिण एवात्म
त्वं मुख्यमनौपचारिकमिष्यते इत्यर्थः । अत्रेदमनुमानं सूचितं विमतः साक्षी मुख्य आत्मा भवितुमर्हति सर्वान्तरत्वाद्यो मुख्यो
न भवति स सर्वान्तरोऽपि न भवति यथाहंकारादिरिति केवलव्यतिरेकी ॥ ४० ॥

भवत्यात्मद्वैविध्यं पुत्रादेः शेषित्वाभिधाने किमायातमित्यत आह ॥ सत्येवमिति ॥ एवमात्मद्वैविध्ये सति येषु लौकिकवैदिककलत्रह्वात्तेषु पालनपोषणब्रह्मात्मत्वानुसंधानादिषु व्यवहारविषयेषु यस्य पुत्रादेर्देहादेः साक्षिणो वात्मत्वमुचितं भवति तेषु तस्य पुत्रा-

सत्येवं व्यवहारेषु येषु यस्यात्मतोचिता ॥
तेषु तस्यैव शेषित्वं सर्वस्यान्यस्य शेषता ॥४१॥
मुमुक्षोर्गृहरक्षादौ गौणात्मैवोपयुज्यते ॥
न मुख्यात्मा न मिथ्यात्मा पुत्रः शेषी भवत्यतः ॥४२॥

देर्देहादेः साक्षिणो वा शेषित्वं प्रधानत्वमन्यत्तद्व्यतिरिक्तस्य सर्वस्य शेषतोपसर्जनत्वं भवतीति शेषः ॥४१॥ एतदेव प्रपंचयति मुमुक्षोरित्यादिना श्लोकपंचकेन ॥ गृहरक्षादौ कर्मविशेषे गौणात्मैव पुत्रभार्यादिरूप उपयुज्यते उपयुक्तो भवति ॥ उत्तरत्र जिज्ञासाविषुत्वादित्यर्थः ॥ मुख्यात्मा साक्षी नोपयुज्यते अविकारित्वात् नापि मिथ्यात्मा तस्य मरणोन्मुखत्वात् ॥ फलितमाह ॥ पुत्र इति ॥ स्पष्टं ॥४२॥

उक्तो गृहरक्षादिव्यवहारे सत्यपि तस्मिन्पुत्रादिस्वीकारे दृष्टान्तमाह ॥ अध्येतेति ॥ अध्ययमध्येता वह्निरित्यस्मिन्प्रयोगे स्वरूपेण विद्य
मानोऽप्यग्निर्नाग्निशब्दार्थत्वेन गृह्यते अध्येतृत्वायोगात् ॥ किंत्वध्येतृत्वयोग्यो वटुर्माणवकवाऽत्रास्मिन्प्रयोगेऽग्निशब्दार्थत्वेन
गृह्यते योग्यत्वात् ॥४३॥ एवं गौणात्मप्राधान्यस्य लक्ष्यमुदाहृत्य मिथ्यात्मप्राधान्यस्य लक्ष्यमुदाहरति ॥ कृशोहमिति ॥ अहं कृशो जातोऽतोऽन्न

अध्येता वह्निरित्यत्रास्मिन् सन्नप्यग्निर्न गृह्यते ॥ अयोग्यत्वेन योग्यत्वाद्वटुरेवात्र गृह्यते ॥४३॥ कृ
शोऽहं पुष्टिमाप्स्यामीत्यादौ देहात्मतोचिता ॥ न पुत्रं नियुङ्क्तेऽत्र पुष्टिहेत्वन्नमन्नदानतो ॥४४॥ तपसा
स्वर्गमेष्यामीत्यादौ कर्त्रात्मतोचिता ॥ अनपेक्ष्य वपुर्योगं चरेत्तत्कृच्छ्रादिकं ततः ॥४५॥ ॥

मशनादिना पुष्टिं संपादयिष्यामीत्यादौ लौकिकव्यवहारे त्वन्नप्राणयोग्यस्य देहस्यैवात्मत्वं ग्रहीतुमुचितं ॥ उक्तमर्थं लौकिकव्यवहा
रप्रदर्शनेन द्रढयति ॥ न पुत्रमिति ॥४४॥ किंच ॥ तपसेति ॥ यदा तु तपः कृत्वा स्वर्गं संपादयिष्यामीत्यादिव्यवहारं करोति तदा कर्तृशब्द
वाच्यविज्ञानमयस्यैवात्मत्वमुचितम् न देहादेरित्यर्थः ॥ तदेवोपपादयति ॥ अनपेक्ष्येति ॥ यतो न देहस्यात्मत्वं उचितं ततो देहभोग
परित्यागपूर्वकं कर्त्तुरुपकरकं कृच्छ्रचान्द्रायणादिकं चरतीत्यर्थः ॥४५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

किंच ॥ यदा पुमान् शमादीन् संपाद्य मुक्तिं प्राप्स्यामीति मतिं करोति तदा गुरुशास्त्राभ्यामाचार्योपदेशवाक्यार्थविचारजन्यापरो
क्षज्ञानेन नाहं कर्त्राद्यात्मा सच्चिदानंदब्रह्मास्मीति निश्चित्य चिदात्मानमवगच्छति तस्य चिदात्मत्वमेवोचितं न तु तत्र कर्त्राद्यात्मत्व
मित्यर्थः ॥४६॥ उदाहृतानां त्रिविधानामात्मनां व्यवहारविशेषेषु व्यवस्थया प्राधान्ये दृष्टांतमाह ॥ विप्रेति ॥ यथा ब्राह्मणो बृहस्प
तिसवेन यजेतेत्यत्र ब्राह्मणस्यैवाधिकारो नेतरयोः क्षत्रियवैश्ययोः राजा राजसूयेन यजेतेत्यत्र राजन्यस्यैवाधिकारो न ब्राह्मण

मोक्ष्येऽहमित्यत्र युक्ता चिदात्मत्वं तदा पुमान् ॥ तद्धेतिगुरुशास्त्राभ्यां न तु किंचिच्चिकीर्षति ॥४६॥
विप्रक्षत्रादयो यद्वत् बृहस्पतिसवादिषु ॥ व्यवस्थितास्तथा गौणमिथ्यामुख्या यथोचितं ॥४७॥
तत्र तत्रोचिते प्रीतिरात्मन्येवातिशायिनी ॥ अनात्मनि तु तच्छेषे प्रीतिरन्यत्र नोभयं ॥४८॥

वैश्ययोः वैश्यो वैश्यस्तोमेन यजेतेत्यत्र वैश्यस्यैवाधिकारो नेतरयोः ॥ एवं गौणमिथ्यामुख्यभेदानामात्मनां यथायोग्यं स्वोचि
तव्यवहारेषु प्राधान्यमिति भावः ॥४७॥ फलितमाह ॥ तत्रेति ॥ यस्मिन्यस्मिन् व्यवहारे य आत्मोचितो भवति तत्र तत्र व्यवहारे
उचिते उपयोजितया प्रधानभूते आत्मन्येव प्रीतिरतिशायिनी अतिशयवती तच्छेषे तु स्यात्मनः शेषभूते नात्मनि आत्मव्यति
रिक्ते वस्तुनि प्रीतिः प्रीतिमात्रं न निरतिशयं प्रेमेत्यर्थः अन्यत्रात्मतच्छेषाभ्यामन्यस्मिन्वस्तुनि नो उभयमपि द्विविधमपि प्रेम
नास्तीत्यर्थः ॥४८॥

अन्यत्र नोऽयमित्यत्राभिहितस्यान्यशब्दार्थस्यावांतरभेदमाह ॥ उपेक्ष्यमिति ॥ अन्यदन्यदित्युच्यमानं वस्तु उपेक्ष्यं उपेक्षाविष
यः ॥ द्वेष्यं द्वेषविषयः अपि त्रिविधाभिः प्रकारैर्भवति ॥ तदुभयमुदाहरति ॥ मार्गेति मार्गगततृणलोष्ठादिकमुपेक्ष्यं स्वस्योपद्रवहेतु
व्याघ्रादिकं ॥ द्वेष्यमित्यर्थः ॥ फलितमाह ॥ एवमिति ॥ ४९ ॥ चातुर्विध्यमेवदर्शयति ॥ आत्मेति ॥ न चात्मादीनां चतुर्णां प्रियतमत्वादि

उपेक्ष्यं द्वेष्यमित्यन्यद्द्वेधा मार्गस्थलोष्टादिकं ॥ उपेक्ष्यं व्याघ्रसर्प्यादि द्वेष्यमेवं चतुर्विधं ॥ ४९ ॥
आत्मा शेषमुपेक्ष्यं च द्वेष्यं चेति चतुर्ष्वपि ॥ न व्यक्तिनियमः किंतु तत्तत्कार्यात्तथा तथा ॥ ५० ॥

कं किं नियतं नेत्याह चतुर्ष्विति ॥ अयमेव प्रियतमः अयमेवाप्रियः इदमेवोपेक्ष्यम् इदमेव द्वेष्यं नान्यदिति नियमो नास्ती
त्यर्थः ॥ किं तर्हीत्यत आह ॥ किंत्विति तस्मात्तत्तत्कार्यविशेषादुपकाररूपात्तथा तथा प्रियाप्रियादिरूपेत्यर्थः
॥ ५० ॥

सर्वज्ञानियमप्रयोजनाय प्रसिद्धे द्वेष्ये व्याघ्रे तदभावं दर्शयति॥ स्यादिति॥ यदा व्याघ्रः स्वभक्षणाय संमुख आगच्छति तदा द्वेष्यो भव-
ति स एव पराङ्मुखो गच्छति चेदुपेक्ष्यो भवति एवं यदि लालनेनात्यानुकूलो भवति तदा विनोदाय विनोदसाधनं भवतीति शेषतां
स्वस्योपकारकत्वेन प्रियत्वं भजते इत्यभिप्रायः॥५०॥ नन्वेकस्यैव वस्तुनः प्रियत्वादिधर्मत्रयांगीकारे व्यवहारव्यवस्था न स्यादित्या-
शंक्याह॥ व्यक्तीनामिति॥ व्यक्तिनियमाभावेपि लक्षणवशाद्व्यवस्था भविष्यतीत्यर्थः॥ किं लक्षणमित्याकांक्षायां तल्लक्षण-

स्याद्व्याघ्रः संमुखो द्वेष्यो ह्युपेक्ष्यस्तु पराङ्मुखः॥ लालनादनुकूलश्चेद्विनोदायेति शेषतां॥५१॥
व्यक्तीनां नियमो मास्तु लक्षणात्तु व्यवस्थितिः॥ आनुकूल्यं प्रातिकूल्यं द्वयाभावश्च लक्षणं॥५२॥
आत्मा प्रेयान् प्रियः शेषो द्वेष्योपेक्ष्ये तदन्ययोः॥ इति व्यवस्थितो लोको याज्ञवल्क्यमतं च तत्॥५३॥

माह॥ आनुकूल्यमिति॥ अनुकूलत्वं प्रियस्य लक्षणं व्यावर्तको धर्मः प्रतिकूलत्वं द्वेष्यस्य लक्षणं उपेक्ष्यस्य आनुकूल्यप्रातिकूल्यरूप-
द्वयाभावो लक्षणमित्यर्थः॥५२॥ एतावता ग्रंथसंदर्भेणोपपादितमर्थं बुद्धिसौकर्याय संक्षिप्य कथयति॥ आत्मेति॥ आत्मा प्रत्यगा-
नंदः प्रेयान् अतिशयेन प्रियः शेषः स्वोपकारकत्वेन ततः पदार्थः प्रियः तदन्ययोः आत्मनस्तच्छेषाच्चान्ययोर्व्याघ्रपक्षिगतत्वेन
दिरूपयोः द्वेष्योपेक्ष्ये यथाक्रमं संभवतः॥ एवं चात्र त्रैविध्येन लोकव्यवस्था प्राप्ता उक्तप्रकारं च तत्र स्थापिते रीतिं न किंचिद्विषयतारत्व-

इत्यभिप्रायः अयमर्थः श्रुत्यभिमतोपीत्याह॥ याज्ञवल्क्येति॥ आत्मादीनां प्रि-
यत्वादिकं याज्ञवल्क्यस्यापि मतमित्यर्थः॥५३॥

२२॥

न केवलं मैत्रेयीब्राह्मणे आत्मनः प्रियतमत्वमुक्तं किंतु पुरुषविधब्राह्मणेऽपीत्यभिप्रायेणात्र वाक्यांतरमुदाहरति ॥ अन्य-
त्रेति ॥ तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादंतरतरं यदयमात्मा इत्यनेन वाक्येन पुत्रवित्तादेः ॥ सर्वस्मादांतरस्यात्म-
तत्त्वस्य प्रियतमत्वमीरितमित्यर्थः ॥५४॥ नन्वेवं श्रुतावभिधानं प्रवृत्ते किमायातमित्यत आह ॥ श्रोतृत्वादिति ॥ श्रुत्यर्थपर्यालोचन-

अन्यत्रापि श्रुतिः प्राह पुत्राद्वित्तात्तथान्यतः ॥
सर्वस्मादांतरं तत्त्वं तदेतत्प्रेय ईक्ष्यतां ॥५४॥
श्रोतृत्वाद्विचारदृष्ट्यायं साक्ष्येवात्मा न चेतरः ॥
कोशान्यं च विविच्यांतर्वस्तुदृष्टिर्विचारणा ॥५५॥

रूपया विचारदृष्ट्या साक्षित्वेनावस्थितस्यात्मत्वं नेतरस्य पुत्रादेरित्यर्थः ॥ विचारदृष्ट्येत्यभिहितस्य विचारस्य स्वरूपमाह ॥ कोशा-
न्येति ॥ अन्नमयादीन्कोशान्त्यं च तैत्तिरीयश्रुत्युक्तप्रकारेणात्मनः पृथक्कृत्वांतःस्थितस्यात्मनो वस्तुनो विचारणेत्यर्थः ॥
॥५५॥

रुं तास्थितस्य वस्तुनो दर्शनप्रकारमेवाह ॥ जागरेति जाग्रदाद्यवस्थानां मध्ये उत्तरोत्तरावस्थागमनस्य पूर्वपूर्वावस्थानिवृत्तेश्चा वभासनं यतो नित्यचैतन्यरूपात्साक्षिणो भवति स स्वप्रकाशचिद्रूप आत्मेत्यर्थः ॥५६॥ संग्रहेणोक्तं श्लोकस्यार्थं प्रपंचयति ॥ शेषा इति साक्षिव्यतिरिक्ताः प्राणादिवित्तान्ताः वक्ष्यमाणाः पदार्थास्तारतम्येनात्मनः आसन्नाः समीपवर्तिनो भवंति तदेवोपपादयन्नाह ॥

जागरस्वप्नसुषुप्तीनामागमापायभासनं ॥ यतोऽभवत्स आत्मा स्वप्रकाशचिदात्मकः ॥५६॥
शेषाः प्राणादिवित्तान्ता आसन्नास्तारतम्यतः ॥ प्रीतिस्तथा तारतम्यात्तेषु सर्वेषु वीक्ष्यते ॥५७॥
वित्तात्पुत्रः प्रियः पुत्रात्पिंडः पिंडात्तथेंद्रियं ॥ इंद्रियाच्च प्रियः प्राणः प्राणादात्मा परः प्रियः ॥५८॥

प्रीतिरिति यथा तारतम्येनांतरत्वं तद्वदेव तेषु प्राणादिषु तारतम्यात् प्रीतिर्वीक्ष्यते सर्वैरपीति शेषः ॥५७॥ प्रीतेस्तारतम्येनानुभवमेव विदयति वित्तादिति पिंडः अन्नमयो देहः अयं भावः सर्वैः प्राणिभिः पुत्रादिविपत्परिहारायापि वित्तव्ययः क्रियते ॥ स्वदेहरक्षारणाय कदाचित्पुत्रादिरपि दीयते इंद्रियनाशपरिहाराय ताडनादिना देहपीडाप्यंगीक्रियते मरणप्रसक्तौ प२८ तत्परिहारार्थं इंद्रियवैकल्यमप्यंगीक्रियते अत एवोत्तरोत्तरमतिशयेन प्रियत्वं स्यवनिनुभवासिद्धमात्मनस्तु निरतिशयप्रेमास्पदत्वं विवदन्तु अनवासिद्धमिति ॥५८॥ ॥ ॥ ॥ ॥ ॥ ॥

मूढ॰
एवमात्मनः प्रियतमत्वे प्रमाणे + सिद्धेऽपि ज्ञान्यज्ञानितोर्विप्रतिपत्तिनिरसनाय श्रुत्या तद्विप्रतिपत्तिर्दर्शितेत्याह एवमिति तत्र
निर्णयमाह तत्रेति आत्मनः प्रियतमत्वस्योपपादितत्वात् ॥५९॥ तामेव विप्रतिपत्तिमाह साक्ष्येवेति इ॰ आत्मातिरिक्तस्य प्रियत्वं मादि

एवं स्थिते विवादोऽत्र प्रतिबुद्धविमूढयोः ॥ श्रुत्योदाहारि तत्रात्मा प्रेयानित्येव निर्णयः ॥५९॥
साक्ष्येव दृश्यादन्यस्मात्प्रेयानित्याह तत्त्ववित् ॥ प्रेयान्पुत्रादिरेवेमं भोक्तुं साक्षीति मूढधीः ॥
इ॰ आत्मनोऽन्यं प्रियं ब्रूते शिष्यश्च प्रतिवाद्यपि ॥ तस्योत्तरं वचो बोधशापौ कुर्यात्तयोः क्रमात् ॥६१॥

नो विमत्योत्तराभिधानाय तमेव वादिनं विभज्य कथयति आत्मन इति उत्तराभिधानप्रकारमाह तस्योत्तरमिति तयोः शिष्यप्र
तिवादिनोः संबंधिनस्तस्य वचनस्योत्तरं वचः प्रत्युत्तररूपं वाक्यं क्रमेण बोधशापौ बोधरूपं शापरूपं च कुर्यादित्यर्थः ॥६१॥

अनयोः प्रतिवचनप्रदानरूपेण योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रोत्स्यतीति समनंतरं प्रतिवाक्यमर्थितः प्रति ॥ प्रियमिति ॥ शिष्य प्रतिवादिना द्वयोरपि प्रति हे शिष्य हे प्रतिवादिन् प्रियं त्वदभिप्रेतं पुत्रादिरूपं स्वनाशेन त्वां शिष्यं प्रतिवादिनं वा रोत्स्यति रोदयिष्यति इत्येवमुक्तेन प्रकारेणोत्तरं प्रतिवचनं वक्ति ब्रवीति ॥ इदमेकमेव वचनं शिष्यप्रतिवादिनो रुभयोः कथमुत्तरं जातमित्याशंक्य शिष्य

प्रियं त्वां रोत्स्यतीत्येवमुत्तरं वक्ति तत्त्ववित् ॥ स्वोक्तप्रियस्य दुष्टत्वं शिष्यो वेत्ति विवेकतः ॥ ६२ ॥
अलभ्यमानस्तनयः पितरौ क्लेशयेच्चिरं ॥ लब्धोऽपि गर्भपातेन प्रसवेन च बाधते ॥ ६३ ॥ ॥
जातस्य ग्रहरोगादिः कुमारस्य च मूर्खता ॥ उपनीतेऽप्यविद्यत्वमनुद्वाहश्च पंडिते ॥ ६४ ॥
पुनश्च परदारादि दारिद्र्यं च कुटुंबिनः ॥ पित्रोर्दुःखस्य नास्त्यंतो धनी चेन्म्रियते तदा ॥ ६५ ॥

प्रत्युत्तरं तावद्द्योतयति स्वोक्तप्रियस्येत्यादिना विवदते तमहर्निशमित्यंतेन सार्द्धश्लोकचतुष्टयेन शिष्यः स्वोक्तप्रियस्य स्वेनाभिहितस्य पुत्रादिरूपस्य प्रीतिविषयस्य विवेकतो वक्ष्यमाणदोषविचारेण दुष्टत्वं वेत्ति अवगच्छति ॥ ६२ ॥ दोषविचारप्रकारमेमेव दर्शयति अलभ्यमान इति दि एवं पुत्रगतदोषसंकीर्तनं दारादिसर्वविषयदोषोपलक्षणार्थं ॥ ६३ ॥ ६४ ॥ ६५ ॥ ॥ ॥

एवं विविच्येति एवमुक्तेन प्रकारेण पुत्रादौ विषयजाते विविच्य विविच्यमानान्दोषान्विविच्य ज्ञात्वा तस्मिन्प्रीतिं परित्यज्य नि-
ज्ञात्मनि ध्रुवत्यगूपे साक्षिणि परमां निरतिशयां प्रीतिं निश्चित्य तं प्रत्यगात्मानमहर्निशं सर्वदा वीक्षते अनुसंधत्ते इत्यर्थः ॥६६॥ प्रेष्ठ-
यं त्वां रोत्स्यतीत्यस्यैव वाक्यस्य प्रतिवादिनं प्रतिशापरूपत्वं प्रकटयति ॥ आग्रहादिति ॥ आग्रहादुक्तं पुत्रादि प्रियत्वं सर्वथा न त्यजामीत्येवं

एवं विविच्य पुत्रादौ प्रीतिं त्यक्त्वा निजात्मनि जात्मनि ॥ निश्चित्य परमां प्रीतिं वीक्षते तमहर्निशम् ॥६६॥
आग्रहाद्ब्रह्मविद्वेषादपि पक्षमभुंचतः ॥ वादिनो नरकः प्रोक्तो दोषश्च बहुयोनिषु ॥६७॥ ॥ ॥

मः
रूपादाग्रहाद्ब्रह्मविद्वेषादनेनोक्तं निद्राटयिष्यामीत्येवंरूपाच्च पक्षात् पुत्रादीनामेवाप्रियत्वाभिमानरूपं परित्यजतः प्रतिवादिनो नरकप्रा-
प्तिस्तथा बहुयोनिषु नरतिर्यगादिषु संख्येषु नेकेषु जन्मसु दोषः पुत्रजायादिस्नेहवियोगादिदुःखप्राप्तिरूपः प्रोक्तः प्रियं त्वां रो-
त्स्यतीति वदता ज्ञानिनेति शेषः ॥६७॥ ॥ ॥ ॥ ॥ ॥

ननु ज्ञानिनोक्तस्यैव वाक्यस्य शिष्यप्रत्युपदेशरूपत्वं वादिनं प्रति शापरूपत्वं चेति विरुद्धं रूपद्वयं कथं घटत इत्याशंक्योत्तरं प्र
दातुरीश्वररूपत्वात्तस्याभिप्रायानुसारेण तौ भविष्यतीति मत्वा तदुपपादकस्येश्वरो हं तथैव स्यादिति समनंतरवाक्यस्य तात्पर्यमाह ॥
ब्रह्मविदिति यतो ब्रह्मविदः स्वस्य ब्रह्मत्वान्नु नवादीश्वरत्वमस्य तस्तेन यं यं शिष्यादिकं प्रति यद्यदिष्टमनिष्टं वाभिधीयते तत्तच्छिष्यप्रति
वादिनोस्तस्य तादृशौ यः शिष्यः पक्षप्रतिवादी तयोस्तथैव स्यादिष्टमनिष्टं वा वशंवदेत्यर्थः ॥ २८ ॥ व्यतिरेकमुखेनोक्तस्यार्थस्या

ब्रह्मविद्ब्रह्मरूपत्वादीश्वरस्तेन वर्णितः । यद्यत्तत्तथैव स्यात्तच्छिष्यस्य प्रतिवादिनोः ॥ २८ ॥
यस्तु स्वाद्धितात्मा तमेव ते प्रियमुत्तमम् । तस्य प्रेयान्स आत्मा न नश्यति कदाचन ॥ २९ ॥

न्वयमुखेन प्रतिपादकमात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवतीति समनंतरवाक्यमर्थतः पठ-
ति यस्त्विति तुशब्द उक्तवैलक्षण्यद्योतनार्थः अनात्मप्रियत्ववादिनोन्यो यः शिष्यः आत्मानमेवोत्तमप्रियं निरतिशयप्रेमगोचरं सेव-
ते सदानुस्मरति तस्याशिष्यादेः प्रेयानत्यन्तप्रियतम आत्मा नाशिमतोसावात्मा प्रतिबाधापि मत प्रियप्रियः न कदाचिद्विनश्यति किंतु सदानंदरूपः
सन्नवभासत इत्यर्थः ॥ २९ ॥

इत्यमात्मनः परप्रेमास्पदत्वहेतुं प्रसाध्येदानीं फलितमाह॥ परप्रेमास्पदेति॥ अत्रायं प्रयोगः॥ आत्मा परानंदरूपः॥ निरतिशयप्रेम
विषयत्वात्॥ यः परमानंदरूपो न भवति स निरतिशयप्रेमविषयो न भवति॥ यथा घटादिरिति केवलव्यतिरेकी परप्रेमास्पदत्वहे पदविशेषण
तोरात्मनः परमानंदरूपसाधने सामर्थ्यद्योतनाय प्रीतिवृद्धौ सुखवृद्धिमुदाहरति॥ सुखेति॥ यतः सार्वभौमादिहैरण्यगर्भांतेषु उप

परप्रेमास्पदत्वेन परमानंदरूपता॥
सुखवृद्धिः प्रीतिवृद्धौ सार्वभौमादिषु श्रुता॥
७०॥ चैतन्यवत्सुखं चास्य स्वभावश्चेच्चिदात्मनः॥
धीवृत्तिष्वनुवर्तेत सर्वास्वपि चितिर्यथा॥ ७१॥

त्तरोत्तरं यत्र यत्र प्रीतिवृद्धिस्तत्र तत्र सुखवृद्धिरस्तीति तैत्तिरीयबृहदारण्यकश्रुत्योरभिहितमतः प्रीतेर्निरतिशयत्वे सति आनंदस्यापि निरति
शयत्वमवगंतुं शक्यत इति भावः॥ ७०॥ नन्वात्मनः परमानंदरूपत्वमनुपपन्नं तथात्वे चैतन्यस्येव तत्स्वरूपभूतस्यानंदस्यापि सर्वा
सु धीवृत्तिष्वनुवृत्तिः प्रसज्येतेति शंकते॥ चैतन्यवदिति॥ ७१॥ ॥ ॥ ॥

चिदानंदयोरुभयोरप्यात्मस्वरूपत्वे वृत्तिषु चित एवानुवृत्तिर्नानंदस्येति दृष्टांतावष्टंभेन परिहरति एवमिति यथा ह्यप्रकाशात्म
कस्य दीपस्य प्रकाश एव गृहादावनुगच्छति नोष्णता एवं चैतन्यस्यैवानुवृत्तिर्नानंदस्येत्यर्थः ॥१२ ननु चिदानंदयोरभेदे चिदभिव्यंज
कधीवृत्तावेवानंदाभिव्यक्तिरपि स्यादित्याशंक्य तथा नियमाभावे दृष्टांतमाह गंधेति यथैकद्रव्यवर्तिनां गंधादीनां चतुर्णां मध्ये घ्राण

एवमप्यप्रकाशात्वाद्दीपस्तस्य प्रभा गृहे व्याप्नोति नोष्णता तद्वच्चितेरेवानुवर्त्तनं ॥१२
गंधरूपरसस्पर्शेष्वपि सत्सु यथा पृथक् । एकाक्षेणैक एवार्थो गृह्यते नेतरस्तथा ॥१३
चिदानंदौ नैव भिन्नौ गंधाद्यास्तु विलक्षणाः इति चेत्तदभेदोपि साक्षिण्यन्यत्र वा वद ॥१४

दिनैकेनेंद्रियेण गंधादिष्वेक एव गुणो गृह्यते नेतरस्तथा चिदानंदयोर्मध्ये चित एवावभासनमित्यर्थः ॥१२ दृष्टांतदार्ष्टांतिकयोर्वैषम्यं
शंकते चिदानंदाविति विलक्षणा भिन्ना इत्यर्थः उक्तं वैषम्यं परिहर्तुं दार्ष्टांतिके चिदानंदयोरभेदः किं स्वाभाविक उतौपाधिक इति विक
ल्पयति तदभेद इति तदभेदस्तयोश्चिदानंदयोरभेदः साक्षिण्यात्मस्वरूपे वा अन्यत्र उपाधिकृतासु वृत्तिषु वेत्यर्थः ॥१४

प्रथमे पद्ये दृष्टांतदार्ष्टांतिकयोः साम्यमाह ॥ आद्य इति ॥ आद्ये चिदानंदयोः साक्षिणि भेदाभावपक्षे पृथ्व्यवर्त्तिनो गंधादयोपि एवं चि
दानंदवदेवाभिन्नाः परस्परभेदरहिताः इतरथा परिहारे लोकस्यापत्तेस्तु मशक्यत्वादिति भावः ॥ द्वितीयपद्येपि साम्यमाह ॥ अद्यानां
गंधादिग्राहकाणां घ्राणादीनां इंद्रियाणां भेदेन तद्भेदे तेषां गंधादीनां भेदाभ्युपगमे तद्वदेव वृत्तिभेदाच्चिदानंदाभिव्यक्तिहेतूनां राज

आद्ये गंधादयोप्येवमभिन्नाः पृथ्व्यवर्त्तिनः ॥ अद्यभेदेन तद्भेदे वृत्तिभेदात्तयोर्भिदा ॥७५॥ सत्त्व
वृत्तौ चित्सुखैक्यं तद्वृत्तेर्निर्मलत्वतः ॥ रजोवृत्तेस्तु मालिन्यात्सुखांशोऽत्र तिरस्कृतः ॥७६॥

ससात्त्विकवृत्तीनां भेदात्तयोश्चिदानंदयोर्भिदा भेदोऽत्र विख्यातीत्यर्थः ॥७५॥ ननु तर्हि चिदानंदयोरैक्यं कुतो नोपलभ्यते इत्याशं
क्याह सत्त्वेति ॥ सत्त्ववृत्तौ सुखमकर्मेपि स्थापितायां सत्त्वगुणपरिणामरूपायां बुद्धिवृत्तौ चित्सुखैक्यं चिदानंदयोरैक्यं भासत इ
ति शेषः ॥ तत्रोपपत्तिमाह तद्वृत्तेरिति ॥ कुत्र तर्हि भेदो भासत इत्यत आह ॥ रजोवृत्तेरि
ति ॥७६॥

॥१९६॥
पं.द.

द्वा१

विद्यामात्रस्यापि सुखांशस्य तिरस्कारे दृष्टान्तमाह तिंतिणीति यथा तिंतिणीफले लवणयोगादम्लत्वं तिरोहितं तत् तद्वद्ज्ञो

नं२ व्यक्तो वा दंतिरोभाव इत्यर्थः ॥७७॥ गूढाभिसंधिं शंकते नन्विति ननु केन प्रकारेणात्मनः परमानंदरूपत्वं परप्रेमास्पदत्वहेतु-

ना गौणाभिध्यात्मरूपेभ्यः प्रियोपेक्ष्य द्वेष्येभ्यो विवेक्तुं विविच्य ज्ञातुं शक्यता नाम तथापि नायं विवेको मुक्तिसाधनमपरोक्षज्ञान-

तिंतिणीफलमत्यम्लं लवणेन युतं यदा ॥ तदाम्लस्य तिरस्कारादीषदम्लं यथा तथा ॥७७॥ न-

नु प्रियतमत्वेन परमानंदतात्मनि ॥ विवेक्तुं शक्यतामेवं विना योगेन किं भवेत् ॥७८॥ य-

द्योगेन तदेवेति वदामो ज्ञानसिद्धये ॥ योगः प्रोक्तो विवेकेन ज्ञानं किं नोपजायते ॥७९॥

गू०

द्वारा मुक्तिहेतुतो योगस्यानभिधानादिति गूढाभिसंधिः ॥७८॥ गूढाभिसंधिरेवोत्तरमाह ॥ यद्योगेनेति ॥ यथा योगस्यापरोक्षज्ञानहे-

तुत्वमस्ति एवं विवेकस्यस्यापीत्यत्रापि गूढाभिसंधिः ॥ एतां नौ चोद्यपरिहारयोरुभयोरभिसंधिं प्रकटयति ज्ञानसिद्धये इ-

ति यथा योगस्यापरोक्षज्ञानसाधनत्वेन योगोऽभिहितः ॥ एवं तद्ध्याये एवमस्मिन्नध्यायेऽभिहितेन गौणध्यानविवेकद्वारा

।सिध।

कौपं० व्यंकविवेकेतात्पिज्ञानसुखप्रसङ्गतोतेस्य ध्यः ॥७९॥

द्वा

तत्र किं प्रमाणमित्याशंक्याह यत्सांख्यैरिति॥ सांख्यैरात्मानात्मविवेकिभिर्यत्स्थानं मोक्षरूपं प्राप्यते गम्यते तद्योगैः॥ योगिभिरपि
प्राप्यते इत्यनेन वचनेन योगिनां विवेकिनां च फलैकत्वं ज्ञानद्वारा मोक्षलक्षणस्य फलस्यैकत्वमुक्तमित्यर्थः॥ ८०॥ ननु विवेकयो-
गयोरेकमेव चेत्फलं तर्ह्यनयोरन्यतरस्यैव युक्तं शास्त्रेषु प्रतिपादनं नोभयोरित्याशंक्याधिकारिवैचित्र्यादेकफलत्वमुभयप्रतिपा-

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते॥ इति स्मृतफलैकत्वं योगिनां च विवेकिनां॥ ८०॥
असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वज्ञाननिश्चयः॥ इत्थं विचार्य मार्गौ द्वौ जगाद परमेश्वरः॥ ८१॥
योगे कोऽतिशयस्तत्र ज्ञानमुक्तं समं द्वयोः॥ रागद्वेषाद्यभावश्च तुल्यो योगिविवेकिनोः॥ ८२॥

दनमित्यभिप्रायेणाह॥ असाध्य इति॥ तत्त्वं त्वं तया समाध्यस्य योगस्य निरायासरूपत्वाद्विवेकादतिशयो वक्तव्य इत्याशंक्य कोऽति-
शयः किमपरोक्षज्ञानजनकत्वादुच्यते उत रागद्वेषनिवृत्तिहेतुत्वाद् उत वाद्वैतानुपलब्धिकारणत्वादिति विकल्प्य प्रथमे पक्षे फल-
साम्यमित्याह॥ योग इति॥ द्वयोर्विवेकयोगयोरुभयोरपि ज्ञानलक्षणं फलं समम् उक्तं यत्सांख्यैरित्यादिना॥ तत्र योगे कोऽतिशयो न को-

विवेकिनो रागाद्यभावमुपपादयति न प्रीतिर्विषयेष्विति आत्मा प्रियतम इति जानतः पुरुषस्य न तावद्विषयेषु प्रीतिरस्ति अतो न तेषु रागो
जायते रागहेतोरनुकूल्यज्ञानस्याभावात् नापि द्वेषस्तद्धेतोः प्रातिकूल्यज्ञानाभावात् ॥ ८२ ॥ ननु विवेकिनो व्यवहारदशायां देहाद्युपद्र

न प्रीतिर्विषयेष्वस्ति प्रेयानात्मेति जानतः ॥
कुतो रागः कुतो द्वेषः प्रातिकूल्यमपश्यतः ८२ ॥
देहादेः प्रातिकूल्येषु द्वेषस्तुल्यो द्वयोरपि ॥ द्वेषं
कुर्वन्नयोगी चेदविवेक्यपि तादृशः ॥ ८४ ॥ ॥

वकारिषु द्वेषो दृश्यते इत्याशंक्य तदायोऽपि विवेकिनोऽस्तु तुल्य इति परिहरति ॥ देहादेरिति ॥ प्रातिकूल्येषु वृश्चिकादिषु कर्तृषु सदा योगित्व
मेव नाभ्युपगम्यते चेद्भवता तर्हि तादृशस्य विवेकित्वमपि नाभ्युपगच्छाम इत्याह ॥ द्वेषमिति ॥ तादृशो द्वेषकर्ता चेदविवेक्यपि विवेक
वानपि न भवतीत्यर्थः ॥ ८४ ॥ ॥ ॥

नन्वविवेकिनो द्वैतदर्शनमस्ति योगिनस्तु तन्नास्तीति तृतीये विकल्पे योगिनोऽतिशयो भविष्यतीत्याशंक्य विवेकिनस्तु द्वैतदर्शनं किं व्यवहा-
रदशायामुच्यते उतान्यदेति विकल्प्याद्ये तावत् योगिनोऽपि समानमित्याह ॥ द्वैतस्येति ॥ द्वितीयमाशंक्यते समाधाविति ॥ योगिनः समाधिका-
ले द्वैतदर्शनं नास्तीत्युच्यते चेदित्यध्याहारः ॥ तर्हि विवेकिनोऽपि विवेकदशायां द्वैतादर्शनं तुल्यमिति परिहरति ॥ तद्वदिति ॥ योगिनः स-
माधिदशायामिवाद्वैततत्त्वविवेकिनः ॥ अद्वैतं तत्त्वमिति श्रुतियुक्तिभ्यां विवेचनं कुर्वतोऽपि तस्मिन्काले द्वैतदर्शनं नास्तीत्यर्थः ॥८५॥ कथं त-

द्वैतस्य प्रतिभानं(चे)त् व्यवहारे द्वयोः समं ॥ समाधौ नेति चेत्तद्वन्नाद्वैतत्वविवेकिनः ॥८५॥ विवक्ष्यते तदस्माभि-
रद्वैतानंदनामके ॥ अध्याये तु तृतीये तः सर्वमप्यतिमंगलं ॥८६॥ सदा पश्यन्निजानंदमपश्यन्निखिलं जग-
त् ॥ अर्थाद्योगीति चेत्तर्हि संतुष्टो वर्द्धतां भवान् ॥८७॥ ब्रह्मानंदाभिधे ग्रंथे मंदानुग्रहसिद्धये ॥ द्वितीयाध्या-
य एतस्मिन्नात्मानंदो विवेचितः ॥८८॥ ॥ ॥ ॥ ॥

दभाव इत्याशंक्योपरितनेऽध्याये तदुपपादयिष्यत इत्याह ॥ विवक्ष्यत इति ॥ उक्तमर्थं निगमयति ॥ सर्वमिति ॥८६॥ नन्वद्वैतादर्श-
नसहितात्मदर्शनवतो योगित्वमेव भविष्यतीति शंकते ॥ यदेति ॥ इष्टापत्त्या परिहरति ॥ तर्हीति ॥८७॥ अध्यायतात्पर्यं संक्षिप्य दर्श-
यति ॥ ब्रह्मानंदेति ॥८८॥ इति श्रीविद्यारण्यभारतीतीर्थमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विरचिते ब्रह्मानंदे आत्मा-
-नंदो नाम द्वितीयोऽध्यायः ॥

नन्वानंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा विषयानंद इति प्रथमाध्याये ऽग्रानंदत्रयमेव प्रतिज्ञाय द्वितीयाध्याये तदतिरि-
क्तात्मानंदनिरूपणाच्चतुर्विधो जायते इत्याशंक्याह॥ योगानंद इति यथा प्रतिज्ञातस्यैव ब्रह्मानंदस्य योगजन्यसाक्षात्कारविष-
यत्वेन योगानंदत्वं निरुपाधिकत्वेन निजानंदत्वं च व्यवहृतं तथा तस्यैव गौणमिथ्यामुख्यात्मविवेचनेनावगम्यत्वविवक्षयाऽऽ-
त्मानंदत्वमभिहितमिति भावः॥ ननु सजातीयाद्यैर्गौणात्मनः पुत्रभार्यादेर्मिथ्यात्मनो देहादेर्द्वितीयादाकाशादेश्च विजातीयस्य स-

नं २

योगानंदः पुरोक्तो यः स आत्मानंद इष्यतां कथं ब्रह्मत्वमेतस्य सद्वयस्येति चेच्छृणु॥ १॥ आ-
काशादि स्वदेहांतं तैत्तिरीयश्रुतीरितं जगन्नास्ति यदानंदादद्वैतब्रह्मता ततः॥ २॥ ॥

द्वयस्यात्मानंदस्य प्रथमाध्यायोक्ताद्वितीययोगानंदरूपता न संभवतीति शंकते॥ कथमिति सजातीयत्वेनाभिमतस्य गौणा-
त्मनः पुत्रादेर्मिथ्यात्मनो देहादेश्च तैत्तिरीयश्रुत्यभिहितजगदंतःपातित्वादाकाशादेश्च जगतः आत्मानंदातिरेकेणासत्त्वा-
न्नाद्वितीयब्रह्मरूपता तस्य घटत इति सबहुमानमुत्तरमाह॥ आचेति॥ आकाशादीति॥ तस्माद्वा एतस्मादात्मन आकाशः संभू-
त इत्यादिकया तैत्तिरीयश्रुत्याभिहितं जगत्स्वकारणभूतादात्मानंदाद्यतः पृथक् नास्ति अतस्तस्यानंदस्याद्वितीयत्वमि-
त्यभिप्रायः॥ १। २॥ ॥ ॥

ननु दाहृतश्रुतिवाक्ये आत्मनः कारणत्वं श्रूयते नानंदस्येत्याशंक्य तच्छ्रुतिपादकं तदीयमेवानंदाद्ध्येव खल्विमानि भूतानि जायंते इत्यादिवाक्यमर्थतः पठति ॥ आनंदादिति ॥ फलितमाह ॥ इत्युक्तानंदादिति ॥ अत्रेदमनुमानं सूचितं ॥ विमतं जगदानंदादुत्पद्यते [illegible] तत्कार्यत्वाद्यत्कार्यं तत्ततो न भिद्यते यथा मृत्कार्यं घटादि मृदः न भिद्यत इति ॥ ननु ॥ कुलालादुत्पन्नस्य घटस्य ततो भेददर्शनान्नैकांतिकता हेतोरित्याशंक्य कुलालस्य निमित्तकारणत्वादिहवानंदस्योपादानत्वसमर्थनान्नैवमित्याह ॥

आनंदादेव तज्जातं तिष्ठत्यानंद एव तत् ॥ आनंद एव लीनं चेत्युक्त्यानंदात्मकं यथा कथं ॥ ननु ॥ कुलालात् घट उत्पन्नो भिन्नश्चेदिति न शंक्यतां ॥ मृद्वदेष उपादानं न निमित्तं कुलालवत् ॥४॥
स्थितिलयौ कुंभादेः कुलाले स्तो न हि क्वचित् ॥ दृष्टौ तौ मृदि तद्वत्स्यादुपादानं तयोः श्रुतेः ॥५॥

कुलालादिति ॥ एष आत्मानंदो मृद्वद्घटस्य चोपादानं उपादानकारणं कुलालवन्न निमित्तकारणं ॥४॥ ननु कुतो नोपादानत्वं कुलालस्यापीत्याशंक्य स्थितिलयाधारत्वरूपोपादानलक्षणाभावादित्याह ॥ स्थितीति ॥ हि यस्मात्कारणात् घटस्य स्थितिलयौ कुलालाधारौ न भवतः अतो नोपादानत्वमिति शेषः ॥ कुत्र तर्हि तौ इत्यत आह ॥ दृष्टाविति ॥ तौ घटस्य स्थितिलयौ तदुपादानभूतायां मृद्येव दृष्टौ प्रत्यक्षेणोपलब्धौ भवतः एवं तत्र प्रकृते किमायातमित्यत आह ॥ तद्वदिति ॥ यद्वद्घटस्य मृदुपादानं तद्वज्जगतोप्यानंद उपादानं स्यात्

आनंदस्य स्वाभिमतं जगदुपादानत्वं तदवांतरभेदमाह ॥ उपादानमिति तत्र विवर्त्तं परिशेषयितुमितरौ पक्षौ दूषयति तत्रेति अंत्या-
वारंभपरिणामपक्षौ निरंशे निरवयवे वस्तुनि नावकाशिनौ अवकाशवंतौ न भवतः ॥६॥ तयोरनवकाशित्वमेव दर्शयितुं ताव-
दारंभवादिनो मतमनुवदति आरंभेति आरंभवादिनो वैशेषिकादयोऽन्यस्मात्कार्यापेक्षयान्यस्मात्कारणादन्यस्य कार्यस्योत्पत्ति-

उपादानं त्रिधा भिन्नं विवर्त्तिपरिणामिभिः ॥ आरंभकं च तत्रांत्यौ न निरंशेऽवकाशिनौ ॥६॥
आरंभवादिनोऽन्यस्मादन्यस्योत्पत्तिमूचिरे ॥ ततोऽपटस्य निष्पत्तेः भिन्नौ तन्तुपटौ खलु ॥
७॥ अवस्थांतरतापत्तिरेकस्य परिणामिता ॥ स्यात् क्षीरं दधि मृत्कुंभः सुवर्णं कुंडलं यथा ॥
८॥

मूचिरे उक्तवंतः ॥ कुत एवं वदंतीत्यत आह ॥ तत इति निष्पत्तेरुत्पत्तेर्दर्शनादिति शेषः । एतावता कथं कार्यकारणभेदासि-
द्धिरित्यत आह भिन्नाविति विरुद्धपरिमाणाद्विरुद्धार्थक्रियावत्त्वाच्चेति भावः ॥७॥ इदानीं परिणामस्य स्वरूपमाह ॥ अवस्थांत-
रेति एकस्यैव वस्तुनः पूर्वावस्थात्यागपुरःसरमवस्थांतरप्राप्तिः परिणाम इत्यर्थः ॥ तमुदाहरति स्यादिति यथा
क्षीरमृत्सुवर्णादीनां क्षीरादिव्यवहारयोग्यतां परित्यज्य दध्यादिव्यवहारयोग्यतापत्तिः ॥८॥

॥२००॥
पं॰ द॰

विवर्त्तलक्षणमाह ॥ अवस्थांतरभानं विवर्त्तेति ॥ तुशब्दोस्य पूर्वस्मात्परिणामाद्वैलक्षण्यद्योतनार्थः ॥ पूर्वावस्थापरित्यागेनैवाव
स्थांतरभानं विवर्त्तः उदाहरति ॥ रज्जुसर्पवदिति ॥ यथा रज्ज्वात्मनावस्थितस्यैव द्रव्यस्य सर्पात्मनावभासनं न तु विवर्त्तमानस्य रज्ज्वादेः
सांशत्वदर्शनान्निरंशे सोपि न घटतइत्याशंक्य निरवयवे गगनादावपि दर्शनान्नैवमित्याह ॥ निरंशेपीति ॥ असौ विवर्त्तः ॥ अतलतल
मध्योमसु खें द्रनीलकटाहकल्पत्वं ॥ मालिन्यं नीलवर्णता तयोः कल्पनादाकाशस्वरूपानभिज्ञैरारोप्यमाणत्वादित्यर्थः ॥ ९ ॥ फलित
माह ॥ ततइति ॥ ततो निरंशेपि विवर्त्तसंभवान्निरंशेप्यानंदे विवर्त्तः कल्पितमित्यंगीकार्यमित्यर्थः ॥ नन्वद्वितीयआनंदे जगत्कल्पनमनु
पपन्नं कल्पनाहेतोरभावादित्याशंक्याह ॥ मायेति ॥ शक्तेः कल्पकत्वं क्व दृष्टमित्यतआह ॥ ऐंद्रीति ॥ यथैंद्रजालिकनिष्ठया मणिमंत्रौषध
अवस्थांतरभानं तु भानं तु विवर्त्तो रज्जुसर्पवत् ॥ निरंशेप्यस्त्यसौ व्योम्नि तलमालिन्यकल्पनात् ॥ ९ ॥ ततो निरंशआनंदे विवर्त्तो
जगदिष्यतां ॥ मायाशक्तिः कल्पिका स्यादैंद्रजालिकशक्तिवत् ॥ १० ॥ शक्तिः शक्तात्पृथङ्नास्ति तद्वद्दृष्टेर्न चाभिदा ॥ प्रतिबंध
स्य दृष्टत्वात् शक्त्यभावे तु कस्य सः ॥ ११ ॥
रूपाया मायाशक्तेर्गंधर्वनगरादिकल्पकत्वे तथेत्यर्थः ॥ नन्वानंदातिरिक्ता या माया याभ्युपगमे द्वैतापत्तिरित्याशंक्य तस्या अनिर्व
चनीयत्वेनान्ततत्वं वक्तुमुत्तरश्लोकस्य माणायालोकिक्या अग्न्यादिगतशक्तेः सा वद्वेदे नाभेदेन वानिर्वक्तुमशक्यत्वं दर्शयति ॥ श
क्तिरिति ॥ शक्तिरग्न्यादिनिष्ठा स्फोटादिजनिका शक्तादग्न्यादिस्वरूपात्पृथक् भेदेन नास्ति ॥ कुतइत्यतआह ॥ तद्वदिति ॥ तद्वत्त
थात्वस्य भेदेनासत्वस्य दृष्टेर्दर्शनादग्न्यादिस्वरूपातिरेकेणानुपलभ्यमानत्वादित्यर्थः ॥ नाप्यग्न्यादिस्वरूपमेव शक्तिरित्याह
न चेति ॥ अभिदा अभेदोपि न च नैव ॥ तत्रापि हेतुमाह ॥ प्रतीति ॥ मणिमंत्रादिभिः शक्तिकार्यस्य स्फोटादेः प्रतिबंधदर्शनात्स्वरूपातिरि
क्ता शक्तिरेष्टव्येत्यभिप्रायः ॥ नवनु प्रतिबंधदर्शनं शक्तेर्भेदोपि मा भूत् को दोषस्तत्राह ॥ शक्तीति ॥ प्रत्यक्षासिद्धस्याग्न्यादिस्वरूपस्य

॥२००॥
पं॰ द॰

तन्नंतींद्रियायाः कथं प्रतिबंधो वगंतुं शक्यत रत्याशंक्याह ॥ शक्तेरिति ॥ अतींद्रियायाः शक्तेर्यतः कार्यलिंगगम्यात्वात्प्रकार्ये सत्य
पि कारणे कार्यानुत्पत्तौ सत्यां प्रतिबंधनं प्रतिबंधो वगम्यत रति शेषः ॥ उक्तमर्थं दृष्टांतप्रदर्शनेन स्पष्टयति ॥ ज्वलतरति ॥ लोके स्व
रूपेण प्रज्वलतोग्नेः सकाशाद्दाहादिलक्षणात्कार्यानुत्पद्यमाने सति मंत्रादिप्रतिबंधतामंत्रादीनां शक्तिप्रतिबंधकत्वं स्यादित्यर्थः ॥ १२ ॥ इ
त्थं लौकिकशक्तिं स्वरूपतः प्रमाणतश्चोपन्यस्येदानीं मायाशक्तिसद्भावे ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगू
ढामिति श्रुतावतारोपनिबद्धं वाक्यमर्थतः पठति देवात्मशक्तिमिति ॥ मुनयः कालस्वभावादिकारणवादे बहुदोषदर्शनवंतः जगत्कारणं

शक्तेः कार्यानुमेयत्वादकार्ये प्रतिबंधनं ॥ ज्वलतोग्नेरदाहे स्यान्मंत्रादिप्रतिबंधना ॥
१२ ॥ देवात्मशक्तिं स्वगुणैर्निगूढां मुनयो विदन् ॥ परास्य शक्तिर्विविधा क्रियाज्ञानव

ज्ञोसया ध्यानयोगमास्थिता बुद्धिकारिणः देवात्मशक्तिं देवस्य द्योतमानस्य स्वप्रकाशचिद्रूपस्यात्मनः प्रत्यगभिन्नस्य ब्रह्मणः ॥ श
क्तिं मायारूपां स्वगुणैः स्वकार्यभूतैः स्थूलसूक्ष्मशरीरैर्निगूढां नितरां गूढामावृतामविदन् ज्ञातवंत इत्यर्थः ॥ तस्या एवोपनिष
दिस्थितं परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति वाक्यमर्थतः पठति ॥ परास्येति ॥ अस्य ब्रह्मणः परा उत्कृष्टा जग
त्कारणभूता शक्तिर्विविधा श्रूयत इति शेषः विविधत्वमेवाह ॥ क्रियेति ॥ क्रिया ज्ञाने प्रसिद्धे ॥ बलमिच्छा शक्तिर्ज्ञानक्रियाशक्तिसाहचर्यात्
क्रियादिशक्तयः आत्मा स्वरूपं यस्याः सा क्रियाज्ञानबलात्मिका ॥ १३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रदं वाक्यद्वयं कुत्र त्वमित्यत आह । इतीति । नकेवलं मायाशक्तिः श्रुतिसिद्धा किंतु स्मृतिसिद्धापीत्यत्याह । वसिष्ठ इति । यथाश्रुतिर्विचित्रां
मायां शक्तिमुक्तवती । वशिष्ठोऽपि तां तथोक्तवान् वाशिष्ठाख्ये ग्रंथे । इति शेषः । मायाप्रतिपादकान् वाशिष्ठश्लोकानेव पठति । सर्वशक्ति
परमिति । नित्यमापूर्णमद्वयमिति ब्रह्मणः पारमार्थिकं रूपं सर्वशक्तीति तस्यैव सोपाधिकरूपं तत् । तत्परं ब्रह्मपदार्थयाथायथाशक्त्या उ

इति वेदवचः प्राह वाशिष्ठश्च तथाब्रवीत् । सर्वशक्ति परं ब्रह्म नित्यमापूर्णमद्वयं । ययोल्लसति
शक्त्यासौ प्रकाशमधिगच्छति ॥ २४ ॥ चिच्छक्तिर्ब्रह्मणो राम शरीरेषूपलभ्यते । स्पंदशक्तिश्च वा
तेषु दार्ढ्यशक्तिस्तथोपले ॥ २५ ॥ द्रवशक्तिस्तथांभस्सु दाहशक्तिस्तथानले । शून्यशक्तिस्तथाका
शे नाशशक्तिर्विनाशिनि ॥ २६ ॥

उल्लसति विकसति विवर्तते । तदासौ शक्तिः प्रकाशमधिगच्छति । अभिव्यक्तिं प्राप्नोति ॥ २४ ॥ इदानीं तामेवाभिव्यक्तिं प्रपंचयति । चिच्छ
क्तिरिति द्वाभ्यां । शरीरेषु देवतिर्यङ्मनुष्यादिरूपेषु चिच्छक्तिश्चेतनत्वव्यवहारहेतुभूतोपलभ्यते दृश्यते । स्पंदश
क्तिश्चलनहेतुभूता प्रकाशमधिगच्छतीत्युक्तानभिव्यक्तिदशायामपि ब्रह्मणो जगत्सत्तादर्शिता ॥ २५ ॥ २६ ॥ ॥ ॥

स्त्रेनभिव्यक्तस्यापि सत्वे दृष्टांतमाह यथेति ॥ विचित्रस्यापि तस्य सत्वे दृष्टांतमाह यथांडांतर्जल इत्यादि सार्धेन ॥१७॥१८॥ ननु स
र्वासामपि शक्तीनां युगपदेवाभिव्यक्तिः कुतो न स्यादित्याशंक्याह क्वाचिदिति क्वचिद्देशविशेषे कदाचित्कालविशेषे काश्चिच्छक्तयो

यथांडांतर्महासत्वे जगदस्ति तथात्मनि ॥ यथांडांतर्जले राम विचित्रो बर्हिरास्थितः ॥१७॥
वटकणबीजे यथा वटद्रुमस्तथेदं ब्रह्मणि स्थितं ॥ फलपत्रलतापुष्पविटपमूलवान् ॥१८॥
काश्चित्काश्चित्कदाचिच्च तस्मादुद्यंति शक्तयः ॥ देशकालविचित्रत्वात् क्ष्मातलादिव शालयः ॥१९॥

दयः तासामयुगपदभिव्यक्तौ दृष्टांतमाह क्ष्मातलेति ॥ यथा नभिगतानां सर्वेषां बीजानां मध्ये देशविशेषे च केषांचिदेव
बीजानामंकुरोत्पत्तिर्नान्येषां तद्वदित्यर्थः ॥१९॥ ॥ ॥ ॥ ॥ ॥

रदानीं जगतः कल्पनामात्ररूपतां दर्शयितुं तत्कल्पकस्य मनसो रूपं तावद्दर्शयति ॥ सम्प्राप्तेति ॥ नित्योदितमहावपुः ॥ नित्यं सदोदितं प्रकाश
नं महद्देशकालादिपरिच्छेदरहितं वपुः स्वरूपं यस्य स तथा यद्यास्मिन्काले मनाक् ईषत् मननीं शक्तिं स्वपरावबोधनरूपां शक्तिं मायाप
रिणामरूपां धत्ते तत्तदा मनस्त्वमुच्यते २० ॥ इदानीं कल्पनाप्रकारमाह ॥ आदाविति ॥ आदौ प्रथमं मननशक्त्युल्लासेन मनो भवति ॥ तदनु

सम्प्राप्तस्सर्वगो राम नित्योदितमहावपुः ॥ यन्मनाङ्मननीं शक्तिं धत्ते तन्मन उच्यते २० ॥ आदौ मनस्तदनु बंधविमो
क्षदृष्टी पश्चात्प्रपंचरचना भुवनाभिधाना ॥ इत्यादिका स्थितिरियं हि गता प्रतिष्ठां आख्यायिका सुभग बालजनो
दितेव २१ ॥ बालस्य हि विनोदाय धात्री वक्ति शुभां कथाम् ॥ क्वचित्संति महाबाहो राजपुत्रास्त्रयः शुभाः २२ ॥ द्वौ न जातौ
तथैकस्तु गर्भ एव हि न स्थितः ॥ वसंति ते धर्मयुक्ता अत्यंतासति पत्तने २३ ॥ स्वकीयाच्छून्यनगरान्निर्गत्य वि
मलाशयाः ॥ गच्छंतो गगने वृक्षान्ददृशुः फलशालिनः २४ ॥ भविष्यन्नगरे तत्र राजपुत्रास्त्रयोपि ते ॥ सुखमद्य स्थि
ताः पुत्रा मृगयाव्यवहारिणः २५ ॥ धात्र्येति कथिता राम बालकाख्यायिका शुभा ॥ निश्चयं स ययौ बालो निर्विचारण

तदनंतरं बंधविमोक्षदृष्टी बंधविमोक्षकल्पने भवतः पश्चात्तदनंतरं बंधदृष्ट्यैव भुवनाभिधानं यस्याः सा प्रपंचरचना प्रपंचस्य
गिरिनगरीसरित्समुद्रादेः रचना कल्पनं भवति ॥ इत्यादिका एवंप्रकारा इयं जगतः स्थितिः प्रतिष्ठां स्थैर्यं गता प्राप्ता ॥ कल्पितस्यापि वा
स्तवत्वप्रतीतौ दृष्टांतमाह ॥ आख्यायिकेति ॥ बालजनायोदिता कथिता आख्यायिका कथा यथा तथा वास्तवत्वबुद्धिं गता ॥ तथेदं जगदपी
त्यर्थः ॥ तामेव कथां कथयति बालस्येति पंचभिः ॥ २२ २३ २४ २५ २६ ॥ ॥ ॥

दृष्टांतमित्युक्तमर्थं दृष्टांते के योजयति इयमिति २७ वसिष्ठोक्तिमुपसंहरति इत्यादिभिरिति एवं मायासद्भावे प्रमाणमुपन्यस्य तस्या अनि-
र्वचनीयतां वक्तुं प्रतिजानीते सैव शक्तिरिति २८ कार्येति एषा मायाशक्तिः कार्यात् स्वकार्यभूतात् जगतः स्वाश्रयाद् ब्रह्मणश्च विलक्ष-
णा विपरीतस्वभावा भवेत् मायाशक्तेः कार्यादाश्रयतो वैलक्षण्यं दृष्टांते न स्पष्टयति स्फोटेति वह्निगतशक्तेः कार्यरूपः स्फोटश्चा-

दि८

इयं संसाररचनाविचारोज्झितचेतसां । यालकाख्यादिकेनैव त्वयमनस्थितिमुपागता ॥२७॥ इत्यादि-
भिरुपाख्यानैर्मायाशक्तेश्च विस्तरं । वसिष्ठः कथयामास सैव शक्तिर्निरूप्यते ॥२८॥ कार्यादाश्रय-
तश्चैषा भवेच्छक्तिर्विलक्षणा ॥ स्फोटांगारौ दृश्यमानौ शक्तिस्तत्रानुमीयते ॥२९॥ पृथुबुध्नोदराकारो घटः कार्योऽत्र मृत्तिका ॥ शब्दादिभिः पंचगुणैर्युक्ता शक्तिस्त्वतद्विधा ॥३०॥ ॥

अपरूपोंगारश्च प्रत्यक्षगम्यौ शक्तिस्तु कार्यानुमेया अतस्ताभ्यां सा विलक्षणेत्यर्थः २९ उक्तन्यायं मृच्छक्तावपि योजयति पृथुबुध्नो-
दरेति यः पृथुबुध्नोदराकारः पृथु स्थूलं बुध्नं वर्तुलं उदरं यस्य स पृथुबुध्नोदरस्तथाविधश्चाकारो यस्य स घटः कार्यः शब्दस्प-
र्शरूपरसगंधाख्यपंचगुणोपेता मृत्तिकाश्रयः शक्तिस्त्वतद्विधा उभयविलक्षणेत्यर्थः ३० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वैलक्षण्यमाह ॥ नेति ॥ शक्तौ घटादिः कार्यधर्मो नास्ति शब्दादिकमाश्रयधर्मोऽपि न विद्यते ॥ अतो विलक्षणेत्यर्थः ॥ तर्हि सा कीदृशीत्यत आह ॥ अस्त्विति ॥ यथा तथेत्युक्तमेवार्थं स्पष्टयति ॥ अत एवेति ॥ यतः कार्यादाश्रयतश्च विलक्षणा अत एषाचिंत्या चिंतेति प्रशक्या न तु तर्ह्यचिंत्यत्वमेव तस्या रूपं स्यादित्याशंक्याह ॥ नेति ॥ भेदेनाभेदेनाचिंत्यत्वादिना वा केनापि रूपेण निर्वचनं नार्हतीत्यर्थः ॥ २१ ॥ ननु कारणस्वरूपातिरिक्ता शक्तिर्यद्यस्ति तर्हि कारणस्वरूपमेव न स्यात्कुतो वभासत इत्याशंक्याह ॥ कार्योत्पत्तेरिति ॥ स्पष्टम् ॥ घटादिर्यत्पत्तेः पूर्वं मृदि निगूढा

न घटादिर्न शब्दादिः शक्तौ अस्तु यथा तथा ॥ अत एव ह्यचिंत्येषा नानिर्वचनमर्हति ॥ २१ ॥ कार्योत्पत्तेः पुरा शक्तिर्निगूढा मृद्यवस्थिता ॥ कुलालादिसहायेन विकाराकारतां गता ॥ २२ ॥ पृथुत्वादिविकारांतं स्पर्शादिं चापि मृत्तिकां ॥ एकीकृत्य घटं प्राहुर्विचाराविकला जनाः ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वतिष्ठते नावभासत इत्यर्थः ॥ निगूढत्वे उपरिष्टादपि न तस्या अभिव्यक्तिः स्यादित्याशंक्यानभिव्यक्तस्यापि नवनीतादेर्मथनादिनेव कुलालादिव्यापारेण तस्या अभिव्यक्तिः स्यादित्याह ॥ कुलालादीति ॥ आदिशब्देन दंडचक्रादयो गृह्यंते ॥ २२ ॥ ननु कारणातिरिक्तस्य शक्तिकार्यस्य सत्ते कार्यकारणयोर्भेदो कुतो नावभासते इत्याशंक्य भेदप्रतीतिहेतोर्विचारस्याभावादित्याह ॥ पृथुत्वेति ॥ अविवेकिनो जनाः पृथुबुध्नत्वादिरूपकार्यं शब्दस्पर्शादिगुणरूपां कारणभूतां मृत्तिकां चाविचारत एकीकृत्य घट इत्याचक्षते ॥ २३ ॥

उक्तस्य घटव्यवहारस्याविचारमूलत्वं कुत इत्याशंक्याह। कुलालेति। कुलालव्यापारात्पूर्वं भाविनो मृदंशस्याघटस्य घट-
त्वव्यवहारादविचारमूलत्वं तस्येति भावः। कस्य तर्हि घटत्वमित्यत आह। पश्चात्त्विति। कुलालव्यापारानंतरभाविनः पृथुबुध्नोदराका-
रस्यैव घटशब्दवाच्यत्वमुचितं तदुत्पत्त्यनंतरमेव घटशब्दप्रयोगदर्शनादिति भावः॥ २४॥ ननु पारमार्थिकस्य घटस्यानिर्वचनीयतो प

कुलालव्यापृतेः पूर्वं यावानंशः स नो घटः। पश्चात्तु पृथुबुध्नादिमत्त्वयुक्तो हि कुंभता॥ २४॥ स घ-
टो न मृदो भिन्नो वियोगे सत्यनीक्षणात्। नाप्यभिन्नः पुरा पिंडदशायामनवेक्षणात्॥ २५॥ अ-
निर्वचनीयोऽयं शक्तिवत्तेन शक्तिजः। अव्यक्तत्वे शक्तिरुक्ता व्यक्तत्वे घटनामभृत्॥ २६॥
ऐंद्रजालिकनिष्ठापि माया न व्यज्यते पुरा। पश्चाद्गंधर्वसेनादिरूपेण व्यक्तिमाप्नुयात्॥ २७॥

शक्तिकार्यत्वमयुक्तमित्याशंक्य घटस्यापि पारमार्थिकत्वमसिद्धमित्याह। स इति। घटो मृदः पृथक्कृत्य रज्जुमशक्यत्वान्न मृ-
दो भिद्यते नापि मृदेव पिंडावस्थायामनुपलभ्यमानत्वात्। अतः शक्तिवदनिर्वचनीय एव घटः। फलितमाह। नेति। ननु शक्ति-
कार्ययोरुभयोरप्यनिर्वचनीयत्वे शक्तिः कार्यं चेति भेदव्यवहारः कुत इत्याशंक्याह। अव्यक्तत्वे इति॥ २५॥ २६॥ सर्वमनभि-
व्यक्ता माया शक्तिः पश्चादभिव्यज्यत इत्येतन्न प्रसिद्धं मायायामुपलभ्यत इत्याशंक्याह। ऐंद्रजालिकनिष्ठापीति। पुरा मणिमंत्रा-
दिप्रयोगात्पूर्वं॥ २७॥

शक्तिकार्यस्य घटादेरनृतत्वं शक्त्याधारस्य मृदादेः सत्यत्वमित्येतद्द्वयं छांदोग्यश्रुतावभ्युदितमित्याह ॥ एवमिति ॥ मायामय
त्वेन मायाकार्यत्वेन विकारस्य कार्यरूपस्य घटादेरनृतात्मतां मिथ्यात्वं विकाराणां घटादीनामाधारभूताया मृदः सत्य
त्वं च वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिरुक्तवतीत्यर्थः ॥ ३८ ॥ इदानीं वाचारंभणमित्यादिवा
क्यमर्थतः पठति वागिति ॥ स्यादयमिति ॥ विकारः मृत्कार्यो घटादिः वाङ्निष्पाद्यं वागिंद्रियेणोच्चार्यते नाममात्रं नामैवास्य घटादे

एवं मायामयत्वेन विकारस्यानृतात्मतां ॥ विकाराधारमृद्वस्तुसत्यत्वं चाब्रवीत् श्रुतिः ॥ ३८ ॥
वाङ्निष्पाद्यं नाममात्रं विकारो नास्य सत्यता ॥ स्पर्शादिगुणयुक्ता तु सत्या केवलमृत्तिका ॥ ३९ ॥
व्यक्ताव्यक्ते तदाधार इति त्रिष्वाद्ययोर्द्वयोः ॥ पर्यायः कालभेदेन तृतीयस्त्वनुगच्छति ॥ ४० ॥

र्न सत्यता नामातिरिक्तेन पारमार्थिकं रूपमस्ति किंतु तदाधारभूताया मृद एव सत्यत्वमित्यर्थः ॥ ३९ ॥ शक्तितत्कार्ययोरनृतत्वे तदाधार
स्य सत्यत्वे च कारणमाह ॥ व्यक्ताव्यक्ते इति ॥ व्यक्तो घटादिलक्षणः कार्यः अव्यक्तः कारणभूता शक्तिः ते व्यक्ताव्यक्ते तदाधार
भूता मृत्तिकेत्येतेषु मध्ये आद्ययोः प्रथमोदितयोर्द्वयोः कार्यशक्त्योः संबंधिनौ यौ कालौ तयोर्भेदेन भेदस्य विद्यमानत्वात्
पर्यायः क्रमेणागमनं तृतीयस्तु अयमाधारस्तु मृदादिरनुगच्छति उभयत्रानुवर्तते ॥ अयं भावः ॥ शक्तिकार्ययोः कादाचित्कत्वादनृ
तत्वमाधारस्य तु कालत्रयानुगामित्वात्सत्यत्वमिति ॥ ४० ॥ ॥ ॥ ॥ ॥

रदंनीविकारस्येवासत्यत्वे हेतुत्रयमाह॥ निस्तत्त्वमिति सार्द्धेन॥ व्यक्तशब्दवाच्यं घटादिकं कार्यं स्वरूपेणासदेवावभासते तथोत्पत्तिवि
नाशवदुपलभ्यते॥ उत्पत्त्यनंतरं वागिंद्रियजन्यनामात्मकतेन व्यवह्रियते च व्यक्ते कार्यरूपेण नष्टेपि तत्कार्याद्भिन्नं नाम नृवक्त्रेषु नृणां
शब्दप्रयोक्तॄणां व्याख्यातॄणां वदनेष्वनुवर्त्तते॥४१॥ ततः किं तदाह॥ तेनेति॥ व्यक्तं कार्यं तेन वाचा व्यवह्रियमाणेन नाम्ना शब्देन निरूप्यत्वात् व्य
वह्रियमाणत्वात्तद्रूपं तस्य नाम्नो रूपमेव रूपं यस्य तत्तथा नामात्मकमुच्यत इत्यर्थः॥ प्रयोगश्च॥ विमतो घटः॥ घटशब्दात्मको भवितुमर्हति घटश
ब्देन व्यवह्रियमाणत्वात्॥ घटशब्दवदिति॥४२॥ एवं हेतुत्रयं प्रसाध्य रज्जौ नीलानुमानरचनाप्रकारं सूचयति॥ निस्तत्त्वादिति॥ व्यक्तस्य घटादिस्व

निस्तत्त्वं भासमानं च व्यक्तमुत्पत्तिनाशभाक्॥ तदुत्पत्तौ तस्य नाम वाचा निष्पद्यते ततः॥४१॥
व्यक्ते नष्टेपि नामैतन्नृवक्त्रेष्वनुवर्त्तते॥ तेन नाम्ना निरूप्यत्वाद्व्यक्तं तद्रूपमुच्यते॥४२॥ नि
स्तत्त्वत्वाद्विनाशित्वाद्वाचारंभणनामतः॥ व्यक्तस्य न तु तद्रूपं सत्यं किंचिन्मृदादिवत्॥४३॥

रूपस्य घटादिरूपस्य कार्यस्य यत्स्वबुद्ध्यादरगाकाररूपमस्ति तत्किंचित्किमपि सत्यं न भवति निस्तत्त्वत्वात् निर्गतं तत्त्वं वास्तवरूपं यस्मा
त्तन्निस्तत्त्वं तस्य भावो निस्तत्त्वत्वं तस्मात् तथा विनाशित्वात् यदि सत्यमेव नाशप्रतियोगित्वात् वाचारंभणनामतः॥ वागिंद्रियजन्यशब्दमा
त्रात्मकत्वात् त्रिष्वपि हेतुषु मृदादिति वैधर्म्यदृष्टांतः॥ अत्रैवं प्रयोगः॥ घटादिरूपः कार्यः असत्यो भवितुमर्हति निस्तत्त्वत्वात् यद
सत्यं न भवति न तन्निस्तत्त्वं यथा घटाद्युपादानं मृदिति केवलव्यतिरेकी॥ एवमितरहेतुद्वयेपि योजनीयं॥४३॥

एवं विकारस्यासत्यत्वमुपपाद्येदानीं तदधिष्ठानभूताया मृदः सत्यत्वमुपपादयति व्यक्तकालेति व्यक्तकाले स्थितिकाले ततः पूर्वमुत्प
त्तेः पूर्वस्मिन्काले ऊर्ध्वमपि व्यक्तविनाशोत्तरकालेऽपि एकरूपभाक् एकाकारं सतत्त्वं तत्त्वेन वास्तवरूपेण सह वर्तत इति सतत्त्वम् अविना
शं नाशरहितं च यन्मृद्वस्तु तत्सत्यमिति कथ्यते विमतं मृद्वस्तु सत्यं त्रिकालेष्वपि सतत्त्वादात्मवदित्यादि योज्यं ॥४४॥ ननु घटादेः कार्यजा
तस्यासत्यत्वे तस्यारोपितरजतादेरिवाधिष्ठानज्ञानान्निवर्त्यता स्यादिति शंकते व्यक्तमिति व्यक्तमित्यादिभिः शब्दैरभिधीयमानो योऽर्थः का
र्यरूपः तस्य कारणातिरेकेणासत्यत्वे गीक्रियमाणे मृत्कर्दमाणस्य कारणस्य ज्ञाने किं न तन्निवर्तेत स्यादित्यर्थः ॥४५॥ दृष्टापत्तिरिति प

व्यक्तकाले ततः पूर्वमूर्ध्वमप्येकरूपभाक् ॥ सतत्त्वमविनाशं च सत्यं मृद्वस्तु कथ्यते ॥४४॥
व्यक्तं घटो विकारश्चेत्येतैर्नामभिरीरितः ॥ अर्थश्चेदनृतः कस्मान्न मृद्वन्निवर्तते ॥४५॥
निवृत्त एव यस्मात्ते तत्सत्यत्वमतिर्गता ॥ ईदृङ्निवृत्तिरेवात्र बोधजा न त्वनाशनम् ॥४६॥

रिहरति निवृत्त इति तत्रोपपत्तिमाह यस्मादिति यस्मात्कारणात्ते तव घटादिविषया सत्यत्वबुद्धिर्नष्टा अतः स निवृत्त एवेत्यर्थः
ननु आरोपितरजतादिस्वरूपस्येवाप्रतीतिरुपलभ्यते न सत्यत्वबुद्ध्युपगमरत्याशंक तस्य निरुपाधिकभ्रमत्वादस्तु तथात्व
मिह तु सोपाधिकभ्रमे सत्यत्वबुद्ध्युपगम एव निवृत्तिः [illegible] स्यादित्यभिप्रायेणाह ईदृगिति अत्र सोपाधिकभ्रम
स्थले ईदृगेव सत्यत्वबुद्ध्युपगमरूपैव बोधजा अधिष्ठानयाथात्म्यज्ञानजन्या निवृत्तिः स्वरूपेणानत्वनाशनं न स्वरूपाप्रतीति
रूपेत्यर्थः ॥४६॥

एवं कूटस्थमित्यत आह पुमानिति जले अधोमुखत्वेन प्रतिभासमानोऽपि पुमान् पारमार्थिको नास्ति तत्रोपपत्तिमाह तटस्थेति कस्य
चिदविवेकिनो विवेकिनो वा तस्मिन्नधोमुखे पुरुषे तीरस्थपुरुषस्य सत्यत्वाभिमानः क्वचिद्देशे वा काले वा नैवास्तीति ४७ ननु आ
रोपितस्यासत्यत्वज्ञानमात्रेण पुरुषार्थसिद्धिरित्याशंक्याह ईदृगिति अद्वैतवादेऽत्र आत्मानंदातिरिक्तस्य सर्वस्य मिथ्यात्वनिश्च
ये सत्याद्वितीयानंदात्मव्यक्तिलक्षणः पुरुषार्थः सिध्यतीत्यभिप्रायः ननु घटस्य मृद्विवर्त्तत्वे सिद्धे तत्त्वज्ञानात् घटस्य सत्यत्व
बुद्धिर्निवर्त्तेत न चैतदिदानीं सिद्धमित्याशंक्याह मृद्रूपस्येति ४८ घटे मृद्रूपपरित्यागाभावेऽपि मृत्परिणामता घटस्य किं न स्यादि

पुमानधोमुखो नीरे भातोऽप्यस्ति न वस्तुतः ॥ तटस्थमर्त्यवत्तस्मिन्नेवास्था कस्यचित्क्वचित् ॥४७॥ ईदृ
ग्बोधे पुमर्थत्वं मतमद्वैतवादिनां ॥ मृद्रूपस्यापरित्यागाद्विवर्त्तत्वं घटे स्थितं ॥४८॥ परिणामे पू
र्वरूपं त्यजेत्तत्क्षीररूपवत् ॥ मृत्सुवर्णे निवर्त्तेते घटकुंडलयोर्नहि ॥४९॥ घटे भग्ने न मृद्भावः क
पालानामवेक्षणात् ॥ मैवं चूर्णेऽस्ति मृद्रूपं स्वर्णरूपं त्वतिस्फुटं ॥५०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्याशंक्याह परिणाम इति यत्र क्षीरादौ परिणामोऽभ्युपगम्यते तत्र क्षीरादिभावस्य पूर्वरूपस्य त्यागरूपलक्ष्यते इत्यर्थः न
नु विवर्त्ते पूर्वरूपापरित्यागः क्व दृष्ट इत्याशंक्य मृत्सुवर्णयोर्दृश्यत इत्याह मृत्सुवर्णे इति मृत्सुवर्णे घटकुंडलयोर्निष्प
न्नयोरपि तत्कारणभूते मृत्सुवर्णरूपे न निवर्त्तेते यतो हि प्रसिद्धमित्यर्थः ननु घटस्य मृद्विवर्त्तत्वमनुपपन्नं घटनाशे पुनर्मृ
द्भावादर्शनादिति शंकते घट इति मृद्भावाभावे कारणमाह कपालानामिति कपालानामपि विनाशे मृद्भावोपलब्धिः स्यादिति परि

ननु परिणामे दृष्टान्तत्वेनाभिहितानां क्षीरमृत्सुवर्णानां मध्ये यदि मृत्सुवर्णयोर्विवर्त्तदृष्टान्तत्वमङ्गीक्रियेत तर्हि तद्वदेव क्षीरस्यापि त
थात्वं स्यादित्याशंक्याह । क्षीरादाविति । तर्हि तद्वदेवावस्थान्तरमापद्यमानयोर्विवर्त्तदृष्टान्तता न भवेदित्याशंक्याह । एतावतेति । एतावता
क्षीरादेः परिणामित्वेन मृदादीनां मृत्सुवर्णादीनां दृष्टान्तत्वं विवर्त्तदृष्टान्तभावः न हीयते न नश्यति । अयमभिप्रायः । क्षीरस्य पूर्वरूपपरि
त्यागपुरःसरमवस्थान्तरापत्तिसद्भावात्परिणामित्वमेव मृत्सुवर्णयोस्त्ववस्थान्तरापत्तिसद्भावेपि पूर्वरूपत्यागाभावाद्विवर्त्तता
पीति ॥५१॥ ननु मृत्सुवर्णयोः परिणामविवर्त्तविचारं सकलमपि किं नाङ्गीक्रियत इत्याशंक्याह । आरंभेति । आरंभवादिनो मते कार्ये घटा

क्षीरादौ परिणामोस्तु पुनस्तद्भाववर्जनात् । एतावता मृदादीनां दृष्टान्तत्वं न हीयते ॥५१॥ आरंभ
वादिनः कार्ये मृदो द्वैगुण्यमापतेत् । रूपस्पर्शादयः प्रोक्ताः कार्यकारणयोः पृथक् ॥५२॥ मृ
त्सुवर्णमयश्चेति दृष्टान्तत्रयमारुणिः । प्राहातो वासयेत्कार्यानृतत्वं सर्ववस्तुषु ॥५३॥ ॥

दिरूपे मृदः मृत्तिकादेर्द्रव्यस्य द्वैगुण्यं कार्याकारेण कारणाकारेण च द्विगुणत्वमापद्येत तथा सति गुरुत्वादि द्वैगुण्यमापद्येतेति भावः ॥ कु
त इत्यत आह । रूपेति । रूपादीनां गुणानां कार्यकारणयोस्तैरेव भेदस्यांगीकृतत्वादिति भावः ॥५२॥ ननु मृत्सुवर्णयोः किं द्वयोरेव विवर्त्त
दृष्टान्तत्वं नेत्याह । मृत्सुवर्णेति । अरुणस्यपुत्र उद्दालककारव्यः कश्चिदृषिर्यथा सोम्यैकेन मृत्पिण्डेनेत्यारभ्य कार्ष्णायसमित्येवस
त्वमित्यं तेन वाक्यसंदर्भेण कार्यस्यानृतत्वे मृत्सुवर्णयोरूपं दृष्टान्तत्रयमुक्तवानित्यर्थः ॥ किमर्थमेवं दृष्टान्तत्रयमुक्तवानित्याशंक्या
ह । अतेति । यत एवं बहुषु मृदादिषु कार्यानृतत्वमुपलब्धमतोनन्तभौतिकरूपेषु सर्वेषु वस्तुषु कार्यानृतत्वं वासितं कुर्यादित्यर्थः ॥
५३

ननु कार्यस्य तत्त्वानुसंधानमपि किमर्थमुक्तमित्याशंक्य कारणज्ञानात्कार्यज्ञानसिद्ध्ये इत्यभिप्रायेणाह कारणेति कारणस्य मृदादेः ज्ञानात्कार्यजातस्य घटादेर्ज्ञानमपि यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्यादित्यादिवाक्यजातेनोक्तवानित्यर्थः ननु मृत्सुवर्णादिरूपस्य पारमार्थिकस्य कारणस्य विज्ञानात्तद्विलक्षणस्य घटरचनादेर्विज्ञानमनुपपन्नमिति शंकते सत्यज्ञाने इति कार्यस्य सत्यानृतांशद्वयरूपत्वात्कारणज्ञानात्कार्यगतसत्यांशज्ञानं भवतीत्यभिप्रायेणाह समक्तस्येति समक्तस्याधिष्ठानमनुगतस्य सहितस्य विकारस्यारोपितस्य घटादिरूपस्य कार्यता कार्यशब्दार्थत्वं लोके प्रसिद्धमित्यर्थः भवत्वेवमेतावता कारणज्ञानात्कार्यज्ञानं न संभव

कारणज्ञानतः कार्यविज्ञानं चापि सोऽवदत् । सत्यज्ञानेऽनृतज्ञानं कथमत्रोपपद्यते ॥ ५४ ॥ समक्तस्य विकारस्य कार्यता लोकदृष्टितः । वास्तवोऽत्र समक्तांशोऽस्य वोधः कारणवोधतः ॥ ५५ ॥ अनृतांशो न वोद्धव्यस्तद्बोधानुपयोगतः । तत्त्वज्ञानं पुमर्थः स्यान्नानृतार्थाववोधनं ॥ ५६ ॥

तीति चोद्यकस्य कः परिहारो जायत इत्याशंक्य कार्यगतानृतांशज्ञानाभावेऽपि तद्गतसत्यांशज्ञानं भवत्येवेति परिहरति वास्तव इति अत्र कार्ये यो वास्तवो समक्तांशोऽस्ति अस्य वास्तवांशस्य वोधो ज्ञानं कारणज्ञानाद्भवतीत्यर्थः ५५ ननु कार्यगतसत्यांशवदनृतांशोऽपि वोध्य इत्याशंक्य प्रयोजनाभावान्नैवमित्याह अनृतांश इति प्रयोजनाभावमेव प्रकटयति तत्त्वज्ञानमिति तत्त्वस्याबाध्यस्य वस्तुनो ज्ञानं पुमर्थः पुरुषस्यार्थः प्रयोजनं यस्मिन् तत्पुमर्थमिति वहुव्रीहिः अनृतांशस्याववोधनं प्रयोजनवन्न भवतीत्यर्थः ५६ ॥ ॥ ॥ ॥ ॥

ननु कारणज्ञानात्कार्यज्ञानं भवतीत्येतच्छ्रोतृबुद्धेश्चमत्कारहेतुर्भविष्यतीत्यभिप्रायेणोक्तं तदेतन्न संभवतीति शंकते तर्हीति कारणस्य मृदादेर्ज्ञानात्कार्यगतं मृदादेः सत्यांशज्ञानं भवतीत्युक्ते मृज्ज्ञानान्मृदो ज्ञानं भवतीत्येवं स्यादिति शब्दत एव चमत्कारो नार्थत इत्यर्थः ॥ ५७ ॥ इदृग्विवेकवतां विस्मयाभावेपि तद्रहितानां विस्मयः स्यादेवेति परिहरति सत्यमिति कार्येषु घटादिषु विद्यमानो योसावंशः कारणस्वरूप एवेति ये जानन्ति तेषामाश्चर्यमास्तु इतरेषां तज्ज्ञानरहितानां जायमानो विस्मयो न निवारयितुं शक्यत इत्यर्थः ॥ ५८ ॥ अज्ञस्य विस्मयोत्र वेदित्युक्तमेवार्थं प्रपंचयति आरंभीति आरंभो नाम समवाय्यसमवायिनिमित्तकारणेभ्यो भिन्नस्योत्पत्तिस्तं यो वक्ति सोयमारंभीत्युच्यते पूर्वरूपपरित्यागे

तर्हि कारणविज्ञानात्कार्यज्ञानमितीरिते । मृद्बोधान्मृत्तिकाबुद्धेत्युक्तं स्यात्कोत्र विस्मयः ॥ ५७ ॥
सत्यं कार्येषु वस्त्वंशः कारणात्मेति जानतः । विस्मयो मास्त्विहाज्ञस्य विस्मयः केन वार्यते ॥ ५८ ॥ आरंभी परिणामी च लौकिकश्चैककारणे । ज्ञाते सर्वमतिं श्रुत्वा प्राप्नुवंत्येव विस्मयं ॥ ५९ ॥ अद्वैतेऽभिमुखीकर्तुमेवात्रैकस्य बोधतः । सर्वबोधः श्रुतो नैव नानात्वस्य विवक्षया ॥ ६० ॥

न रूपांतरप्राप्तिलक्षणं परिणामं यो वक्ति स परिणामी प्रक्रियाद्वयमजानानो लोकव्यवहारमात्रपरो लौकिकः एषां त्रयाणामपि कारणस्यैकस्य ज्ञानादनेकेषां कार्याणां विज्ञानं भवतीति वाक्यश्रवणाद्विस्मयो देवेत्यर्थः ॥ ननु यथाश्रुतमर्थं परित्यज्येत्थं व्याख्याने किं कारणमित्याशंक्याह श्रुतेस्तत्र तात्पर्याभावादित्याह अद्वैत इति अद्वैते विज्ञाने शिष्यमभिमुखीकर्तुमेवात्र छांदोग्यश्रुतौ एकस्य कारणस्य विज्ञानात्सर्वेषां कार्याणां विज्ञानमुक्तं न तु कार्याणामनेकेषां विज्ञानसिद्ध्यर्थमित्यभिप्रायः ॥ ६० ॥

इदानीमेकविज्ञानेन सर्वविज्ञाने दृष्टान्तप्रदर्शनपरस्य यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यादिति वाक्यस्यार्थनिरूपणं पुनः
स एव दार्ष्टान्तिकप्रदर्शनपरस्य उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति वाक्यस्यार्थं प्रदर्शयन् प्रव्यक्ते फलित
माह ॥ एकमृत्पिण्डेति ॥ यथा घटशरावाद्युपादानस्यैकस्य मृत्पिण्डस्यावबोधात्तद्विकाराणां सर्वेषां घटादीनां बोधो भवति एवं सर्वोपादानस्यैक
स्य ब्रह्मणो बोधात्तत्कार्यस्य दृश्यस्य जगतो बोधो भवतीत्यवगन्तव्यमित्यर्थः ॥ ६१ ॥ ननु ब्रह्मजगतोः स्वरूपापरिज्ञाने ब्रह्मज्ञाने ब्रह्मज्ञानेन ज
गतो ज्ञानं भवतीत्येवं नावगन्तुं शक्यत इतीशंक्य तदवगमाय तदुभयस्वरूपं दर्शयति ॥ सच्चिदिति ॥ ब्रह्मणः सच्चिदानन्दस्वरूपत्वे किं प्रमाणमित्या

एकमृत्पिण्डविज्ञानात्सर्वं मृन्मयधीर्यथा ॥ तथैकब्रह्मबोधेन जगद्बुद्धिर्विभाव्यते ॥ ६१ ॥
सच्चित्सुखात्मकं ब्रह्म नामरूपात्मकं जगत् ॥ तापनीये श्रुतं ब्रह्म सच्चिदानन्दलक्षणम् ॥ ६२ ॥
सद्रूपमारुणिः प्राह प्रज्ञानं ब्रह्म बह्वृचाः ॥ सनत्कुमारश्चानन्दमेवमन्यत्र गम्यते ॥ ६३ ॥

शंक्य तापनीयादिश्रुतयः प्रमाणमित्यभिप्रायेणाह ॥ तापनीय इति ॥ उत्तरस्मिंस्तापनीये आथर्वणिके सावद्वितीये ब्रह्मैवेदं सर्वं सच्चिदानन्दमात्रमि
त्यादिप्रदेशेषु ब्रह्मणः सच्चिदानन्दरूपत्वमुक्तमित्यर्थः ॥ ६२ ॥ आदिशब्देन विवक्षितानि श्रुत्यन्तराणि दर्शयति ॥ सद्रूपमिति ॥ आरुणिरारुण
पुत्रेण उद्दालकेन छान्दोग्यश्रुतौ सदेव सोम्येदमग्र आसीदित्यादिना सद्रूपं ब्रह्मेति रूपितं तथा बह्वृचाः ऋग्वेदस्य शाखाध्यायिन ऐतरेयोप
निषदि प्रज्ञानं त्वेव विजिज्ञासितव्य इत्युपक्रम्य यो वै भूमा तत्सुखमिति भूमशब्दाभिधेयस्य ब्रह्मण आनन्दरूपत्वमुक्तवानित्यर्थः ॥ उक्तान्याप
मन्यत्राप्युपदिशतीति ॥ एवमन्यत्रापि ॥ अन्यत्र तैत्तिरीयकादिश्रुतिषु आनन्दो ब्रह्मेति व्यजानादित्यादिवाक्यैरानन्दरूपत्वादिकमुक्तमिति रद्ध
प्रातिरव्या प्रज्ञानं ब्रह्मेति प्रज्ञाज्ञानरूपत्वं ब्रह्मणो दर्शयति एवं सर्वादाहृतायां छान्दोग्यश्रुतौ एव सनत्कुमारश्चानन्दं नारदाख्यशिष्या

सच्चिदानंदेष्विव नामरूपयोरपि श्रुतिं दर्शयति ॥ विचिंत्येति सर्वाणि रूपाणि विचिंत्य धीरः नामानि कृत्वाभिवदन् यदास्ते इति श्रुतेनन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च स्रष्टव्ये जगति द्वे नामरूपे श्रुत्या दर्शितेत्यर्थः ६४ तत्रैव श्रुत्यंतरमुदाहरति ॥ अव्याकृतमिति ॥ बृहदारण्यकश्रुतौ तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदंरूप इति स्रष्टस्य जगतो

विचिंत्य सर्वरूपाणि कृत्वा नामानि तिष्ठति ॥ अहं व्याकरवाणीमे नामरूपे इति श्रुतेः ॥ ६४ ॥
अव्याकृतं पुरा सृष्टेरूर्ध्वं व्याक्रियते द्विधा ॥ अचिंत्यशक्तिर्मायैषा ब्रह्मण्यव्याकृताभिधा ॥ ६५ ॥

नामरूपात्मत्वं दर्शितमित्यर्थः ॥ सृष्टेः पूर्वमिदं जगदव्याकृतमव्यक्तनामरूपात्मकमभूत् ऊर्ध्वं सृष्ट्यवसरे द्विधा वाच्यवाचकभावेन व्याक्रियते व्यक्तीकृतमित्यर्थः ॥ इदानीं तद्धेदं तर्ह्यव्याकृतमासीदित्यत्राव्याकृतशब्दस्यार्थमाह ॥ अचिंत्यशक्तिरिति ॥ एषा ब्रह्मण्यचिंत्या शक्तिर्मायाख्या अव्याकृताभिधा अव्याकृतमभिधानमस्याः सा अव्याकृताभिधास्मिन् वाक्ये अव्याकृतशब्देनाभिधीयत इत्यर्थः ॥ ६५ ॥ ॥ ॥ ॥

तन्नामरूपाभ्यामेव व्याक्रियते तस्यार्थमाह अविकृतेति अविकारिणि ब्रह्मणि वर्त्तमाना साऽनेकधा मातजौतिकप्रपंचरूपेणैव सुधा
विकारं परिणामं प्राप्नोति माया ब्रह्मणि वर्त्तत इति अत्र प्रमाणमाह मायामिति मायां सर्वोक्तां प्रकृतिः प्रक्रियतेऽनयेति प्रकृतिरुपादान
कारणं विद्यात्मायिनं तस्या आश्रयत्वेन तद्वंतं महेश्वरं मायाति पाप्मकं विद्यादित्यनुवर्त्तते अत्र यजुःशब्दः परस्परवैलक्षण्यद्योत
नार्थः ६६ इदानीं मायोपहितस्य ब्रह्मणः प्रथमं कार्यमाह आद्य इति तस्य कारणादागतं रूपत्रयमाह स इति सच्चिदानंदरूपः इत्यर्थः तस्य

अविकृतब्रह्मणि स्याविकारं यात्यनेकधा ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ॥ ६६ ॥
आद्यो विकार आकाशः सोस्तिभात्यपि च प्रियः ॥ अवकाशः स्वकं रूपं तन्मिथ्या न तु तत्त्रयम् ॥ ६७ ॥
न व्यक्तेः पूर्वमस्त्येवं न पश्चाच्च विनाशतः ॥ आदावंते च यन्नास्ति वर्त्तमानेपि तत्तथा ॥ ६८ ॥ अव्य
क्तादीनि भूतानि व्यक्तमध्यानि भारत ॥ अव्यक्तनिधनान्येवेत्याह कृष्णोऽर्जुनं प्रति ॥ ६९ ॥ सद्वृत्ते
सच्चिदानंदा अनुगच्छंति सर्वदा ॥ निराकाशे सदादीनामनुभूतिर्निजात्मनि ॥ ७० ॥ ॥ ॥

प्रातिस्विकं रूपमाह अवकाश इति तस्य पूर्वस्माद्रूपत्रयाद्वैलक्षण्यमाह तदिति सदादिरूपत्रयं वास्तवमित्यर्थः ६७ तस्य चतुर्थरूपस्य
मिथ्यात्वे हेतुमाह नेति न रूपोत्पत्तिविनाशयोर्मध्ये प्रतीयमानस्यावकाशस्य कथमसत्त्वमित्याशंक्याह आदाविति ६८ उक्तार्थे श्रीकृष्णवा
क्यं प्रमाणयति अव्यक्तादीनिति ६९ सदादिरूपत्रयस्याकाशेसत्वे किं प्रमाणमित्याशंक्यानुभूतिरेव प्रमाणमित्याह सद्वृदिति सद्वृदितिह
कौतम दर्शनार्थं घटादिषु यथाकालत्रयेपि अनुवर्त्तते तथा सदादिरूपत्रयं सर्वदानुगतमित्यर्थः ॥ नन्ववकाशं विहाय सदादिरूपत्रयं कथं

तदेवोपपादयति अवकाश इति पूर्ववादिनोद्यमनुवदति अन्यमिति अंगीकृत्य परिहारमाह अस्त्विति शब्दतः अन्यमस्त्वर्थः तस्यावकाशाभावविशेषणस्य विशिष्यत्वेन प्रतीयमानं किंचिदस्तीत्यभ्युपगंतव्यमित्याह तादृगिति हिशब्दो लोकप्रसिद्धिद्योतनार्थः ७१ भवत्वेवं प्रकृते किमायातमित्याशंक्य विशेष्यत्वेन प्रतीयमानस्य स्वरूपमभ्युपेयमित्याह तादृक्त्वादिति तस्य सुखस्वरूपत्वमाह औदासीन्येनेति औदासीन्यविषयत्वात्तस्य सुखस्वरूपत्वमित्यर्थः ननु रूक्षत्वरादिः तस्य कथं सुखत्वमित्याशंक्याह आनुकूल्येति ७२ तदेवोपपादयति ॥ ॥

अवकाशे विस्मृतेऽथ तत्र किं भाति ते वद ॥ अन्यमेवेति चेत्तर्ह्यस्तु नाम तादृग्विभाति हि ॥ ७१ ॥ तादृक्त्वा-
देव तत्त्वात्त्वं औदासीन्येन तत्सुखं ॥ आनुकूल्यप्रातिकूल्यहीनं यत्तन्निजं सुखं ॥ ७२ ॥ आनुकू-
ल्ये हर्षधीः स्यात्प्रातिकूल्ये तु दुःखधीः ॥ द्वयाभावे निजानंदः निजं दुःखं तु न क्वचित् ॥ ७३ ॥ निजा-
नंदे स्थिरे हर्षशोकयोर्व्यत्ययः क्षणात् ॥ मनसः क्षणिकत्वेन तयोर्मानस्यतेष्यतां ॥ ७४ ॥ आका-
शेप्येवमानंदः सत्तामात्रेण संमते ॥ बाह्यादिदेहपर्यंतवस्तुष्वेवं विज्ञाव्यतां ॥ ७५ ॥ ॥ ॥

आनुकूल्ये हर्षधीरिति ॥ ननु निजानंदवन्निजदुःखमपि किं न स्यादित्याशंक्य दुःखे निजरूपास्याभावान्नैवमित्याह ॥ निजं दुःखमिति ॥ ७३ ॥ ननु निजानंदस्य सदानंदत्वात्सर्वदा हर्षएव स्यान्न तु शोक इत्याशंक्य तस्य नित्यत्वेपि तदा हि क्षणो मनसः क्षणिकत्वेन मानयोस्तयोरपि क्षणिकत्वमित्याह ॥ निजानंद इति ॥ ७४ ॥ दृष्टांतेसिद्धमर्थं दार्ष्टांतिके योजयति ॥ आकाश इति ॥ एवं निजानंदस्य प्रकारेणेत्यर्थः ॥ सत्तामात्रेणेति भवताप्यभ्युपगम्यते तेनोपपादनीय इत्यर्थः ॥ आकाशे प्रतिपादितमर्थं बाह्यादिशरीरांतेष्वभ्युपगंतव्यमित्याह बाह्यादिति ॥ ७५ ॥

तत्र वाय्वादीनामसाधारणधर्मानाह ॥ गतिस्पर्शाविति द्वाभ्यां ॥ ७६ ॥ ७७ ॥ फलितमाह ॥ अनेकधेति ॥ तर्हि प्रतीयमानयोर्नामरूपयोः का गतिरित्या
शंक्य कल्पितत्वमेव गतिरित्याह ॥ निरस्तत्वे इति ॥ कल्पितत्वे हेतुः ॥ जन्मनेति ॥ ७९ ॥ ततः किमित्यत आह ॥ सच्चिदानंदेति ॥ ८० ॥ ब्रह्मज्ञानदार्ढ्य

गतिस्पर्शौ वायुरूपं वह्नेर्दाहप्रकाशने ॥ जलस्य द्रवता भूमेः काठिन्यं चेति निर्णयः ॥ ७६ ॥ असाधारण
आकाराश्चौषध्यन्नवपुष्वपि ॥ एवं विज्ञाय मनसा तद्रूपं परिचिंतयेत् ॥ ७७ ॥ अनेकधा विभिन्नेष्वेषु नामरूपेषु चैकधा ॥ तिष्ठति सच्चिदानंदाविसंवादो न कस्यचित् ॥ ७८ ॥ निरस्तत्वे नामरूपे द्वे जन्मनाशयुते च
ते ॥ बुद्ध्वा ब्रह्मणि वीच्यश्च समुद्रे बुद्बुदादिवत् ॥ ७९ ॥ सच्चिदानंदरूपोऽस्मिन्नक्षरे ब्रह्मणि वीक्षिते ॥
स्वयमेवावजानाति नामरूपे शनैः शनैः ॥ ८० ॥ यावद्यावदवज्ञा स्यात्तावत्तावन्नदीक्षणं ॥ यावद्या
वन्नदीक्षेत तावत्तावद्दुमे त्यजेत् ॥ ८१ ॥ तदभ्यासेन विद्यायां सुस्थितायामयं पुमान् ॥ जीवन्नेव
भवेन्मुक्तो वपुरस्तु यथा तथा ॥ ८२ ॥ तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं ॥ एतदेकपरत्वं च तद
दभ्यासं विदुर्बुधाः ॥ ८३ ॥

स्य द्वैतावज्ञा सर्वकत्वाद्ध्रुवत्वादिव द्वैतावज्ञापि कर्तव्येत्याह ॥ यावदिति ॥ ८१ ॥ उक्ताभ्यासस्य फलमाह ॥ तदिति ॥ ८२ ॥ इदानीं ब्रह्मा
भ्यासस्य स्वरूपमाह ॥ तच्चिंतनमिति ॥ ८३ ॥ ॥ ॥

नन्वेनादिकालमारभ्य प्रतिभासमाने द्वैते तस्य कादाचित्केन ज्ञानाभ्यासेन कथं निवृत्तिरित्याशंक्य दीर्घकालनैरंतर्यसत्कारसेविते ना
भ्यासेन निवर्तत एवेत्याह ॥ वासनेति ॥ ८४ ॥ ननु ब्रह्मण एकस्यानेकाकारजगद्धेतुत्वमनुपपन्नमित्याशंक्य मायासहितस्योपपद्यत इत्या
ह ॥ मृदिति ॥ अनंतानि कार्याणीत्यर्थः ॥ ननु मृच्छक्तेः सत्यत्वादेकहेतुत्वाद्विषमो दृष्टांत इत्याशंक्य पक्षांतरमाह ॥ यद्वेति ॥ ८५ ॥ दृष्टांतं विशद
यति ॥ निद्राशक्तिरिति ॥ दार्ष्टांतिकमाह ॥ ब्रह्मणीति ॥ ८६ ॥ दुर्घटकारित्वमेव दर्शयति ॥ स्वप्न इति ॥ ८७ ॥ स्वप्नस्य दुर्घटत्वे हेतुमाह ॥ इदमिति ॥ ८८ ॥ उक्त

वासनानेककालीना दीर्घकालं निरंतरं ॥ सादरं चाभ्यस्यमाने सर्वथैव निवर्तते ॥ ८४ ॥ मृच्छक्तिवद्ब्रह्मशक्तिरनेकाननंतान्सृजे
त् ॥ यद्वा जीवगता निद्रा स्वप्नश्चात्र निदर्शनं ॥ ८५ ॥ निद्राशक्तिर्यथा जीवे दुर्घटस्वप्नकारिणी ॥ ब्रह्मण्येषा तथा माया सृष्टिस्थि
त्यंतकारिणी ॥ ८६ ॥ स्वप्ने वियद्गतिं पश्येत्स्वमूर्धच्छेदनं यथा ॥ मुहूर्ते वत्सरौघं च मृतपुत्रादिकं पुनः ॥ ८७ ॥ इदं युक्त
मिदं नेति व्यवस्था तत्र दुर्लभा ॥ यथा यथेक्ष्यते यद्यत्तत्तद्युक्तं तथा तथा ॥ ८८ ॥ ईदृशो महिमा दृष्टो निद्राशक्तेर्यदा तदा ॥
मायाशक्तेरचिंत्योयं महिमेति किमद्भुतं ॥ ८९ ॥ शयाने पुरुषे निद्रा स्वप्नं बहुविधं सृजेत् ॥ ब्रह्मण्येवं निर्विकारे विकारा
न्कल्पयत्यसौ ॥ ९० ॥ खानिलाग्निजलोर्व्यंडलोकप्राणिशिलादिकाः ॥ विकाराः प्राणिधीष्वंतश्चिच्छाया प्रतिबिंबिता ॥ ९१ ॥

मर्थं कैमुतिकन्यायेन स्पष्टयति ॥ ईदृश इति ॥ ८९ ॥ अप्रयतमानब्रह्मनिष्ठया मायया जगद्धेतुत्वे दृष्टांतमाह ॥ शयान इति ॥ ९० ॥ मायासृष्टा
न्पदार्थान्दर्शयति ॥ खानिलेति ॥ ननु पांचभौतिकत्वे समानेऽपि केषांचिच्चेतनत्वं केषांचिज्जडत्वं कुत इत्याशंक्याह ॥ प्राणिधीष्विति ॥ प्राणि
शरीरेष्वंतःकरणेषु चैतन्यप्रतिबिंबनाच्चेतनत्वमितरत्र तदभावाज्जडत्वमित्यर्थः ॥ ९१ ॥

ननु चेतनाचेतनविभागभिन्नरूपं ब्रह्म स्यात् एवं किं न स्यादित्याशंक्य ब्रह्मणः सर्वोपादानत्वेन सर्वत्र समत्वान्नैवमित्याह॥ चेतनेति॥४२॥ ब्रह्मणोऽभि
न्नत्वे साधारणत्वे हेतुमाह॥ ब्रह्मण्येवेति॥ ब्रह्मणः सर्वकल्पनाधारत्वात् सर्वगतत्वमित्यर्थः॥ तत्कथमवगम्यत इत्याशंकायां कल्पितनाम
रूपत्यागेऽधिष्ठानं ब्रह्मावगम्यत इत्याह॥ उपेक्ष्येति॥४३॥ उक्तार्थे दृष्टान्तमाह॥ जलस्थ इति॥ नीरे घोमुखे देहे वारि दृश्यमानेऽपि तत्रादरं परित्य

चेतनाचेतनेष्वेषु सा[illegible]च्चिदानंदलक्षणः॥ समानं ब्रह्म भिद्येते नामरूपे पृथक् पृथक्॥४२॥ ब्रह्मण्येव नामरूपे
पटे चित्रमिव स्थिते॥ उपेक्ष्य नामरूपे द्वे सच्चिदानंदधीर्भवेत्॥४३॥ जलस्थे घोमुखे स्वस्य देहे दृष्टेऽप्युपेक्ष्य
तं॥ तीरस्थ एव देहे स्वे तात्पर्यं स्याद्यथा तथा॥४४॥ सहस्रशो मनोराज्ये वर्तमाने सदेव तत्॥ सर्वैरुपेक्ष्यते
यद्वदुपेक्षा नामरूपयोः॥४५॥ क्षणे क्षणे मनोराज्यं नवं त्वेवान्यथान्यथा॥ गतं गतं पुनर्नास्ति व्यवहारो
बहिस्तथा॥४६॥ न बाल्यं यौवने प्राप्ते यौवनं स्थाविरे तथा॥ मृतः पिता पुनर्नास्ति नायात्येव गतं दिनं॥४७॥ म
नोराज्याद्विशेषः कः क्षणध्वंसिनि लौकिके॥ अतोऽस्मिन्भासमानेऽपि तत्सत्यत्वधियं त्यजेत्॥४८॥ ॥ ॥ ॥

ज्य तीरस्थे स्वदेहे तद्विपरीते ममत्वबुद्धिर्यथेत्यर्थः॥४४॥ इदानीं सर्वजनप्रसिद्धं दृष्टान्तान्तरमाह॥ सहस्रश इति॥ उपेक्षा कर्तव्येति शे
षः॥४५॥ प्रपंचवैचित्र्ये दृष्टान्तमाह॥ क्षणे क्षण इति॥ दार्ष्टान्तिकमाह॥ व्यवहार इति॥४६॥ तदेव विवृणोति॥ न बाल्यमिति॥४७॥ द्वैतक्ष
णिकत्वमुपसंहरति॥ मनोराज्याद्विशेष इति॥ क्षणिकत्वसाधनेन प्रयोजनमाह॥ अतोऽस्मिन्निति॥४८॥ ॥ ॥ ॥ ॥ ॥

यो॰३॥

ननु लौकिकोपेक्षायां को लाभ इत्याशंक्य ब्रह्मणि धीः स्थिरा भवतीत्याह उपेक्षित इति तर्हि ज्ञानिनो व्यवहारः कथमित्याशंक्याह न
टवदिति ९९ ननु ज्ञानिनो व्यवहाराभ्युपगमे विकारित्वप्रसङ्ग इत्याशंक्य बुद्धेर्व्यवहारवत्त्वमपि तत्साक्ष्यात्मा निर्विकार इति सदृष्टां
तमाह प्रवहतीति उदके उपरि प्रवहत्यपि अधः स्थिता प्रौढशिला यथा न चलति तथा एवं बुद्धेः संसरत्वमपि न ज्ञानी संसरतीत्यर्थः १००
नन्वेवं ब्रह्मणस्तद्विलक्षणस्य जगतः कथमवभानमित्याशंक्य निश्छिद्रे दर्पणे सावकाशवस्तुनो यथा भानं तद्वदित्याह निश्छिद्र इति न

उपेक्षिते लौकिके धीर्निर्विघ्ना ब्रह्मचिंतने ॥ नटवत्कृत्रिमास्थायां निर्वहत्येव लौकिकं ॥ ९९ ॥ प्रवहत्यपि
नीरेऽधः स्थिरा प्रौढशिला यथा ॥ नामरूपान्वयात्तद्वत्कूटस्थं ब्रह्म नान्यथा ॥ १०० ॥ निश्छिद्रे दर्पणे भाति व
स्तुगर्भं बृहद्वियत् ॥ सच्चिद्घने तथा नानाजगद्गर्भमिदं वियत् ॥ १ ॥ अदृष्ट्वा दर्पणं नैव तदंतस्थेक्षणं तथा ॥
अमत्वा सच्चिदानंदं नामरूपमतिः कुतः ॥ २ ॥ प्रथमं सच्चिदानंदे भासमानेऽथ तावता ॥ बुद्धिं नियम्य नैवो
र्ध्वं धारयेन्नामरूपयोः ॥ २ ॥ एवं च निर्जगद्ब्रह्म सच्चिदानंदलक्षणं ॥ अद्वैतानंद एतस्मिन्विश्राम्यंतु जनाश्चि
रं ॥ ४ ॥

न्वदृष्टे ब्रह्मणि कथं जगत्प्रतीतिरित्याशंक्य सच्चिदानंदप्रतीतिपुरःसरमेव जगत्प्रतीतिरिति सदृष्टांतमाह अदृष्ट्वेति २ ननु नामरूप
योरपि भासमानत्वात्कथं निर्विषयब्रह्मप्रतीतिरित्याशंक्य तदुपायमाह प्रथममिति एवमिति सच्चिदानंदे ब्रह्मणि कल्पितनामरू
पात्मकप्रपंचे सच्चिदानंदमात्रं बुद्ध्या गृहीत्वा नामरूपयोर्बुद्धिं न धारयेत् एवं सति निर्जगद्ब्रह्म सच्चिदानंदलक्षणं भवतीत्यर्थः ३
॥ ४ ॥

इदानीमध्यायार्थमुपसंहरति ॥ ब्रह्मानंदेति ५ इति ब्रह्मानंदे द्वैतानंदो नाम तृतीयः ॥ इदानीं वृत्तवर्त्स्यमानयोर्ग्रंथयोः संबंधमाह ॥ यो
गेनेति १ विद्यानंदस्वरूपमाह विषयानंदवदिति ॥ तस्यावांतरभेदमाह ॥ दुःखेति २ चातुर्विध्यमेव दर्शयति ॥ दुःखाभावेति ३ निवृत्ति

ब्रह्मानंदाभिधे ग्रंथे तृतीयोध्याय ईरितः ॥ अद्वैतानंद एव स्याज्जगन्मिथ्यात्वचिंतयेति ॥ इति तृतीयोध्यायः ॥
योगेनात्मविवेकेन द्वैतमिथ्यात्वचिंतया ॥ ब्रह्मानंदं पश्यतोथ विद्यानंदो निरूप्यते ॥ १ ॥ विषयानंदवद्विद्यानं
दो धीवृत्तिरूपकः ॥ दुःखाभावादिरूपेण प्रोक्त एष चतुर्विधः ॥ २ ॥ दुःखाभावश्च कामाप्तिः कृतकृत्योहमित्य
सौ ॥ प्राप्तप्राप्योहमित्येवं चातुर्विध्यमुदाहृतम् ॥ ३ ॥ ऐहिकं चामुष्मिकं चेत्येवं दुःखं द्विधेरितं ॥ निवृत्तिमै
हिकस्याह बृहदारण्यकं वचः ॥ ४ ॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरी
रमनुसंज्वरेत् ॥ ५ ॥ जीवात्मा परमात्मा चेत्यात्मा द्विविध ईरितः ॥ चित्तादात्म्यात्त्रिभिर्देहैर्जीवः सन्भोक्ततां व्रजे
त ॥ ६ ॥

नीयदुःखं विभजते ॥ ऐहिकमिति ऐहिकस्य निवृत्तिर्बृहदारण्यकवाक्येनोच्यत इत्याह ॥ निवृत्तिमिति ४ तच्छ्रुतिवाक्यं पठति ॥ आत्मान
मिति ५ आत्मनि शोकसंबंधं दर्शयितुं तद्भेदमाह ॥ जीवात्मेति ॥ आत्मनो जीवत्वनिमित्तमाह ॥ चित्तादात्म्यादिति ॥ चैतन्यस्य स्थूलसूक्ष्म
कारणरूपैस्त्रिभिः शरीरैस्तादात्म्यभ्रमे सति चित्तो भोक्तृत्वं भवति स भोक्ता जीव इत्युच्यते ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रदानीं परमात्मनः स्वरूपमाह ॥ परात्मेति ॥ तस्य भोग्यरूपत्वापत्तिप्रकारमाह ॥ तादात्म्यमिति ॥ नामरूपकल्पनाधिष्ठानत्वेन तत्तादात्म्यप्रा
प्य भोग्यमित्युच्यत इत्यर्थः ॥ भोक्तृत्वाद्यभावे कारणमाह ॥ तदिति ॥ ताभ्यां शरीरत्रयजगद्भ्यां विवेके भेदज्ञाने सति नो भयं भोक्तृभोग्यरूपता
स्तीत्यर्थः ॥ ७ ॥ उक्तमर्थं विवृणोति ॥ भोग्यमिति ॥ ८ ॥ कस्मिन् शरीरे को ज्वर इत्याशंक्य स्थूलदेहे विद्यमानान् ज्वरान् दर्शयति ॥ व्याधय इति ॥ लिं

परात्मा सच्चिदानंदस्तादात्म्यं नामरूपयोः ॥ गत्वा भोग्यत्वमापन्नस्तद्विवेके तु नो भयं ॥ ७ ॥ भोग्यमिच्छन् भो
क्तुरर्थं शरीरमनुसंज्वरेत् ॥ ज्वरास्त्रिषु शरीरेषु स्थिता न त्वात्मनो ज्वराः ॥ ८ ॥ व्याधयो धातुवैषम्ये
स्थूलदेहे स्थिता ज्वराः ॥ कामक्रोधादयः सूक्ष्मे द्वयोर्बीजं तु कारणे ॥ ९ ॥ अद्वैतानंदमार्गेण परात्मनि वि
वेचिते ॥ अपश्यन् वास्तवं भोग्यं किं नामेच्छेत्परात्मावित् ॥ १० ॥ आत्मानंदोक्तरीत्यास्मिन् जीवात्मन्यवधा
रिते ॥ भोक्ता नैवास्ति कोऽप्यत्र शरीरान्तु ज्वरः कुतः ॥ ११ ॥

गदेहगतान् ज्वरानाह ॥ कामक्रोधादय इति ॥ ९ ॥ इदानीमुदाहृतश्रुतितात्पर्यकथनव्याजेन पूर्वोक्तमेवार्थं विशदयति ॥ अद्वैतानंदेति ॥ तृतीया
ध्यायोक्तप्रकारेण मायाकार्यनामरूपाभ्यां सच्चिदानंदपरमात्मनि विवेचिते भेदेन ज्ञाते सति सर्वप्रपंचं मिथ्येति जानन् किं नाम भो×
ग्यमिच्छति ॥ १० ॥ ततः सर्वाध्यायोक्तरीत्या जीवात्मस्वरूपे संगकूटस्थचैतन्यरूपे निश्चिते सति कामपि तुरभावाज्ज्वरादिसंबंधो
नास्तीत्याह ॥ आत्मानंदोक्तरीत्येति ॥ ११ ॥

मा१

इदानीमामुष्मिकं ज्वदर्शयति पुण्यपापेति ॥ तस्यायमावः प्रथमाध्याये निरूपित इत्याह ॥ प्रथमाध्यायइति नन्वज्ञानिनः प्रार
ब्धमात्रदागामिकर्मविषया चिंता प्रभवत्येवेत्याशंक्य ॥ तद्यथापुष्करपलाशेत्यज्ञानिनः आगामिकर्मसंबंधनिराकरणात्तद्वि
नास्तीत्याह ॥ यथेति १३ तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति श्रुत्यवष्टंभेन संचितकर्मविषया पि चिंता नास्ति
नो ॥

कर्मविषयाचिं
तावयोपिचिंता
२

[illegible]

पुण्यपापद्वयोश्चिंता दुःखमामुष्मिकं भवेत् ॥ प्रथमाध्याय एवोक्तं ज्ञानिनो नैव तद्भवेदिति ॥१२॥ यथा पुष्करपर्णेऽस्मि
न्तोयासंश्लेषणं तथा ॥ वेदनादूर्ध्वमागामिकर्मणोसंश्लेषणं बुधैः ॥१३॥ इषीकातूलस्य वह्निदाहः क्षणा
द्यथा ॥ तथा संचितकर्मस्य दग्धं भवति वेदनात् ॥१४॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ॥ ज्ञानाग्निः स
र्वकर्माणि भस्मसात्कुरुते तथा ॥१५॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ॥ हत्वापि स इमांल्लोकान्न हंति न
निबध्यते ॥१६॥ मातापित्रोर्वधः स्तेयं भ्रूणहत्यान्यदीदृशं ॥ न मुक्तिं नाशयेत्पापं मुखकांतिर्न नश्यति ॥१७॥ ॥
दुःखाभाववदेवास्य सर्वकामाप्तिरीरिता ॥ सर्वान्कामान्सोऽश्नुते प्राप्य ह्यमृतोऽभवदित्यतः ॥१८॥ ॥ ॥

नास्तीत्याह ॥ इषीकेति १४ ॥ उक्तार्थे भगवद्वाक्यमपि प्रमाणयति ॥ यथेति १५ १६ अस्मिन्नेवार्थे न मातृवधेन पितृवधेन न स्तेये
न न भ्रूणहत्यया नास्य पापं न चक्रुषो मुखं नीलं वेत्तीति छांदोग्यश्रुतिवाक्यमर्थतः पठति ॥ मातेति ॥ न चेत्येकं पदं नीलमिति
कांतिरित्यर्थः ॥ उक्तचातुर्विध्यमध्ये द्वितीयं प्रकारमाह ॥ दुःखाभाववदिति ॥ ईरितास्त्यपेति शेषः ॥ अस्मिन्नेवार्थे ऐतरेयश्रुतिवाक्य

जक्षत्क्रीडन्रममाणः स्त्रीभिर्यानैर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरमिति छांदोग्यश्रुतिवाक्यमर्थतः पठति जक्षदिति तत्रैव
वत्तैत्तिरीयश्रुतिवाक्यं पठति सर्वान्कामानिति ननु कर्मफलभोगांगीकारे जन्मापि प्रसज्येतेत्याशंक्याह नान्यवदिति ज्ञानेन संचि
तकर्मणां दग्धत्वादज्ञवज्जन्म नास्तीत्यर्थः २० इदानीं तैत्तिरीयकबृहदारण्यकवाक्यं संक्षिप्यार्थतः पठति युवेति ननु सार्वभौमा दिहि २

जक्षत्क्रीडन्रतिं प्राप्तः स्त्रीभिर्यानैस्तथेतरैः ॥ शरीरं न स्मरेत्प्राणः कर्मणा जीवयेदमुम् ॥ १९ ॥ सर्वान्का
मानवाप्नोति नान्यवज्जन्मकर्मभिः ॥ वर्तते श्रोत्रिये भोगा युगपत्क्रमवर्जिताः ॥ २० ॥ युवा रूपी च विद्या
वान्नीरोगो दृढचित्तवान् ॥ सैन्योपेतः सर्वपृथ्वीं वित्तपूर्णां प्रपालयन् ॥ २१ ॥ सर्वैर्मानुष्यकैर्भोगैः सं
पन्नस्तृप्तभूमिपः ॥ यमानंदमवाप्नोति ब्रह्मवित्तमवाप्नुते ॥ २२ ॥ मर्त्यभोगे द्वयोर्नास्ति कामस्तृप्तिरतः समा ॥
भोगान्निष्कामतैकस्य परस्यापि विवेकतः ॥ २३ ॥ श्रोत्रियत्वाद्वेदशास्त्रैर्भोगदोषानवेक्षते ॥ राजा बृहद्र
थो दोषांस्तान्गाथाभिरुदाहरत् ॥ २४ ॥ ॥ ॥ ॥

दोषाश्चित्तदोषा भाग्यदोषाश्च रिपुप्रभृतयो गर्भीतानां जीवन्निष्ठा मानंदानां कथं ज्ञानिनि संभव इत्याशंक्य सर्वेषामानंदानां ज्ञानिनावगतब्र
इत्याह यमा ह्माशतातः संभवति ननु सार्वभौमश्रोत्रिययोर्विषयप्राप्तिसाम्याभावात् कथमानंदसाम्यमित्याशंक्य नैरपेक्ष्यसाम्यात्तृप्तिसाम्य
नंदे २ मित्याह मर्त्यभोगेति तृप्तिसाम्ये हेतुमाह भोगादिति विवेकत इत्युक्तमर्थं विवृणोति श्रोत्रियत्वादिति विषयदोषाः कस्यां शाखायां
केन निरूपिताः इत्याशंक्य बृहद्रथेन मैत्रायणीयशाखायां निरूपिता इ
त्याह राजा बृहद्रथेति २४

देहेति विवेकिनः कामानुदये दृष्टांतमाह शुनेति २५ सार्वभौमाच्छ्रोत्रियस्याधिक्यमाह निष्कामत्व इति २६ नोभयमिति सार्वभौ
मत्वसाधनसाध्यं पश्चात्तन्नाशभीतिश्चेति दोषद्वयवत्वाच्छ्रोत्रिये तु तदुभयाभावादाधिक्यमित्यर्थः श्रोत्रियस्याधिक्यांतरमाह गं
धर्वानंदेति २७ इदानीं गंधर्वानंदद्वैविध्यं दर्शयितुं श्लोकद्वयेन गंधर्वभेदमाह अस्मिन्निति २८ २९ चिरलोकपित्रानंदप्रदर्श

देहदोषाश्चित्तदोषा भोग्यदोषा अनेकशः ॥ शुना वान्ते पायसे नो कामस्तद्वद्विवेकिनः ॥२५॥ निष्कामत्वे समे राज्ञः साध्य
साधनसंचये दुःखमासीद्भाविनाशादिति भीरनुवर्त्तते ॥२६॥ नोभयं श्रोत्रियस्यातस्तदानंदोधिकोन्यतः ॥ गंधर्वानंद आ
शास्ति राज्ञो नास्ति विवेकिनः ॥२७॥ अस्मिन्कल्पे मनुष्यः सन्पुण्यपाकविशेषतः ॥ गंधर्वत्वं समापन्नो मर्त्यगंधर्व ऽ
च्यते ॥२८॥ पूर्वकल्पे कृतात्पुण्यात्कल्पादावेव चेद्भवेत् ॥ गंधर्वत्वं तादृशोत्र देवगंधर्व उच्यते ॥ अग्निष्वात्तादयो लो
के पितरश्चिरवासिनः ॥ कल्पादावेव देवत्वं गता आजानदेवता ॥३०॥ अस्मिन्कल्पे स्वमेधादिकर्म कृत्वा महत्पदं ॥
अवाप्याजानदेवैर्याः पूज्यास्ताः कर्मदेवता ॥३१॥ यमाग्निमुख्या देवाः स्युर्ज्ञाताविंद्रबृहस्पती ॥ प्रजापतिर्विराट्
प्रोक्तो ब्रह्मा सूत्रात्मनामकः ॥३२॥ सार्वभौमादिसूत्रांता उत्तरोत्तरकामिनः ॥ अवाङ्मनसगम्योयमात्मानंदस्ततः
परः ॥३३॥

नाय चिरलोकपितृत्वमाह अग्निष्वात्तादय इति देवानंदद्वैविध्यज्ञानाय देवभेदमाह कल्पादाविति सार्द्धद्वयेन ॥ ३० ॥ ३१ ॥ इंद्रबृहस्पतीप्र
सिद्धावित्यर्थः ३२ सार्वभौमादिसूत्रांतानां श्रोत्रियान्न्यूनत्वद्योतनायाह सार्वभौमादीति एभ्यः सर्वेभ्योधिकमानंदमाह अवाङ्म
नसेति यतोयमानंद अवाङ्मनसगम्य अत एभ्यः सर्वेभ्योधिक इत्यर्थः ॥ ३३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इदानीमेषां सर्वेषामानंदाः श्रोत्रियेविद्यंते तस्य तेषुनिस्पृहत्वादित्याह ॥ तैस्तैरिति २४ उपपादितमर्थमुपसंहरति सर्वेति ॥ इदानीं प्र
द्वांतरमाह यद्वेति यथा स्वदेहे आनंदाकारबुद्धिसाक्षित्वेनानंदित्वमितरेष्वपि देहेषु तद्वदित्यर्थः २५ नन्वुक्तप्रकारेण तस्यापि सर्वा
नंदप्राप्तिरस्तीत्याशंक्य सर्वेषु सर्वबुद्धिसाक्षित्वमपीति ज्ञानाज्ञानाभ्यां वैषम्यमित्याह अज्ञस्येति उक्तार्थे तैत्तिरीयश्रुतिं प्रमाणयति योवेदेति

तैस्तैः काम्येषु सर्वेषु सुखेषु श्रोत्रियो यतः ॥ निस्पृहस्तेन सर्वेषामानंदाः संति तस्य ते ॥ २४ ॥ सर्वकामाप्तिरेषोक्ता
यद्वा साक्षिचिदात्मना ॥ स्वदेहवत्सर्वदेहेष्वपि भोगानवेक्षते ॥ २५ ॥ अज्ञस्याप्येतदस्त्येव न तु तृप्तिरबोधतः ॥ यो
वेद सोऽश्नुते सर्वान्कामानित्यब्रवीच्छ्रुतिः ॥ २६ ॥ यद्वा सर्वात्मतां स्वस्य साम्ना गायति सर्वदा ॥ अहमन्नं तथान्ना
दश्चेति साम ह्यधीयते ॥ २७ ॥ दुःखाभावश्च कामाप्तिः समे ह्येवं निरूप्यते ॥ कृतकृत्यत्वमन्यच्च प्राप्यत्वमीदा
ता ॥ २८ ॥ उभयं तृप्तिदीपे हि सम्यगस्माभिरीरितं ॥ त एवात्रानुसंधेयाः श्लोका बुद्धिविशुद्धये ॥ २९ ॥ ऐहिकामुष्मि
कव्रातासिद्धौ मुक्तेः स्वसिद्धये ॥ बहुलत्वपुरोस्योक्तं तत्र सर्वं प्रधानतः ॥ ४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

गुहायां विवृतं तत्र यो वेद सोऽश्नुत इति योजना २६ इदानीं तृतीयप्रकारमाह यद्वा सर्वात्मतामिति इमांल्लोकान्कामान्नी कामरू
प्यत्व[illegible]संचरन्नित्यादिनेत्यर्थः २७ प्रतीतमर्थमनेन सिद्धमर्थं संक्षिप्याह दुःखाभाव इति उभयमिति कृतकृत्यत्व
त्वं प्राप्तप्राप्यत्वमुभयं तृप्तिदीपे द्रष्टव्यं ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रादि

तदेतत्कृत्यशेषत्वं प्रतियोगिपुरःसरं ॥ अनुसंदधदेवायमेवं तृप्यति नित्यशः ॥४१॥ दुःखिनोऽज्ञाः संसरंतु कामं पुत्राद्यपेक्षया ॥ पर
मानंदपूर्णोऽहं संसरामि किमिष्टया ॥४२॥ अनुतिष्ठंतु कर्माणि परलोकयियासवः ॥ सर्वलोकात्मकः कस्मादनुतिष्ठामि किं क
थं ॥४३॥ व्याचक्षतां ते शास्त्राणि वेदानध्यापयंतु वा ॥ येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः ॥४४॥ निद्राभिक्षे स्नानशौचे ने
च्छामि न करोमि च ॥ द्रष्टारश्चेत्कल्पयंति किं मे स्यादन्यकल्पनात् ॥४५॥ गुंजापुंजादि दह्येत नान्यारोपितवह्निना ॥ ना
न्यारोपितसंसारधर्मानेवमहं भजे ॥४६॥ शृण्वंत्वज्ञाततत्वास्ते जानन्कस्माच्छृणोम्यहं ॥ मन्यंतां संशयापन्ना न म
न्येहमसंशयः ॥४७॥ विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्यये ॥ देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहं ॥४८॥ अहं मनु
ष्य इत्यादिव्यवहारो विनाप्यमुं ॥ विपर्यासं चिराभ्यस्तवासनातोऽवकल्पते ॥४९॥ आरब्धे कर्मणि क्षीणे व्यवहारो निव
र्तते ॥ कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः ॥५०॥ विरलत्वं व्यवहृतेरिष्टं चेद्ध्यानमस्तु ते ॥ अबाधिकां व्यवहृतिं पश्य
न्ध्यायाम्यहं कुतः ॥५१॥ विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम ॥ विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ॥५२॥
नित्यानुभवरूपस्य को मेऽत्रानुभवः पृथक् ॥ कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः ॥५३॥ व्यवहारो लौकिको वा शास्त्री
यो वान्यथापि वा ॥ ममाकर्तुरलेपस्य यथारब्धं प्रवर्त्ततां ॥५४॥ अथवा कृतकृत्योऽपि लोकानुग्रहकाम्यया ॥ शास्त्रीयेणै
व मार्गेण वर्त्तेय का मम क्षतिः ॥५५॥ देवार्चनस्नानशौचभिक्षादौ वर्त्ततां वपुः ॥ तारं जपतु वाक्तद्वत्पठत्वाम्नाय
मस्तकं ॥५६॥ विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानंदे विलीयतां ॥ साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये ॥५७॥ ॥

इममध्यायार्थमुपसंहरति ब्रह्मानंदेति ६५ इति विद्यानंदो नाम चतुर्थोध्यायः पंचमाध्यायस्य प्रतिपाद्यमर्थमाह
अथेति विषयानंदस्य लौकिकत्वान्मोक्षशास्त्रे निरूपणमनुपपन्नमित्याशंक्य तस्य लौकिकप्रसिद्धत्वेपि ब्रह्मानंदैकदेशत्वेन ब्र

कृतकृत्यतयातृप्तः प्राप्तप्राप्यतयापुनः तृप्यन्नेवं स्वमनसा मन्यतेसौ निरंतरं ५८ धन्योहं धन्योहं नित्यं स्वात्मान
मंजसा वेद्मि धन्योहं धन्योहं ब्रह्मानंदो विभाति मे स्पष्टं ५९ धन्योहं धन्योहं दुःखं सांसारिकं न वीक्षेद्य व धन्योहं
धन्योहं स्वस्याज्ञानं पलायितं क्वापि ६० धन्योहं धन्योहं कर्त्तव्यं मे न विद्यते किंचित् धन्योहं धन्योहं प्राप्तव्यं
सर्वमद्य संपन्नं ६१ धन्योहं धन्योहं तृप्तेर्मे कोपमा भवेल्लोके धन्योहं धन्योहं धन्यो धन्यः पुनः पुनर्धन्यः
६२ अहो पुण्यमहो पुण्यं फलितं फलितं दृढं अस्य पुण्यस्य संपत्तेरहो वयमहो वयं ६३ अहो शास्त्रमहोशा
स्त्रमहो गुरुरहो गुरुः अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखं ६४ ब्रह्मानंदाभिधे ग्रंथे चतुर्थोध्याय ईरि
तः विद्यानंदस्तदुत्पत्तिपर्यंतोभ्यास इष्यतां ६५ इति विद्यानंदो नाम चतुर्थोध्यायः अथात्र विषयानं
दो ब्रह्मानंदांशरूपभाक् निरूप्यते द्वारभूतस्तदंशत्वं श्रुतिर्जगौ १ एषोस्य परमानंदो योखंडैकर
सात्मकः अन्यानि भूतान्येतस्य मात्रामेवोपभुंजते २

ह्मज्ञानोपयोगित्वाद्वक्तुमित्याह द्वारभूत इति ब्रह्मानंदैकदेशत्वे किं प्रमाणमित्याशंक्याह तदंशत्वमिति १ तामेव श्रुति
मर्थतः पठति २

इदानीं विषयानंदस्य ब्रह्मानंदांशत्वप्रदर्शनाय तदुपाधिभूतांतःकरणवृत्तिर्विभज्यते ॥ शांतेति शांताः सात्विक्यो वृत्तयः घोरा राजस्यः मूढास्तामस्यः ता एव शांतादिवृत्तीर्दर्शयति वैराग्यमिति सार्द्धेन २ ४ उदाहृतासु त्रिविधासु चित्तवृत्तिषु ब्रह्मणश्चिद्रूपत्वं प्रतिभातीत्याह ॥ वृत्तिष्विति ॥ शांतासु विशेषमाह ॥ शांतास्विति चशब्द उक्तविषयसमुच्चयार्थः ॥५ उक्तार्थे श्रुतिवा

शांता घोरास्तथा मूढा मनसो वृत्तयस्त्रिधा ॥ वैराग्यं क्षांतिरौदार्यमित्याद्याः शांतवृत्तयः ॥ २ ॥ तृष्णा स्नेहो रागलोभावित्याद्या घोरवृत्तयः ॥ संमोहो भयमित्याद्याः कथिता मूढवृत्तयः ॥ ४ ॥ वृत्तिष्वेतासु सर्वासु ब्रह्मणश्चित्स्वभावता ॥ प्रतिबिंबति शांतासु सुखं च प्रतिबिंबति ॥ ५ ॥ रूपं रूपं बभूवासौ प्रतिरूप इति श्रुतिः ॥ उपमा सूर्यकेत्यादि सूत्रयामास सूत्रकृत ॥ ६ ॥ एक एव तु भूतात्मा भूते भूते व्यवस्थितः ॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत् ॥ ७ ॥ जले प्रविष्टश्चंद्रोयमस्पष्टः कलुषे जले ॥ विस्पष्टो निर्मले तद्वद्द्वेधा ब्रह्मापि वृत्तिषु ॥ ८ ॥ घोरमूढासु मालिन्यात्सुखांशस्य तिरोहितिः ॥ ईषन्नैर्मल्यतस्तत्र चिदंशः प्रति ॥ २

कर्ममर्थितः पठति ॥ रूपमिति ॥ तत्रैव व्यासस्तत्रैकदेशं पठति उपमेत्यादि ॥ अत एवेति सूत्रस्य पर्वभागः ॥ ६ ॥ स्वरूपेणैकस्योपाधिसंबंधान्नानात्वे श्रुतिं पठति एक इत्यादि ॥ ननु निरवयवस्य ब्रह्मणः क्वचिच्चिन्मात्रभानमितरत्र चिदानंदभानमित्येवं विभागकरणमनुपपन्नमित्याशंक्य चंद्रदृष्टांतेन परिहरति जलइति ७ तदेवोपपादयति घोरेति ८ ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु चंद्रोपाधेरुदकस्य द्वैविध्यादंशमात्रमुपपन्नं प्रकृते तूपाधिभूतस्यांतःकरणस्यैकत्वादेकांशमात्रमनुपपन्नमित्याशंक्य दृष्टां
तांतरमाह॥ यद्वेति॥ इदानीं शांतासु वृत्तिषु चिदानंदयोः प्रतीतौ दृष्टांतरमाह॥ काष्ठे त्विति ११॥ ननु एवं व्यवस्था कुतः स्यादित्याशंक्याह॥
वस्तुस्वभावमिति तत्र किं नियामकमित्याशंक्याह॥ अनुभूत्यनुसारेणेति १२ अनुभूतिमेव दर्शयति न घोरास्विति घोरासु मूढासु

यद्वापि निर्मले नीरे वह्नेरौष्ण्यस्य संक्रमः॥ न प्रकाशस्य तद्वत्स्याच्चिन्मात्रोद्भूतिरत्र च॥ १०॥ का
ष्ठे त्वौष्ण्यप्रकाशौ द्वावुद्भवं गच्छतो यथा॥ शांतासु सुखचैतन्ये तथैवोद्भूतिमाप्नुतः॥ ११॥ व
स्तुस्वभावमाश्रित्य व्यवस्था तूभयोः समा॥ अनुभूत्यनुसारेण कल्प्यते हि नियामकं॥ १२॥ न
घोरासु न मूढासु सुखानुभव ईक्ष्यते॥ शांतास्वपि क्वचित्कोऽपि सुखातिशय ईक्ष्यतां॥ १३॥ गृ
हक्षेत्रादिविषये यदा कामो भवेत्तदा॥ राजसस्यास्य कामस्य घोरत्वात्तत्र नो सुखं॥ १४॥ सि
द्ध्येन्न वेत्यस्ति दुःखमसिद्धौ तद्विवर्द्धते॥ प्रतिबंधे भवेत्क्रोधो द्वेषो वा प्रतिबंधकः॥ १५॥

न सुखप्रकाशोऽस्ति सोऽपि क्वाचित्कः क्वचित्सुखातिशयो भवतीत्याह॥ शांतेति॥ १३॥ उक्तं घोरमूढवृत्तिषु सुखाभावमेवाभिनीय
दर्शयति गृह क्षेत्रादि विषये इति काल दुःखस्य सत्वादित्यर्थः॥ सुखासिद्धौ दुःखं वर्द्धते सुखस्य प्रतिबंधे क्रोधो भवति सु
खाभावे कारणांतरमाह द्वेषो वेति १५॥ ॥ ॥ ॥ ॥ ॥

परिहारस्याशक्यत्वे विवादोऽनवतितस्यापि तामसत्वान्न तत्र सुखमित्याह ॥ अशक्यस्येत्यप्रतीकारो विषादः स्यात्स तामसः ॥
क्रोधादिषु महद्दुःखं सुखशङ्कापि दूरतः ॥१६॥ काम्यलाभे हर्षवृत्तिः शांता तत्र महत्सुखं ॥ भोगे महत्तरं लाभप्रसक्तावी-
षदेव हि ॥१७॥ महत्तमं विरक्तौ तु विद्यानंदे उदीरितम् ॥ एवं क्षांतौ तथौदार्ये क्रोधलोभनिवारणात् ॥१८॥ यद्यत्सुखं भ-
वेत्तत्तद्ब्रह्मैव प्रतिबिंबनात् क्रोधादिष्वित्यादयः स्पष्टार्थाः ॥ एवं क्षांत्यादीनां स्विद्धमित्याह ॥ वृत्तिष्वंतर्मुखास्वस्या निर्वि-
घ्नं प्रतिबिंबनमिति ॥१९॥ इदानीं सर्वत्र ब्रह्मस्वरूपानुवृत्तिप्रदर्शनाय तत्स्वरूपं स्मारयति ॥ सत्ता चितिः सुखं चेति स्वभा-
वा ब्रह्मणस्त्रयः ॥ मृच्छिलादिषु सत्तैव व्यज्यते नेतरद्वयम् ॥२०॥ सत्ता चितिर्द्वयं व्यक्तं धीवृत्त्योर्घोरमूढयोः ॥ शांतवृ-
त्तौ त्रयं व्यक्तमिति ॥ मृच्छिलादिषु सत्तामात्रमिति अर्थः ॥ घोरमूढयोः सत्ताचिती द्वे शांतवृत्तौ सच्चिदानंदास्त्र-
योऽपि व्यक्ताः ॥ एवं सप्रपंचब्रह्माभिहितमित्याह ॥ मिश्रं ब्रह्मैवमीरितमिति ॥२१॥ अमिश्रं कुतो ज्ञायत इत्या-
क्याह ॥ अमिश्रं ज्ञानयोगाभ्यां तौ च पूर्वमुदाहृता ॥ विति तौ च ज्ञानयोगौ पूर्वमेवोक्तावित्यर्थः ॥ कुत्रोक्ता-
वित्याशंक्य तत्र योगः प्रथमाध्याय उक्त इत्याह ॥ आद्याध्याये योगचिंतेति समनंतराध्याययोर्ज्ञानमुक्त-
मित्याह ॥ ज्ञानमध्याययोर्द्वयोरिति ॥२२॥ ननु सच्चिदानंदानां ब्रह्मरूपत्वे मायायाः किंरूपमित्याशंक्याह ॥ ॥

आद्या ध्याये योगश्चिंतेति समनंतराध्याययोर्ज्ञानमुक्तमित्याह ज्ञानमध्याययोर्द्वयोरिति २२ मनुसच्चिदानंदात्मा ब्रह्म
रूपत्वे मायायाः किंरूपमित्याशंक्याह असत्ताजाड्यदुःखे द्वे मायारूपं त्रयं त्विदम् असत्ता नरशृंगादौ जाड्यं काष्ठशिलादि
ति नरशृंगादावसत्वमच्छिलादिषु जाड्यमिति विवेकः दुःखं कुत्रेत्याशंक्याह घोरमूढधियो दुःखमिति एवं सर्वत्र मा
याप्रतिभासतरत्याह एवं मायाविजृंभितेति शांत्यादिवृत्तिषु ब्रह्मणो भिन्नत्वे किंकारणमित्यत आह शांतासु जडकुड्ये
क्या निश्चं ब्रह्मेति कीर्तितमिति एतदभिधानं किमर्थमित्याशंक्य ब्रह्मध्यानार्थमित्याह एवं स्थिते त्रयेब्रह्मध्यानमभि
च्छेत्तु मानसो रति नरशृंगादिमुपेक्ष्यान्यत्र ब्रह्मध्यानं कर्तव्यमित्याह एवं स्थिते त्रयेब्रह्मध्यानमभिच्छेत्तु मानसो रति
नरशृंगादिमुपेक्ष्यान्यत्र ब्रह्मध्यानं कर्तव्यमित्याह नरशृंगादिमुपेक्ष्येतरा शिवं ध्यायेद्यथा तथा अन्यत्र त्वत्र तं कुत्र कथं
ध्येयमित्यत आह शिलादौ नामरूपे द्वे त्यक्त्वा सन्मात्रचिंतनमिति घोरमूढबुद्धिषु दुःखं परित्यज्य सच्चिद्रूपयोश्चिंतनं
कर्तव्यमित्याह शांतासु सच्चिदानंदांस्त्रीनप्येवं विचिंतयेदिति एतद्ध्यानानां किं साध्यमित्यत आह कनिष्ठमध्यमोत्कृ
ष्टास्तिस्रश्चिंताः क्रमादिमाः तदानीं निर्गुणब्रह्मध्यानेऽनधिकारिणोऽनुग्राह्यमित्यत्र ब्रह्मध्यानेऽधिकार इत्याह मंद
स्य व्यवहारेऽपि मिश्रब्रह्मणि चिंतनं उत्कृष्टं वक्तुमेवात्र विषयानंद ईरित इति २८ एवं सवृत्तिकध्यानत्रयमु
क्त्वा अवृत्तिकमाह औदासीन्ये तु धीवृत्तेः शै— ल्यादुत्तममोत्तमं अखंडसच्चिदानंद इति एतद्ध्यानेभ्योऽधिकमित्यर्थः
उक्तं निगमयति ध्यानमुक्तं चतुर्विधमिति २९ अयं ज्ञानतरध्यानानां भेदः किमित्याह न ध्यानं ज्ञानयोगाभ्यामिति तर्हि

अस्याविद्यात्वे हेतुमाह विद्यायामिति २१ भेदकोपाधिवर्जनादित्युक्तं तानेव भेदकोपाधीनाह शांता इति तत आपाद्यं
त्वारः केनोपायेनेत्याशंक्याह योगादिति २२ फलितमाह निरुपाधीति त्रिपुटीनाशाद्भूमानंदोऽयमित्युच्यत इत्य
र्थः २३ ग्रंथमुपसंहरति ब्रह्मानंदेति २४ प्रियादिति २५

विद्यायां सच्चिदानंदा अखंडैकरसात्मतां । प्राप्य भांति न भेदेन भेदकोपाधिवर्जनात् २१ शांता घोरा
स्तथा मूढा उपाधयो मताः । योगाद्विवेकतो वैषामुपाधीनामपाकृते २२ निरुपाधिब्रह्मतत्त्वे भा
ते स्वयंप्रभे । अद्वैते त्रिपुटी नास्ति भूमानंदोऽयमुच्यते २३ ब्रह्मानंदाभिधे ग्रंथे पंचमोऽध्याय ईरि
तः । विषयानंदद्वारेणात्र प्रविश्यतां २४ प्रियाद्धरिहरोऽनेन ब्रह्मानंदेन सर्वदा । पायाच्च प्रा
णिनः सर्वान्स्वाश्रितान्शुद्धमानसान् २५ इति श्रीविद्यारण्यभारतीतीर्थकृतौ ब्रह्मानंदे पंचमोऽध्यायः

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनीश्वरकिंकरेण रामकृष्णाख्यविदुषा विरचि
तमुपदेशग्रंथविवरणं संपूर्णं समाप्तं संवत् १८२५ समयाश्वावदि ११ चंद्रदिने लिखितं पंचदशीपुस्तकं

घा२


PANJAB UNIVERSITY
LIBRARY





